A.C. Joshi Library
P.U. Chandigarh

MSS No. 347 Subject Philosophy

Name of MSS मानवधर्म शास्त्र

Author

Period Folios 182

Script Devnagiri Source Brithipal Singh

Missing Folios NIL

347

...वतनवृ...
...वा. विजातीय...
...वकत्वेदर्थिनम् यव...
...दिवनो [illegible] त्वृत्तवशाः क्रमे...तकर्मतदत्तुनामधेयमिश्रा [illegible]
...नस्माद्रूपोत्स्य [illegible] मध्याहार्थे यत्तब्रह्महत्यादिरूपार्थमंकीर्तन...
...मर्वस्यविधानस्य स्वयंभुवः प्रवित्यस्याप्रमेयस्यकार्यंतत्व...
...धानतयागम्यत्वेहेतुमाह तमेकइत्यादिहिशब्दोहेतौ यस्मात्तमेकोऽद्वितीय...
...योयतेऽनेन कस्मादप्यग्निहोत्रादीनीतिविधानवेदस्तस्य स्वयंभुवाः पौरुषेयः...
...स्य अप्रमेयस्यमीमांसादिन्यायनिरपेक्षतयाऽनवगम्यमानप्रमेयस्यकार्यम्...
...वेदानेवयम् तदेवार्थःप्रतिपाद्यभागमन्वेतीति कार्यतत्त्वार्थवित् मेयातिथिर...
...वेतीतिकार्यंतत्त्वार्थविदितिव्याचष्टे तत्रवेदानांब्रह्मण्यपिप्रामाण्याभ्युपगम...
...मितौजामहात्मभिः प्रत्युवाचार्च्यतान्सर्वान्महर्षीञ्छ्रूयतामिति ४
...मनुर्महर्षयीयथातित्रकारणमेकैकेनतस्माद... [illegible] ...भ्रष्टार्थ... ...वत... ...मकयथात

A. no. 347

मं· नुः·
वृ·टि· 1

ॐ नमो भगवते वासुदेवाय ॥ ॐ गौडीनंदनवासिनाम्नि सुजनैर्वंद्ये वरेन्द्र्यां कुले श्रीमद्भट्टदिवाकरस्य तनयः कुल्लूकभट्टः काश्यामुत्त
रवाहिजह्नुतनयातीरे समं पण्डितैस्तेनेयं क्रियते हिताय विदुषां मन्वर्थमुक्तावली १ सर्वज्ञस्य मनोरसर्वविदसियहास्य
ये ग्रंथा बहुभिर्यतो मुनिवरैरत्र ह्रवाः ह्रतम् तां व्याख्यामधुनातनैरपि कृतां तां याञ्छ वाणस्य मे भक्त्या मानव वाञ्छदेर्भूयाद
शेषेश्वरः २ मीमांसे बहु सेविता मिसुहृदस्तर्काः समस्ताः स्मृत्तैवेदान्ताः परमात्मबोधगुरवो धूयं मया पासिताः अग्रणीनि
वाल्मीकिनागुम्फाभिरभ्यर्थये प्राञ्जसर्थ समयो मनूक्तविहतो साहाय्यमालम्ब्यताम् ३ द्वेषादिदोषरहितस्य सतां प्रवर्षा
नत्वकथयतो यममेवादयनस्य देवाद्यदिक्वचिदिह स्वलनेन तथापि निस्तारको भवतु मे जगदन्तरात्मा ४ मान्यैर्या नया
व्याख्यानवामयोल्लिखा । प्राचीना अपि किंचिरा व्याख्यानृणामशेषाणाम् ५ ॥

ॐ श्रीगणेशाय नमः ॐ मनुमेकाग्रमासीनमभिगम्य महर्षयः प्रतिपूज्य यथान्याय…
तम… ॥

मनुमेकाग्रमासीनमित्यादि अत्र महर्षीणां यम्ति… …नापिमनरदान… [illegible]
स्वहस्तप्रश्नानि विषयसंबंधप्रयोजनानामु… …तिपाद्य
प्रतिपादकलक्षणः संबंधः ॥ प्रमाणान्तराम… …स्वर्गापव
र्गादि तस्य च धर्मस्याभिधानात् … प्रत्यपगम… …रतः सदे
ति· मनुः कालादितिरूपेण सोपि यस्मादेव प… …स्. मोदाय
ज्ञेयावबाधिक्षितस्यात्… तस्यापि यस्मात्… …तामविगी
तमहाजनपरिगृहीत प्रस्पष्टाच्च वे… …दृश्जनेष
जनाया इति बृहस्पतिरप्याह वेदा… …ख्यातानि।
प्रामेनतंकैर्व्याकरणमिव धर्म… …विस्तर प्रश्ना
सिद्धपि निवन्धनिर्हतव्यानि ह… …अनाबवदति
प्राह्लं मीमांसया पदेश्यत्वेदप्रामाणी… …पश्च द्वितीयश्लो
…वाक्यस्य… अन्वेति… …सावधेयत्वाद्वि

1-A

347

सम्प्रदायमनुस्मृतेः प्रादुर्भूतत्वात् तदभिधानस्य मंगलातिशयत्वात् वक्ष्यति हि एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिमिति विषयान्तरा व्यासक्तिविमुखमासीनं सोपायधर्मेष्टं इदं शास्त्रं महर्षिप्रश्नोत्तरदानयोग्यत्वात् अभिगम्य अभिमुखं गत्वा महर्षयो महान्तश्च ते ऋषयश्चेति तथा प्रतिपूज्य पूजयित्वा यद्वा मनुना आकृतेति प्रतिशब्दाद् ज्ञायते यथान्यायं येन न्यायेन विधानेन प्रश्नः कर्तुं युज्यते शास्त्रेति भक्तिश्रद्धा निरवधानादिना वक्ष्यति च नापृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छत इति अभिगम्य प्रतिपूज्य अब्रुवन्निति क्रियाद्वयेऽपि मनुमित्येवं कर्म अनुवर्तिष्यमाणकथितकर्मता ब्रुविधातोर्द्विकर्मकत्वात् १ ॥

भगवन्सर्ववर्णानां यथावदनुपूर्वशः। अन्तरप्रभवानां च धर्मान्नो वक्तुमर्हसि २ ॥

किमब्रुवन्नित्यपेक्षायामाह भगवन्नित्या दि ऐश्वर्यादीनां भगशब्दो वाचकः तदुक्तं विष्णुपुराणे ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा म तद्वत्त्वमस्त्यर्थत्वेन भगवन्निति वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राः सर्वे च ते वर्णाश्चेति सर्ववर्णाः तेषामन्तरप्रभवाणां संकीर्णजातीनां चा पि अनुलोमप्रतिलोमजातानां अम्बष्ठक्षत्तृकरणप्रभृतीनां तेषां विजातीयमैथुनसंभवत्वेन त्वन्तरालीयसम्यक्संज्ञाताः पृथगन्तरजाता न्तरत्वाद्वर्णग्रहणेनाग्रहणात्पृथक्प्रश्नः एतेनास्य सर्वोपकारकत्वं दर्शितम् यथा यो धर्मो यस्य वर्णस्य येन प्रकारेणानुष्ठेयस्तेन प्रकारेणान्तरप्रभवा नामपि प्रश्नः अनुपूर्वशः क्रमेण जातकर्मतदनन्तरनामधेयप्रभृतीन् धर्मान्नोऽस्मभ्यं वक्तुमर्हसि सर्वधर्माभिधाने योग्यो भवसि तस्माद् ... यत्तु ब्रह्महत्यादिरूपाधर्मकीर्तनं तत्प्रायश्चित्तविधिरूपधर्मविषयत्वेन नग्र

त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः। अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो ३ ॥ तेसमया ४ ॥

सकलधर्माभिधानयोग्यत्वे हेतुमाह त्वमेक इत्यादि हि यस्माद्धेतौ यस्मात्त्वमेकोऽद्वितीयः अस्य सर्वस्य स्वयंभुवो ब्रह्मणोऽपौरुषेयस्य वेद विधानस्य विधीयतेऽनेन कर्माण्यग्निहोत्रादीनीति विधानं वेदस्तस्य सर्वस्य ... अचिन्त्यस्य बहुशाखाविभिन्नत्वादियत्तया परिच्छेत्तुमशक्यस्य अप्रमेयस्य मीमांसादिन्यायनिरपेक्षतया अनवगम्यमानप्रमेयस्य कार्यतत्त्वार्थं मीमांसादि तत्त्वबुद्ध्या सर्वेषां न मनेन ... तत्त्वार्थः प्रतिपाद्यमनगम्यत इति कार्यतत्त्वार्थवित् ... मीमांसा वा ... वेदस्य ... तत्त्वार्थं विदितवान् तत्र वेदानां ... प्रमाणमभ्युपगमात् ... यथार्थ मतेः ... अमितौजा महात्मभिः प्रत्युवाचार्च्य तान्सर्वान्महर्षीञ्छ्रूयतामिति ४ व्यवस्थापनसमर्थत्वात् ... यथा ... यथार्थमधिगम्यतीत्यादि ... प्रकारेण ... न्यायेन ... प्रदाति ... सम्यक् यथात

मः
नु स्मृ
टी
२

ते इत्युवाच श्रूयतामित्युपक्रममत्रमितमपरिच्छेद्यमोजः सामर्थ्यं ज्ञानं तन्नाभिधानादौ यस्य मनस्तथाऽत्र तत एव सर्वज्ञः सर्वशक्तिर्यो महर्षी
णामपि श्रुतिविषयः महात्मभिर्महस्वभावैः आर्चपूजयित्वा अत एव सर्वस्यार्चितेत्यर्चितत्वेन रूपमिदं धर्मस्याभिधानमपि पूजनपूर्वः सर्वमेव कर्त
व्यमित्यनेन फलितम् ननु मनुप्रणीतत्वे सत्यस्य शास्त्रस्य महर्षिः प्रत्युवाचेति नुपपन्नं अहं प्रोक्तवानिति प्रयुज्यते अन्यप्रणीतत्वेन च कथं मा
नवीयं संहितेति उच्यते प्रायेण वार्त्तानामियं शैलीयत्स्वाभिप्रायमपि परोपदेशमिव वर्णयन्ति अत एव कर्माण्यपि जैमिनिः फलार्थत्वा
दिति जैमिनिरेव सूत्रयत एव तदुपर्युपरि बादरायणः संभवादिति बादरायणस्यैव स्वाभिप्रायं कथयति अथवा मनुप्रदिष्टार्थ मनुशिष्य भृगु
णा प्रणीतत्वादनेन निबद्धः अत एव वक्ष्यति एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः इत्यतो युज्यते एव महर्षिः प्रत्युवाचेति मनुप्रदि
ष्टधर्मोपनिबद्धत्वाच्च मानवीयं संहितेति व्यपदेशः ४ ॥ आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ ५ ॥

श्रूयतामित्युपदिष्टमर्थमाह आसीदिदमिति नन्वनेनानन्यमर्थविषयप्रश्नेऽनैर्वचनात्तु भवितेत्तकोऽयमसंलग्नता

प्रलयदशायाः कारणे लीनस्य जगतः सृष्टिप्रकरणं तत्र अत्रेमेधातिथिः महादये ... महाप्रयोजनं तत्र मनने न सर्वं प्रतिपाद्यते
अस्यायास्याः अपर्यन्तः संसारगतेः धर्मस्याप्रमेयानि ... प्रतिपाद्यते तमसा वहुरूपेणावृष्टेतत्कामदेवेनेति वहूनि वचनानि अद्या
सम्जीवस्यगती स्वेनैव हेतुना प्रायेणा ... धर्मतत्त्वं ... न हि ... तत्र ... यस्य ... ज्ञायमानतया
प्रवृत्तिज्ञानार्थमिदम् ... महाप्रयोजनमेतद्ब्रह्मविद्यायां ... तेन गोविन्दराजस्यापीदमेव ... तत्र
नेयमस्वरूपप्रश्ने यद्यमस्य फलकीर्तनेनेतद्दर्शयन्ति धर्मान् ... किंवकर्माणि फलानि हेतिपर्मनस्तु महर्षि
भिः द्वादशो वद्यमाणास्ववक्ष्यमाणेन पृच्छ्यते इदेव वदामः मुनीनायमर्थविषयप्रश्ने जगत्कारणतया ब्रह्मप्रतिपादनेयमेकथनमेवेति
नाप्रस्तुताभिधानं आत्मज्ञानस्यापि धर्मस्य रूपत्वान्मनुनैव वक्ष्यति तमादमोऽस्ययोगवमिन्द्रियनिग्रहः धी विद्यासत्यमक्रोधो दशकं धर्मल
क्षणमिति दशविधधर्माभिधाने विद्याशब्दवाच्यम् आत्मज्ञानं धर्मत्वेनोक्तं महाभारतेऽपि आत्मज्ञानं ... धर्मः सायरणां नृप
आत्मज्ञानं परमं धर्मत्वेनोक्तं याज्ञवल्क्येनापि परमधर्मत्वेनोक्तं यदाह इज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयं तु परमो धर्मो यद्यो
गेनात्मदर्शनमिति जगत्कारणत्वेन च ब्रह्मलक्षणम् अत एव ब्रह्ममीमांसायाम् अथातो ब्रह्मजिज्ञासेति सूत्रानन्तरं ब्रह्मलक्षणकथना
य जन्माद्यस्य यत इति द्वितीयसूत्रं भगवान् बादरायणः प्रणिनाय अस्य जगतो यतो जन्मादि सृष्टिस्थितिप्रलयमिति सूत्रार्थः त
द्वक्ष्यति यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुत्या ...
उत्पत्तिस्थितिलयानि ... न ब्रह्मप्रतिपादनं आत्मज्ञानस्य ... प्रथमाध्याये क्रमात् संस्कारादि ...
दृगतयो ... वक्ष्यति ... कर्माद्विविधो ... वाक्यानामेव ... ध्येतव्यः

यद्येवं धर्ममनुपृष्टा जगतः कारणं तु वक्तव्यम् आत्मज्ञानं परं धर्मं विदितेति विज्ञप्तवान् अथात्मध्यायाध्याये प्रान्तेऽत एव कीर्त्तने धर्मोस्य
स्तत्तदेशमुखो वक्ष्यमाणतेतरं इदमित्यध्येतास्मवेद्यभासमानतया जगन्निर्दिश्यते इदं जगत्तमोभूतं तमसि स्थितं लीनमासीत् तमःशब्देन।
गुणवृत्त्या प्रकृतिर्निर्दिश्यते तम इव तमः यथा तमसि लीनाः पदार्थाः अप्रत्यक्षेण न प्रकाश्यन्ते एवं प्रकृतिलीना अपि भावा नावगम्यन्त इ
ति गुणयोगः प्रलयकाले सूक्ष्मरूपतया प्रकृतौ लीनमासीदित्यर्थः तथा च श्रुतिः तम आसीत्तमसा गूढमग्र इति प्रकृतिरपि ब्रह्मा
त्मनाऽव्याकृतमासीत् अत एवाप्रज्ञातम् अप्रत्यक्षं सकलप्रमाणश्रेष्ठतया प्रत्यक्षगोचरः प्रज्ञात इत्युच्यते तन्न भवतीत्यप्रज्ञातम् अ।
लक्षणम् अननुमेयं लक्ष्यतेऽनेनेति लक्षणं लिङ्गं तदस्य नास्तीति अलक्षणम् अप्रतर्क्यं तर्कयितुमशक्यं तदानीं वाचकस्थूलशब्दा।
भावात् शब्दानामप्यविषयम् एतदेव प्रमाणत्रयं मतं केषांचिदाचार्याणां मनुनाभ्युपगतम् अत एवाविज्ञेयम् इत्थं प्रत्यक्षागोचरमिति यथा गो
चरस्यापि व्याख्यानं न वक्तव्यमासीदेवेति वाच्यं तदानीं श्रुतिसिद्धत्वात् तथा च श्रूयते तद्धेदं तर्ह्यव्याकृतमासीत् छान्दोग्योपनिषच्च सदेव सो
म्येदमग्र आसीत् इदं जगत्सदेवासीत् ब्रह्मात्मना आसीदित्यर्थः सच्छब्दो ब्रह्मवाचकः प्रसुप्तमिव सर्वतः स्वकार्याक्ष
ममित्यर्थः ५॥

ततः स्वयंभूर्भगवानव्यक्तो व्यंजयन्निदम् महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ६॥

अथ किमभूदित्याह ततः स्वयंभूर्भगवानित्यादि ततः प्रलयावसानानन्तरं स्वयंभूः परमात्मा स्वयं भवति स्वेच्छया गृहीतशरीरपरिग्रहं करोति न लिङ्ग
शरीरवत्कर्मायुतदेहः तथा च श्रुतिः स एकधा भवति त्रिधा भवतीति भगवान् ऐश्वर्यादिसंपन्नः अव्यक्तो बाह्यकरणागोचरः योगाभ्यासवशेन
इति यावत् इदं महाभूतादि आकाशादीनि महाभूतानि आदिग्रहणात् महदादीनि च व्यञ्जयन् अव्यक्तावस्थाप्रथमं स्थूलरूपेण प्रकाश
यन् वृत्तौजाः वृत्तमप्रतिहतमुच्यते अत एव सृष्टिसर्गतायेन प्रक्रमस्य प्रवृत्तिरप्रतिष्ठितेति व्याख्यातं तथादिव्येन वृत्तमप्रतिहतमोजः
सृष्टिसामर्थ्यं यस्य स तथा तमोनुदः प्रकृतिप्रेरकः तदुक्तं भगवद्गीतायां मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति प्रादुरासीत् प्रका
शितोऽभूत् तमोनुदः प्रलयावस्थाध्वंसक इति मेधातिथिगोविन्दराजौ ६॥

योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥७॥

योऽसाविति सर्वनाम्ना येन सकललोकवेदपुराणेतिहासादिप्रसिद्धः परमात्मा निर्दिश्यते अतीन्द्रियग्राह्यः इन्द्रियमतीत्य वर्त्तत इत्यतीन्द्रि
यं मनस्तद्ग्राह्य इत्यर्थः यदाहुर्व्यासः नैवासौ चक्षुषा ग्राह्यो न च शिष्टैरपीन्द्रियैः मनसा तु प्रसन्नेन गृह्यते सूक्ष्मदर्शिभिः सूक्ष्मो बहिरिन्द्रिया।
गोचरः अव्यक्तोऽभिव्यक्तिरहितः सनातनो नित्यः सर्वभूतमयः सर्वभूतात्मा अत एवाचिन्त्यः इयत्तया परिच्छेत्तुमशक्यः स एव स्वयं

3 म॰स॰ टी॰ मं॰ ३

उद्भवो महदादिकार्यस्वरूपतया प्रादुर्बभूव उक्तेर्वोभातिः प्रादुर्भाव विवर्तते यावत्तामनेकार्थत्वात् ७

सोभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः अप एव ससर्जादौ तासु बीजमवासृजत् ८ ॥

सोभिध्यायेति सपरमात्मा नानाविधाः प्रजाः सिसृक्षुरभिध्याय आपो जायन्तामित्यभिध्यानमात्रेण अप एव ससर्ज अभिध्यानपूर्विकात्सृष्टिर्वदा
तो मतः प्रकृतिरेवाचेतना स्वतः परिणामतः स्यापमव्ययानैरमतः किं तत्र मे वा व्याकृतत्वात् शक्यात्मनात्जगत्कारणमिति विद्वेद्वि वदन्तमिद्धान्तपट
भिमतः प्रतिभाति तथाव च्छांदोग्योपनिषत् तदैक्षत बहुस्यां प्रजायेयेति अत एव शारीरकसूत्रकृता व्यासेन सिद्धान्तितं ईक्षतेर्नाशब्दमिति इदं च
तेरीक्षणश्रवणात् न प्रधानात्जगत्कारणमशब्दत्वविधत्वेशब्दःश्रुतिर्यस्य तदशब्दमिति सूत्रार्थः स्वात्शरीरात् अव्याकृतरूपात् अव्याकृतमेव भ
गवज्ज्ञानस्य शरीरं वेदान्तदर्शने प्रकृतिस्तदेव च तस्य शरीरं अव्याकृतं शरीरं अव्याकृतशब्देनैव भूतबुद्धीन्द्रियकर्मेन्द्रियप्राणमनः कर्मविद्यावा
सनाएव सूक्ष्मरूपतया प्रागव्यात्मनास्थितास्त अभिधीयन्ते अव्याकृतस्य च ब्रह्मणा सह भेदाभेदस्वीकरणात् ब्रह्मादेव शक्त्यात्मना च ब्रह्म जगद्रूप
तया परिणमति द्वैतमभयमप्युपलब्धेः आदौ सकार्याणां पूर्वमुत्पाद्ये सृष्टेः प्राक अपां सृष्टिश्च ये महदहंकारतन्मात्रक्रमेणबोद्धव्या महाभूतादि
च्यजयति स्पृष्टौ अभिधायते अतः तन्मात्रेपि महदादिसृष्टेर्वक्ष्यमाणत्वात् तासु अप्सु बीजशक्तिरूपं आरोपितवान् ८ ॥

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् तस्मिन्जज्ञे स्वयम्ब्रह्मा सर्वलोकपितामहः ९ ॥

तदण्डमभवद्धैममिति तद्बीजं परमेश्वरेच्छया हैममण्डमभवत् हैममिव हैमं शुद्धिगुणयोगात् तदैहं मेमव तदीयैकशाकलेन भूमिनिर्माणस्य व
क्ष्यमाणत्वात् भूमिश्चाहैममतः सहस्रांशवादुपचारात् सूर्यो महस्रांशुरादित्यस्तत्तस्य प्रभेत स्मिन्नंडे हिरण्यगर्भो जातवान् येन स्वयं जन्मनि हिरण्य
गर्भोहमस्मीति भेदाभेदभावनया परमेश्वरोपासना कृता तदीयलिंगशरीरावच्छिन्नो मनुष्यविशेष स्वयं परमात्मैव हिरण्यगर्भरूपतया प्रा
दुर्भूतः सर्वलोकानां पितामहो जनकः सर्वलोकपितामह इतिवा तस्य नाम ९ ॥

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः १० ॥

इदानीमागमप्रसिद्धनारायणाख्यार्थनिर्वचनेन उक्तमेवार्थं द्रढयति आपो नारा इत्यादिना आपो नारा शब्देनोच्यन्ते तत्र च नारा शब्दस्याप्रसिद्धे
स्तदर्थमाह यतस्ता नाराख्याः परमात्मनः नरस्य सूनवः पुत्रा इतिवेदे इत्यण्प्रत्ययः प्राप्तस्तस्यापि छान्दसत्वात् लोपे अपि स्त्रीलिङ्गत्वाद्वा हारामवे
विद्यय ज्ञेदमविकल्प्यन्तरति यादिकोडाम्प्रत्ययस्तस्याभावचेसामामपलक्षणशान् दापिकृते नारा इति रूपसिद्धिः आपो ऽस्य परमा

3A

त्मनो ब्रह्मरूपेणावस्थितस्य पूर्वमयनमाश्रय इति सो नारायण इत्यागमेष्वाम्नातः गोविन्दराजेन त्वायोपनरा इति पठितं व्याख्यातं च नारायण।
इति शब्देऽस्मिन्नेषामपि दस्यत इति दीर्घेण नरायण इति रूपम् अयमेनापो नारायण इति पठन्तीति १० ॥

यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकं तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते ११ ॥

यत्तत्कारणमव्यक्तमित्यादि यत्तदिति सर्वनामभ्यां लोकवेदादिप्रसिद्धं परमात्मानं निर्दिशति कारणं सर्वोत्पत्तिमतां अव्यक्तं बहिरिन्द्रियागो
चरं नित्यमुत्पत्तिविनाशरहितं वेदान्तप्रसिद्धत्वात् सत्स्वभावं प्रत्यक्षाद्यगोचरत्वादसत्स्वभावमिव अथवा सद्भावजातमसद्भावस्तयोरात्मभूतम् ता
वच्छ्रुतिः ऐतदात्म्यमिदं सर्वमिति तद्विसृष्टस्तेनोत्पादितः स पुरुषः सर्वत्र ब्रह्मेति कीर्त्यते ११ ॥

तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरं स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा १२ ॥

तस्मिन्नण्डे स भगवानित्यादि तस्मिन्पूर्वोक्तेऽण्डे स ब्रह्मा वत्समाणब्रह्मणोऽनेन संवत्सरमुषित्वा स्थित्वा आत्मनैवाण्डं द्विधा भवत्विति आत्मगतध्यानमा
त्रेण तदण्डं द्विखण्डं कृतवान् १२ ॥

ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतं १३ ॥

ताभ्यां स शकलाभ्यां चेत्यादि शकले खण्डे ताभ्यामण्डशकलाभ्यामूर्ध्वेन दिवं स्वर्लोकमधरेण भूलोकं मध्ये व्योमाकाशं दिशश्चान्तरालदिशश्च
अष्टौ समुद्राख्यमपां स्थानं स्थिरं निर्मितवान् १३ ॥

उद्बबर्हात्मनश्चैव मनः सदसदात्मकं मनसश्चाप्यहंकारमभिमन्तारमीश्वरम् १४ ॥ इदानीं महदादिक्रमेणैव जगन्नि
र्माणमिति दर्शयितुं तत्सृष्टिमाह उद्बबर्हात्मनश्चैवेत्यादि स ब्रह्मा आत्मनः परमात्मनः सकाशात्तेन रूपेण मन उद्धृतवान् परमात्मन एव ब्रह्मस्वरूपे
णावस्थानात् परमात्मन एव च मनः सृष्टिर्वेदान्तेषु तेन तत्प्रधानात् तथा च श्रुतिः एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापश्च
पृथिवी विश्वस्य धारिणी न तत्प्रत्यक्षसिद्धत्वात् युगपज्ज्ञानानुत्पत्तिलिङ्गगम्यं मनः प्रत्यक्षत्वादसदिति मनसः पूर्वमहंकारं तत्सहमित्यभिमानाख्य
कार्यं युक्तं ईश्वरं स्वकार्यकरणसमर्थं १४

महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च १५ ॥

महान्तमेव चात्मानमित्यादि महान्तमिति महदभ्युत्पत्तेः अहंकारात्पूर्वं परमात्मन एव प्राकृतशक्तिरूपं सत्त्वसहितं उद्धृतवान् आत्मन उत्पन्न
त्वात् आत्मनः उत्पन्नत्वात् आत्मानमात्मोपकारकत्वादात्मायत्तसिद्धितां निर्दिश्य तेन तान्युत्पत्तिमन्ति सर्वाणि सुखदुःखमोहगुणयुक्तानि विष
याणां शब्दस्पर्शरूपरसगन्धानां ग्राहकाणि शनैः क्रमेण वेदान्तसिद्धेन श्रोत्रादीनि बुद्धीन्द्रियाणि पायूपस्थवाक्पाणिपादाख्यानि पञ्च बुद्धीन्द्रियाणि च ग्राह्यस्पर्शा
द्यादीनि कर्मेन्द्रियाणि ग्राह्यतन्मात्रादीनि च पञ्चोत्पादितवान् तदभिधानमेवैकत्र ... तत्सिद्धान्तमनारभिमत इति प्राग्

4

म॰ तं॰ से॰ स

कृतत्वमेव गच्छति इदानीं महदादिक्रमेण सृष्ट्यभिधानादेवं तद्दर्शनेन तु परमात्मन एवाकाशादिक्रमेण सृष्टिः कस्मात् तथा च तैत्तिरीयोपनिषत्
तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी इति उच्यते प्रकृतेर्महदादिक्रमेण सृष्टिरिति भगव
द्बादरायणीयदर्शनेऽप्युपपद्यते इति तद्विदां व्यवहारे तेऽव्याकृतमेव प्रकृतिरिष्यते तस्य च सृष्ट्युन्मुखत्वं सृष्ट्यादिकालयोगरूपं तदेव महत्तत्वं
ततो बहु स्यामिति अभिमानात्मकेन कालयोगित्वमव्याकृतस्याहंकारत्वं तत आकाशादिपंचभूतसूक्ष्माणि क्रमेणोत्पन्नानि पंचत
न्मात्राणि तेभ्य एव स्थूलान्युत्पन्नानि पंच महाभूतानि सूक्ष्मस्थूलक्रमेण कार्योदयदर्शनादिति न विरोधः अव्याकृतगुणेऽपि सत्व
रजस्तमसां साम्यावस्था निर्गुणानेऽप्युपपद्यते भवत्वेवा सत्वरजस्तमः समता रूपैव मूलप्रकृतिः भवतु च तन्नारायणेव महदहंकारतन्मात्राणि
तथापि प्रकृतिरेव सर्वेषामित्येतिमतेः स्वरसः य एव स्वतिः सर्वभूतेषु चात्मानं सर्वभूतानि तथा एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना समं भूतानां
मेतत्रष्टव्यमिति परस्परमिति ७५

तेषां त्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसां सन्निवेश्यात्ममात्रासु सर्वभूतानि निर्ममे १६ ॥

तेषां त्ववयवान्सूक्ष्मानित्यादि तेषां षण्णां पूर्वोक्ताहंकारस्य तन्मात्राणां च ये सूक्ष्मा अवयवास्तान् आत्ममात्रासु षण्णां स्वविकारेषु योजयि
त्वा मनुष्यतिर्यक्स्थावरान् तन्मात्राणां विकाराः पंच महाभूतानि अहंकारस्येंद्रियाणि पृथिव्यादिभूतेषु शरीररूपतया परिणतेषु तन्मात्रा
हंकारयोजनां कृत्वा सकलस्य कार्यजातस्य निर्माणं अत एवामितौजसा अनेन कार्यनिर्माणेनातिवीर्यशालिनाम् १६ ॥

यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट् तस्माच्छरीरमित्याहुस्तस्य मूर्तिं मनीषिणः १७

यन्मूर्त्यवयवाः सूक्ष्मास्तन्मात्र इत्यादि यस्मान्मूर्तिः शरीरं तन्निष्पादका अवयवाः सूक्ष्मास्तन्मात्राहंकाररूपाः षडेतस्य ब्रह्मणः सप्रकृतिका
स्य इमानि वक्ष्यमाणानि भूतानींद्रियाणि च स्ववैकारिकानि कार्यत्वेनाश्रयंति तन्मात्रेभ्यो भूतोत्पत्तेः अहंकाराच्चेंद्रियोत्पत्तेः तथा च पठं
ति प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः तस्मादपि षोडशकात्पंचभ्यः पंच भूतानि तस्मात्तस्य ब्रह्मणो या मूर्तिः स्वभावस्ता
मपरिणतामिंद्रियादिशालिनीं लोकाः शरीरमिति वदंति षट् आश्रयणाच्छरीरं इति शरीरनिर्वचनेनानेन पूर्वोक्तास्यैतिक्रम एव दृढीकृतः
१७

तदाविशन्ति भूतानि महान्ति सह कर्मभिः मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययम् १८ ॥

तदाविशंति भूतानीत्यादि तदेति ब्रह्म तत्स्वसात्तदिति परामृश्यते तद्ब्रह्म शब्दादि पंचतन्मात्रावस्थितं महाभूतान्याकाशादीनि आविशं
ति तेभ्य उत्पद्यंते सह कर्मभिः स्वकार्यैस्तत्राकाशस्यावकाशदानं कर्म वायोर्व्यूहनं विन्यासरूपं तेजसः पाकोऽपां संग्रहणं पिंडीकरणं
पृथिव्या धारणं अहंकारावस्थितं ब्रह्मतद्विशत्यहंकारादुत्पद्यते इत्यर्थः अवयवैः स्वकार्यैः शुभाशुभसंकल्पादिः सुखदुःखादि
रूपैः सूक्ष्मैर्वेहिरिंद्रियगोचरैः सर्वभूत[illegible]ति मित्तं मनो जन्मशुभाशुभकर्मप्रभवत्वान् गतं अव्ययमविनाशि १८ ॥ ॥

4A

तेषामिदं तु सप्तानां पुरुषाणां महौजसां सूक्ष्माभ्यो मूर्त्तिमात्राभ्यः संभवत्यव्ययाद्व्ययं १९ ॥

तेषामिदं तु सप्तानामित्यादि तेषां पूर्वप्रकृतीनां महदहंकारतन्मात्राणां सप्तानां पुरुषादात्मन उत्पन्नत्वात् तदुत्पत्तियोग्यत्वाच्च पुरुषा-
णाम्महौजसां स्वकार्यसंपादनेन वीर्यवतां सूक्ष्मा या मूर्त्तिमात्राः शरीरसंपादकभागास्ताभ्य इदं जगत् नश्वरं संभवत्यनश्वरात् कार्यं
हि नाशि स्वकारणे लीयते कारणात्तु कार्यापेक्षया स्थिरं परमकारणात्तु कार्यापेक्षया स्थिरं परमकारणं तद्ब्रह्म नित्यमुपासनीयमि-
त्येतद्दर्शयितुमनुवादः १९

आद्याद्यस्य गुणं त्वेषामवाप्नोति परः परः यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः २० ॥

आद्याद्यस्य गुणं त्वेषामित्यादि एषामिति पूर्वोक्तश्लोके तदाविशंतीति भूतानीत्यत्र भूतानां परामर्शस्तेषां चाकाशादिक्रमेणोत्पत्तिक्रमः
शब्दादिगुणा वक्ष्यन्ते तत्राद्याद्यस्याकाशादेर्गुणं शब्दादिकं वाय्वादिः परः परः प्राप्नोतीत्येतदेव स्पष्टयति यो य इति एषां मध्ये यो
यो यावतां पूरणो यावतिथः वतोरिथुक् स स द्वितीयादिः द्वितीयो द्विगुणः तृतीयस्त्रिगुण इत्येवमादिर्मन्वादिभिः स्मृतः एतेनेतदु-
क्तं भवति आकाशस्य शब्दो गुणो वायोः शब्दस्पर्शौ तेजसः शब्दस्पर्शरूपाणि अपां शब्दस्पर्शरूपरसाः भूमेः शब्दस्पर्शरूपरसगंधाः
आद्याद्यस्येत्यपि नित्यवीप्सयोरिति द्विवचनेनाद्यस्याद्यस्येति रूपे प्राप्ते तथापि स्मृतीनां छन्दः समानविषयत्वात् सुपां सुलुगिति पृथ-
माद्यस्य षष्ठ्येकवचनस्याद्याद्य इति रूपसिद्धिः २०

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे २१ ॥

सर्वेषां तु स नामानीत्यादि स परमात्मा हिरण्यगर्भरूपेणावस्थितः सर्वेषां नामानि गोजातेर्गौरिति अश्वजातेरश्व इति कर्माणि ब्राह्म-
णस्याध्ययनादीनि क्षत्रियस्य प्रजारक्षणादीनि पृथक् पृथक् पूर्वकल्पे यान्यभवन् तान्यादौ सृष्ट्यादौ वेदशब्देभ्य एवावगम्य निर्मितवा-
न् भगवता व्यासेनापि वेदसमासमध्यास दर्शकेन जगत्सृष्टिरुक्ता दिना तथा च शारीरके शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमा-
नाभ्यामित्यस्यार्थः देवतानां विग्रहवत्त्वे वैदिकेषु वस्वादिशब्देषु देवजातिवाचिनि विरोधः स्यात् वेदस्यादिमत्त्वप्रसंगादिति वेदाविरोधः
कस्मादतः शब्दादेव जगतः प्रभवादुत्पत्तेः प्रलयकालेपि सूक्ष्मरूपेण परमात्मनि वेदराशिः स्थितः सर्गादौ कल्पादौ हिरण्यगर्भस्य पर-
मात्मन एव प्रथमदेहिनस्ते मंत्रस्य वस्यांत समतापरः सप्रणवप्रबुद्धस्य प्रादुर्भवति तेन च तदीयस्थानेषु येन सर्वतरतिर्यगादिप्रविभ-
क्तं जगत् ऋषिप्रभृति निर्मितमिति कथमिदं गम्यते प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः प्रत्यक्षं श्रुतिरनपेक्षत्वात् अनुमानं स्मृति-
रनुमीयमानश्रुतिसापेक्षत्वात् तथा च श्रुतिः एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इति पितॄंस्तिरः पवित्र-
मिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमिति सौभगेत्यन्याः प्रजाः स्मृतिरपि सर्वेषां तु स नामानीत्यादिका महाभारतादिप्रणीताप्र-
पृथक् संस्थाश्चेति लौकिकीश्च व्यवस्थाः कुलालस्य घटनिर्माणं कुविन्दस्य पटनिर्माणमित्यादिका विभागेन निर्मितवान् २१ ॥

म॰
नु॰ सं॰
टी॰ ५

5

कर्मात्मनां च देवानां सोऽसृजत्प्राणिनां प्रभुः। साध्यानां च गणं सूक्ष्मं यज्ञं चैव सनातनं ॥ २२ ॥

कर्मात्मनां च देवानामित्यादि स ब्रह्मा देवानां गणमसृजत् प्राणिनामिन्द्रादीनां कर्माणि आत्मा स्वभावो येषां तेषाम् प्राणिनां च ग्रावादीनां ~~देवानां~~ साध्यानां च देवविशेषाणां सूक्ष्मं च यज्ञं च ज्योतिष्टोमादिकं कल्पान्तरे यमनुष्ठीयमानत्वान्नित्यं साध्यानां च गणस्य पृथग्वचनं सूक्ष्मत्वात् ॥

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनं। दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥ २३ ॥

अग्निवायुरविभ्य इत्यादि ब्रह्मा ऋग्यजुःसामसंज्ञं वेदत्रयमग्निवायुरविभ्य आकृष्टवान् सनातनं नित्यं वेदापौरुषेयत्वपक्ष एव मनोरभिमतः पूर्वकल्पे ये वेदास्त एव परमात्ममूर्तेर्ब्रह्मणः सर्वज्ञस्य स्मृत्यारूढाः तानेव कल्पादौ अग्निवायुरविभ्य आचकर्ष श्रौतश्चायमर्थो न शङ्कनीयः तथा च श्रुतिः अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः आदित्यात्सामवेद इति आकर्षणार्थत्वाद्दुहिः ताभ्यो अग्निवायुरविभ्यः किं यज्ञसिद्ध्यर्थं त्रयी सम्पादनात् यज्ञानां आपीनस्य क्षीरवत् विषमा ~~~ तामेव वेदानामभिव्यक्तिरूपयानार्थं आकर्षणात् दुहेः प्रयोगः ॥

कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा। सरितः सागराञ्छैलान्समानि विषमाणि च ॥ २४ ॥

कालं कालविभक्तीश्चेत्यादि अयं कालसृष्टिः स्वर्लोके वर्तते क्रियासम्बद्धस्तस्यादित्यादिक्रियाप्रचयरूपं कालं कालविभक्तीर्मासर्त्वयनानि नक्षत्राणि कृत्तिकादीनि ग्रहान्सूर्यादीन् सरितो नदीः सागरान्समुद्रान् शैलान्पर्वतान् समानि समस्थानानि विषमाणि उन्नतानि च सृष्टवान् ॥

तपो वाचं रतिं चैव कामं च क्रोधमेव च। सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः ॥ २५ ॥

तपो वाचमित्यादि तपः प्राजापत्यादि वाचं ~~~ रतिं चेतःपरितोषं कामं इच्छां क्रोधं चित्तप्रज्वलनं च सृष्टिं च वक्ष्यमाणां सृजति सृष्टिः कर्मणां ~~~ इमाः प्रजा वक्ष्यमाणा देवादिकाः कर्तुमिच्छन् ॥ २५ ॥

कर्मणां च विवेकार्थं धर्माधर्मौ व्यवेचयत्। द्वन्द्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः ॥ २६ ॥ कर्मणां चेति धर्मो यज्ञादिः स कर्तव्यः अधर्मो ब्रह्मवधादिः स न कर्तव्यः इति कर्मणां विभागाय धर्माधर्मौ व्यवेचयत् पृथक्केनाभिधाद् धर्मस्य फलं सुखं अधर्मस्य फलं दुःखं धर्माधर्मफलभूतैर्द्वन्द्वैः परस्परविरुद्धैः सुखदुःखादिभिरिमाः प्रजा योजितवान् आदिग्रहणात्कामक्रोधरागद्वेषक्षुत्पिपासाशोकमोहादिभिः ॥

अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः। ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः ॥ २७ ॥

5A

थान्वेति द्र्याहौतां पुंखानां महाभूतानां याः सूक्ष्माः पंचतन्मात्रख्या विनाशिन्यः पंचमहाभूतरूपतया विपरिणामिन्यः ताभिः सहउक्तं
वक्ष्यमाणं चेदं सर्वं मुत्पद्यते पूर्वपूर्वशः क्रमेण सूक्ष्मात्स्थूलं स्थूलात्स्थूलतरमित्यनेन सर्वशः क्रमेणामानमस्ततिः कदाचिन्नानिर
पेक्षा स्यादितीमाम् शंकामपनिनीषन् तद्वारेणावयवसृष्टिरिति मयोऽपुनः पूर्वोक्तं स्मारितवान् २२ ॥

यं तु कर्मणि यस्मिन्स न्ययुङ्क्त प्रथमं प्रभुः स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः २८ ॥

यं त्विति स प्रजापतिर्यं जातिविशेषं व्याघ्रादिकं यस्मिन्क्रियायां हरिणमारणादिकायां सृष्ट्यादौ नियुक्तवान् स जातिविशेषः पुनः पुन
रपि सृज्यमानः स्वकर्मवशात्तदेवाचरितवान् एतेन प्राणिकर्मसापेक्षत्वात्प्रजापतेः रागद्वेषाद्यभावात्तिनिर्माणे रागद्वेषाद्यभावमित्ति दर्शयति
श्रुतप्रवर्तत इति यथा कर्मानुपायोगात्स्थावरजंगममिति २८ ॥

हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते यद्यस्य सोऽदधात्सर्गे तत्तस्य स्वयमाविशत् २९ ॥ एतदेव प्रपंचयति हिंस्रा
हिंस्रे इत्यादि हिंस्रं कर्म सिंहादेः करिमारणादिकं अहिंस्रं हरिणादेः मृदु दयाप्रधानं विप्रादेः क्रूरं क्षत्रियादेः धर्मो यथा ब्रह्मचर्यादेः गुरुशुश्रू
षादिः अधर्मो यथा तस्यैव मांसमैथुनसेवादिः अनृतमस्य तत्प्रायेण देवानामनृतं मनुष्याणां यदपि प्रायेण मनुष्याणां तथा श्रुतिः सत्यवाचो
देवा अनृतवाचो मनुष्या इति तेषामध्ये यत्कर्म स प्रजापतिः सर्गादौ यस्याधारयत् तस्य सृष्टिकाले मध्ये तदेव कर्म प्राक्तनादृष्टवशात् स्व
यमेवभेजे २९ ॥

यथर्तुलिंगान्यृतवः स्वयमेवर्तुपर्यये स्वानि स्वान्यभिपद्यन्ते तथा कर्माणि देहिनः ३० ॥ यथर्तुलिंगानीति यथा हि यथा ऋतु
लिंगानि वसन्तादि ऋतवः स्वचिह्नानि चूतमञ्जर्यादीनि स्वऋतुपर्यये स्वकार्यावसरे स्वयमेवमाप्नुवन्ति तथा देहिनोऽपि हिंसादीनि कर्माणि ३०

लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् ३१ ॥

लोकानामिति भूलोकादीनां विवृद्ध्यर्थं मुखबाहूरुपादेभ्यो ब्राह्मणक्षत्रियवैश्यशूद्रान् तथा क्रमं निर्मितवान् ब्राह्मणादिभिः मार्गेण प्र
त्तयाप्याहुतिः आदित्यमुपतिष्ठते सूर्याद्वृष्टिः वृष्टेरन्नमिति अन्नात् प्रजा वा हुत्सवद्धत्ति वृष्ट्यग्नौ प्रस्ताहुतिः सम्यगादित्यमित्यादि देवाः च दैवा
न्यामुपत्याद्यैव ब्राह्मणादीनि निर्माणं ब्रह्मणा नविशकलोपपन्नेतिसिद्धमात् तथा च श्रुतिः ब्राह्मणोऽस्य मुखमासीदित्यादिः ३१ ॥

द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत् अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः ॥ ३२ ॥ द्विधा कृत्वेति स ब्रह्मा निजदे
हं द्विखंडं कृत्वा अर्धेन पुरुषो जातः अर्धेन स्त्री तस्यां मैथुनधर्मेण विराट्संज्ञं पुरुषं निर्मितवान् श्रुतिश्च विराडततो जायतेति ३२ ॥

मा।
नु। से।
६

तपस्तप्त्वासृजद्यंतुसस्वयंपुरुषोविराट् तंमांवित्तास्यसर्वस्यस्रष्टारंद्विजसत्तमाः ३३

तपस्तप्त्वेतिसविराट्तपोविधायवर्यंनिर्मितवान् तंमांमनुंजानीतअस्यसर्वस्यजगतःस्रष्टारंभोद्विजसत्तमाः एतेनस्वजन्मोत्कर्षसामर्थ्याति-
शयवाभिहितवान् लोकानांप्रत्ययितप्रत्ययार्थम् ॥३३॥

अहंप्रजाःसिसृक्षुस्तुतपस्तप्त्वासुदुश्चरम् पतीन्प्रजानामसृजंमहर्षीनादितोदश ३४ ॥

अहमिति अहंप्रजाःस्रष्टुमिच्छन् सुदुश्चरंतपःकृत्वादशप्रजापतीन् प्रथमंसृष्टवान्तैरपिप्रजानांसृज्यमानत्वात् ३४ ॥

मरीचिमत्र्यंगिरसौपुलस्त्यंपुलहंक्रतुं प्रचेतसंवसिष्ठंचभृगुंनारदमेवच ३५॥

मरीचिमित्यादितएतेदशप्रजापतयोनामतोनिर्दिष्टाः ३५॥एतेमनूंस्तुसप्तान्यानसृजन्भूरितेजसः देवान्देवनिकायांश्चमहर्षी
श्चामितौजसः ३६ ॥

एतेमनूनिति एतेमरीच्यादयोदशभूरितेजसोबहुतेजसोऽन्यान् सप्तापरिमिततेजस्कान्मनून्देवान्सप्तान्
स्थानान् देवनिवासस्थानानिस्वर्गादीन्महर्षींश्चसृष्टवंतः मनुशब्दोऽयमधिकारवाची चतुर्दशसुमन्वन्तरेषुप्रथमयत्रसर्गाधिकारःसप्तवंतो
स्मिन्मन्वन्तरेस्वायंभुवस्वारोचिषादिनामभिर्मनुरितिव्यपदिश्यते ३६ ॥

यक्षरक्षःपिशाचांश्चगंधर्वाप्सरसोऽसुरान् नागान्सर्पान्सुपर्णांश्चपितॄणांचपृथग्गणान् ३७ ॥

यक्षरक्षेति एतेऽसृजन्निति पूर्वस्मिन्वाक्येऽनुषंगः अनयश्लोकद्वयेन यक्षावैश्रवणादयस्तदनुचराश्च रक्षांसिपूतनादीनि पिशाचास्तेभ्योऽपकृ
ष्टाः अशुचिमरुदेशनिवासिनः गंधर्वाश्चित्ररथादयः अप्सरसः उर्वश्यादयः असुराः सर्पास्तेभ्योऽपकृष्टाः कुलगर्द्दादयः सुपर्णाः गरुडादयः सर्पास्त
तोऽपकृष्टाः कुलगर्द्दादयः गरुडादयः पितृणांमान्यपादीनांगणाः समूहाः पृथग्विभेदइतिहासादिप्रसिद्धोनाविदादिगोचरा ३७ ॥

विद्युतोऽशनिमेघांश्चरोहितेंद्रधनूंषिच उल्काविर्घातकेतूंश्चज्योतींष्युच्चावचानिच ॥ ३८ ॥

विद्युतइतिमेघेषुदृश्यंदीर्घाकारंज्योतिर्विद्युत् मेघादेवयदुज्ज्योतिर्हतादिविनाशकंतदशनिः मेघाःप्रसिद्धाः रोहितंदंडाकारंनानावर्णं
दिविदृश्यमानेयदुज्ज्योतिस्तदेवचक्रमिंद्रधनुः उल्कारेखाकारमंतरीक्षात्पतदुज्ज्योतिः निर्घातोभूम्यन्तरीक्षगतउत्पातध्वनिः केतवःशिखा
वंतिज्योतींषिउत्पातरूपाणि ज्योतींष्युच्चावचानिनानाप्रकाराणि ३८ ॥

किंनरान्वानरान्मत्स्यान्विविधांश्चविहंगमान् पशून्मृगान्मनुष्यांश्चव्यालांश्चोभयतोदतः ३९ ॥

वि [illegible]ति किंनराः [illegible]त्वा देवयोनयो नरविग्रहाः वानराः प्रसिद्धाः मत्स्या रोहितादयः विहंगमाः पक्षिणः पशवो गवाद्या मृगा हरि

6A

णाद्याः व्यालाः सिंहाद्याः उभयतोदतः द्वे दन्तपंक्ती येषां [illegible] ३९ ॥

कृमिकीटपतंगांश्च यूकामक्षिकमत्कुणम् सर्वं च दंशमशकं स्थावरं च पृथग्विधम् ४० ॥ कृमिकीट इति कीटाः [illegible]

[illegible] पतंगाः शलभाः यूकादयः प्रसिद्धाः स्वेदजं तद्वद्व्यनेन [illegible] स्थावरं वृक्षलतादिभेदेन विविधप्रकारम् ४० ॥

एवमेतैरिदं सर्वं मन्नियोगान्महात्मभिः यथाकर्म तपोयोगात्सृष्टं स्थावरजंगमम् ४१ ॥

एवमेतैरिति एवमित्युक्तप्रकारेण एतैर्मरीच्यादिभिर्यदिदं सर्वं स्थावरजंगमं सृष्टं यथाकर्म यस्य जंतोर्यादृशं कर्म तदनुरूपेण सदेवमनुष्यादि [illegible] योगादियोनिसृष्टा [illegible] मन्नियोगात् मदाज्ञया तपोयोगात्महत्तपः कृत्वा सर्वमेतत्तपोऽधीनमिति दर्शितम् ४१ ॥

येषां तु यादृशं कर्म भूतानामिह कीर्तितं तत्तथा वोऽभिधास्यामि क्रमयोगं च जन्मनि ४२ ॥ येषामित्यादि येषां पुनर्या

दृशं कर्म [illegible] कथितं यथौषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ब्राह्मणादीनां अध्ययनादि कर्म तत्तथैव वो युष्माकं व

[illegible] क्रमं जन्मादिक्रमयोगं च ४२ ॥

पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ४३ ॥

पशवश्चेति [illegible] गर्भवेष्टनचर्म तत्र मनुष्यादयः प्रादुर्भवन्ति पश्चात्कुक्षौ जायन्ते एषामेव जन्मक्रमः [illegible] दन्तशकलसमाना येषां [illegible] [illegible] एतयामवहुवचनेनुभयतोद

न्तेति ४३

अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः यानि चैवंप्रकाराणि स्थ

लजान्यौदकानि च ४४ ॥

अण्डजाः पक्षिण इति [illegible] भवन्ति ततो जायन्ते इति एषां जन्मक्रमः नक्राः कुंभीराः स्थलजानि कृकलासादीनि औदकानि शंखादीनि ४४

स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम् ऊष्मणश्चोपजायन्ते यच्चान्यत्किंचिदीदृशम् ४५ ॥ स्वेदजमिति स्वेदः

पार्थिवद्रव्याणां तापेन क्लेदः ततो दंशमशकादिर्जायते ऊष्मणश्च स्वेदहेतुतापादपि [illegible] पादिस्पर्शात्पतिकापिपीलिकादि जायते ४५

उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ४६ ॥

उद्भिज्जा इति [illegible]

म॰
मु॰ सं॰ 7

क्रिमयः तेन जायन्ते ऊष्मजं भूमिं च भित्त्वा उद्भिज्जा उद्भिज्जाः ते च द्विधा। केचिद्बीजाद्देव जायन्ते केचित् काण्डात् ... ओषध्य इति बहुपुष्पफलोपगाः ... ओषधयो व्रीहियवादयः फलपाकेनैव नश्यन्ति बहुपुष्पफलयुक्ताश्च भवन्ति ओषधिशब्दो ... वृक्षादिकाः ... ओषध्य इति ... ४६

अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः। पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ४७

अपुष्पा इति ... अभिधानकोषवत् ... वनस्पतयस्तेषां पुष्पं ... फलं ... फलानीति ... उभयतः ... ४७

गुच्छगुल्मं तु विविधं तथैव तृणजातयः। बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च ४८ ॥

गुच्छगुल्मं तु इति मूलत एव यत्र लतासमूहो भवति न च प्रकाण्डं ते गुच्छा मल्लिकादयः गुल्मा एकमूलाः संघातजाताः शरेक्षुप्रभृतयः तृणजातयः उलपाद्याः प्रतानास्तन्तुयुक्ताः त्रपुषालाबुप्रभृतयः वल्ल्यो गुडूच्यादयः ... तिष्ठन्ति बीजकाण्डरुहाणि ... कर्मनेकमेकं ... इति नपुंसकत्वम् ४८

तमसा बहुरूपेण वेष्टिताः कर्महेतुना। अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ४९ ॥

तमसेति एते वृक्षादयस्तमोगुणेन विविधफलदुःखवेदनाधर्मकर्महेतुकेन ... अन्तःसंज्ञा भवन्ति ... सुखदुःखसमन्विताः ... जायते ४९ ॥

एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः। घोरेऽस्मिन्भूतसंसारे नित्यं सततयायिनि ५० ॥ एतदन्ता इति स्थावरपर्यन्ता ब्रह्मोपक्रमा गतय उत्पत्तयः कथिताः भूतानां ... जन्ममरणप्रबन्धरूपे ... विनश्वरे ५० ॥

एवं सर्वं स सृष्ट्वेदं मां चाचिन्त्यपराक्रमः। आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन् ५१ ॥

इदानीं ... एवं सर्वमिति एवमुक्तप्रकारेणेदं सर्वं स्थावरजंगमं जगत् ... मां च ... सृष्टिकालं प्रलयकालेन ... कर्मवशात् पुनः पुनः सर्गप्रलयान् करोतीत्यर्थः ५१ ॥

यदा स देवो जागर्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ५२ ॥

प्रबोधितमाह यदेति यदा स प्रजापतिर्जागर्ति सृष्टिस्थिती इच्छति तदेदं जगत्श्वासाहारादिचेष्टां लभते यदा स्वपिति निवृत्तेच्छो भवति शान्तात्मा

तस्मिन्स्वपिति तु सुस्थे कर्मात्मानः शरीरिणः स्वकर्मभ्यो निवर्तन्ते मनश्च ग्लानिमृच्छति ५३॥ उपसंहारमनाः तदेदं जगत्प्रलीयते ५२॥

पूर्वोक्तमेव स्पष्टयति तस्मिन्स्वपतीति तस्मिन्प्रजापतौ निवृत्तचेष्टे सुस्थे उपसंहृतदेहमनोव्यापारे कर्मलब्धदेहाः क्षेत्रज्ञाः स्वकर्मभ्यो देहग्रहणादिभ्यो निवर्तन्ते मनः सर्वेन्द्रियसहितं वृत्तिरहितं भवति ५३॥

युगपत्तु प्रलीयन्ते यदा तस्मिन्महात्मनि तदायं सर्वभूतात्मा सुखं स्वपिति निर्वृतः ५४

इदानीं महाप्रलयमाह युगपदिति एकस्मिन्नेव काले यदा तस्मिन्परमात्मनि सर्वभूतानामात्मा निर्वृतः निवृत्तजाग्रत्स्वप्नव्यापारः सुखं स्वपिति स्वप्रत्यक्षं भवति यद्यपि नित्यज्ञानानंदस्वरूपे परमात्मनि न स्वापोपि जीववद्धर्मोयमुपचर्यते ५४॥

तमोयं तु समाश्रित्य चिरं तिष्ठति सेन्द्रियः न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ५५॥

इदानीं प्रलयप्रसंगेन जीवस्योत्क्रमणमपि श्लोकद्वयेनाह तमोयमिति अयं जीवस्तमो ज्ञाननिवृत्तिं प्राप्य बहुकालमिन्द्रियादिसहितस्तिष्ठति न चात्मीयं कर्म श्वासप्रश्वासादिकं करोति तदा मूर्तितः पूर्वदेहादुत्क्रामति अन्यत्र गच्छति लिंगशरीरावच्छिन्नस्य जीवस्य उत्क्रमणमुपपद्यते तथा चोक्तं बृहदारण्यके तमुत्क्रामन्तं प्राणोनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति प्राणा इन्द्रियाणि ५५

यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च समाविशति संसृष्टस्तदा मूर्तिं विमुञ्चति ५६॥

कदा देहान्तरं गृह्णातीत्यत आह यदाणुमात्रिक इति अणवो मात्राः पुर्यष्टकरूपेण भूतादीनां सूक्ष्मरूपाः ताः सह विद्यते यस्य स अणुमात्रिको भूत्वा भूतेन्द्रियमनोबुद्धिवासनाकर्मवायवः अविद्या चाष्टकं प्रोक्तं पुर्यष्टकमृषिसत्तमैः ब्रह्मपुराणे प्रोक्तं पुर्यष्टकेन लिंगेन प्राणाद्येन स युज्यते तेन बद्धस्य वै बंधो मोक्षो मुक्तस्य तेन च यदाणुमात्रिको भूत्वा स्थावरजंगमत्वादिहेतुभूतं पाणिमानुषादिकारणं बीजं प्रविशत्यधितिष्ठति तदा संसृष्टः पुर्यष्टकयुक्तो मूर्तिं स्थूलदेहान्तरं कर्मानुरूपं विमुञ्चति गृह्णाति ५६॥

एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरं संजीवयति चाजस्रं प्रमापयति चाव्ययः ५७

प्रासंगिकं जीवस्योत्क्रमणमभिधाय प्रकृतमुपसंहरति एवं स जाग्रत्स्वप्नाभ्यामिति स ब्रह्मा अनेन प्रकारेण स्वीयजाग्रत्स्वप्नाभ्यामिदं स्थावरजंगमं संजीवयति मारयति चाजस्रं सततम् अविनाशी अव्ययः ५७॥

मा.
मु. स. ८
८

इदं शास्त्रं तु कृत्वासौ मामेव स्वयमादितः। विधिवद्ग्राहयामास मरीच्यादींस्त्वहं मुनीन् ५८॥

इदं शास्त्रमिति असौ ब्रह्मा इदं शास्त्रं कृत्वा सृष्ट्यादौ मामेव विधिवच्छास्त्रोक्तोपायेनानुष्ठानेनाध्यापितवान् अहं तु मरीच्यादीनध्यापित-
वान् ननु ब्रह्मकृतत्वे मानवं शास्त्रमिति कथं मानवव्यपदेशः अत्र मेधातिथिः शास्त्रशब्देन शास्त्रार्थो विधिनिषेधसमूह उच्यते तं ब्रह्मा कृतवान् मनुं
ग्राहयामास मनुस्तु तत्प्रतिपादकं ग्रन्थं कृतवानिति न विरोधः अस्मिन्पक्षे कृतं तेन ग्रन्थं मनुना प्रथमं मरीच्यादिभ्यः सहस्रशोऽस्य
सुप्रकाशितत्वान्मानवव्यपदेशः वेदापौरुषेयत्वेऽपि काठकादिव्यपदेशवत् इदं तु युक्तं शतसाहस्रमिदं शास्त्रं
ख्यापितं आसीत् ततस्तु नवसंक्षेपेण संक्षिप्य शिष्येभ्यः प्रतिपादितमित्यविरोधः तथा च नारदः शतसाहस्रोऽयं ग्रन्थ इति स्मरति।

एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः। एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं मुनिः ५९॥ ल पट

एतद्व इत्यादि एतच्छास्त्रमयं भृगुः युष्माकं कथमखिलं कथयिष्यति यस्मादेषोऽशेषमेतन्मत्तोऽधीतवान् ५९॥

ततस्तथा स तेनोक्तो महर्षिर्मनुना भृगुः। तानब्रवीदृषीन्सर्वान्प्रीतात्मा श्रूयतामिति ६०

ततस्तथेति
स भृगुर्मनुना यथोक्तोऽयं श्रावयिष्यतीति यस्मादेषोऽधिजगे इत्युक्तः ततोऽनन्तरमनेकमुनिसन्निधौ गुरुसंभावनया प्रीतिमनास्तानृषीन्सर्वान्वक्ष्यमाणं श्रूयतामित्युक्तवान् ६०

स्वायंभुवस्यास्य मनोः षड्वंश्या मनवोऽपरे। सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महौजसः ६१॥

स्वायंभुवस्येति ब्रह्मपौत्रस्यास्य मनोः षड्वंशप्रभवाः षडन्ये मनवः पृथक्कार्यकारिणः स्वस्वकाले सृष्टिपालनादावधिकृताः स्वाः स्वाः प्रजा सृष्टवन्तः ६१

स्वारोचिषश्चोत्तमिश्च तामसो रैवतस्तथा। चाक्षुषश्च महातेजा विवस्वत्सुत एव च ६२॥

स्वारोचिष इति एते षडेते मनवः नामतो निर्दिष्टाः ६२॥

स्वायंभुवाद्याः सप्तैते मनवो भूरितेजसः। स्वे स्वेऽन्तरे सर्वमिदमुत्पाद्यापुश्चराचरम् ६३

स्वायंभुवेति स्वायंभुवप्रमुखाः सप्तैते मनवः स्वीयस्वीयाधिकारकाले इदं स्थावरजंगममुत्पाद्य पालितवन्तः ६३॥

निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला। त्रिंशत्कला मुहूर्तः स्यादहोरात्रं तु तावतः ६४॥

इदानीमुक्तमन्वन्तरसृष्टिप्रलयादिकालपरिमाणपरिज्ञानायाह निमेषा दश चाष्टौ चेति अक्षिपक्ष्मणोः स्वाभाविकोऽन्मेष

मेषे॥ निमेषा इति। अष्टादश निमेषाः काष्ठा नाम कालः त्रिंशत्काष्ठाः कलासंज्ञकः त्रिंशत्कलाः मुहूर्तो नाम कालः तावत्त्रिंशन्मुहूर्तानामहोरात्रः
कालविधानता वक्ष्यति इति द्वितीयातिदेशात् विधायादिमथाहारः ६४॥ अहोरात्रे विभजते सूर्यो मानुषदैविके रात्रिः स्वप्ना-
य भूतानां चेष्टायै कर्मणामहः ६५॥ अहोरात्रे इति मानुषदैवसंबंधिनौ दिनरात्रिकालावादित्यः पृथक् करोति तयोर्मध्ये भूता-
नां स्वापार्थं रात्रिर्भवति कर्मानुष्ठानार्थं च दिनम् ६५॥ पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः कर्मचेष्टास्वहः कृष्णः शुक्लः
स्वप्नाय शर्वरी ६६॥ पित्र्ये इति मानुषाणां मासः पितॄणामहोरात्रे भवतः तत्पक्षद्वयेन विभागः कर्मानुष्ठानाय कृष्णपक्षो ऽहः स्वापाय
शुक्लपक्षो रात्रिः ६६॥
दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनं ६७
दैवे रात्र्यहनी वर्षमिति मानुषाणां वर्षं देवानां रात्रिदिने भवतः तयोरयं विभागः उत्तरायणं देवानामहः तत्र प्रायेण दैवकर्माणामनुष्ठाने
दक्षिणायनं रात्रिः ६७
ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः एकैकशो युगानां तु क्रमशस्तन्निबोधत ६८॥
ब्राह्मस्येति ब्रह्मणो ऽहोरात्रस्य यत्परिमाणं समस्तं कं युगानां च कृतादीनां तत्क्रमेण समासतः संक्षेपतः शृणुत पृथक् तेषां कालविभागे यद्द्रव्य
तेः ऽध्ययनस्य पृथक् श्रुतिस्तानेतद्दीयन्ते तस्य पुण्यफलत्वात्तावधिवदन्तिच ब्राह्मणमहर्विज्ञेयं ब्रह्मदेवानां प्रमाणं ६८॥
चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगं तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ६९॥
चत्वार्याहुरिति चत्वारि वर्षसहस्राणि कृतयुगकालं मन्वादयो वदन्ति तस्य तावद्वर्षशतानि संध्या प्राक् भवति युगस्य पश्चात् संध्यांशः वर्षसंध्या
याः तेषु क्रमविष्णुपुराणे तु प्रमाणं दर्शितं संध्या पूर्वा तत्र अभिधीयते संध्यांशकस्तत्तुल्यो युगस्यानन्तरो हि यः संध्यासंध्यांशयोरन्तर्यः कालो मुनि
सत्तम युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः वर्षसंख्या चेयं दिव्यमानेन तत्संख्या न तु मानुषेणेति दिव्यवर्षसहस्रैस्तु कृतत्रेतादिसंज्ञकम्
चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे इति विष्णुपुराणवचनात् ६९॥
इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु एकापायेन वर्तन्ते सहस्राणि शतानि च ७०॥ इतरेष्विति त्रेताद्वापरकलि-
षु संध्यासंध्यांशसहितेषु एकापायात् सहस्राणि शतानि च भवन्तीति तेन दर्शयति त्रीणि वर्षसहस्राणि त्रेतायुगं संध्या त्रीणि वर्षशतानि संध्या
संध्यांशश्च एवं द्वे वर्षसहस्रे द्वापरः तस्य द्वे वर्षशते संध्या संध्यांशश्च एवं वर्षसहस्रं कलिः तस्य वर्षशतं संध्या संध्यांशश्च ७०॥
यदेतत्परिसंख्यातमादावेव चतुर्युगं एतद्द्वादशसाहस्रं देवानां युगमुच्यते ७१॥

नु. सं. १

मुष्टेनदिति एतमश्लोकस्यादौ येन तस्मात् यश्चैवं चतुर्युगं परिगणितं एतत् देवानां युगमुच्यते चतुर्युगशब्देन संख्यासंख्येयोर्भेदा ... मनुना ... दिव्ययुगसहस्रे
एतत् द्वादशसाहस्रमिति स्वार्थे एवं चतुर्युगे एव द्वादशसहस्रसंवत्सरे दिव्ययुगमिति तथा ... मानाद् ... मनुनानेन ... दिव्ययुगसहस्रे
... साहस्र ... अभिधानात् विष्णुपुराणे च साग्रं चतुर्युगसहस्रं ब्रह्मणो अहः कीर्तनात् ... चतुर्युगे नैव दिव्ययुगान्तर्गमनात् तथा
... विष्णुपुराणे कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं प्रोच्यते तत्सहस्रं तु ब्रह्मणो दिवसो मुने ७१॥

दैविकानांयुगानांतुसहस्रंपरिसंख्यया ब्राह्ममेकमहर्ज्ञेयंतावतीरात्रिरेवच ७२॥

दैविकानामिति देवयुगानां सहस्रं ब्राह्मदिनं तावदेव सहस्रमेव रात्रिः परिसंख्ययेति श्लोकपूरणार्थोऽनुवादः ७२॥

तद्वैयुगसहस्रान्तंब्राह्मंपुण्यमहर्विदुः रात्रिंचतावतीमेवतेऽहोरात्रविदोजनाः ७३॥ तद्वै युगेति युगसहस्रं पर्यन्तः समा
प्तिर्यस्य तद्ब्राह्मं ... रात्रिं ... अहोरात्र ... ब्राह्ममहोरात्रं ... विद्युः परिकल्प्य ... एवं ... ७३॥

तस्यसोऽहर्निशस्यान्तेप्रसुप्तःप्रतिबुध्यते प्रतिबुद्धश्चसृजतिमनःसदसदात्मकं ७४॥

तस्येति स ब्रह्मा तस्य पूर्वोक्तस्य ... अहोरात्रस्य ... प्रतिबुद्धो भवति प्रतिबुद्धश्च ... मनः सृजति भूर्लोकादिसृष्ट्यर्थं ... ननु
... भूर्लोकादित्रय ... मनः सृष्टि
... पुराणेषु श्रूयते मनः ... महान् ... मनः ... सृष्टि ... महान्तमेव ... प्रत्यक्षा
भूतानां ... महाप्रलया ... महान् ... हिरण्यगर्भस्यापि ...
नामत्र वदति ... भवति ब्रह्मा महाप्रलयावसाने तस्मादेव ... महदादीन् ... जगत्सृष्ट्यर्थं मनः सृजति ...
... मनःप्रभृति ... सृष्टिः ... एतद् ... तेनानुवादः स्यात् ७४॥

मनःसृष्टिंविकुरुतेचोद्यमानंसिसृक्षया आकाशंजायतेतस्मात्तस्यशब्दंगुणंविदुः ७५॥

मनः सृष्टिमिति मनो महान् सृष्टिं करोति परमात्मनः स्रष्टुमिच्छया प्रेर्यमाणं तस्मादाकाशं ... आकाशात् ... शब्दं गुणं विदुर्मन्वा

आकाशात्तुविकुर्वाणात्सर्वगन्धवहःशुचिः बलवाञ्जायतेवायुःसवैस्पर्शगुणोमतः ७६
... आकाशादिति आकाशात् विकारजनकात् ... सर्वगन्धवहः पवित्रो बलवांश्च वायुर्जायते स च स्पर्शगुणवान् मन्वादीनां मतः ७६

9A

वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदं ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते ७७ ॥
वायोरपीति वायोरपि तेज उत्पद्यते विरोचिष्णु प्रकाशकं तमोनाशनं भास्वत्प्रकाशकं तमोनाशनं तच्च रूपगुणमभिधीयते ७७ ॥
ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः ७८ ॥ ज्योतिषश्चेति तेजसः
उत्पद्यन्ते ताश्च रसगुणयुक्ताः अद्भ्यो गन्धगुणयुक्ता भूमिरित्येषा महाप्रलयानन्तरं सृष्ट्यादौ भूतसृष्टिः तैरेव भूतैः सर्वान्तरप्रलयानन्तरमपि भूरादिलो
ककल्पननिर्माणम् ७८ ॥
यत्प्राग्द्वादशसाहस्रमुदितं दैविकं युगं तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ७९ ॥
यत्प्रागिति यत्पूर्वं द्वादशवर्षसहस्रपरिमाणं संख्यासंख्यातमभिहितं मनुष्याणां चतुर्युगं देवानामेकं युगमुक्तं तदेकसप्ततिगुणितं मन्व
न्तराख्यः कालः इह शास्त्रे अभिधीयते तत्रैकस्य मनोः सर्गाद्यधिकारः ७९ ॥ मन्वन्तराण्यसंख्यानि सर्गः संहार एव च क्रीडन्निवैतत्कुरु
ते परमेष्ठी पुनः पुनः ८० ॥ चतुर्दश मन्वन्तराणि पुराणोक्तपरिगणितानि तथापि सर्गप्रलयानामानन्त्यात् असंख्यानीत्युक्तं
मन्वन्तराणीति यद्यपि
महासर्गमहाप्रलयः एतत्सर्वं क्रीडन्निव प्रजापतिः पुनः पुनः कुरुते ... क्रीडा ... यतः ... प्रवृत्तिः ... भाववा
... परमेष्ठी प्रयोजनं विना परमात्मनः सृष्ट्यादिकर्मणः कथं ... लोकवत्तु लीलाकैवल्यम् ॥८० ॥
हिरण्यगर्भः व्याख्यानं विवक्षया चालनादीन ... शारीरक सूत्रे लोकवत्तु लीलाकैवल्यम्
चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे नाधर्मेणागमः कश्चिन्मनुष्यान्प्रतिवर्तते ८१ ॥
चतुष्पात्सकल इति सत्ययुगे सकलो धर्मश्चतुष्पात्सर्वाङ्गसम्पूर्ण आसीत् धर्मस्य पादाः सम्भवान्न ... हि भगवान् धर्मस्तपोयागमेहूपा
... तेन कीर्तनात् तस्य पादचतुष्टयेन सम्पूर्णत्वात् सत्ययुगेऽपि यत्तादि धर्माणां सर्वेषां ... सम्पूर्णत्वात् ... चतुष्पाद्धर्मः ... तपः
... तेन कीर्तनात् तस्य पादचतुष्टयेन सम्पूर्णत्वात् ... सत्ययुगे सम्पूर्ण इत्यर्थः तथा
रमितत्र मनुनैव तपो ज्ञानयज्ञदानानां चतुर्णां कीर्तनात् तस्य पादचतुष्टयेन सम्पूर्णत्वात् ... आगमः उत्पत्तिर्मनुष्याणां सम्पद्यते ८१ ॥
सत्यवत्कृतयुगमासीत् सकलधर्मश्रेष्ठत्वात् ... शास्त्रीयक्रमात् ... अधर्मेण ... आगम उत्पत्तिर्मनुष्याणां ...
इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः चौरिकानृतमायाभिर्धर्मश्चापैति पादशः ८२ ॥
इतरेष्विति सत्ययुगादन्येषु त्रेतादिषु आगमात् धर्मः ... अर्जनात् ... पूर्वश्लोके ... आगमाद्वेदादिति ... तु गोविन्दराजः
इतरेष्विति सत्ययुगादन्येषु त्रेतादिषु आगमात् धर्मार्जनविद्यादेरर्जनात् ... प्रतियुगं ... पादमवरोपितो हीनः कृतः ... चरति ...
मेधातिथिश्च धर्मो यागादिः यथाक्रमं प्रतियुगमस्यादेः पादमवरोपितो हीनः

मा
तु मं
१०

धर्मः [illegible]तियुगपादशो ह्रासमुपगच्छति त्रेतादियुगेषु सहचौरिकानृतच्छद्मना नयथासंख्यं सर्वत्र सर्वेषां दर्शनात् ८२ ॥

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः । कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ८३ ॥ अरोगा इति रोगनिमित्ताय

[illegible]त्वादरोगाः सर्वसिद्धकाम्यफलाः प्रतिबंधकाधर्माभावात् चतुर्वर्षशतायुषश्च स्वाभाविकमधिकायुः प्रापकधर्मवशादधिकायुषोऽपि भवे
ति तदशवर्षसहस्राणि रामो राज्यमकारयदित्यादि विरोधः शतायुर्वै पुरुष इत्यादिश्रुतेन [illegible] बहुतरः कलियुगे चापचयरूपा मनुष्याः

वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम् । फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् ८४ ॥ कृते भवन्ति त्रेतादिषु पुनः पादपादन्यूनाल्पीभवन्ति । ८३

वेदोक्तमायुरिति शतायुर्वै पुरुष इत्यादि वेदोक्तमायुः कर्मणां च काम्यानां फलविषयाः प्रार्थना ब्राह्मणादीनां च शापानुग्रह
[illegible]सामर्थ्यादिप्रभावाश्च युगानुरूपेण फल

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे । अन्ये कलियुगे नृणां युगह्रासानुरूपतः ८५ न्ति ॥

अन्ये इति कृतयुगेऽन्ये धर्मा भवन्ति त्रेतादिष्वपि युगादिह्रासानुरूपेणान्यथैवेत्यर्थः ८५ ॥

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते । द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ८६ ॥

तपः परमिति यद्यपि तपःप्रभृतीनि सर्वाणि सर्वयुगेष्वनुष्ठेयानि तथापि सत्ययुगे तपः प्रधानं महाफलमिति ज्ञापनार्थं [illegible] आत्म ज्ञा

सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः । मुखबाहूरुपज्जानां पृथक्कर्माण्यकल्पयत् नं त्रेतायुगे द्वापरे यज्ञो दानं कलौ ८६
ल्पयत् ८७ ॥ सर्वस्येति स ब्रह्मा महातेजाः [illegible]स्य सर्गस्य रक्षार्थं ब्राह्मणादीनामिति [illegible] ब्राह्मणादीनां विभा

अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् गेन कर्माणि दृष्टादृष्टार्थानि निर्मितवान् ८७
८८

अध्यापनमिति अध्यापनादीनामिह [illegible] [illegible]तयाभिधानं विविधस्यापि [illegible] भविष्यति अध्यापनादीनि षट्कर्मा
णि ब्राह्मणानां कल्पितवान् ८८

प्रजानां रक्षणं दानमिज्याध्ययनमेव च । विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः ८९

प्रजानामिति प्रजारक्षणादीनि क्षत्रियस्य [illegible] कल्पितवान् विषयेषु गीतनृत्यवनितोपभोगादिष्वप्रसक्तिस्तेषां पुनः पुनरसेवनं

पशूनां रक्षणं दानमिज्याध्ययनमेव च । वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च । समासतः संक्षेपेण ८९ ॥

[illegible]श्री

10A

...पशूनां पालनादीनि विषयप्रसक्तिं कल्पितवान् वणिक्पथं स्थलजलादिना वाणिज्यं कुसीदं वृद्ध्यर्थं धनप्रयोगः ९० ॥

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् एतेषामेव वर्णानां शुश्रूषामनसूयया ९१

शूद्रस्य ब्राह्मणादिवर्णत्रयपरिचर्यात्मकं कर्म निर्मितवान् एकमेवेति प्राधान्यप्रदर्शनार्थं दानादेरपि तस्य विहितत्वात् ... अनसूयया गुणनिन्दया ९१ ॥

ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयंभुवा ९२ ॥

... सर्गरक्षार्थं ब्राह्मणस्य ... ब्राह्मणस्य श्रेष्ठत्वमाह ऊर्ध्वमिति सर्वत एव पुरुषो मेध्यः नाभेरूर्ध्वं मेध्यतरः अतिशयेन मेध्यः ततोऽपि मुखमस्य मेध्यतमं ब्रह्मणोक्तं ९२ ॥

उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ९३ ॥

ततः किमत आह उत्तमाङ्गोद्भवादिति उत्तमाङ्गं मुखं तत उद्भवात् क्षत्रियादिभ्यः पूर्वोत्पन्नत्वात् अध्यापनव्याख्यानादिना ... ब्रह्मणो वेदस्य धारणात् सर्वस्यास्य जगतो धर्मानुशासनेन ब्राह्मणः प्रभुः ... विशेषाद्वर्णानां ब्राह्मणः प्रभुः ९३ ॥

तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत् हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ९४ ॥

... तं हि स्वयंभूरिति तं ब्राह्मणं ब्रह्मा आत्मीयमुखात् देवपितृहव्यकव्यवहनाय तपः कृत्वा सर्वस्य जगतो रक्षायै च ...

यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः कव्यानि चैव पितरः किं भूतमधिकं ततः ९५

... हव्यकव्यवहनं ... यस्य मुखेन ... श्राद्धादौ ... पितरः कव्यानि भुञ्जते ततोऽन्यत् प्रकृष्टं भूतं किं भवेत्

भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ९६

भूतानामिति भूतानां स्थावरजङ्गमानां मध्ये प्राणिनः कीटादयः श्रेष्ठाः ... तेषामपि बुद्धिजीविनः सार्थनिरर्थदेशोपसर्पणकारिणः पश्वादयः तेभ्योऽपि मनुष्याः प्रकृष्टज्ञानसंबन्धात् तेभ्योऽपि ब्राह्मणाः सर्वश्रेष्ठत्वात् ... अपवर्गाधिकारयोग्यत्वात् ९६ ॥

ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः ९७ ॥

म॰
तु॰ टी॰
११

ब्राह्मणेष्वेवेति ब्राह्मणेषु च मध्ये विद्वांसः। ... हाफलज्योतिष्टोमादिकर्माधिकारित्वात् तेभ्योपि कृतबुद्धयः श्वनागतेषिकृतं मयेति बुद्धिर्ये[illegible]
कर्तारः ... कर्तव्यतावुद्धय इत्यर्थः। तेभ्योपि ब्रह्मवादिनः हितादितशास्त्रविहारब्रह्मभागित्वात् तेभ्योपि ब्रह्मविदः मोक्षलाभात् ९७ ॥

उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती। स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ९८ ॥

उत्पत्तिरिति ब्राह्मणदेहे जन्ममात्रमेव धर्मस्य शरीरमविनाशि यस्मात्स धर्मार्थं जातः धर्मानुगृहीतात्मज्ञानेन मोक्षाय संपद्यते ९८ ॥

ब्राह्मणो जायमानो हि पृथिव्यामधिजायते। ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ९९ ॥

ब्राह्मण इति यस्माद्ब्राह्मणो जायमानः पृथिव्यामधि उपरि भवति श्रेष्ठ इत्यर्थः। सर्वभूतानां धर्मसमूहरक्षायै प्रभुः ब्राह्मणोपदिष्टत्वात्सर्वधर्माणां

सर्वं स्वं ब्राह्मणस्येदं यत्किंचिज्जगतीगतं। श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति १०० ॥

सर्वं स्वमिति यत्किंचिज्जगद्गतं धनं तद्ब्राह्मणस्य स्वमिति स्तुत्योच्यते स्वमिव स्वं न तु स्वमेव ब्राह्मणस्यापि मनुना स्तेयस्य वक्ष्यमाणत्वात् तस्मा
त्स्वाह्मसम्भवोद्भवेनाभिजनेन श्रेष्ठ्येन तया सर्वं ब्राह्मणोऽर्हतीति सर्वग्रहणयोग्यो भवति स्ववेदधारणेन १०१ ॥

स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च। आनृशंस्याद्ब्राह्मणस्य भुंजते हीतरे जनाः १०१ ॥

स्वमेवेति यत्परस्याप्यन्नं ब्राह्मणो भुंक्ते परस्य वस्त्रं परिधत्ते परस्य गृहीत्वा समस्मै ददाति तदपि ब्राह्मणस्य स्वमिव स्वं वसिष्ठादिः यस्मात् ब्राह्मणस्य कारु

तस्य कर्मविवेकार्थं शेषाणां चानुपूर्वशः। स्वायंभुवो मनुर्धीमानिदं शास्त्रमकल्पयत् १०२ ॥ कुमाद ... दिकृतं वेति १०२

इदानीं ब्राह्मणप्रकृष्टकर्माभिधायकत्वेन शास्त्रप्रशंसां प्रकृत्य ये तस्य कर्मविवेकार्थमिति ब्राह्मणस्य कर्मज्ञानार्थं शेषाणां क्षत्रियादीनां च स्वायंभुवे
...स्वायंभुवो धीमान् सर्वविषयज्ञानवान् मनुरिदं शास्त्रं विरचितवान् १०२ ॥

विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः। शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केनचित् १०३ ॥

विदुषेति एतच्छास्त्राध्ययनफलं तेन ब्राह्मणेनाध्येतव्यं शिष्येभ्यश्च सम्यगेव व्याख्यातव्यं नान्येन क्षत्रियादिना अध्येतव्यमेव न तु व्याख्यातव्यं ...तावता नेन
... ब्राह्मणस्याध्ययनमात्रेण व्याख्यानाध्यापनयोरधिकारोऽस्ति त्रिवर्णस्याध्ययनमपि नियोगिकादि ... इत्यादिना विधास्यते अनुवादमात्रमेतदिति मेधा
तिथिमतं तन्मतमतिः द्विजैरध्ययनं ब्राह्मणेनैवाध्यापनव्याख्याने इत्यस्यालाभात् यत्तु श्रयोर्ध्यां रक्षया वा ... इत्यादि तद्व्रतविषयमिति व्रत
वि... ब्राह्मणो ... विधानं न भवति अनुवादत्वं माध्यस्थेन तु ... मयातिष्ठ ग्रहः १०३ ॥

11A

इदं शास्त्रमधीयानो ब्राह्मणः शंसितव्रतः मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते १०४ ॥
इदं शास्त्रमिति इदं शास्त्रं पठंस्तदीयमर्थं ज्ञात्वा संशितव्रतोऽनुष्ठितव्रतः मनोवाक्कायसंभवैः पापैर्न संबध्यते १०४ ॥
पुनाति पंक्तिं वंश्यांश्च सप्त सप्त परावरान् पृथिवीमपि चैवेमां कृत्स्नामेकोऽपि सोऽर्हति १०५ ॥
पुनातीति इदं शास्त्रमधीयान इत्यनुवर्तते अपंक्त्योपहतां पंक्तिं मात्रपर्यां निविष्टजनसमूहं पवित्रीकरोति वंशभवांश्च सप्त भवान् पित्रादी
न् पुत्रांश्च सप्त पुत्रादीन् पृथिवीमपि सर्वां सकलां प्रतिग्रहीतुं योग्यो भवति १०५ ॥
इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्द्धनं इदं यशस्यमायुष्यमिदं निःश्रेयसं परं १०६ ॥
इदमिति अभिमतस्याविनाशः स्वस्ति तस्यायनं प्रापकं पतेच्छास्त्रस्याध्ययनं स्वस्त्ययनजपहोमादिवाचकत्वाच्च श्रेष्ठं स्वस्त्ययनान्तरापेक्षया उत्कृष्टं बु
द्धिविवर्द्धनमेतच्छास्त्राभ्यासेनाशेषविधिनिषेधपरिज्ञानात् यशसे हितं यशस्यं विद्वत्तया ख्यातिलाभात् आयुष्यं ... निःश्रेयसं निःश्रेयसस्य मोक्ष
अस्मिन्धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणां चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः १०७ ...स्योपायोपदेशकत्वात् १०६
अस्मिन्निति अस्मिन् शास्त्रे धर्मोऽखिलेनोक्तः कर्मणां च विहितनिषिद्धानामिष्टानिष्टफलं चतुर्णामपि वर्णानां धर्मः ...
चारः शाश्वतः पारंपर्यागतः धर्मेऽप्याचारस्य प्राधान्यख्यापनाय पृथक् निर्देशः १०७ ॥
आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च तस्मादस्मिन्सदा युक्तो नित्यं स्यादात्मवान्द्विजः १०८
आचार इति ... आचार इति ... आत्महितेच्छुः सर्वदा ... आत्महितेच्छुरालम्बते १०८ ॥
आचाराद्विच्युतो विप्रो न वेदफलमश्नुते आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत् १०९ ॥
आचारादिति आचाराद्विच्युतो विप्रो न वैदिकफलं लभते आचारयुक्तः पुनः संपूर्णफलभाग्भवति १०९ ॥
एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिं सर्वस्य तपसो मूलमाचारं जगृहुः परं ११० एवमिति उक्तप्रकारेण
... तपसश्चान्द्रायणादेः सर्वस्य कारणमाचारं मत्वा श्रेष्ठं गृहीतवन्तः ... आचारस्य ... ११०
जगतश्च समुत्पत्तिं संस्कारविधिमेव च व्रतचर्योपचारं च स्नानस्य च परं विधिं १११ ॥

रुद्रादीनामिव समस्तवस्तुविषयं वेदेन समाप्तार्थं क्रमगति कामाह जगतश्च समुत्पत्तिमिति प्रथमोऽध्यायः धर्मोत्पत्तिं तेन जगदुत्पत्तिर्यथोक्ता... तिग्रहः ...संस्काराणां संस्कृतानां स्वास्तवादिकं च सृष्टावेवान्तर्भवति प्रतस्य प्रथमाध्याय प्रमेयं संस्काराणां जातकर्मादीनां विधिमनुष्ठानं ब्रह्मचा रिणो व्रताचरणं उपचारश्च गुर्वादीनामभिवादनोपासनादिरूपो द्वितीयविभागः यैकवद्भवतीत्येकवद्भावः प्रतद्वितीयाध्यायप्रमेयं स्नानस्य गुरुकुलान्निवर्तमानस्य संस्कारविशेषस्य परं प्रकृष्टं विधानम् ॥ १११ ॥

दारादिगमनं चैव विवाहानां च लक्षणम् । महायज्ञविधानं च श्राद्धकल्पं च शाश्वतम् ॥ ११२ ॥

दाराधिगमनमिति दाराधिगमनं विवाहः तद्विशेषाणां ब्राह्मादीनां च लक्षणं महायज्ञाः पंचवैश्वदेवादयः श्राद्धस्य विधिः शाश्वतः प्रतिसर्गम नादिप्रवाहरूपत्वान्नित्यः प्रथमतृतीयाध्यायार्थः ॥ ११२ ॥

वृत्तीनां लक्षणं चैव स्नातकस्य व्रतानि च । भक्ष्याभक्ष्यं च शौचं च द्रव्याणां शुद्धिमेव च ॥ ११३ ॥

वृत्तीनामिति वृत्तीनां जीवनोपायानां ऋतादीनां लक्षणं स्नातकस्य गृहस्थस्य व्रतानि नियमाः प्रतच्चतुर्थाध्यायप्रमेयं भक्ष्यमदव्यादि प्रभृतं लशुनादि शौचं मरणादेश्च यज्ञपात्रादेः शाहादिद्रव्याणां शुद्धिमुदकादिना ॥ ११३ ॥

स्त्रीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च । राज्ञश्च धर्ममखिलं कार्याणां च विनिर्णयम् ॥ ११४ ॥ स्त्रीधर्मयोगमिति स्त्रीणां धर्मोपायं प्रतत्पंचमिकं तापस्यं मिवानप्रस्थस्य हितं तस्य धर्मं मोक्षं संन्यासं वर्णितं धर्मं प्रतिधर्मं ... प्रतार्थं पष्ठाध्यायार्थः राज्ञोऽभिषिक्तस्य सर्वो दृष्टादृष्टार्थो धर्मः सप्तमाध्यायार्थः कार्याणामृणादानादीनामर्थिप्रत्यर्थिनोर्विनिर्णयो विचारपूर्वक

साक्षिप्रश्नविधानं च धर्मं स्त्रीपुंसयोरपि । विभागधर्मं द्यूतं च कण्टकानां च शोधनम् ॥ ११५ ॥ ... निर्णयः ११४

साक्षीति साक्षिणां प्रश्नप्रकारविधानं व्यवहाराङ्गत्वेनापि प्रतिज्ञादिवत् तत्प्रधाननिर्णयोपायत्वात् पृथक् निर्देशः प्रतदष्टमिकम् स्त्रीपुंसयोर्जायापत्योः ...धर्मो ...स्वयमभागस्य ... इत्येषापि ...भागोऽपि कार्याणां विनिर्णय इत्यनेनैव प्राप्तं तथापि पृथगधयनार्थं पृथङ्निर्देशः द्यूतविधानं ... प्रते कण्टकानां चौरादीनां शोधनं निरसनम् ॥ ११५ ॥

वैश्यशूद्रोपचारं च संकीर्णानां च संभवम् । आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं तथा ॥ ११६ ॥

वैश्यशूद्रोपचारं चेति वैश्यशूद्रयोः स्वधर्मानुष्ठानं प्रतन्नवमं प्रवं संकीर्णानामनुलोमप्रतिलोमजानामुत्पत्तिश्चापदि वजीविकोपदेशः आपद्धर्मे प्रतद्दशमे प्रायश्चित्तविधिमेकादशे ॥ ११६ ॥

12A

संसारगमनं चैव त्रिविधं कर्मसंभवं निःश्रेयसं कर्मणां च गुणदोषपरीक्षणं ॥ संसारगमनमिति त्रिविधं संसारं [illegible] उत्तम
शास्त्रे पंडत्तममध्यमाधमभेदेन त्रिविधं शुभाशुभकर्महेतुकं निःश्रेयसं मात्मज्ञाने सर्वोत्कृष्टं मोक्षलक्षणं श्रेयोहेतुत्वात् कर्मणां च विहितनिषि
देशधर्मांजातिधर्मान्कुलधर्मांश्च शाश्वतान् पाषंडगणधर्मांश्च शास्त्रेस्मिन्नुक्तवान्मनुः द्धानां कर्मणां गुणदोषपरीक्षणं ॥ ११७
देशधर्मानिति प्रतिनियतदेशेष्वनुष्ठीयमानान्देशधर्मान्ब्राह्मणादिजातिनियतान्जातिधर्मान् कुलविशेषाश्रयान्कुलधर्मान् देववाक्यागमसमाश्र
यान् निषिद्धव्रतचर्यापाषंडं तद्योगात्पुरुषोपि पाषंडः तन्निमित्ता ये धर्माः पाषंडिनां धर्मः ख्यानित्यादयः तेषां शास्त्रे यज्ञधर्मानभिधानात् गणाः समूहा
यथेदमुक्तवान्शास्त्रं पुरा पृष्टो मनुर्मया तथेदं यूयमप्यद्य मत्सकाशान्निबोधत ॥ ११९ ॥ वणिगादीनां ॥ ११८ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां प्रथमोऽध्यायः ॥ १ ॥

यथेदमिति पूर्वं मया पृष्टो मनुर्यथेदं शास्त्रमभिहितवान् तथैव यूयमनतिरिक्तं मत्सकाशाच्छृणुतेति ऋषीणां श्रद्धातिशयार्थं पुनर
भिधानम् ॥ ११९ ॥ इति श्रीकुल्लूकभट्टकृतायां मन्वर्थमुक्तावल्यां मनुवृत्तौ प्रथमोऽध्यायः ॥ १ ॥

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥ १ ॥

प्रकृष्टपरमात्मज्ञानस्य धर्ममूलत्वाय जगत्कारणं ब्रह्मस्वरूपं निरूप्याधुना ब्रह्मज्ञानाङ्गभूतं संस्कारादिरूपं धर्मं प्रतिपादयितुं धर्मसामा
न्यलक्षणं [illegible] विद्वद्भिरिति वेदविद्भिः सद्भिर्धार्मिकै रागद्वेषशून्यैरनुष्ठितो हृदयेनाभिमुखेनानुज्ञातो यः श्रेयःसाधनमभिमत
तं धर्मं [illegible] ज्ञातो भवति वेदविद्भिरित्यनेन विशेषणोपादानसामर्थ्यात् ज्ञातस्य वेदस्यैव [illegible] साधनत्वेन कारणत्वं विवक्षितं
[illegible] तस्य कर्तृत्वं वेदस्य हननेन प्राप्तामपि तो वेदप्रमाणकः श्रेयःसाधनं धर्म इत्युक्तं एवं विधो यो धर्मस्तं निबोधत उक्तार्थसंग्र
हश्लोकः वेदविद्भिस्तानीति शब्दज्ञानो विशेषणं [illegible] वेदवपि [illegible] हृदयेनाभिमुखेन ज्ञात [illegible] निर्दिशन् श्रेयः
साधनमित्याह तत्रश्लोकश्चैवं मनः वेदप्रमाणकः श्रेयःसाधनं धर्मः [illegible] प्रीतिसूर्यधर्मलक्षणं [illegible] हारीतः अथातो
धर्मं व्याख्यास्यामः श्रुतिप्रमाणको धर्मः श्रुतिश्च द्विविधा वैदिकी तान्त्रिकी च [illegible] मनुरपि श्रेयोभ्युदयलक्षणं महर्षिवि
धाप्रोक्तो वेदमूलः सनातनः अस्य सम्यगनुष्ठानात्स्वर्गो मोक्षश्च जायते इह लोके सुखैश्वर्यमतुलं च खगाधिप । श्रेयःसाधनमित्यर्थः जैमिनिरपि
इदमपि धर्मलक्षणमसूत्रयत् चोदनालक्षणोऽर्थो धर्म इति प्रयत्नचोदनया लक्ष्यते सोऽर्थः श्रेयःसाधनं ज्योतिष्टोमादिः श्येनादिः [illegible] प्रत्यवायसाधनं

13

म०
नु. स.
२

घ्येनाद्वि[illegible]त्त्ववेदप्रमाणकेष्वेयः साधनं ज्योतिष्टोमादिधर्म इति मन्वर्थः स्मृत्यादयोपि वेदमूलत्वेनैव धर्मे प्रमाणमिति दर्शयितुमा[illegible]
गतवा[illegible]द्विभेना[illegible]नुज्ञातं इत्यतः कारणं विचिकित्सा[illegible]स्मृत इति व्याख्यातवान् तन्मते वेदविद्भिरनुष्ठितः सेव्यते संहित च धर्म इति धर्मं लक्षणं
स्यात् [illegible]ष्टार्थं [illegible]मनादि साधारणं धर्मलक्षणं विवक्षितं न श्रद्दधते मेधातिथिस्तु हृदयेनाभ्यनुज्ञात इति यन्मनसो यो नो भावनादिरू
पेण कृतं हृदयस्थितिर्हृदयमित्युक्तवा

कामात्मता न प्रशस्ता न चैवेहास्त्यकामता काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः २ न १

कामात्मतेति फलाभिलाषशीलत्वं पुरुषस्य कामात्मता सा न प्रशस्ता बंधहेतुत्वात् स्वर्गादिफलाभिलाषेण काम्यानि कर्माण्यनुष्ठीयमानानि
पुनर्जन्मनेकारणं भवंति नित्यनैमित्तिकानि त्वात्मज्ञानसहकारितया मोक्षाय कल्पंते न च तस्मादिच्छामात्रमनेन निषिध्यते न यस्मादिवे
हास्त्यकामतेति यतो वेदस्वीकरणं वैदिककर्मसकलधर्मसंवन्धं च इच्छाविषयमेव २ ॥

संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः व्रतानि यमधर्माश्च सर्वे संकल्पजाः स्मृताः ३ ॥

अत्रोपपत्तिमाह संकल्पमूल इति अनेन कर्मणा इदमिष्टं फलं साध्यत इत्येवंविषया बुद्धिः संकल्पः तदनंतरमिष्टसाधनतयावगते तस्मि
न्निच्छा जायते तदर्थं प्रयत्नं कुरुते एवं यज्ञाः संकल्पसंभवाः व्रतानि यमरूपाश्च ते प्रत्यध्यायं वक्ष्यमाणाः सर्वे इत्येतेन प्रदेशेन[illegible]
स्य संकल्पादेव जायते इच्छा मनुष्याणामपि न संभवतीत्यर्थः गोविंदराजस्तु व्रतानि मनसा ग्रहणीयद्रूपाणि यमधर्माः प्रतिषेधार्थकाः इत्या
ह ३ ॥

अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् यद्यद्धि कुरुते किंचित्तत्तत्कामस्य चेष्टितं ४

अत्रैव लौकिकं व्याप्तेर्व्याख्यायते अत्रैव लौकिकं निदर्शयति कामरहितेन लोके या काचिद्भोजनगमनादि[illegible] सर्वथा निश्चेतना
कदाचिन्न दृश्यते तेन तत्सर्वं तत्तत् सर्वं कर्म लौकिकं वैदिकं च यद्यत्पुरुषः कुरुते तत्तदिच्छाकार्यं ४ ॥

तेषु सम्यक् वर्तमानो गच्छत्यमरलोकतां यथा संकल्पितांश्चेह सर्वान्कामान्समश्नुते ५ ॥ (

संकल्पितमेवांश फलाभिलाषादिभिर्यत्नियमयत्ते तेषु सम्यग्वर्तमान इति नात्रेच्छा निषिध्यते किंतु शास्त्रोक्तकर्मसम्यक् प्रवृत्तिर्विधीयते वेद
रूपत फलाभिलाषविना शास्त्रीयकर्मणामनुष्ठानं तेषु सम्यग्वृत्तिः सम्यग्वर्तमानोऽमरलोकतां अमरधर्मकत्वं ब्रह्मभावं गच्छति मोक्षं प्राप्नोतीत्यर्थः
तथाभूतश्च सर्वेष्वपि कामेष्वपि लोकेषु सर्वानभिलषितान् प्राप्नोति तथा च छांदोग्ये यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्ति
ष्ठंतीत्यादि ५

13A

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ६॥

इदानीं धर्मप्रमाणान्याह वेदोऽखिलो धर्ममूलमिति वेदः ऋग्यजुःसामाथर्वलक्षणः समस्तो विध्यर्थवादमन्त्रात्मा धर्मे मूलं प्रमाणं अर्थवा
दानामपि विध्येकवाक्यतया स्तावकत्वेन धर्मे प्रामाण्यात् यदाह जैमिनिः विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः मन्त्रार्थवादा
नामपि विधिवाक्यैकवाक्यतयैव धर्मे प्रामाण्यं प्रयोगकाले चानुष्ठीयमानस्मारकत्वेन वेदस्य च धर्मे प्रामाण्यं यथा उपवकरणाल्लक्षणं प्रत्यक्षवेदमन्त्रस
मादीनामपि तन्मूलत्वेनैव प्रामाण्यप्रतिपादनार्थमनूद्यते मन्वादीनां च वेदविदां स्मृतिर्धर्मे प्रमाणं वेदविदामिति विशेषणोपादाना
द्वेदमूलत्वेनैव स्मृत्यादीनां प्रामाण्यमभिमतं शीलं ब्रह्मण्यतादिरूपं तदाह हारीतः ब्रह्मण्यता देवपितृभक्तता सौम्यता अपरोपतापिता
अनसूयता मृदुता अपारुष्यं मैत्रता प्रियवादित्वं कृतज्ञता शरण्यता कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलं गोविन्दराजस्तु शीलं रागद्वेषप
रित्याग इत्याह आचारः कम्बलवल्कलाद्याचरणरूपः साधूनां धार्मिकाणामात्मनस्तुष्टिश्च वैकल्पिकविषयार्थपदार्थे प्रमाणं तदाह गर्गः वैक
ल्पिके आत्मतुष्टिः प्रमाणं ६

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ७॥

स्मृतेर्वेदमूलत्वेन प्रामाण्यं हेतुविशेषेण वेदमूलतामाह यः कश्चिदिति यः कश्चित्कस्यचिद्
ब्राह्मणादेर्धर्मो वेदमूलत्वेन प्रामाण्यमभिहितो यो मनुना स्मृतः स सर्वो वेदे प्रतिपादितः यस्मात् सर्वज्ञोऽसौ मनुः सर्वज्ञतया चोत्सन्नविप्रकीर्णपठ्यमानं धर्मं सम्यग्ज्ञात्वा
प्रणीतवान् मनुना धर्मं उक्तः स सर्वो वेदे प्रतिपादितः यस्मात्सर्वज्ञो सौ मनुः सर्वज्ञतया च सर्वज्ञानारण्यइव वेद इति वेदविशेषणतामाह ७।
गोविन्दराजस्तु सर्वज्ञानमय इत्यस्य सर्वज्ञानानुगुण इति
सौ वेदस्तु विधिना धर्मेण निबद्धवान्

सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा श्रुतिप्रामाण्यतो विद्वान्स्वधर्मे निविशेत वै ८॥ सर्वं त्विति सर्वं शास्त्र
जातं समवेक्ष्य निखिलं तद्विशेषेण पर्यालोच्य वेदप्रामाण्येनानुष्ठेयतया ज्ञात्वा स्वधर्मेऽवतिष्ठेत
तं वेदार्थावगमार्थमिति मीमांसाव्याकरणादिकं ज्ञानमेव चक्षुस्तेन निखिलं तद्विशेषेण पर्यालोच्य

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखं ९॥

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्मानव इह लोके धार्मिकत्वेनानुषंगिकीं कीर्तिं परलोके च धर्मफलं अनुत्तमं स्वर्गापवर्गादिसुखरूपं प्राप्नोति अनेनैवं स्तव
नात्कथनेन श्रुतिस्मृत्युदितं धर्ममनुतिष्ठेदित्युक्तं भवति ॥

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ १०॥

श्रुतिस्मृत्योः प्रतिकूलतर्केणामीमांसत्वं विधातुमर्थनिर्देशः श्रुतिस्तु वेदो विज्ञेयो धर्मेण नाचारा
नीतिविनीतिलोकधर्मसुखमंत्रास्त्रमंत्रसंबन्धयानुवादायं श्रुतिस्मृत्योः प्रतिकूल

14

म॰ टी॰ स्मृ॰ १४

दिभ्यो बलवत्त्वप्रतिपादनार्थं च तेन स्मृतिशिष्टाचारो हेयः इत्यस्य फलं श्रुतिर्वेदो मन्वादिशास्त्रं स्मृतिः ते उभे प्रतिकूलतर्केण न विचारयितव्ये इत्याह

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः। स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः॥ ११॥ लोभ्यानि धर्मप्रमाणयमीव भा प्रकाशनानीति

योऽवमन्येतेति य एते श्रुतिस्मृती द्विजोऽवमन्येत स शिष्टैर्द्विजैरध्यापनयाजनादिकर्मभ्यो निःसार्यः पूर्वश्लोके सामान्येन मीमांसानिषेधात् तत्प्रतिकूलमीमांसापि न प्रवर्तनीयेति भ्रमो माभूदिति विशेषयति हेतुशास्त्राश्रयात् वेदवाक्यमप्रमाणं वाक्यत्वात् विप्रलम्भकवाक्यवदित्यादिप्रतिकूलतर्कावष्टम्भेन चार्वाकादिर्नास्तिक इव नास्तिकोऽयं वेदनिन्दकः॥ ११॥

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥ १२॥ इदानीं मूलभावा

द्भावात् तर्भावसंभवात् वेदमूलतया एवं वेदस्मृतिशीलादिप्रकार इति दर्शयित्वा तद्धर्मप्रमाणमाह वेद इति वेदो धर्मे प्रमाणम् एकविधः
स्मृतिः ... यत्र वेदस्मृत्योः ... सदाचारः शिष्टाचारः स्वस्य च

अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते। धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः॥ १३॥ तःप्रियमात्मनः॥ १२॥

अर्थकामेष्विति अर्थकामेष्वसक्तानां अर्थकामलिप्सासक्तानां धर्मोपदेशो यस्त्वर्थकामसमीहया लोकप्रतिपत्त्यर्थं धर्ममनुतिष्ठति तस्य कर्म
फलमित्यर्थः धर्मं च ज्ञातुमिच्छतां प्रकृष्टं प्रमाणं श्रुतिः प्रकर्षबोधनेन च श्रुतिस्मृतिविरोधे स्मृत्यर्थो नादरणीय इति भावः अत एव जाबालः श्रुति
स्मृतिविरोधे तु श्रुतिरेव गरीयसी अविरोधे सदा कार्यं स्मार्तं वैदिकवत्सता भविष्यपुराणेऽप्युक्तं श्रुत्या सह विरोधे तु बाध्यते विषयं विना जैमि
निरप्याह विरोधे त्वनपेक्षं स्यादसति ह्यनुमानं श्रुतिविरोधे स्मृतिवाक्यमनपेक्षमप्रमाणं नादरणीयम् असति विरोधे मूलवेदानुमानमित्यर्थः

श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ। उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः॥ १४॥

श्रुतिद्वैधमिति यत्र पुनः श्रुत्योरेव द्वैधं परस्परविरुद्धार्थप्रतिपादनं तत्र द्वावपि धर्मौ मनुना स्मृतौ तुल्यबलतया विकल्पानुष्ठानविधानेन च विरोधाभावः
यस्मात् मन्वादिभिः पूर्वतरैरपि विद्वद्भिः सम्यक्समीचीनो द्वावपि तौ धर्मावुक्तौ समानन्यायतया स्मृत्योरपि विरोधे विकल्प इति प्रकृतोपयोगः तुल्यबलत्वे

उदितेऽनुदिते चैव समयाध्युषिते तथा। सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः॥ १५॥ श्रुत्यन्तरदाहरणमाह तुल्यबलविरो
धे विकल्पः॥ १४॥

श्रुतिद्वैधोदाहरणमाह उदितेऽनुदिते चैवेति सूर्यनक्षत्रवर्जितः कालः समयाध्युषितशब्देनोच्यते उदयात्पूर्वं मयूखकिरणाभावात् प्रविरलतारकोऽनुदितका

14A

...तः पूर्वस्य विरुद्धकालत्वेऽपि सर्वथा विकल्पेनाग्निहोत्रहोमः प्रवर्तत इति दर्शितो देशान्तरेऽप्यंशभागग्रहणायोगात् यज्ञपार्श्वे त्रिगोत्राः उदिते होतव्यमित्या-
दिका वैदिकी श्रुतिः १५

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः तस्य शास्त्रेऽधिकारोऽस्मिन्ज्ञेयो नान्यस्य कस्यचित् १६ ॥

निषेकादीति गर्भाधानादिरन्त्येष्टिपर्यन्तो यस्य ... मन्त्रैरनुष्ठानकालोपदिष्टो द्विजातेरेव ... तस्यास्मिन्मानवधर्मशास्त्रेऽध्ययनेऽधिकारो नान्यस्य कस्यचित् ... यथाधिकारः ... प्रवचनं ... ब्राह्मणकर्तृकमेवेति विदुषा ब्राह्मणेनेत्यत्र व्याख्यातम् १६ ॥

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते १७ ॥ सरस्वतीति धर्मस्य स्वरूपं प्रमाणं परिभाषितो इदानीं धर्मानुष्ठानयोग्यदेशानाह सरस्वतीदृषद्वत्योर्नद्योरुभयोर्मध्यं ब्रह्मावर्तं देशमाहुः देवनदी देवनिर्मितपाठो नदीदेशप्राशस्त्यार्थः १७

तस्मिन्देशे य आचारः पारम्पर्यक्रमागतः वर्णानां सान्तरालानां स सदाचार उच्यते १८ ॥

तस्मिन्देश इति तस्मिन्देशे प्रायेण शिष्टानां संभवात्तेषां ब्राह्मणादिवर्णानां य आचारः पारम्पर्यक्रमागतो न त्विदानीन्तनः स सदाचारोऽभिधीयते

कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः १९ ॥

कुरुक्षेत्रमिति मत्स्यादिशब्दा बहुवचनान्ता एव देशविशेषवाचकाः पञ्चालाः कान्यकुब्जदेशाः शूरसेनका मथुरादेशाः एष ब्रह्मर्षिदेशो ब्रह्माव-
र्तात्किंचिदूनः १९

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः २०

एतद्देश इति कुरुक्षेत्रादिदेशजातस्य ब्राह्मणस्य सकाशात्सर्वे मनुष्या आत्मीयमात्मीयमाचारं शिक्षेरन् २० ॥

हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः २१ ॥ हिमवदिति
उत्तरदक्षिणदिग्व्यवस्थितौ हिमवद्विन्ध्यौ पर्वतौ तयोर्यन्मध्यं विनशनात्सरस्वत्यन्तर्धानदेशात् यत्पूर्वं प्रयागाच्च यत्पश्चिमं मध्यदेशनामा देशः कथितः

आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः २२ ॥ आसमुद्रादिति आपूर्वसमुद्रात् आपश्चिमसमुद्रात् हिमवद्विन्ध्ययोश्च यन्मध्यं तमार्यावर्तदेशं पण्डिता जानन्ति मर्यादायामयमाङ् नाभिविधौ तेन समुद्रसमीपदेशानां नार्यावर्तता आर्या अत्रावर्तन्ते पुनः पुनरुद्भवन्तीत्यार्यावर्तः २२ ॥

15

म॰
नु॰ स्मृ॰
टी॰
१५

कृष्णसारस्तु चरति मृगो यत्र स्वभावतः स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः २३ ॥

कृष्णसार इति कृष्णसारो मृगो यत्र स्वभावतो वसति न तु बलादानीतः स यज्ञार्हो देशो ज्ञातव्यः अन्यो म्लेच्छदेशो न यज्ञार्ह इत्यर्थः २३ ॥

एतान्द्विजातयो देशान्संश्रयेरन्प्रयत्नतः शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्षितः २४

एतानिति ब्रह्मदेशाद्यावत्तान्द्विजातयो यत्नार्थनादेहवोर्थं वा एतान्देशान्सयत्नादाश्रयेरन् शूद्रस्तु वृत्तिपीडितो वृत्त्यर्थं सर्वदेशमप्याश्रयेत् २४

एष धर्मस्य वो योनिः समासेन प्रकीर्तिता संभवश्चास्य सर्वस्य वर्णधर्मान्निबोधत २५ ॥

एष धर्मस्येति एषा युष्माकं धर्मस्य योनिः संक्षेपेण ज्ञायो निर्ज्ञप्तिकारणं वेदोऽखिलो धर्ममूलमित्यादिनोक्तमित्यर्थः गोविन्दराजस्तु हृदयमेष
नः पूर्वाध्यात्मकधर्मे वर्तत इति विद्वद्भिः सेवित इत्यत्र ज्ञानकारणं प्रकीर्तितः पूर्वार्थस्य धर्मस्य योनिरिति व्याख्यातवान् संभवश्चास्येति जग
तः सृष्टिः कार इदानीं वर्णधर्मान् शृणुत वर्णधर्मश्च वर्णाश्च वर्णधर्माश्रमधर्मवर्णाश्रमधर्मगुणधर्मनैमित्तिकधर्माणामुपलक्षणं तेन भ
विष्यपुराणोक्ताः वर्णधर्मः स्मृतेर्लक्षणाश्रमाणामतः परो वर्णाश्रमस्ततो यस्तु गोणो नैमित्तिकस्तथा वर्णत्वमेकमाश्रित्य यो धर्मः संप्रवर्त
ते वर्णधर्मः स उक्तस्तु यथोपनयनं नृप यस्त्वाश्रमं समाश्रित्य अधिकारः प्रवर्तते स खलाश्रमधर्मस्तु भिक्षादण्डादिको यथा वर्णत्वमाश्रमत्वं
च योऽधिकृत्य प्रवर्तते स वर्णाश्रमधर्मस्तु मौञ्जीया मेखला यथा यो गुणेन प्रवर्तेत गुणधर्मः स उच्यते यथा मूर्धाभिषिक्तस्य प्रजानां परिपालन
निमित्तमेकमाश्रित्य यो धर्मः संप्रवर्तते नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा २५ ॥

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनां कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च २६ ॥

वैदिकैरिति वेदमूलत्वाद्वैदिकैः पुण्यैः शुभैर्मन्त्रप्रयोगादिभिः कर्मभिः द्विजातीनां गर्भाधानादिशरीरसंस्कारः कर्तव्यः पावनः पापक्षयहेतुः प्रेत्य परलोके संस्कारस्य संस्कृतस्य यागादिफलसंबन्धात् इहलोके च वेदाध्ययनाद्यधिकारात् २६ ॥

गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते २७ ॥

कृतः पापं संभवार्थं येषां पापक्षयहेतुत्वमतश्चाह गार्भैरिति यो गर्भशुद्धये क्रियन्ते ते गार्भा होमा गृह्योपलक्षणाः गर्भाधानादिहोमा
जातं जातस्य यत्कर्म मन्त्रवत्प्राशनं प्राशनादिरूपं तज्जातकर्म चौडं चूडाकरणाख्यं कर्म मौञ्जीनिबन्धनमुपनयनं एभिर्बैजिकं शुक्रशोणितस्थं होमादि
कल्माषादिना अपेतत्कर्मोत्पत्तिदोषात् यच्च पापं गार्भिकं वा अशुचिमातृगर्भवासजं तच्च द्विजातीनाममृज्यते २७ ॥

15A

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः २८॥

स्वाध्यायेनेति वेदाध्ययनेन व्रतैर्मधुमांसवर्जनादिनियमैर्होमैः सावित्रचरुहोमादिभिः सायंप्रातर्होमैश्च त्रैविद्याख्येन व्रतेन प्राशमादुसमृ गुणपन्यामासङ्ग्याद्ब्रह्मचर्यावस्थायां देवर्षिपितृतर्पणरूपया गृहस्थावस्थायां सुतोत्पादनेन महायज्ञैः पञ्चभिर्ब्रह्मयज्ञादिभिः यज्ञैर्ज्योतिष्टोमादिभिः ब्राह्मीयं ब्रह्मप्राप्तियोग्येयं तनुः तदवच्छिन्न आत्मा क्रियते केवलमहरहःकृततत्र ब्रह्मज्ञानेन मोक्षावाप्तेः २८॥

प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयते मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् २९॥

प्रागिति नाभिच्छेदनात्प्राक् पुरुषस्य जातकर्माख्यः संस्कारः क्रियते तदा चास्य स्वगृह्योक्तमन्त्रैः सुवर्णमधुघृतानां प्राशनं २९॥

नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत् पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ३०॥ नामधेयमिति जातकर्मेति पूर्वश्लोके जन्मनः प्रस्तुतत्वाज्जन्मापेक्षयैव दशमे द्वादशे वाहनि अस्य शिशोर्नामधेयं स्वयं संभवे कारयेत् अथवा प्रशस्ते वाऽनतिक्रान्ते नामकर्म विधीयत इति शङ्खवचनादशमेऽहन्यतीते एकादशेऽहनीति व्याख्येयं तत्र यथाकरणोपप्रशस्ते तिथौ प्रशस्ते एव मुहूर्ते नक्षत्रे वा गुणान्विते वज्योतिषागमोक्ते कर्तव्यमाह्लादः वयार णे ३०॥

मङ्गल्यं ब्राह्मणस्य स्यात्क्षत्रियस्य बलान्वितं वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ३१॥

मङ्गल्यमिति ब्राह्मणादीनां यथाक्रमं मङ्गलबलधननिन्दावाचकानि शुभबलवसुदीनादीनि नामानि कर्तव्यानि ३१॥

शर्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितं वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतं ३२॥

इदानीमुपपदनियमार्थमाह शर्मवद्ब्राह्मणस्येति ये शर्मादयः यथाक्रमं शर्मरक्षापुष्टिप्रेष्यवाचकानि कर्तव्यानि शर्मवर्मभूतिदासादीनि उपपदानि कार्याणि उदाहरणानि शुभशर्मा बलवर्मा वसुभूतिः दीनदास इति तथा च यमः शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् विष्णुपुराणे तु क्रमशर्मवद्ब्राह्मणस्योक्तं वर्मेति राज्ञः संयुतं गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ३२॥

स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरं मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ३३॥ स्त्रीणामिति सुखोच्चार्यमक्रूरार्थं वाविस्पष्टार्थं अस्वप्रियं मनःप्रीतिजननं मङ्गलवाचि दीर्घस्वरान्तं आशीर्वादवाचकेनाभिधानेन शब्देनोपेतं स्त्रीणां नामकर्तव्यं यथा यशो

चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ३४ दादेवेति ३३॥

मा॰ नु॰ से॰ १९ 16

चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् मीति चतुर्थे मासे बालस्य जन्मगृहान्निष्क्रमणमादित्यदर्शनार्थं कार्यं अन्नप्राशनं च षष्ठे मासे यद्वा कुलधर्मत्वेन यन्मंगलमिष्टं तत्कर्तव्यं तेनाक्तकालादन्यकालेऽपि निष्क्रमणं तथा च यमः ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनं सक
लसंस्कारविषये ज्ञायते तन्नाम्ना षष्ठीदिकमप्युपपदं कुलाचारेण कर्तव्यं ३४ ॥

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ३५

चूडाकर्मेति चूडाकरणं प्रथमे वर्षे तृतीये वा द्विजातीनां धर्मतो धर्मार्थं कार्यं श्रुतिचोदनात् यत्र वाणाः संपतन्ति कुमारा विशिखा इवेति मं
त्रलिंगात्कुलधर्मानुसारेणायं व्यवस्थितविकल्पः अत एवाश्वलायनगृह्यम् तृतीये वर्षे चूडाकरणं यथाकुलधर्मं वा ३५ ॥

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनं गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ३६ ॥ गर्भाष्टम इति गर्भा
द्यष्टमे वर्षे ब्राह्मणस्योपनायनं कर्तव्यं उपनयनमेवोपनायनं अन्येषामपि दृश्यत इति दीर्घः गर्भैकादशे क्षत्रियस्य गर्भद्वादशे वैश्यस्य ३६

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ३७ ब्रह्मवर्चसकामस्येति वे
दाध्ययनतदर्थज्ञानादिप्रकर्षकृतं तेजो ब्रह्मवर्चसं तत्कामस्य ब्राह्मणस्य गर्भपंचमे वर्षे उपनयनं कार्यं क्षत्रियस्य हस्त्यश्वादिराज्यबलार्थिनो
गर्भषष्ठे वैश्यस्य बहुकृष्यादिचेष्टार्थिनो गर्भाष्टमे यद्यपि वर्षाणामेव प्रकृतत्वात् यद्यपि बालस्य कामना न संभवति तथापि तत्पितुरेव तत्फलकामना-

आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः नातिवर्तते गृहोपवर्त्यते ३७ ॥ ३८

आषोडशादिति अभिविधावाङ् ब्राह्मणक्षत्रियविशां अष्टमैकादशद्वादशवर्षे गौणमुख्यविवक्षितत्वात् षोडशवर्षपर्यन्तं ब्राह्मणस्य सावित्र्यनु
वचनं उपनयनं नातिक्रान्तकालं भवति क्षत्रियस्य द्वाविंशतिपर्यन्तं वैश्यस्य चतुर्विंशतिपर्यन्तं अत्र मर्यादायामाङ् केचिद्वाप्यापस्तंबमनुवदन्
ति तथा च यमः पतितायस्य सावित्री दशवर्षाणि पंच च ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः
विवस्वतः सुतः श्रीमान्यमो धर्मार्थतत्त्ववित् सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः हविष्यं भोजयेदन्नं ब्राह्मणान्सप्त पंच वा ३८ ॥

अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ३९

अत ऊर्ध्वमिति एते ब्राह्मणादयो यथाकालं यो यस्यानुकल्पिकोऽप्युपनयनकाल उक्तः षोडशवर्षादिपर्यन्तं तत्रासंस्कृतास्तत ऊर्ध्वं सावि
त्रीपतिताः उपनयनहीनाः शिष्टगर्हिता व्रात्यसंज्ञा भवन्ति संज्ञाप्रयोजनं च व्रात्यानां याजनं कृत्वेत्यादिमां व्यवहारसिद्धिः ३९ ॥

नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् ब्राह्मान्यौनांश्च संबन्धानाचरेद्ब्राह्मणः सह ४०

नैतैरिति एतैरपूतैर्यथाविधिप्रायश्चित्तमकृतवद्भिः सह आपत्कालेपि कदाचिदध्यापनकन्यादानादीन्संबन्धान् ब्राह्मणो न कुर्यात् ४०

कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ४१ कार्ष्णरौरववास्तानीति

कार्ष्ण इति विशेषा[illegible]यानपि कृष्णमृगविशेषः रुरुर्मृगविशेषः हरिणमेणशंबराः कार्ष्णेरवा ब्राह्मणस्य वचनाच्च कृष्णमृगो गृह्यते कृष्णमृगरुरु
वस्तचर्माणि ब्रह्मचारिण उत्तरीयाणि वसीरन् वसीरन्नुत्तरीयाणीति गृह्यवचनात् तथा शाणक्षौमाविकानि वसनानि ब्राह्मणादयः क्रमेण परिदधीरन् ४१

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ४२

मौञ्जीति मुञ्जमयी त्रिगुणा समगुणत्रयनिर्मिता सुखस्पर्शा ब्राह्मणस्य मेखला कर्तव्या क्षत्रियस्य मूर्वामयी ज्या धनुर्गुणरूपा वैश्यस्य शणतन्तुमयी त्रिगुणा प्रदक्षिणा मेखला इति सामान्येन प्रचेतसा त्रिगुणा
मेखला त्रिवृत्त्वाभिधानात् ४२

मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ४३

मुञ्जालाभे तु कर्तव्या इति बहुवचननिर्देशाद्ब्रह्मचारित्रयस्य प्रकृतत्वात् मुञ्जालाभे विषये ज्यायाः समत्वात् कोशादीनां तृणानां विधानात्
मुञ्जाद्यलाभ इति ... बहुवचनमुपपन्नं ... ज्यायाः मुञ्जाद्यलाभे
ब्राह्मणादीनां यथाक्रमं कुशाश्मन्तकबल्वजैः मेखलाः कार्याः त्रिगुणेनैकग्रन्थिना ... त्रिभिः पञ्चभिर्वा ग्रन्थिभिः
विदेशात् ... यथाकुलाचारं विकल्पः ... ४३

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ४४ कार्पासमिति यदीयाः
... ब्राह्मणस्य कार्पासमुपवीतं ... मेखलामनिर्मितं त्रिवृदिति त्रिगुणीकृत्य ऊर्ध्ववृतं
... त्रिगुणीकृत्य त्रिगुणीकार्यं ...
त्रिवृतं कार्यं ... देवलोऽप्याह यज्ञोपवीतं कुर्वीत सूत्राणि नव तन्तवः ४४

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ४५

म॰ 17
तु॰ मे॰
२

ब्राह्मण इति। यद्यपि दण्डलिङ्गस्यानन्वयावगमात् प्रायाणमपि समुच्चितैव प्राप्तं तथापि केशान्तिको ब्राह्मणस्य दण्डः कार्य्य इति तथा प्रति
गृह्येप्सितं दण्डमिति विधाने एकत्वस्य विवक्षितत्वात् बैल्वः पालाशो वा दण्ड इति वाशिष्टविकल्पदर्शनात् एकस्यैव दण्डस्य धारणं विकल्पितं।
यो वैकल्पिकब्राह्मणस्यैव यात् समुच्चयाद्धेतोनान्यपदे ब्राह्मणादयो विकल्पेन त्रयो दण्डा वक्ष्यमाणाः कार्य्यं कर्तुमर्हन्तीति ४५ ॥

केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः। ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः ४६

केशान्तिक इति केशललाटनासिकापर्य्यन्तपरिमाणक्रमेण ब्राह्मणादीनां दण्डाः कर्तव्याः ४६ ॥

ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः। अनुद्वेगकरा नॄणां सत्वचो नाग्निदूषिताः ४७ ॥

ऋजव इति ते दण्डा अव्रणा अच्छिन्नाः शोभनदर्शनाः सवल्कलाः अग्निदाहरहिताश्च भवेयुः ४७ ॥

प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करं प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ४८ ॥

नवैतेः प्राणिजातमुद्वेजनीयमित्याह प्रतिगृह्येप्सितमिति उक्तलक्षणं शास्त्रनिर्दिष्टं दण्डं गृहीत्वा आदित्याभिमुखो भूत्वाग्निं प्रदक्षिणी कृत्य यथाविधि भै

भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः। भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरं ४९ ॥ क्ष्यं चरेत् ४८ ॥

भवदिति ब्राह्मणो भवतिभिक्षां देहीति भवच्छब्दपूर्वं भिक्षां याचनवाक्यमुच्चारयेत् क्षत्रियो भिक्षां भवति देहीति भवन्मध्यं वैश्यो भिक्षां देहि भव

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजां भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ५० तीति भवदुत्तरं ४९

मातरं वेति उपनयनाङ्गभूतां भिक्षां प्रथमं मातरं भगिनीं वा मातुः सहोदरां वा याचेत् या चैनं ब्रह्मचारिणं प्रत्याख्यानेन नावमन्येत पूर्वासम्भवे उत्तरापरिग्रहः ५०

समाहृत्य तु तद्भैक्षं यावदन्नममायया। निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ५१ समाहृत्येति तद्भैक्षं बहुभ्य आहृत्य

यावदन्नं तृप्तिमात्रोचितं गुरवे निवेद्य निवेदनेऽकृते वाऽमायया न कदन्नेन सदन्नप्रच्छादनं एवमेतत् गुरुणा दोषेति तीत्यादिमायया क्षतिरेकेणात्तदनुज्ञातो वाचमनं

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः। श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः कृत्वा शुचिः सन्भुञ्जीत प्राङ्मुखः ५१

इदानीं काम्यभोजनमाह आयुष्यमिति ऋतं ५२ ॥ आयुषे हितं सम्यक् प्राङ्मुखो भुङ्क्ते आयुःकामः प्राङ्मुखो भुञ्जीत यशसे हितं दक्षिणामु

खः श्रियं प्रत्यङ्मुखः ऋतं सत्यं तस्य फलमिच्छन्नुदङ्मुखो भुञ्जीत ५२ ॥

17A

उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत् ५३ उपस्पृश्येति निषेध गृहस्थेऽप्युपादानमत्रिपुरुषपि भोजनात्प्रागाचमनं विहितं तथा चाद्भिः खानि च संस्पृशेदिति गुणविधानार्थोऽनुवादः नित्यब्रह्मचर्यादेरपि द्विजा श्चमात्रमश्नीत समाहितोऽनन्यमनाः भुक्त्वा चाचामेत् सम्यग्यथाशास्त्रं तेन प्रक्षालितहस्तपादो चाचि त्रिः पिबेदम्बु वीक्षितमित्यादि दत्तापुत्राणि संस्पृशे त् जलेन खानीन्द्रियाणि षट्छिद्राणि च स्पृशेत् तानि च शिरःस्थानि खानि चक्षुःश्रोत्रादीनि गृहीत्वा तानि खानि चोपस्पृश्यात् श्रोत्रशीर्षण्यानीति गो तमवचनात् उपस्पर्शनेन कृत्वा चोपस्पृशेदिति पृथग्विधानात् त्रिरभ्यासमाचमनं स्पर्शनादिकमिति कर्तव्यता इति दर्शितम् ५३

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः ५४ ॥

पूजयेदशनमिति. सर्वदान्नं पूजयेत् तदुक्तमादिपुराणे अन्नं विष्णुः स्वयं प्राह इत्यनुवृत्तो प्राणार्थं मां सदा ध्यायेत् स मां सम्पूजयेत्सदा इति दृष्ट्वान्नं दोषा न् दृष्ट्वा हृष्येत् प्रसीदेच्चेति हेत्वन्तरमपि खेदमन्नदर्शनेन त्यजेत् प्रतिनन्देत् नित्यमस्माकमेतदस्त्विति अभिधाय वन्दनं प्रतिनन्दनम् तदुक्तमा दिपुराणे अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः कथयेत्ततः अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वन्दयेत् सर्वशः सर्वमन्नम् ५४ ॥

पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम् ५५

पूजितमिति यस्मात्पूजितमन्नं सामर्थ्यं वीर्यं च ददाति अपूजितं पुनरेतदुभयं नाशयति तस्मात्सर्वदान्नं पूजयेदिति पूर्वश्लोकवाक्यतात्प र्यमिदं फलश्रवणमर्थवादमात्रं दीनत्वमवतिष्ठते कामनाविषयेणापि नित्यश्रुतिरविना नित्यश्रुतिविरोधात् फलश्रवणमस्त्यर्थमि तिमेधातिथिगोविन्दराजौ ५५

नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैव तथान्तरा न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्वचिद्व्रजेत् ५६

नोच्छिष्टमिति भुक्तावशेषं कस्यचिन्न दद्यात् वक्ष्यमाणं प्रातरायं सायं मात्रं विवक्षया शिष्टो अन्नेन च सायंप्रातर्निषेधेन शूद्रस्याप्युच्छिष्टदानविषेधसिद्धेः नोच्छिष्टं हविष्कृतमिति शूद्रगोचरनिषेधस्यात्यर्थः स्नातकव्रतताथः दिवासायंभोजनयोश्च मध्ये न भुञ्जीत अतिहृद्यत्यतिभोजनं न कुर्यात् मात्रातिमात्रातिमात्रं चरेदिति वक्ष्यमाणस्नातकव्रतार्थम् उच्छिष्टः सन् क्वचिन्न गच्छेत् ५६ ॥

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ५७ ॥ अतिभोजने दोषमाह

अनारोग्यमिति आरोग्यो रोगाभावः तस्मै हितमारोग्यमनायुष्ये हितमायुष्यं यस्मादतिभोजनमनारोग्यमनायुष्यं च भवति अजीर्णजनकत्वेन रोगमरणहेतुत्वात् अस्वर्ग्यं च स्वर्गहेतुयागादिविरोधित्वात् अपुण्यमितरपुण्यप्रतिपक्षत्वात् लोकविद्विष्टं बहुभोजनतया लोके निन्दनात् तस्मात्तन्न कुर्यात् ५७

म॰ नु॰ से॰ १८ 18

ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ५८ ब्राह्मेणेति ब्राह्मादिसं-
ज्ञेयं प्राक्संज्ञाव्यवहारार्थं तस्य पर्याचनं तत् ब्रह्म प्रजापतिर्देवता कस्मिं भवति प्रयोगतः प्रमाणात् तीर्थं प्रश्नोपि पावनगुणयोगात् ब्राह्मेण तीर्थेन सर्वदा
विप्रादिराचामेत् कः प्रजापतिस्तदीयः कायः स्वःस्वेदमिदं त्रिदशाः देवाः त्रैदशिको देवः ताभ्यां वा पित्र्येण तीर्थेन नैव कदाचिदाचामेत्
अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ५९ प्रश्नसिद्धत्वात् ५८
ब्राह्मादितीर्थान्याह अङ्गुष्ठमूलस्येति अङ्गुष्ठमूलस्याधो भागे ब्राह्मं कनिष्ठाङ्गुलिमूले कायं अङ्गुलीनामग्रे दैवमङ्गुष्ठप्रदेशिन्योर्मध्ये पित्र्यं तीर्थम
नादयस्त्वाहुः अपि कायमङ्गुलिमूले तयोरधः इत्यत्र चाङ्गुलिमात्रं श्रुतं तथापि स्मृत्यन्तराद्विशेषपरिग्रहः तथा च याज्ञवल्क्यः कनिष्ठादेशिन्य-
ङ्गुष्ठमूलान्यग्रं करस्य च प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ५९
त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ६० ॥
सामान्योपदिष्टस्याचमनस्यानुष्ठानक्रममाह त्रिराचामेदिति पूर्वं ब्राह्मादितीर्थेन जलगण्डूषत्रयं पिबेत् अनन्तरं संवृतौष्ठाधरौ वारद्वयमङ्गुष्ठ-
मूलेन संमृज्यात् संवृतौष्ठाङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखमिति दक्षिणाविशेषाभिधानात् खानि चेन्द्रियाणि जलेन स्पृशेन्मुखस्य समभिधानात् मु-
खस्थान्येव गौतमो ह्याह खानि चोपस्पृशेच्छीर्षण्यानि ह्यात्मेति पुरुष इति उपनिषत्सु हृदयदेशेनात्मनः श्रवणादात्मानं हृदयं शिर-
अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित् शौचेप्सुः सर्वदाचामेदेकान्ते प्रागुदङ्मुखः श्चाद्भिरेव स्पृशेत् ६० ॥
अनुष्णाभिरिति अनुष्णाभिः फेनवर्जिताभिरद्भिः ब्राह्मादिः ६१ दितीर्थेन शौचमिच्छन् एकान्ते जनैरनाकीर्णे शुचिदेशे ह्यन्यः प्राङ्मुख
उदङ्मुखो वा सर्वदाचामेत् अप्वत्यन्ततश्चाभिः कारणादित्यभिधानात् व्याध्यादिकारणव्यतिरेकेणाप्याचामेत् व्याध्यादौ तदुष्णीकृता-
भिराचमने दोषाभावः तीर्थव्यतिरेकेणाचमने शौचाभावइति दर्शयितुमुक्तस्यापि तीर्थस्य पुनर्वचनम् ६१ ॥
हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः ६२
हृद्गाभिरित्याचमनजलपरिमाणमाह ब्राह्मणो हृदयगामिनीभिः वैश्योऽन्तरास्यप्रविष्टाभिः कण्ठमप्राप्ताभिरपि शूद्रो जिह्वौष्ठान्तेनापि
स्पृष्टाभिरद्भिः पूतो भवति अन्तत इति तत्तीयाशेजेभिः ६२ ॥
उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः सव्ये प्राचीन आवीती निवीती कण्ठसज्जने ६३ ॥

18A हृतेइति आचमनांगतां उपवीतस्य दर्शयितुमुपवीतलक्षणं तत्प्रसंगेन प्राचीनावीतित्वादिलक्षणमाह दक्षिणपाणावुद्धृते वा[illegible]
दक्षिणकक्षावलंबे यज्ञसूत्रे च सव्ये उपवीती द्विजः कथ्यते वामपाणावुद्धृते दक्षिणस्कंधस्थिते वामकक्षावलंबे प्राचीनावीती भण्यते
प्राचीनावीतीति छंदोनुरोधात् उक्तं तथा च गोभिलः दक्षिणं बाहुमुद्धृत्य शिरोवधाय सव्ये अंसे प्रतिष्ठापयति दक्षिणं कक्षमवलंबते भवति
यज्ञोपवीती भवति सव्यं बाहुमुद्धृत्य शिरोवधाय दक्षिणे अंसे प्रतिष्ठापयति सव्यं कक्षमवलंबते भवत्येवं प्राचीनावीती भवति निवीती सकंठ
मज्जनइति शिरोवधाय दक्षिणपाणावुद्धृते कंठादेव मज्जने सज्ज्वालंबे यज्ञसूत्रे चैवमेव निवीती भवति ६३ ॥

मेखलामजिनं दंडमुपवीतं कमंडलुं अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रवत् ६४ ॥
मेखलामिति मेखलादीनि विनष्टानि भिन्नानि छिन्नानि च जले प्रक्षिप्यान्यानि नवानि स्वस्वगृह्योक्तमंत्रैर्गृह्णीयात् ६४ ॥

केशांतः षोडशे वर्षे ब्राह्मणस्य विधीयते राजन्यबंधोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ६५ केशांत इति केशांताख्यो
गृह्योक्तसंस्कारः गर्भादिसंख्यया वर्षाणामिति बौधायनवचनात् गर्भषोडशे वर्षे ब्राह्मणस्य क्षत्रियस्य गर्भाद्द्वाविंशे वैश्यस्य ततो [illegible]

अमंत्रिका तु कार्येयं स्त्रीणामावृदशेषतः संस्कारार्थं शरीरस्य यथाकालं यथाक्रमं ६६ केगर्भे च तद्विंशके तत्याः ६५
म ६६ अमंत्रिकेति इयमावृदयं जातकर्मादिक्रियाकलापः समग्रः उक्तकालक्रमेण शरीरसंस्कारार्थं स्त्रीणाममंत्रकः कार्यः ६६

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः पतिसेवा गुरौ वासो गृहार्थोग्निपरिक्रिया ६७ ॥
[illegible] उपनयनं [illegible] विधानमाह वैवाहिकइति वैवाहिको विधिः स्त्रीणां वैदिकः संस्कारः उपनयनाख्यो मन्वादिभिः स्मृतः पतिसेवै
व गुरुकुलवासो वेदाध्ययनरूपः गृहकृत्यमेव समायंप्रातः समिद्धोमरूपोग्निपरिचर्यातस्मात् विवाहादेरुपनयनस्थाने विधानादुपनयनाद्यो

एष प्रोक्तो द्विजातीनामौपनायनिको विधिः उत्पत्तिव्यंजकः पुण्यः कर्मयोगं निबोधत ६८ ॥ निवृत्तिरिति ६
[illegible]ति औपनायनिक इति प्रकृतिकादिनाड भयपदह्विः अयं द्विजातीनां उपनयनसंबंधी कर्मकलापः उक्तः उत्पत्तेर्द्वितीयजन्मनो व्यंज

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः आचारमग्निकार्यं च संध्योपासनमेव च ६९ ॥ कः ६८
इदानीं उपनीतस्य येन कर्मणा योगस्तं शृणुतेत्याह उपनीयगुरुरिति गुरुः शिष्यमुपनीय प्रथममेकालिंगे गुदे तिस्र इत्यादि

ग्रस्योणिम्।

शिष्यं …नेन तु मनाग्याचारमग्नेः सायंप्रातः समिद्धोमावस्थानं समन्त्रकसंध्योपासनविधिं च शिक्षयेत् ६९ ॥

शौचं स्नानेन … ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ७० ॥

अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः कृताञ्जलिः पवित्रवासाः कृतेन्द्रियसंयमो गुरुणाध्याप्या

अध्ययनं करिष्यमाणः शिष्यो यथाशास्त्रं कृताचमनः उत्तराभिमुखः ब्रह्माञ्जलिकृत इति वक्ष्यमाणहिताग्न्यादिष्वप्यनेन नक

अध्येष्यमाणमिति अध्ययनं … गोतमवचनात् प्राङ्मुखस्यापि अध्ययनं ब्रह्माञ्जलिकृत इति … लघुहस्तवासाः परनिपातः ७० ॥

…श्च प्राङ्मुखो दक्षिणतः शिष्य उदङ्मुखो वेति

म. स. 19

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः

ब्रह्मारम्भेऽवसाने चेति वेदाध्ययनतः ७१ आरम्भे कर्तव्ये समाप्ते च कृते गुरोः पादोपसंग्रहणं कर्तव्यं हस्तौ संहत्य संश्लिष्टौ कृत्वा अध्येतव्यम् स ब्रह्माञ्जलिः स्मृत इति पूर्वश्लोकोक्तब्रह्माञ्जलिस्वरूपव्याकारः ७१ ॥

व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः ७२

व्यत्यस्तपाणिनेति पादोपसंग्रहणं गुरोः व्यत्यस्तपाणिना कार्यमिति विधीयते कीदृशो व्यत्यासः कार्य इत्यत आह सव्येन पाणिना सव्यः पादो दक्षिणेन पाणिना दक्षिणः पादः गुरोः स्प्रष्टव्यः … ७२ ॥

सव्येन पादावभिवादयेत दक्षिणापरिभावेन …

अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ७३

अध्येष्यमाणमिति अध्ययनं करिष्यमाणं शिष्यं सर्वदा अनलसो गुरुरधीष्व भो इति प्रथमं वदेत् शेषे विरामोऽस्त्विति अभिधाय विरमेत् निवर्तेत ७३ ॥

ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यति ७४

ब्राह्मण इति … वेदस्याध्ययनारम्भे अध्ययनसमाप्तौ चोंकारं कुर्यात् यस्मात् पूर्वं यस्योंकारो न कृतः तत्स्रवति शनैः शनैर्नश्यति यस्य परस्तान्न कृतस्तद्विशीर्यति … ७४ ॥

प्राक्कूलान्पर्युपासीनः पवित्रैश्चैव पावितः प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति ७५

प्राक्कूलानिति प्राक्कूलान् प्रागग्रान् दर्भान् अध्यासीनः पवित्रैः कुशैः करद्वयस्थैः पवित्रीकृतः प्राणायामस्त्रयः पञ्चदशमात्रा इति गोतमस्मरणात् पञ्चदशमात्रैस्त्रिभिः प्राणायामैः प्रयतः अकारादिलघ्वक्षरकालश्च मात्रा ततोऽध्ययनार्थमोंकारमर्हति ७५ ॥

अकारं चाप्युकारं च मकारं च प्रजापतिः वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च ७६ ॥

अकारं चेति एतदक्षरमेतां चेति वक्ष्यति तस्यायं शेषः अकारं उकारं मकारं च प्रणवावयवभूतं त्रयं वेदत्रयात् प्रजापतिर्भूर्भुवः स्वरिति व्याहृतित्रयं च क्रमेणादूदुहत् उद्धृतवान् ७६

त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् । तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥ ७७ ॥

त्रिभ्य एवेति तथा त्रिभ्य एव वेदेभ्यः ऋग्यजुः सामभ्यः तदित्यृच इति प्रतीकेनानूदितायाः सावित्र्याः पादं पादमिति त्रीन्पादान् ब्रह्मा चकर्ष परमेष्ठीति परमे स्थाने तिष्ठतीति परमेष्ठी ७७

एतदक्षरमेतां च जपन्व्याहृतिपूर्विकाम् । संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥ ७८ ॥

एतदक्षरमिति एतदक्षरमोंकाररूपमेतां च त्रिपदां सावित्रीं व्याहृतित्रयपूर्विकां संध्याकाले जपन्वेदज्ञो विप्रादिर्वेदत्रयाध्ययनपुण्येन युक्तो भवति अतः संध्याकाले प्रणवव्याहृतित्रयोपेतां सावित्रीं जपेदिति ७८ ॥

सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः । महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ॥ ७९ ॥

सहस्रकृत्व इति संध्यायामन्यत्र च काले एतत्सहस्रकृत्वः प्रणवव्याहृतित्रयसावित्र्यात्मकं त्रिकं ग्रामाद्बहिर्नद्यादौ जप्त्वा मासेन महतोऽप्येनसो मुच्यते यथा सर्पः कञ्चुकान्मुच्यते तस्मात्पापक्षयार्थमिदं जपनीयमिति प्रकरणाद्गम्यते ७९ ॥

एतयर्चा विसंयुक्तः काले च क्रियया स्वया । ब्रह्मक्षत्रियविड्योनिर्गर्हणां याति साधुषु ॥ ८० ॥

एतयर्चेति संध्यायामन्यत्र च समये वा सर्वदैतया सावित्र्या विमुक्तः त्यक्तसावित्रीजपः स्वकीयया क्रियया च समये प्रातर्होमादिरूपया स्वकालेन ब्राह्मणः क्षत्रियो वैश्यो वा साधुषु निन्दां गच्छति तस्मात्स्वकाले सावित्रीजपं स्वक्रियां च न त्यजेत् ८० ॥

ओंकारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः । त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥ ८१ ॥

ओंकारपूर्विका इति ओंकारपूर्विकास्तिस्रो व्याहृतयः भूर्भुवः स्वरित्येताः अव्ययाः ब्रह्मावाप्तिफलत्वेनाव्ययाः त्रिपदा च सावित्री ब्रह्मणो वेदस्य मुखमाद्यं तस्मात्तत्पूर्वकं वेदाध्ययनारम्भात् अथवा ब्रह्मणः परमात्मनः प्राप्तिद्वारमेतदध्ययनजपादिना निष्पापस्य ब्रह्मसाक्षात्कारोपायत्वात्

योऽधीतेऽहन्यहन्येतांस्त्रीणि वर्षाण्यतन्द्रितः । स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान् ॥ ८२ ॥

अतएवाह योऽधीत इति यः प्रत्यहमनलसः सन्सावित्रीं प्रणवव्याहृतियुक्तां वर्षत्रयमधीते स परं ब्रह्माभिमुख्येन गच्छति स वायुभूतो वायुरिव कामचारी जायते खमाकाशं तदेवास्य मूर्तिरिति खमूर्तिमान् भवति शरीरस्याप्यभावात् ब्रह्मैव संपद्यते ८२ ॥

म॰ मु॰ मे॰ ४० 20

एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ८३ एकाक्षरमिति एकाक्षरमोंक
ारं परं ब्रह्म परब्रह्मावाप्तिहेतुत्वात् ओंकारस्य जपेन तदर्थस्य च परस्य ब्रह्मणो भावनया तदवाप्तेः प्राणायामाः सप्रणवसव्याहृतिसशिरस्कगायत्रीभिः
त्रिरावृत्तिभिः कृताश्चान्द्रायणादिभ्योपि परं तपः प्राणायामा इति बहुवचननिर्देशात् त्रयोवश्यं कर्तव्या इत्युक्तं सावित्र्याः प्रकृष्टमन्यन्मन्त्रजा
तं नास्ति मौनादपि सत्यं वाग्विशिष्यते एषां चतुर्णामुत्कर्षाभिधानादेतासामुपासनीयतानीति विधिः कल्प्यते यद्यपीयं रूपानेक एकाक्षरपरं ब्रह्मप्राणा
यामं परं तप इति पठितं व्याख्यातं चैकाक्षरपरस्य तदेकाक्षरपरं प्रणवं प्राणायामपरमिमिमिथानि धियप्रभृतिभिर्वृद्धैर्लिखितं यतः लिखमाख

क्षरन्ति सर्वा वैदिक्यो जुहोतियजतिक्रियाः अक्षरं त्वक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः ८४ तेनत्र सतेनायथणा ८
क्षरन्तीति सर्वा वेदविहिता होमयागादिरूपाः क्रियाः स्वरूपतः फलतश्च विनश्यन्ति अक्षरं त्वक्षरं प्रणवरूपमक्षयं ब्रह्मप्राप्तिहेतुत्वात् फलहेतो
र्णादक्षरस्याभावस्याविनाशात् कथमस्य ब्रह्मप्राप्तिहेतुत्वमित्यत आह ब्रह्म चैवेति च शब्दो हेतौ यस्मादयं ब्रह्म प्रजानामधिपतिरित्यतः ब्रह्मतद्वाचको
कारः स्वरूपतो ब्रह्मप्रतिपादकत्वेन वाच्यब्रह्मत्वे उभयथापि ब्रह्मत्वेन प्रतिपादकत्वेन वायमुपासितो जपकाले मोक्षहेतुत्वेनेदं दर्शितं ८४

विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ८५
विधियज्ञादिति विधिविषयो यज्ञो विधियज्ञो दर्शपौर्णमासादिस्तस्मादुक्तानां प्रणवादीनां जपयज्ञो दशगुणाधिकः सोऽप्युपांशुश्चेत्तदा श
तः तदा शतगुणाधिकः यत्समीपस्थोपि परो न शृणोति तदुपांशु मानसस्तु जपः सहस्रगुणाधिकः यत्र जिह्वोष्ठमनागपि न चलति स मान

ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ८६ ॥ सः ८५।
ये पाकयज्ञा इति ब्रह्मयज्ञादन्ये ये पंच महायज्ञान्तर्गता वैश्वदेवहोमबलिकर्मनित्यश्राद्धातिथिभोजनात्मकाश्चत्वारः पाकयज्ञाः विधि
यज्ञाः दर्शपौर्णमासादयः तैः सहिता जपयज्ञस्य षोडशीमपि कलां न प्राप्नुवन्ति जपयज्ञस्य षोडशांशेनापि न समा इत्यर्थः ८६ ॥

जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ८७ ॥
जप्येनैवेति ब्राह्मणो जप्येनैव तु संसिद्धिं लभते मोक्षप्राप्तियोग्यो भवति अन्यद्वैदिकं यागादिकं करोतु न करोतु वा यस्मान्मैत्रो
ब्राह्मणः ब्रह्मणः संबन्धी ब्रह्मणि लीयत इत्यागमेषूच्यते मित्रमेव मैत्रः स्वार्थेऽण् यागादिषु पशुबीजादिवधात् सर्वप्राणिप्रियत्वमस्य
स्ति तस्माद्यागादिना विनापि प्राणिवधं जपनिष्ठाविस्तरतीति जपप्रशंसा न तु यागादीनां निषेधः तेषामपि शास्त्रीयत्वात् ८७ ॥

२०१ इंद्रियाणां विचरतां विषयेष्वपहारिषु संयमे यत्नमातिष्ठेद्विद्वान्यंतेव वाजिनां ८८ इदानीं सर्ववर्णानुष्ठेयमेका
लपुरुषार्थोपयुक्तमिंद्रियसंयममाह इंद्रियाणामिति इंद्रियाणां विषयेष्वपहरणशीलेषु वर्तमानानां तथा विषयदोषान्‌ जानन्‌ यः
एकादशेंद्रियाण्याहुर्यानि पूर्वे मनीषिणः तानि सम्यक्प्रवक्ष्यामि यथावदनुपूर्वशः ८९ त्नं कुर्यान्सारथिरिव रथयोजितानामश्वा नां ८८
एकादशेति पूर्वे पंडिता यान्येकादशेंद्रियाण्याहुस्तानि सर्वाणि शिष्टार्थं सर्वाणि कर्मेणानामतश्च क्रमाद्वक्ष्यामि ८९ ॥ ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पंचमी पायूपस्थं हस्तपादं वाक्चैव दशमी स्मृता ९० श्रोत्रमिति तेषु एकादशसु श्रो
त्रादीनि दशैतानि बाह्यानींद्रियाणि नामतो निर्दिशति पायूपस्थं हस्तपादमिति द्वंद्वश्च प्राणितूर्यांगसेनांगानामिति एकवद्भावः ९०।
बुद्धींद्रियाणि पंचैषां श्रोत्रादीन्यनुपूर्वशः कर्मेंद्रियाणि पंचैषां पाय्वादीनि प्रचक्षते ९१ बुद्धींद्रियाणीति एषां दशानां
मध्ये श्रोत्रादीनि पंच क्रमोक्तानि बुद्धेः करणत्वात्‌ बुद्धींद्रियाणि पाय्वादीनि चोत्सर्गादिकर्मकरणत्वात्‌ कर्मेंद्रियाणीति वदंति ९१
एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकं यस्मिन्‌ जिते जितावेतौ भवतः पंचकौ गणौ ९२ एकादशमिति
एकादशसंख्यापूरकं च मनोरूपमंतरिंद्रियं ज्ञातव्यं स्वगुणेन संकल्परूपेणोभयरूपेंद्रियगणप्रवर्तकस्वरूपं अत एव यस्मिन्मनसि
जिते उभावपि पंचकौ बुद्धींद्रियकर्मेंद्रियगणौ जितौ भवतः पंचकाविति तदस्य परिमाणमित्यनुवृत्तौ संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति पंचसंख्या परिमितिमेवार्थकः ९२
इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयं संनियम्य तु तान्येव ततः सिद्धिं नियच्छति ९३ ॥
इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयं सं संनियम्य तु तान्येव ततः सिद्धिं नियच्छति ९३ ॥ इंद्रियाणामिति यस्मादिंद्रियाणां विषयेषु प्रसक्त्या
मनोऽपि संकल्पमूलत्वादिंद्रियाणां प्रायेण प्रवृत्तेः किमिंद्रियनिग्रहः कर्तव्य इत्यत आह इंद्रियाणामिति धर्माधर्मौ
दृष्टादृष्टदोषानिःसंदेहं प्राप्नोति तानि चेव पुनरिंद्रियसम्यक् नियम्य सिद्धिं मोक्षादिपुरुषार्थयोग्यतारूपां लभते तस्मादिंद्रियसंयमं कुर्यादिति शेषः ९३
न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ९४ ॥
किमिंद्रियसंयमेन विषयोपभोगादेवलब्धकामो निवर्त्स्यतीत्यत आह न जात्विति न कदाचिदभिलाषः कामेष्विति कामा विषयास्तेषामुप
भोगेन निवर्तते किंतु घृतेनाग्निरिवाधिकाधिकमेव वर्धते शाम्यभोगस्यापि प्रतिदिनं तदधिकभोगवांछादर्शनात्‌ तथा च विष्णुपुराणे ययातिवाक्यं यत्पृ
थिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः एकस्यापि न पर्याप्तमिति दित्वा तितिक्षां न्जेत्तथा पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः तथाप्यनुदिनं तृष्णा ममैते
षु च जायते

मू॰
अ॰ २
४२

यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत् प्रापणात्सर्वकामानां परित्यागो विशिष्यते ॥ ९५ ॥

यश्चैतानिति यः पुनः सर्वान्विषयान्प्राप्नुयात् यश्चैतान्कामान् उपेक्षते तयोर्विषयोपेक्षकः श्रेयान् तस्मात्सर्वकामप्राप्तेस्तदुपेक्षा प्रशं-
स्यते यतो हि विषयलोलुपस्य तत्प्राप्त्यनापत्त्युत्पादने क्लेशः संभवो विपत्तौ च क्लेशः शान्तिप्रायः त्यक्तविषयविरसस्य ॥ ९५ ॥

न तथैतानि शक्यन्ते संनियन्तुमसेवया विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ॥ ९६ ॥

इदानीमिन्द्रियसंयमोपायमाह न तथेति एतानीन्द्रियाणि विषयेषु प्रसक्तानि तथा नासेवया विषयसन्निधिवर्जनरूपया नियन्तुं शक्यन्ते इति वा श्रुत्वा य-
थामेध्यादिविषयाणां त्यजनादिदोषज्ञानेन शरीरस्य चास्थिस्थूणामित्यादिवक्ष्यमाणदोषचिन्तनेन तस्माद्विषयदोषज्ञानादिना वशीकर्तव्यानीन्द्रियाणि ॥ ९६ ॥

वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ॥ ९७ ॥ तस्मान्नियच्छेत् ॥

यस्मादनियमितमनो विकारस्य हेतुः स्यादत आह वेदा इति वेदाध्ययनदानयज्ञनियमतपांसि स्त्र्यादिविषयसेवाभिः कल्मषीकृतमनसो न कदाचित्फलसिद्धिहेतवो भवन्ति ॥ ९७ ॥

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥ ९८ ॥

जितेन्द्रियस्य स्वरूपमाह श्रुत्वेति स्तुतिवाक्यं निन्दावाक्यं च श्रुत्वा सुखस्पर्शं दुकूलादि दुःखस्पर्शं मेषकम्बलादि स्पृष्ट्वा सुरूपं कुरूपं च दृष्ट्वा स्वादु अस्वा-
दु च भुक्त्वा सुरभिमसुरभिं च घ्रात्वा यस्य न हर्षविषादौ स जितेन्द्रियो ज्ञातव्यः ॥ ९८ ॥

इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियं तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकं ॥ ९९ ॥

एकेन्द्रियासंयमोऽपि निवार्यत इत्याह इन्द्रियाणामिति सर्वेषामिन्द्रियाणां मध्ये यद्येकमपीन्द्रियं विषयप्रवणं भवति ततोऽस्य विषयपरस्य इन्द्रियो-
तरेष्वपि तत्त्वज्ञानं क्षरति न व्यवतिष्ठते चर्मनिर्मितोदकपात्रादिवैकेनापि छिद्रेण सर्वस्मान्नस्य उदकं न व्यवतिष्ठते ॥ ९९ ॥

वशे कृत्वेन्द्रियग्रामं संयम्य च मनस्तथा सर्वान्संसाधयेदर्थानक्षिण्वन्योगतस्तनुं ॥ १०० ॥ इन्द्रियसंयमस्य सर्वपुरुषार्थहेतु-

त्वं दर्शयति वशे कृत्वेति बाह्येन्द्रियगणमायत्तं कृत्वा मनश्च संयम्य सर्वान्पुरुषार्थान्साधयेत् योगतः उपायेन स्वदेहमपीडयन् ॥ ...महत्त्वा दीप्तसंहिताव्रतादिकं मुमुक्षुः ... ॥ १०० ॥

पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् पश्चिमां तु समासीनः सम्यगृक्षविभावनात् ॥ १०१ ॥ पूर्वां संध्यामिति पूर्वां संध्यां पश्चिमामिति च कालाध्वनोरत्यन्तसंयोगे द्वितीया प्रथमसंध्यां सूर्यदर्शनपर्यन्तं सावित्रीं जपन्तिष्ठेत्
आसनादुत्थाय निश्चलगतिकश्चतुर्दशोर्ध्वः स्यात् पश्चिमां तु संध्यां सावित्रीं जपन् सम्यङ्नक्षत्रदर्शनपर्यन्तमुपविष्टः स्यात् ... प्रयत्नेन

३४A

ध्यानं मनेन वेदः फलवत्सन्निधावफलं तदङ्गमिति न्यायात् संध्यायो वेदविहितो वेदग्रहणेन गृह्यते ... इति च पूर्वे अपरं फलं ... मे
यातिर्विलक्षणं ... संध्याकालश्च मुहूर्तमात्रं तथाह योगियाज्ञवल्क्यः ह्रासवृद्धी तु सततं दिवसानां यथाक्रमम् संध्या मुहूर्तमात्रा

पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम् १०२ ह्रासे वृद्धौ च सा स्मृता १

पूर्वां संध्यामिति पूर्वसंध्यायां तिष्ठन् जपं कुर्वाणो निशासंचितमपनोदयति पश्चिमसंध्यायां तूपविष्टो जपं कुर्वन् दिवार्जितं पापं निहन्ति तत्रापि जपात्
फलं उक्तमेतत् ज्ञानाज्ञानादिकृतपापविषयं अत एव याज्ञवल्क्यः दिवा वा यदि वा रात्रौ यदज्ञानकृतं भवेत् त्रिकालसंध्याकरणात्तत्सर्वं विप्रणश्यति

न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम् स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः १०३॥

न तिष्ठतीति यः पुनः पूर्वसंध्यां नानुतिष्ठति पश्चिमां च नोपास्ते तत्तत्कालविहितं जपादि न करोतीत्यर्थः स शूद्र इव सर्वस्मात् द्विजातिकर्मणा
अतिथिसत्कारादेरपि बाह्यः कार्यः अनेनैव प्रत्यवायेन संध्योपासनस्य नित्यता ज्ञानतोऽपि सर्वदा पदितपापक्षयस्य फलत्वमविरुद्धं १०३

अपां समीपे नियतो नैत्यकं विधिमास्थितः सावित्रीमप्यधीयीत गत्वारण्यं समाहितः १०४

अपां समीप इति ब्रह्मयज्ञरूपमिदं बहुवेदाध्ययनाशक्तः सावित्रीमात्राध्ययनमपि विधीयते अरण्यादि निर्जनदेशं गत्वा नद्यादिजलसमीपे
नियतेन्द्रियः समाहितोऽनन्यमना नैत्यकं विधिं ब्रह्मयज्ञरूपमास्थितोऽनुतिष्ठासुः सावित्रीमपि प्रणवव्याहृतित्रययुक्तामध्यायमधीयीत १०४

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि १०५॥

वेदोपकरण इति वेदोपकरणे वेदाङ्गे शिक्षादौ नैत्यके नित्यानुष्ठेये च स्वाध्याये ब्रह्मयज्ञरूपे होममन्त्रेषु चानध्यायादरो नास्ति १०५॥

नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम् ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतम् १०६॥

नैत्यक इति पूर्वश्लोके नैत्यके ... अनध्यायो नास्ति यतः सततभवत्वात् ब्रह्मसत्रं तत्सत्रवादिभिः स्मर्यते ब्रह्मैव वा हुतिर्ब्रह्माहुतिः हविस्तस्याहुतं
स्वाध्यायस्यायमनुवादः नैत्यके जपयज्ञे अनध्यायो ... अध्ययनरूपमनध्यायवषट्कृतमपि पुण्यमेव भवति १०६

यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु १०७

यः स्वाध्यायमिति अब्दमिति अत्यन्तसंयोगे द्वितीया वर्षमप्येकं स्वाध्यायमहरहर्विहितं गृह्योक्तनियमैः शुचिः प्रयतो जपति तस्यैष स्वाध्यायो जपयज्ञः
सर्वकामान् जनयन् उपकारिणः पयआदीनि क्षरति ... अत एव याज्ञवल्क्यः मधुना पयसा चैव
... देवांस्तर्पयेद्द्विजः पितॄंश्च मधुसर्पिर्भ्यामन्वहं योऽधीते ... इत्युपक्रम्य वेदानां ... देवपितॄन् ... फलमुक्तं ...॥

म. से. २२

22

त्पर्यन्तं सर्वकामफलं श्रुतौ श्रूयते ॥ [illegible]

अग्नीन्धनं भैक्षचर्यामधः शय्यां गुरोर्हितं । आसमावर्तनात्कुर्यात्कृतोपनयनो द्विजः १०८ अग्नीन्धनमिति सायंप्रातः समि[द्धो]मं भिक्षाहरणमखट्वाशयनारूपमधःशयनं तत्स्थण्डिलशायित्वमेव गुरोरुदककुम्भाद्याहरणरूपं हितं कृतोपनयनो ब्रह्मचारी समावर्तनपर्यन्तं कुर्यात् १०८

आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः । आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः १०९

कीदृशाः शिष्योऽध्याप्य इत्याह आचार्यपुत्र इति आचार्यपुत्रः परिचारकः ज्ञानान्तरदाता धार्मिकः मृद्वार्यादिशुचिः बान्धवः ग्रहणधारणसमर्थः धनदा[ता] हितेच्छुः ज्ञातिः एते दश धर्मेणाध्याप्याः १०९

नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः । जानन्नपि हि मेधावी जडवल्लोक आचरेत् ११०

नापृष्ट इति ग्रन्थमेतावन्तं स्वरविस्वरं विसर्गं वाधीतमिति शिष्यस्य नपृष्टः सन्न वदेत् शिष्यस्य न पृच्छतोऽपि वक्तव्यं भक्तिश्रद्धादिप्रश्नधर्मोल्लङ्घनेन अन्यायेन पृच्छतो न ब्रूयात् जानन्नपि हि प्राज्ञो लोके मूकवद्व्यवहरेत् ११०

अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति । तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति १११

उक्तप्रतिषेधव्यतिक्रमे दोषमाह अधर्मेणेति अधर्मेण पृष्टोऽपि यो यस्य वदति यश्चान्यायेन पृच्छति तयोरन्यतरो व्यतिक्रमकारी म्रियते विद्वेषं वा तेन सह प्राप्नोति

धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा । तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ११२

धर्मार्थाविति यस्मिन्शिष्येऽध्यापिते धर्मार्थौ न भवतः परिचर्या वाऽध्ययनानुरूपा तत्र विद्या नार्पणीया शुभं व्रीह्यादिबीजमिवोषरे यत्र बीजमुप्तं न प्ररोहति स ऊषरः नचार्थग्रहणे यस्मिन्शिष्येऽध्यापिते धर्मार्थौ न भवतः परिचर्या वाऽध्ययनानुरूपा तत्र विद्या नार्पणीया व्रीह्यादिबीजमिवोषरे यत्र बीजमुप्तं न प्ररोहति स ऊषरः नचार्थग्रहणे भृतकाध्यापकत्वमापादनीयम् यदि धर्मस्तावन्न सम्पद्यते तदेनमध्यापयामीति नियमाभावात् ११२ ॥

विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना । आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत् ११३

विद्ययेति विद्ययैव सह वेदाध्यापकेन वरं मर्तव्यम् न तु सर्वथाध्यापनयोग्यशिष्याभावे अपात्रायैनां प्रतिपादयेत् तथा च छान्दोग्यब्राह्मणं विद्या ह वै ब्राह्मणमाजगाम इरिणे वपेत् ११३ ॥

विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष मां असूयकाय मां मादास्तथा स्यां वीर्यवत्तमा ११४ ॥ असूयकाय दद्यात् विद्या ब्राह्मणमित्युक्तवा विद्याधिष्ठात्री देवता कंचिदध्यापकं ब्राह्मणमागत्य एवमवदत् त्वामहं निधिरस्मि मां रक्ष असूयकादिदोषवते न मां देहि तथाहं
त्वनिग्रहेण वीर्यवत्तमा स्यां तथा च छन्दोग्यब्राह्मणे विद्या ह वै ब्राह्मणमाजगाम तवाहमस्मि मां पालय अनर्हते मानिने नैव मादा गोपाय मा श्रेयसी तेऽहमस्मीति ११४
यमेव तु शुचिं विद्यान्नियतब्रह्मचारिणं तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने ११५
प्रमादरहिताय मां वद ११५ ॥
यमिति यमेव पुनः शिष्यं शुचिं नियतेन्द्रियं ब्रह्मचारिणं जानासि तस्मै विद्यारूपनिधिरक्षकाय प्रमादरहिताय मां वद
ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात् स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ११६ ॥
ब्रह्मेति यः पुनरभ्यासार्थमधीयानात् अन्यं वा कंचिदध्यापयतस्तदनुज्ञारहितो वेदं गृह्णाति स वेदस्तेययुक्तो नरकं गच्छति तस्मादेतन्न कर्तव्यं ११६
लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ११७ ॥ लौकिकमिति लौकिकं अर्थशास्त्रादिज्ञानं वैदिकं वेदार्थज्ञानं आध्यात्मिकं ब्रह्मज्ञानं यस्माद्गृह्णाति बहूनां मान्यानां मध्ये स्थितं तं प्रथममभिवादयेत् लौकिकादि
ज्ञानदातॄणां क्रमेण पूर्वपूर्वस्य मान्यता ११७
सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी ११८ ॥ नायन्त्रितो वेदत्रयवेत्तापि निषिद्धभोजनादिशीलः श्रे
सावित्रीति सावित्रीमात्रवेत्तापि वरं सुयन्त्रितः शास्त्रनियमितः विप्रादिमान्यः नायन्त्रितो वेदत्रयवेत्तापि निषिद्धभोजनादिशीलः सर्वविक्रयी सत्त्वात् ११८ ॥
शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेत् ११९ ॥ शय्येति शय्या चास्
निषिद्धविक्रयाच्च
शय्यासने चाध्याचरिते श्रेयसा न समाविशेत् शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेत् शय्यासनेऽध्याचरिते गुरुणा आच्छादिते शय्यायां आसने वा गुरोरुपभुक्ते न तत्काले अपि नासीत स्वयं च शय्यासनस्थो गुरावागते उत्थाया
भिवादनं कुर्यात्
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यस्माद्यूनः स्थविरे आयति आगच्छति सति प्राणा ऊर्ध्वमुत्क्रामन्ति देहाद्
प्रत्युत्थानाभिवादाभ्यां पुनः स्वस्थान् करोति तस्मात् वृद्धस्य प्रत्युत्थानाभिवादनं कुर्यात् १२० ॥
निर्गन्तुमिच्छन्ति तान् वृद्धस्य प्रत्युत्थानाभिवादाभ्यां पुनः स्वस्थान् करोति
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलं १२१ ॥

म०
कु० म०
टी०
२३

23

इत्यस्य फलमाह अभिवादनशीलस्येति। अथायं वृद्धाभिवादनशीलस्य वृद्धसेविन आयुः प्रज्ञा यशो बलानि चत्वारि सम्यक् वर्धन्ते ॥ १२१ ॥

अभिवादात्परं विप्रो ज्यायांसमभिवादयन्। असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥ १२२ ॥

अभिवादनविधिमाह अभिवादात्परमिति। वृद्धमभिवादयन् विप्रादिरभिवादात्परं अभिवादये इति शब्दोच्चारणानन्तरं अमुकनामाहमस्मीति स्वनाम परिकीर्तयेत् स्वकीयनामविशेषमुच्चारयेत् अतो नामशब्दस्य विशेषपरत्वात् स्वनामविशेषोच्चारणानन्तरं अमुकनामाहमस्मीति शब्दोऽपि प्रयोज्य इति मेधातिथिगोविन्दराजयोरभिधानमप्रमाणं अत एव गौतमः स्वनाम प्रोच्याहमभिवादय इत्यभिवदेत् ... अभिवादनवाक्ये नाम प्रोक्तं ... यदि च नाम ... अकारश्चास्य नाम्नोऽन्ते ... आश्वलायनाद्युक्तं ... अभिवादनवाक्ये नाम ... ॥

नामधेयस्य ये केचिदभिवादं न जानते। तान्प्राज्ञोऽहमिति ब्रूयात्स्त्रियः सर्वास्तथैव च ॥ १२३ ॥

नामधेयस्येति। नामधेयस्य उच्चारितस्य ये केचिदभिवाद्याः संस्कृतानभिज्ञतयाभिवादार्थं न जानन्ति तान् प्रत्यभिवादने ये असमर्थाः ... अभिवादयेऽहमित्येव ब्रूयात् स्त्रियः सर्वास्तथैव ब्रूयात् ॥ १२३ ॥

भोःशब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने। नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः ॥ १२४ ॥

... भोःशब्दं कीर्तयेत् अभिवाद्यसंबोधनार्थं अत एव ... नाम्नामिति भोः ... भावः ... अभिवाद्यनाम्नां ... स्वरूपभाव ऋषिभिः स्मृतः तस्मादेवमभिवादनवाक्यं अभिवादये अमुकनामाहमस्मि भोः ॥ १२४ ॥

आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने। अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥ १२५ ॥

आयुष्मानिति। अभिवादने कृते अभिवादयिता अभिवाद्येन विप्रादिरायुष्मान् भव सौम्येति वाच्यः ... अभिवादकस्य नाम्नोऽन्ते अकारादिः स्वरो नाम्नामकारान्तत्वनियमाभावात् स प्लुतः कार्यः ... पूर्वाक्षरः ... व्यञ्जनान्तेऽपि नाम्नि ... प्लुतः कार्यः ... इति प्लुतः ... पाणिनिः ... व्याख्यातं ... अभिवादनवाक्ये आयुष्मान् भव सौम्य ... एवं ... यथा ... तस्मादीदृशं ... प्लुतो ... इति पाणिनिवचनात् स्त्रियामपि निषेध इति कात्यायनवचनात् ... गोविन्दराजः ... अभिवादनवाक्ये आयुष्मान् भव सौम्य ... इति कात्यायनवचनात् स्त्रियामपि प्रत्यभिवादने ... आयुष्मान् भव सौम्येति ... ॥ १२५ ॥

23A

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनं नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः १२६ ॥

यो न वेत्तीति । यो विप्रोऽभिवादनस्यानुरूपं प्रत्यभिवादनं न जानाति असावभिवादनविदुषापि स्वनामोच्चारणपूर्वकविधिना शूद्रवन्नाभि

वाद्यः प्रत्यभिवादयेदिति शब्दोच्चारणमात्रेण चरणग्रहणादि स्तुत्यमनिषिद्धि शास्त्रकत्वात् १२६ ॥

ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयं वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च १२७

ब्राह्मणमिति समागम्य समागमे कृतेऽभिवादकमवरवयस्कं समानवयस्कमनभिवादकं ब्राह्मणं कुशलं क्षत्रियमनामयं वैश्यं क्षेमं शूद्रमारोग्यं पृच्छेत् प्रश्नवाक्ये कु

शलमस्तु वयं समानवयस्का वा विप्रः पृच्छेत् अनामयं क्षत्रियं क्षेमं वैश्यं आरोग्यं शूद्रं अवरवयसमभिवादकं वयस्यमनभिवादकमपीति मन्वर्थ

मेव पाठमपि स्मृत इति मेधातिथिर्विदांसः प्रकरणात्त्वभिवादकस्यैव कुशलादिप्रश्नमाहुः तत्राभिवादकेन सह समागमस्याध्याहृतत्वात् समागम्य

इति निष्प्रयोजनानुवादत्वप्रसङ्गात् ततः कुशलादिप्रश्नत्र्यनामयारोग्यपदयोश्च समानार्थत्वात् शब्दविशेषोच्चारणमेव विवक्षितम् १२७ ॥

अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् भोभवत्पूर्वकं त्वेनमभिभाषेत धर्मवित् १२८ ॥

अवाच्य इति प्रत्यभिवादनकाले अन्यदा वदी(?) कनीयानपि अभ्यवभृथस्नानात् कनिष्ठोऽपि दीक्षितो नाम्ना न वाच्यः किं तु भोभवच्छब्दपूर्वकं

दीक्षितादिशब्दोत्तरैर्धर्मविभिरेव धार्मिकोऽभिभाषेत भो दीक्षित इदं कुरु भवता यजमानेनेदं क्रियतामिति १२८ ॥

परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च १२९ ॥ परपत्नीति या स्त्री परस्य

स्त्री भवति असंबन्धा च योनितः इति स्वस्रादिर्न भवति तामप्रयोजनसंभाषणकाले भवति सुभगे भगिनीति वा वदेत् परपत्नीग्रहणात् कन्यायां न

मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः १३० ॥ प्रविधिः ... कस्मादेशाद्यसमादिप

मातुलांश्चेति मातुलादीनागतान् कनिष्ठान्नमना उत्थाय असावहमिति वदेत् नाभिवादयेत् असाविति स्वनामनिर्देशः अभिवादननिषेधः देशभाषणा

इत्युपक्रम्य ज्ञानवृद्धतमाद्वयोऽपि हारीतेन गुरुत्वकीर्तनात् तयोश्च कनिष्ठयोरपि संभवात् तद्विषयोऽयं गुरुशब्दः १३० ॥ इति गुरव

मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा संपूज्या गुरुपत्नीवत्समस्ता गुरुभार्यया १३१ ॥

मातृष्वसेति मातृस्वसादयो गुरुपत्नीवत्प्रत्युत्थानाभिवादनासनदानादिभिः संपूज्याः अभिवादनप्रकरणादभिवादनमेव संपूज

नं विज्ञायत इति समस्ता इत्युक्तेऽवन् गुरुभार्यासमानत्वात् प्रत्युत्थानादिकमपि कार्यमित्यर्थः १३१ ॥

म.
तु. म.
९४

भ्रातृभार्योपसंग्राह्या सवर्णाहन्यहन्यपि विप्रोष्य तूपसंग्राह्या ज्ञातिसंबन्धियोषितः १३२ ॥

भ्रातृभार्येति भ्रातुः सजातीया भार्या ज्येष्ठस्य ज्ञातव्या प्रकरणात् उपसंग्राह्या पादयोरभिवाद्या प्रत्यहमहनि प्रत्यहमेव प्रोष्य पुनः प्रत्यागतेन ज्ञातयः पितृव्या
दयः संबन्धिनो मातृपक्षाः श्वशुरादयश्च तेषां पत्न्यः पुनर्विप्रोष्य प्रवासात् प्रत्यागतेनैवाभिवाद्या न तु प्रत्यहमिति नियमः १३२ ॥

पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी १३३ ॥

पितुर्भगिन्यामिति पितुर्मातुश्च भगिन्यां ज्येष्ठायां चात्मनो भगिन्यां मातृवद्वृत्तिमातिष्ठेन्माता पुनस्ताभ्यो गुरुतमा ननु मातृष्वसा मातुला
नीसमानेन वयः पत्नीवत्पूज्या सज्या इत्युक्तं किमर्थमनेनैवोच्यते उच्यते इदमेव मातातिताभ्यो गरीयसीति तेन पितृष्वसा मातृष्वसा ज्येष्ठा
चविशये मातृगरीयसी गुरुष्वपीति अथवा पूर्वं पितृवत्पूज्यत्वमुक्तं अनेन तत्र हानिर्न स्यादिति विशेषतः इत्युक्तम् १३३ ॥

दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृतां त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु १३४ ॥

दशाब्दाख्यमिति दशाब्दाख्यायमनः पञ्चाब्दाख्यं पौरसख्यं प्रथमः एकपुरवासिनो वक्ष्यमाणविद्यादिगुणरहितानां एकस्य दशाभिः
वर्षैः ज्येष्ठत्वेऽपि सख्यमाख्यायते गीतवादित्रादिकलाभिज्ञानां पञ्चवर्षपर्यन्तं सख्यं
श्रोत्रियाणां त्र्यब्दपर्यन्तं सपिण्डेषु अत्यल्पेनैव कालेन सख्यम् अपि वर्षमेवाल्पकालाद् ज्येष्ठव्यवहारः १३४ ॥

ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपं पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता १३५ ब्राह्मणमिति दशवर्षं ब्रा
ह्मणं शतवर्षं पुनः क्षत्रियं पितापुत्रौ जानीयात् तयोर्मध्ये दशवर्षोऽपि ब्राह्मणः क्षत्रियस्य शतवर्षस्यापि पिता तस्मात्पितृवदसौ मान्यः १३५

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् १३६ ॥ वित्तमिति वित्तं न्यायार्जितं धनं
बन्धुः पितृव्यादिः वयोऽधिकवयस्कता कर्म श्रौतं स्मार्तं च विद्या वेदार्थतत्त्वज्ञानं एतानि पञ्च मान्यत्वकारणानि एषां मध्ये यद्यदुत्तरं तत्तत्प्रबलम् [illegible]

पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः १३७ ॥ भूयांसीति बहूनां समवाये बला
बलमुक्तम् १३६
पञ्चानामिति त्रिषु वर्णेषु ब्राह्मणादिषु पञ्चानां वित्तादीनां मध्ये यत्र पूर्वं पूर्वं समस्तेनैकं भवति स एवोत्तरस्मादपि मान्यः तेन वित्तवन्धुयुक्तो वया
धिकान्मान्यः एवं वित्तादिद्वययुक्तः कर्मवतो मान्यः वित्तादिचतुष्टययुक्तो विद्वद्भ्यो मान्यः गुणवन्ति चेति प्रकर्षवन्ति तेन द्वयोरेव वित्तादिमत्त्वे प्रक
र्षो मानहेतुः शूद्रोऽपि दशमीमवस्थां नवत्यधिकां गतो द्विजन्मनामपि मानार्हः शतवर्षाणां दशधा विभागे दशमावस्था नवत्यधिका
भवति १३७ ॥

२५A

चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियः स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च १३८ ॥
प्रथममपि पूज्यप्रकारः प्रसंगादुच्यते चक्रिण इति चक्रयुक्तरथादियानारूढस्य नवत्यधिकवयसो रोगार्तस्य भारपीडितस्य स्त्रियाश्चाचिरनिवृ
त्तसमावर्तनस्य देशाधिपस्य विवाहाय प्रस्थितस्य पन्थास्त्यक्तव्यः त्यागार्थताद्ददातेन चतुर्थी १३८ ॥

तेषां तु समवेतानां मान्यौ स्नातकपार्थिवौ राजस्नातकयोश्चैव स्नातको नृपमानभाक् १३९ ॥
तेषामिति तेषामेकत्र मिलितानां देशाधिपस्नातकौ मान्यौ राजस्नातकयोरपि स्नातक एव राज्ञापि मान्यः अतो राजशब्दोऽत्र पूर्वश्लोके च न
केवलं क्षत्रियजातिवचनः क्षत्रियजात्यपेक्षया ब्राह्मणं दशवर्षं त्वित्यनेन ब्राह्मणमात्रस्य मान्यत्वाभिधानात् स्नातकगृहस्थविषयमेतत् १३९

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते १४०
उपनीयेति आचार्यादिशब्दार्थमाह नैतद्विधिपराणि प्राप्त्यभावात् यो ब्राह्मणः शिष्यमुपनीय कल्परहस्यसहितां वेदशाखां सर्वामध्या
पयति तमाचार्यं पूर्वे मुनयो वदन्ति कल्पो यज्ञविद्या रहस्यमुपनिषत् वेदत्वेप्युपनिषदां प्राधान्यविवक्षया पृथङ्निर्देशात् १४० ॥

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते १४१ ॥
एकदेशमिति वेदस्यैकदेशं मन्त्रब्राह्मणं वेदरहितानि व्याकरणादीन्यङ्गानि यो वृत्त्यर्थमध्यापयति स उपाध्याय उच्यते १४१ ॥
निषेकादीनि कर्माणि यः करोति यथाविधि संभावयति चान्नेन स विप्रो गुरुरुच्यते १४२ निषेकादीनीति निषेका
गर्भाधानं तेन पितुरयं गुरुत्वोपदेशः गर्भाधानादीनि संस्कारकर्माणि पिता यथाशास्त्रं यः करोति अन्नेन च संवर्धयति स विप्रो गुरुरुच्य
ते १४२
अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते १४३
अग्न्याधेयमिति आहवनीयाद्यग्न्यु[illegible]म अग्न्याधेयमष्टकादीन् पाकयज्ञान् अग्निष्टोमादीन् यज्ञान् कृतवरणो यस्य करोति स तस्य
र्त्विगिह शास्त्रेऽभिधीयते अस्य वादिधर्मेष्वनुपयुक्तमपि संज्ञाविकल्पनामाचार्यादिवदृत्विजोपि मान्यत्वं दर्शयितुं प्रसंगादुक्तम् १४३ ॥
य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ स माता स पिता ज्ञेयस्तं न द्रुह्येत्कदाचन १४४ य आवृणोतीति य उभौ कर्णाववित
थमिति वर्णस्वरवैगुण्यरहितेन सत्यरूपेण वेदेनापूरयति स माता पिता च ज्ञेयः महोपकारकत्वगुणयोगात् अयमध्यापको मातापितृसाम्यवाच्यः तस्मै
उपाध्यायान्दशाचार्य आचार्याणां शतं पिता सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते १४५ नापकुर्यात्कदाचनेति निगमो[illegible]
[illegible] वेदे [illegible]

मं॰
टी॰ मे॰
४९

उपाध्यायानिति दशोपाध्यायानपेक्ष्य आचार्यः आचार्यशतमपेक्ष्य पिता सहस्रं पितॄनपेक्ष्य माता गौरवेणातिरिक्ता भवति अत्रोपनयनपूर्वकं सावित्रीमात्राध्यापयिता आचार्यो ऽभिप्रेतः तमपेक्ष्य पितुरुत्कर्षः। उत्पादकब्रह्मदात्रोरित्यनेन पुनराचार्यस्य पितुरपेक्षयोत्कर्षं वक्ष्यतीति विरोधः ॥ १४५ ॥

उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता। ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥ १४६ ॥

उत्पादकेति जनकाचार्यौ द्वावपि पितरौ जन्मदातृत्वात् तयोराचार्यः पिता गुरुतरः यस्मिन् द्विजस्य ब्रह्मग्रहणार्थं जन्मोपनयनजन्मसंस्कारः स्वरूपस्य परलोके इह लोके च शाश्वतं नित्यं ब्रह्मप्राप्तिफलकत्वात् ॥ १४६ ॥

कामान्माता पिता चैनं यदुत्पादयतो मिथः। संभवं तस्य तं विद्याद्यद्योनावभिजायते ॥ १४७ ॥

मातापितरौ यदेनं बालकं कामवशेनान्योन्यमुत्पादयतः संभवमात्रं तस्य पश्वादिसाधारणं यद्योनौ मातृकुक्षावभिजायते अंगप्रत्यंगानि लभते ॥ १४७ ॥

आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः। उत्पादयति सावित्र्या ...... सा ऽजरामरा ॥ १४८ ॥

आचार्य इति आचार्यः पुनर्वेदज्ञोऽस्य माणवकस्य यां जातिं यज्जन्म विधिवत् सावित्र्येति सांगोपनयनपूर्वकसावित्र्यनुवचनेनोत्पादयति सा जातिः सत्याऽजराऽमरा च ब्रह्मप्राप्तिफलत्वात् उपनयनपूर्वकस्य वेदाध्ययनतदर्थज्ञानानुष्ठानैर्निष्कामस्य मोक्षलाभात् ॥ १४८ ॥

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः। तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया ॥ १४९ ॥

अल्पं वेति श्रुतस्य श्रुतेन। उपाध्यायो यः शिष्यस्याल्पं वा बहु वा हितं श्रुतेनोपकरोति तमपीह शास्त्रे गुरुं जानीयात् श्रुतमेवोपक्रिया तया [illegible] ॥ १४९ ॥

ब्राह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता। बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः ॥ १५० ॥

ब्राह्मस्येति ब्रह्मग्रहणार्थं जन्म ब्राह्मं उपनयनं स्वधर्मस्य शासिता वेदार्थव्याख्याता नात्र वयोऽपि बालोऽपि वृद्धस्य [illegible] पिता भवति धर्मतः इति पितृधर्मो तस्मिन्ननुष्ठातव्यः ॥ १५० ॥

अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः। पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥ १५१ ॥

अत्रैवार्थवादमाह अध्यापयामासेति आङ्गिरसः पुत्रो बालः कविर्विद्वान् पितॄन् [illegible] पितृव्यतत्पुत्रादीनधिकवयसोऽध्यापितवान् तान् ज्ञानेन परिगृह्य शिष्यान् कृत्वा पुत्रका इति [illegible] इति हेतोः [illegible] उक्तवान् ॥ १५१ ॥

ते तमर्थमपृच्छन्त देवानागतमन्यवः। देवाश्चैतान्समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् ॥ १५२ ॥

ते तमर्थमपृच्छन्तेति ते पितरो जातक्रोधाः पुत्रकशब्दार्थं देवान्पृष्टवन्तः देवाश्च संभूय मिलिताः एतानवोचन् न्याय्यं शिशुः पुत्रका इत्युक्तवान् ॥ १५२ ॥

अज्ञो भवति वै बालः पिता भवति मन्त्रदः। अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ॥ १५३ ॥

अज्ञो भवति [illegible] बालो भवति न तु वयसा मन्त्रदः पिता भवति मंत्रग्रहणं वेदोपलक्षणार्थं योऽत्र समध्यापयति [illegible] पिता ॥ १५३ ॥ ४९

इति वेदानेवं यथा [illegible]

25A

नहायनैर्न पलितैर्न वित्तेन न बंधुभिः ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् १५४ ॥

ऋषेर्वेदस्तमाह यस्मात्सर्वेऽपि मुनयोऽङ्गं बालमिन्दुः मत्तं देवपितेत्ये वाध्रुवन्नुरस्मात् नहायनैरिति बहुभिर्वर्षैर्नकेशपाशमश्रुलोमभिः श्वेतैः नबहुना धनेनापि नवा नादिभिर्बंधुभावैः समुदितैरप्येतैर्न महत्त्वं भवति किं तत्र ऋषयः धर्मं कृतवन्तः यः सांगवेदाध्येता सोऽस्माकं महानसंमतः १५४ ॥

विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः १५५ ॥

विप्राणामिति ब्राह्मणानां विद्यया क्षत्रियाणां तु वीर्येण वैश्यानां धान्यधनादिना शूद्राणामेव पूर्वजन्मना श्रेष्ठत्वं सर्वत्र तृतीयार्थे तसिः १५५

न तेन वृद्धो भवति येनास्य पलितं शिरः यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः १५६ ॥

नतेनेति न तेन वृद्धो भवति येनास्य शुक्लकेशं शिरः किं तु युवापि सन् विद्वान् तं देवाः स्थविरं जानंति १५६ ॥

यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति १५७ ॥

यथा काष्ठमय इति यथा काष्ठघटितो हस्ती यथा चर्मनिर्मितो मृगः यश्च विप्रोऽनधीतस्त्रयऽपि ते नाममात्रं दधति न तु हस्त्यादिकार्यं शत्रुवधादिकं कर्तुं क्षमाः १५७ ॥

यथा षंढोऽफलः स्त्रीषु यथा गौर्गवि चाफला यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः १५८

यथा षंढ इति स्त्रीषु नपुंसकः स्त्रीषु निष्फलः यथा स्त्री गवी गवामेव निष्फला यथा चाज्ञे दानमफलं तथा ब्राह्मणोऽनधीयानो निष्फलः श्रौतस्मार्तकर्मानर्हत्वेन तथा तत्फलरहितत्वात् १५८

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनं वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता १५९ ॥ श्रेयोऽर्थमनुशासनमनतिहिंसया कर्तव्यं स्नातो वाडदलेन वा त्वल्पहिंसायाश्च अहिंसयेति भूतानां शिष्याणां प्रकर्षेणानुशासनं वाणी च मधुरा प्रीतिजननी श्लक्ष्णा यातोऽस्मै च्यते सा शिष्यं शिक्षायै धर्मं तु इच्छता प्रयोक्तव्या १५९ ॥

यस्य वाङ्मनसे शुद्धे सम्यग्गुप्ते च सर्वदा स वै सर्वमवाप्नोति वेदांतोपगतं फलं १६० ॥

यस्येति इदानीं पुरुषमात्रस्य फलं धर्मं वाङ्मनसं यममाह न मृष्यायिता एव यस्य वाङ्मनसे शोभयं शुद्धं भवति वागमृतादिभिः दुष्टा मनश्च रागद्वेषादिभिः सम्यक् तं भवति एते वाङ्मनसी निषिद्धविषयेषु करणे सर्वदा यस्य गुप्ते स नरः सर्वं तत् भवति स वेदांतेऽवगतं सर्वं फलं प्राप्नोति सर्वं शास्त्रादिरूपमात्मलाभादेवाप्नोतीत्यर्थः

नारुंतुदः स्यादार्तोऽपि न परद्रोहकर्मधीः ययास्योद्विजते वाचा नालोक्यां तामुदीरयेत् १६१ ॥

म॰
९६

नारुंतुदइति आर्त्तोपि पृथममात्रस्यैव धर्मोनाध्यापकस्यार्त्तः पीडितोपिनारुंतुदःस्यात् नमर्मपीडाकरंतत्तदुच्चारयेत् नयापरस्यद्रोहाय
कार्यंतदर्थंकर्म्मद्विषन्नकुर्यात् तयायया वाचा परोद्विजते तां मर्मस्पृशमलोक्यांस्वर्गादिप्राप्तिविरोधिनींनवदेत् १६१ ॥

संमानाद्ब्राह्मणोनित्यमुद्विजेतविषादिव अमृतस्येवचाकांक्षेदवमानस्यसर्वदा १६२ संमानादिति ब्राह्मणः संमानात्
विषादिवसर्वतोद्विजेत संमानेप्रीतिंनकुर्यात् अमृतस्येवसर्वसालोकादवमानस्याकांक्षेत् अवमानेकृतेपिक्षमावांश्चित्तखेदंनकुर्यात् मानावमानद्वं
द्वसहिष्णुत्वमनेनविधीयते १६२

सुखंह्यवमतःशेतेसुखंचप्रतिबुध्यते सुखंचरतिलोकेस्मिन्नवमन्ताविनश्यति १६३
सुखंह्यवमतःशेतेइति अवमानसहिष्णुत्वेहेतुमाह यस्मादवमानेपरेणकृते तत्रचित्तखेदमकुर्वाणः सुखंनिद्राति सुप्यथावमानदुःखेनदह्यमानःक
थंनिद्रालभतेकथंसुखंचप्रतिबुध्यते प्रतिबुद्धश्च कथंसुखेनकार्येषुचरति अवमानकर्त्तातेनपापेनविनश्यति १६३ ॥

अनेनक्रमयोगेनसंस्कृतात्माद्विजःशनैः गुरौवसन्संचिनुयाद्ब्रह्माधिगमिकंतपः १६४
अनेनेति अनेनक्रमकथितोपायेनजातकर्मादिनाउपनयनपर्यंतेन संस्कृतोद्विजोगुरुकुलेवसन् शनैस्तस्यावेदग्रहणार्थं तपोऽभि
हितान्वियासमानंनियमकलापरूपमनुतिष्ठेत् विध्यन्तरमिदमपि अयमनुवादोध्ययनांगत्वबोधनाय १६४ ॥

तपोविशेषैर्विविधैर्व्रतैश्चविधिचोदितैः वेदःकृत्स्नोधिगन्तव्यःसरहस्योद्विजन्मना १६५ अयमुपनीतगृह्यमवश्य
पृच्छतितपोविशेषैरिति तपोविशेषैर्नियमकलापैर्विविधैर्बहुप्रकारैश्चब्रह्मचारिधर्मैः व्रतैश्चविधिचोदितैर्महानाम्न्यादिभिर्वेदश्च
त्रयीचउपनिषन्महानाम्निकादिभिर्विधिदर्शितैः सगृह्यविहितैःसमग्रोवेदोमन्त्रब्राह्मणात्मकःसोपनिषत्काध्येतव्यःसरहस्यउपनिषत्साध्या

वेदमेवसदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः वेदाभ्यासोहिविप्रस्यतपःपरमिहोच्यते १६६ अध्यापनायपृथग्द्विजोत्तमः १६५
वेदमेवेति यद्यनियमानामंगत्वमुक्तंतत्तत्रस्वाध्यायाध्ययनमनेनविधीयते तपस्तप्स्यन्नतिरिक्तंद्विजोवेदमेवग्रहणार्थमावर्तयेत्तस्माद्वेदाभ्यासएव

आहैवसनखाग्रेभ्यःपरमंतप्यतेतपः यःस्रग्व्यपिद्विजोऽधीतेस्वाध्यायंशक्तितो विप्रस्येहलोकेप्रकृष्टंतपोऽभिहितमिति
न्वहं १६६ ॥
न्वहं १६७ आहैवेति स्वाध्यायाध्ययनस्तुतिरियंहशब्दःपरमशब्दाभिहितस्यापिअवधिरयं नखाग्रपर्यन्तंवकारःसद्विजआनखाग्रेभ्यएवसर्वशरीरेणैव
सर्वांगमर्दं देहव्यापकमेवप्रकृष्टतमंतपस्तप्यतेयःस्रग्व्यपिकुसुममालाधार्यपिअन्यदेहयथाशक्तिस्वाध्यायमधीतेस्रग्व्यपीत्यनेनेवदाध्य
यनायब्रह्मचारिनियमत्यागमपिदर्शयति तथैतेनपरतिनतपस्तपःकमेकस्यैवतपथनात्मनेपदमवस्तः १६७ ॥

योऽनधीत्यद्विजोवेदमन्यत्रकुरुतेश्रमम् सजीवन्नेवशूद्रत्वमाशुगच्छतिसान्वयः १६८ ॥

योऽनधीत्येति यो द्विजो वेदमनधीत्यान्यत्रार्थशास्त्रादौ श्रमं यत्नातिशयं करोति स जीवन्नेव पुत्रपौत्रादिसहितः शीघ्रं शूद्रत्वं गच्छति वेदम
नधीत्यापि स्मृतिवेदाङ्गाध्ययने विरोधाभावः अत एव शाङ्खलिखितौ न वेदमनधीत्यान्यां विद्यामधीयीतान्यत्र वेदाङ्गस्मृतिभ्यः १६८॥

मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात् १६९

द्विजातीनां त्र्यधिकारं श्रुतेर्द्वि
जत्वनिरूपणार्थमाह मातुरग्र इति मातुः सकाशादादौ पुरुषस्य जन्म द्वितीयं मौञ्जीबन्धने उपनयने आर्षः संस्कारः छन्दसो बहुलमिति ह्रस्वः तृतीयं ज्यो
तिष्टोमादियज्ञदीक्षायां वेदश्रवणात् तथा च श्रुतिः पुनर्वा एतदृत्विजः यज्ञियं कुर्वन्ति यद्दीक्षयन्तीति प्रथमद्वितीयतृतीयजन्मकथनं च द्वितीयजन्म
स्तुत्यर्थं द्विजस्य च यज्ञदीक्षायामप्यधिकारात् १६९

तत्र यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितं तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते

तत्रेति तेषु त्रिषु जन्मसु मध्ये यदेतद्ब्रह्मग्रहणार्थं जन्म उपनयनसंस्काररूपं मेखलाबन्धनोपलक्षितं तत्रास्य माणवकस्य सावित्री माता
आचार्यश्च पिता मातापितृसंपाद्यत्वाज्जन्मनः १७०

वेदप्रदानादाचार्यं पितरं परिचक्षते न ह्यस्मिन्युज्यते कर्म किंचिदा मौञ्जिबन्धनात्

वेदप्रदानादिति वेदाध्यापनादाचार्यं पितरं मन्वादयो वदन्ति पितृवन्महोपकारफलात् गौणं पितृत्वं तत्त्वं महोपकारमेव दर्शयति न ह्यस्मि
न्निति यस्मादस्मिन्माणवके प्रागुपनयनात् किंचित्कर्म श्रौतस्मार्तं च न संबध्यते न तत्रापि क्रियत इत्यर्थः १७१॥

नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते शूद्रेण हि समस्तावद्यावद्वेदे न जायते १७२॥

नाभिव्याहारयेदिति आमौञ्जीबन्धनादिमं प्रवर्तते प्रागुपनयनाद्वेदं नोच्चारयेत् स्वधाशब्दे नयनं श्राद्धं उच्यते तत्र निर्दीयते निष्पाद्यते येन मन्त्रजातेन तद्व
र्जयित्वा मृतपितृकोऽनवश्राद्धादौ मन्त्रानुच्चारयेत् तद्व्यतिरिक्तं वेदमादाहरेत् यस्माद्यावद्वेदे न जायते तावदसौ शूद्रेण तुल्यः १७२

कृतोपनयनस्यास्य व्रतादेशनमिष्यते ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकम् १७३॥

कृतोपनयनस्येति यस्मादस्य माणवकस्य समिधमाधेहि मा दिवा स्वाप्सीरित्यादिव्रतादेशनं वेदस्याध्ययनं मन्त्रब्राह्मणक्रमेणाध्येय
माणमाचार्यात् इत्यादिविधिपूर्वकं उपनीतस्योपदिश्यते तस्मादुपनयनात्पूर्वं न वेदमुदाहरेत् १७३॥

यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि १७४॥

यद्यस्येति यस्य ब्रह्मचारिणो यानि चर्मसूत्रमेखलादण्डवस्त्राण्युपनयनकाले गृह्येण विहितानि गोदानादिकव्रतेष्वपि नवानि कर्तव्यानि १७४

सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन् संनियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः १७५॥

सेवेतेति ब्रह्मचारी गुरुसमीपे वसन्निन्द्रियसंयमं कृत्वात्मनोऽदृष्टवृद्ध्यर्थमिमान्नियमाननुतिष्ठेत् १७५॥

म॰ 27
टी॰ सं॰
२७

नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् । देवताभ्यर्चनं चैव समिदाधानमेव च १७६ नित्यमिति प्रत्यहं स्नात्वा देव
र्षिपितृभ्यस्तर्पकदानं प्रतिमादिषु हरिहरादिदेवपूजनं सायंप्रातश्च समिद्धोमं कुर्यात् यत्तु गौतमोये स्नाननिषेधो ब्रह्मचारिणः स च विलासस्नानवि
षयः श्रुतपदवीयायतः नाप्सु श्लाघमानः स्नायादिति समावर्त्तकालद्वयमभिषेकाग्निकार्यकारणमप्यदृष्टं स्नानमिति कुर्वीतानु वारद्वयं स्ना
वर्जयेन्मधु मांसं च गन्धं माल्यं रसान् स्त्रियः । शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् १७७ ॥ नमुपदिष्टम् १७६
वर्जयेदिति क्षौद्रं मांसं च न खादेत् गन्धं च कर्पूरचन्दनकस्तूरिकादि वर्जयेत् येषां च गन्धानां यथासंभवं भक्षणमनुलेपनं प्रतिषिद्धं माल्यं च न धारयेत्
उद्रिक्तरसांश्च गुडादीन्न खादेत् स्त्रियश्च नोपेयात् यानि स्वभावतो मधुरादि रसानि कालवशेनोदकवासादिना चाम्लीभवन्ति तानि शुक्तानि तानि वा
अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम् । कामं क्रोधं च लोभं च नर्तनं गीतवादनम् प्राणिनां हिंसां न कुर्यात् १७७
अभ्यङ्गमिति तैलादिना शिरःसहितदेहमर्दनं तत्तच्चूर्णकज्जलादिभिश्चक्षुषो रञ्जनं पादुकायाश्छत्रस्य च धारणं कामं मैथुनातिरिक्तविषया
भिलाषातिशयं मैथुनस्य स्त्रिय इत्यनेनैव निषिद्धत्वात् क्रोधं लोभं नृत्यगीतवीणापणवादि वर्जयेत् १७८ ॥
द्यूतं च जनवादं च परिवादं तथानृतम् । स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च १७९ ॥
द्यूतमिति अक्षादिक्रीडां जनैः सह निरर्थवाक्कलहं परस्य दोषवादं मृषाभिधानं स्त्रीणां च मैथुनेच्छया सादरं प्रेक्षणालिङ्गनं परस्यापकारं व
एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् । कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः १८० र्जयेत् १७९
एक इति सर्वत्र नीचशय्यादावेकाकी शयनं कुर्यात् इच्छया न स्वशुक्रपातं येन यस्मादिच्छया स्वमहतां स्वशुक्रपातयन् स्वकीयं व्रतं नाशयति व्रत
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः । स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं ज लोपं चावकीर्णि प्रायश्चित्तं कुर्यात् १८०
पेत् १८१ ॥ स्वप्न इति ब्रह्मचारी स्वप्नादावनिच्छया रेतः सिक्त्वा कृतस्नानो गन्धाद्यनुलेपनपुष्पधूपादिभिः सूर्यमभ्यर्च्य पुनर्मामैत्विन्द्रियमित्येतामृ
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् । आहरेद्यावदर्थानि भैक्षं चाहरहश्चरे चं वारत्रयं पठेत् इदमत्र प्रायश्चित्तम् १८१
त् १८२ उदकुम्भमिति जलकलशपुष्पगोमयमृत्तिकाकुशान् यावदर्थानि यावद्भिः प्रयोजनानि आचार्यस्य तानि स्वस्याग्निकार्यार्थमाहरेत् प्रत
एवउदकुम्भमित्यत्र एकवचनमविवक्षितं प्रदर्शनं चैतत् अन्यदप्याचार्यायोपयुक्तमुपहरेत् भैक्षं च प्रत्यहमर्जयेत् १८२ ॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु । ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् १८३ ॥

27A

वेदयज्ञैरिति वेदयज्ञैरत्यागस्तानां स्वकर्मसु दक्षाणां गृहेभ्यः प्रत्यहं ब्रह्मचारी भिक्षामाहरेत १८३

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत १८४ गुरोः कुल इति आचार्यस्य सपिण्डे-
षु बन्धुषु च मातुलादिषु न भिक्षेत तद्व्यतिरिक्तभिक्षादानयोग्यगृहाभावे चोक्तेभ्यः पूर्वं पूर्वं वर्जयेत तत्र बन्धुषु प्रथमं बन्धुषु भिक्षेत तत्रालाभे ज्ञातीन त-

सर्वं वापि चरेद्ग्रामं पूर्वोक्तानामसम्भवे नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत गुर्वलाभे गुरोरपि ज्ञातीनभिक्षेत १८४

सर्वं वेति पूर्वं वेदयज्ञैरहीनानामित्यनेनोक्तानामसम्भवे सर्वं वा ग्रामं पूर्वोक्तगुणरहितमपि शुचिर्मौनी भिक्षेत महापातकाद्यभिशस्तांस्त्यजेत १८५

दूरादाहृत्य समिधः सन्निदध्याद्विहायसि सायंप्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः १८६ ॥

दूरादिति दूरादिभ्यः पश्चिमहीनहुं देशेभ्यः समिध आनीय आकाशे धारणार्थं उक्तेः पटलादौ स्थापयेत ताभिश्च समिद्भिः सायंप्रातरनले होमं कुर्यात १८६

अकृत्वा भैक्षचरणमसमिध्य च पावके अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत १८७ ॥

अकृत्वेति भिक्षाहारं सायंप्रातः समिद्धोममरोगी नैरन्तर्येण सप्तरात्रमकृत्वा लुप्तव्रतो भवति ततश्चावकीर्णिप्रायश्चित्तं कुर्यात १८७ ॥

भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेद्व्रती भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता १८८ भैक्षेणेति ब्रह्मचारी अन्यका-

मन्नां किंत्वेकगृहादन्नं भिक्षासमूहेन प्रत्यहं जीवेत यस्माद्भिक्षासमूहेन ब्रह्मचारिणो वृत्तिरुपवाससमा श्रुतिभिः स्मृता १८८ ॥

व्रतवद्देववदैवत्ये पित्र्ये कर्मण्यथर्षिवत काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते १८९ व्रतवदिति पूर्वं निषिद्धमेकान्नं
भोजनमस्यापवदति देवदैवत्ये कर्मणि देवतोद्देशेन श्राद्धेऽभ्यर्थितो ब्रह्मचारी व्रतवदिति व्रतविरुद्धमधुमांसादिवर्जितमेकस्याप्यन्नं यथेप्सितं भुञ्जी-
त अत्रापि पित्र्ये श्राद्धेऽभ्यर्थितो भवति तदा ऋषिवदिति मधुमांसवर्जितमेकस्यार्थं यथेप्सितं भुञ्जीत इति स्मृ-
त्यन्तरेऽपि ... नियमरूपं व्रतमस्य लुप्तं न भवति याज्ञवल्क्योऽपि श्राद्धेऽभ्यर्थितस्यैकान्नभोजनमाह ब्रह्मचार्याहूतोऽपि ता-
दृशो वेदमध्यतानादिकं ... कामतः श्रीयाच्छ्राद्धे व्रतमपीडयन्निति विष्णुपुराणे व्रतमस्य न लुप्यते इति ब्रह्मचारिणां ...
कामतः ... ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन्निति ...

ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः राजन्यवैश्ययोस्त्वेवं नैतत्कर्म विधीयते १९० ...

ब्राह्मणस्यैवेति ब्राह्मणक्षत्रियविशां ब्रह्मचारिणां भैक्षचरणविधानात् ... नेन तन्दर्भपत्रादरूपमेकान्नभोजनमुपदिष्टं ...
योऽयं प्रक्रमेणोपदिष्टस्तेनैकान्नभोजनरूपं कर्म तद्ब्राह्मणस्यैव वेदार्थविद्भिर्विहितं क्षत्रियवैश्ययोः पुनर्नैतत्कर्मेति ब्रूयते १९० ॥

म॰ नु॰ सं॰

चोदितो गुरुणा नित्यमप्रचोदित एव वा कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च १९१॥
चोदित इति आचार्येण प्रेरितो न प्रेरितो वा स्वयमेव प्रत्यहमध्ययने गुरुहितेषु च उद्योगं कुर्यात् १९१॥
शरीरं चैव वाचं च बुद्धीन्द्रियमनांसि च नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखं १९२॥
शरीरं चेति देहवाग्बुद्धीन्द्रियमनांसि नियम्य कृताञ्जलिर्गुरुमुखं पश्यंस्तिष्ठेत् नोपविशेत् १९२॥
नित्यमुद्धृतपाणिः स्यात्साध्वाचारः सुसंयतः आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः १९३॥
नित्यमिति सततमुद्धृतपाणिः दक्षिणबाहुः शोभनाचारो वस्त्रावृतदेहः आस्यतामिति गुरुणोक्तः सन् गुरोरभिमुखं यथा भवति तथा आसीत १९३
हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसंनिधौ उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत् १९४॥
हीनान्नवस्त्रेति सर्वदा गुरुसमीपे गुर्वपेक्षया न्यूनान्नवस्त्रप्रसाधनो भवेत् गुरोः प्रथमं रात्रिशेषे शयनादुत्तिष्ठेत् प्रदोषे च गुरोः स्वपनात्पश्चात्स्वपेत् १९४
प्रतिश्रवणसंभाषे शयानो न समाचरेत् नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः १९५
प्रतिश्रवणेति प्रतिश्रवणमाज्ञाङ्गीकरणं संभाषणं च गुरोः शयानः आसनोपविष्टो भुञ्जानस्तिष्ठन्विमुखश्च न कुर्यात् १९५॥
आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः १९६
कथं तर्हि कुर्यादित्याह आसीनस्येति आसनोपविष्टस्य गुरोराज्ञां ददतः स्वयमासनादुत्थितः तिष्ठतो गुरोरादिशतः तदभिमुखं कतिचित्पदानि गत्वा
यदा गुरुरागच्छति तदाप्यभिमुखं गत्वा यदा तु गुरुर्धावन्नादिशति तदा तस्य पश्चाद्धावन् प्रतिश्रवणसंभाषे कुर्यात् १९६॥
पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकं प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः १९७ तथा पराङ्मुखस्येति पराङ्मुख-
स्य गुरोरादिशतः संमुखीभूय दूरस्थस्य गुरोः समीपमागम्य शयानस्य गुरोः प्रणम्य प्रह्वीभूय निदेशान्तिके च स्थितस्य तिष्ठतो गुरोरादिशतः प्रह्वीभूय च प्र-
नीचं शय्यासनं चास्य सर्वदा गुरुसंनिधौ गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् १९८ तिश्रवणसंभाषे कुर्यात् १९७
नीचमिति गुरुसमीपे चास्य गुरुशय्यासनापेक्षया नीचे च शय्यासने नित्यं स्यातां यत्र च देशे समासीनं गुरुः पश्यति तत्र यथेष्टं चेष्टां चरणप्रसा-
रणादिकां न कुर्यात् १९८
नोदाहरेदस्य नाम परोक्षमपि केवलं न चैवास्यानुकुर्वीत गतिभाषितचेष्टितं १९९
नोदाहरेदिति अस्य गुरोः परोक्षमपि उपाध्याय

२४A याचार्थादिवस्नानवचनोपपदस्तस्य नाम नोच्चारयेत् तथास्य गुरोर्गमनभाषितचेष्टितानुकुर्वीत गुरोर्गमनादिसदृशमात्मनो गमनादिन्न कुर्यादिति उपहासबुद्ध्या

गुरोर्यत्र परीवादो निंदा वापि प्रवर्तते कर्णौ तत्र पिधातव्यौ गंतव्यं वा ततोऽन्यतः २०० न कुर्वीत १९९

नं परीवादः अविद्यमानदोषाभिधानं निंदा यत्र देशे गुरोः परीवादो निंदा वा वर्तते तत्र स्थितेन शिष्येण कर्णौ हस्तादिना तिरोधातव्यौ तस्माद्वा देशाद्देशा गुरोर्यत्रेति विद्यमानदोषस्याभिधा

परीवादात्खरो भवति श्वा वै भवति निंदकः परिभोक्ता कृमिर्भवति कीटो भवति मत्स न्तरं गंतव्यम् २००

री २०१ इदानीं शिष्यकर्तृकपरीवादादिफलमाह परीवादादिति गुरोः परिवादात् शिष्यो मृतः खरो निंदकः कुक्कुरो भवति परिभोक्ता

अनुचितेन गुरुधनेनोपजीवकः कृमिर्भवति मत्सरी गुरोरुत्कर्षासहनः कीटो भवति कीटः कृमिभ्यः किंचित्स्थूलो भवति २०१

दूरस्थो नार्चयेदेनं न क्रुद्धो नांतिके स्त्रियाः यानासनस्थश्चैवैनमवरुह्याभिवादयेत् २०२ दूरस्थ इति दूर

स्थः शिष्योऽन्यं नियुज्य माल्यवस्त्रादिना गुरुं नार्चयेत् स्वयं गमनाशक्तौ न दोषः क्रुद्धः कामिनीसमीपे च स्थितं स्वयमपि नार्चयेत् यानास

स्थश्च शिष्यो यानासनादवतीर्य गुरुमभिवादयेत् यानासनस्थश्चैवैनं प्रत्युत्थायाप्येनेन यानासनाद्रुह्यान विहितत्वेन तत्र यानासनस्थस्यागमे

प्रतिवातेऽनुवाते च नासीत गुरुणा सह असंश्रवे चैव गुरोर्न किंचिदपि कीर्तयेत् २०२ पुनरुक्तिः

प्रतिवात इति प्रतिगतो अभिमुखो भूतः शिष्यस्य गुरुदेशाच्छिष्यदेशमागच्छति स प्रतिवातः यः शिष्यदेशाद्गुरुदेशमागच्छति सोऽनुवातः त

त्र गुरुणा सममेनासीत तथा अविद्यमानः संश्रवो यत्र तस्मिन्नसंश्रवे गुरुर्यत्र न शृणोति तथा तत्र गुरुगतमन्यगतं वा न किंचित्कथयेत् २०३

गोऽश्वोष्ट्रयानप्रासादस्रस्तरेषु कटेषु च आसीत गुरुणा सार्धं शिलाफलकनौषु च २०४ गोऽश्वेति यानशब्दः प्रत्येकमभिसं

बध्यते बलीवर्दयाने घोटकप्रयुक्ते याने उष्ट्रप्रयुक्ते याने प्रासादोपरि प्रस्तरे कटे च तृणादिनिर्मिते शिलायां फलके च दारुघटिते नौकायां

गुरोर्गुरौ संनिहिते गुरुवद्वृत्तिमाचरेत् न चानिसृष्टो गुरुणा स्वान्गुरूनभिवादयेत् नौकायां च गुरुणा सहासीत २०४

गुरोर्गुरौ सन्निहिते आचार्यस्याचार्ये सन्निहिते आचार्य इव तस्मिन्नपि अभिवादनादिकां वृत्तिमनुतिष्ठेत् तथा गुरुगृहे वसन् शिष्य आचार्येणानिसृष्टो २०५

विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु प्रतिषेधत्सु चाधर्माद्धितं चोपदिशत्स्वपि २०६ गुरून्मातृपित्रादीनभिवादयेत्

विद्येति आचार्यव्यतिरिक्ता उपाध्यायादयो विद्यागुरवः तेष्वेतदेव नित्या समानोपक्रमः किंतु आचार्य इव नित्या सार्वकालिकी वृत्तिर्विधेया तथा स्व २०५

श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत् गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबंधुषु २०७ योनिषु पित्रादिषु तत्र हितोपदेशके

तथा चोपनिषत्सु गुरुवद्वर्तितव्यम् २०६

२९

म०
७। मृ
२४

श्रेयः स्विति श्रेयः स्वविद्यातपःसमृद्धेषु आर्येषु इति गुरुपुत्रविशेषणं समानजातिषु गुरुपुत्रेषु शेषज्ञातिषु पितृव्यादिषु सर्वदा गुरुवद्वृत्तिमन्
तिष्ठेत गुरुपुत्रस्त्वाचार्यशिष्यात् अधिकवयाश्चेवोच्यते शिष्यबालसमानवयसोऽपि तेन तं विशेषमवधारयन्मान्यमाह २०७ ॥

बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति २०८ ॥ बाल इति कनिष्ठः सम
वया वा ज्येष्ठोऽपि वा शिष्यो वाऽध्यापयन् अध्यापनसमर्थो गृहीतवेदस्तथा यज्ञकर्मणि ऋत्विगनृत्विग्वा यज्ञदर्शनार्थमागतो गुरुवत्पूजामर्हति २०८

उत्सादनं च गात्राणां स्नापनोच्छिष्टभोजने न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनं २०९ ॥ आचार्यवदिष्यविशेषे
णस्नातायोग्यानां विशेषमाह उत्सादनमिति गात्राणामुत्सादनमुद्वर्तनं स्नापनं उच्छिष्टभक्षणं पादयोश्च प्रक्षालनं गुरुपुत्रस्य न कुर्यात् २०९

गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः २१० ॥
गुरुवदिति सवर्णा गुरुपत्न्यः गुरुवदाज्ञाकरणादिना पूज्या भवेयुः असवर्णाः पुनः केवलैः प्रत्युत्थानाभिवादनैः ॥ २१० ॥

अभ्यंजनं स्नापनं च गात्रोत्सादनमेव च गुरुपत्न्या न कार्याणि केशानां च प्रसाधनं २११ अभ्यंजनमिति तैलादिना
देहाभ्यंगः स्नापनं गात्राणां उद्वर्तनं केशानां च माल्यादिना प्रसाधनमेतानि गुरुपत्न्या न कर्तव्यानि केशानामिति प्रदर्शनमात्रं मुखदेहस्यापि चन्दना
दिना प्रसाधनं न कार्यम् २११ ।

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः पूर्णविंशतिवर्षेण गुणदोषौ विजानता २१२
गुरुपत्नीति युवती गुरुपत्नी पादयोरुपसंगृह्य अभिवादनदोषगुणज्ञेन यूना नाभिवाद्या पूर्णविंशतिवर्षेणेति यौवनप्रदर्शनार्थं बालस्य पादयोरभि
वादनं न निषिद्धं न स्त्रस्तभूमावभिवादनं च
तथा २

स्वभाव एष नारीणां नराणामिह दूषणं अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः २१३
स्वभाव इति स्त्रीणामयं स्वभावः यदिह शृंगारचेष्टया व्यामोह्य पुरुषाणां दूषणम् अतोऽर्थादस्माद्धेतोः पंडिताः स्त्रीषु न प्रमत्ता भवंति २१३ ॥

अविद्वांसमलं लोके विद्वांसमपि वा पुनः प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगं २१४ अविद्वांसमिति विद्वानहं जितें
द्रिय इति विद्याभिमानेन स्त्रीसन्निधिर्न विधेयः यस्मादविद्वांसमपि वा पुनः पुरुषं देहधर्मात्कामक्रोधवशानुयायिनं स्त्रियः उत्पथं नेतुं समर्थाः २१४ ॥

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् बलवानिंद्रियग्रामो विद्वांसमपि कर्षति २१५
[illegible] सेवेति मात्रा भगिन्या दुहित्रा वा निर्जनगृहादौ नासीत यतोऽतिबलइंद्रियगणः शास्त्रनियमितात्मानमपि पुरुषं परवशं करोति २१५ ॥

कामं तु गुरुपत्नीनां युवतीनां युवा भुवि विधिवद्वंदनं कुर्यादसावहमिति ब्रुवन् २१६ कामंमिति कामं तु गुरुपत्नी
नां युवतीनां युवमपि युवा यथोक्तविधिना भूमावभिवादयेऽमुकशर्माहं भवतीति ब्रुवन्पादग्रहणं विनाययेष्टमभिवादनं कुर्यात् २१६ ॥

विप्रोष्य पादग्रहणमन्वहं चाभिवादनं गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् २१७ विप्रोष्येति प्रवासात्संगतस्य प्रेतम
वाम[illegible]दक्षिणेन च दक्षिणं इत्युक्तविधिना पादग्रहणं प्रत्यहं च भूमावभिवादनं गुरुपत्नीषु युवा कुर्यात् शिष्टानामयमाचार इति जानन् २१७

यथा खनन्खनित्रेण नरो वार्यधिगच्छति तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति २१८
यथेति उक्तस्य शुश्रूषाविधेः फलमाह यथा कश्चिन्मनुष्यः खनित्रेण भूमिं खनन् जलं प्राप्नोति एवं गुरुस्थितां विद्यां गुरुसेवापरः शिष्यः प्राप्नोति २१८

मुंडो वा जटिलो वा स्यादथवा स्याच्छिखाजटः नैनं ग्रामेऽभिनिम्लोचेत्सूर्यो नाभ्युदियात्क्वचित् २१९
मुंडो वेति ब्रह्मचारिणः प्रकारत्रयमाह मुंडितसमस्तशिरःकेशो वा जटो वा न वा शिखैव वा जटा जाता यस्य अपरेषु शिरःकेशाः मुंडिताः तथा वा भवेत्
एनं ब्रह्मचारिणं क्वचित् ग्रामे निद्राणं अनतः शयानमिति दर्शनात् सूर्यो नाभिनिम्लोचेत् नास्तमियात् २१९ ॥

तं चेदभ्युदियात्सूर्यः शयानं कामचारतः निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनं २२० अत्र प्रायश्चित्तमाह तं चेदिति तं
[illegible]निद्रापरवशं चेन्नाज्ञानात् सूर्योऽभ्युदियात् अस्तमियात्तदा सावित्रीं जपन् उभयत्रापि दिनं उपवसेत् रात्रौ भुंजीत अभिविक्तकस्य
[illegible]उपवासजपो अभिरभागइति कर्मप्रवचनीयसंज्ञा ततः कर्मप्रवचनीययुक्ते द्वितीया सावित्रीं जपन् कुर्वन् गौतमवचनात् तदाह[illegible]
[illegible]अभ्युदिता ब्रह्मचारी तिष्ठेत् [illegible]भिस्तमितश्चरात्रिं जपन् सावित्रीं न गौतमवचनात् सूर्याभ्युदितस्य दिनाभोजनं जपाद्युक्ता[illegible]
[illegible]भोजनं जपो नेनत [illegible]मन्त्रविहितमन्यमन्त्रयामहे [illegible]दर्शनादसत्याक्रमे[illegible]
[illegible]गौतमवचनात् सावित्रीजपोऽभ्युपेयप्रवचनं [illegible]दिनोपवासजपमपाक्रमे तस्माद[illegible]समानवगौतमोयप्राय
श्चित्तविकल्पः २२० ॥

सूर्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा २२१
[illegible]माह सूर्येणेति यस्मात्सूर्येणाभिनिर्मुक्तोऽभ्युदितश्च निद्राणः प्रायश्चित्तमकुर्वन्महता पापेन युक्तो नरकं गच्छति तस्मात्[illegible]प्रायश्चित्तम
[illegible] २२१

आचम्य प्रयतो नित्यमुभे संध्ये समाहितः शुचौ देशे जपंजप्यमुपासीत यथाविधि २२२ ॥
यस्मादकरणे [illegible]आह आचम्येति आचम्य पवित्रो नित्यमनन्यमनाः शुचिदेशे सावित्रीं जपन् उभे संध्ये विधिवदुपासीत २२

यदि स्त्री यद्यवरजः श्रेयः किंचित्समाचरेत् तत्सर्वमाचरेद्युक्तो यत्र वास्य रमेन्मनः २२३ ॥

30

म
नु सं
३०

30

यदीति यदि स्त्री शूद्रो वा किंचिच्छ्रेयः शुभं पश्यति तत् सर्वं प्रयुक्तः कुर्वीत यत्र च शास्त्रानिषिद्धे मनो ऽस्य रमते तदपि कुर्यात् २२३ ॥

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः २२४ ॥

श्रेय एव विनिश्चयति धर्मार्थाविति धर्मार्थौ श्रेयो ऽभिधीयते कामार्थौ दित्यादितिके विदाचार्यामन्यते श्रेयो धर्मार्थकामौ स्वादेव देहत्वात् धर्म एव श्रेयोऽर्थकामयोरप्युपायत्वात् अर्थ एवेह लोके श्रेयः सत्यं धर्मकामयोरपि साधनत्वात् सम्प्रति समतमाह धर्मार्थकामात्मकः परस्परावि
रुद्धस्त्रिवर्ग एव पुरुषार्थस्तथा श्रेय इति विनिश्चयः एवं च मुमुक्षोरपि उपदेशात्मकत्वात् मुमुक्षूणां तु मोक्ष एव श्रेय इति षष्ठे वक्ष्यते २२४ ॥

आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः २२५ आचार्यो ऽत्र शिक्षया
र्थो वेदान्तो दितस्य ब्रह्मणः परमात्मनो मूर्तिः शरीरं पिता हिरण्यगर्भस्य माता च धारणात् पृथिवी मूर्तिः भ्राता च स्वः सगर्भः देव तस्मात्तस्मादेव नापु
आचार्यश्च पिता चैव माता भ्राता च पूर्वजः नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः २२६ पायत्तावमन्तव्याः २२५ ॥
आचार्यश्चेति आचार्यो जनको जननी च भ्राता च भ्राता च सगर्भो ज्येष्ठः पीडितेनापि श्रमीनावमाननीयाः विशेषतो ब्राह्मणेन यस्मात् २२६ ॥

यं मातापितरौ क्लेशं सहेते संभवे नृणाम् न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि २२७ ॥

यमिति नृणामपत्यानां संभवे गर्भोत्पत्तेः प्रसति प्रभृति यं क्लेशं मातापितरौ सहेते तस्य वर्षशतैरपि पृथक् एकेनापि जन्मभिरानृण्यं कर्तुमशक्यं मातुस्तावत्
कुक्षौ धारणं दुःखं प्रसववेदनानि पित्रोर्जातस्य रक्षणावर्धनकष्टं च पितुश्चापि बाल्ये रक्षणासंवर्धनकष्टं उपनयनात्प्रभृति वेदं तद्ग्राहयन् व्याख्या

तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते २२८ नानादि श्रेयो तिसामयइति सर्वमिदं तस्मा
तयोर्नित्यमिति तयोर्मातापित्रोः प्रत्यहमाचार्यस्य च सर्वदा प्रीति कुर्यादेव तत् यस्मात्तेष्वेव त्रिषु प्रीतेषु सर्वं तपः चान्द्रायणादि कर्म फलं
णाम्यकृत्यं तमाचादिप्रयतेषु च सर्वस्य तपसः फलं प्राप्नोतीत्यर्थः २२८ ॥ देव तेषु पत्नीनावमन्तव्याः २२७ ॥

तेषां त्रयाणां शुश्रूषा परमं तप उच्यते न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् २२९ तेषामिति तेषां मातापित्राचार्याणां यत्परि
चर्या सर्वेषां तपसां श्रेष्ठं इत एव सर्वतपःफलप्राप्तेर्यं धर्ममपि धर्ममेकं पुण्यं वितत् करोति तदपेतं त्रयाणामनुमतिव्यतिरेकेण न कुर्यात् २२९ ॥

त एव हि त्रयो लोकास्त एव त्रय आश्रमाः त एव हि त्रयो वेदास्त एवोक्तास्त्रयो ऽग्नयः २३०

त एवेति यस्मात्त एव मातापित्राचार्याः त्रयो लोकाः लोकत्रयप्राप्तिहेतुत्वात् कारणे कार्योपचारः त एव त्र्याश्रमाः गार्हस्थ्यादिमा च त्रय आश्रमाः गार्हस्थ्याद्या
श्रमत्रयफलदत्वात् त एव त्रयो वेदाः वेदत्रयजपफलोपपादनात् त एव हि त्रयो ऽग्नयो ऽभिहिताः त्रेताग्निसाध्ययज्ञादिफलदातृत्वात् २३० ॥

30A

पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः गुरुराहवनीयस्तु साग्नित्रेता गरीयसी २३१॥ पितेति वेदप्रसिद्धौ यथा त्रयोऽपि तेऽपि गार्हपत्याग्निः माता दक्षिणाग्निः आचार्य आहवनीयः सेयमग्नित्रेता श्रेष्ठतमा तस्मादेतेषां शुश्रूषणेन वस्तुविशेषोऽत्र न भावनीयः २३१॥

त्रिष्वप्रमाद्यन्नेतेषु त्रीँल्लोकान्विजयेद्गृही दीप्यमानः स्ववपुषा देववद्दिवि मोदते २३२॥

त्रिष्विति एतेषु त्रिषु प्रमादमकुर्वन्नभक्त्यावज्ञायन्नेव गृहस्थोऽपि त्रीन्लोकान्विजयते संज्ञापूर्वकस्यात्मनेपदविधेरनित्यत्वात्परस्मैपदं त्रीँल्लोकान्विजयेदिति त्रिष्वपि प्राप्नोति तथा स्ववपुषा प्रकाशमानः सूर्यादिदेववद्दिवि हृष्टो भवति २३२॥

इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते २३३॥

इममिति इमं भूर्लोकं मातृभक्त्या पितृभक्त्या मध्यमं तदन्तरीक्षम् आचार्यभक्त्या तु हिरण्यगर्भलोकमेव प्राप्नोति २३३॥

सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः २३४ सर्वे तस्येति यस्यैते त्रयो मातापित्राचार्या आदृताः सत्कृताः तस्य सर्वे धर्माः फलदा भवन्ति यस्यैते त्रयोऽनादृतास्तस्य सर्वाण्यग्निहोत्रादीनि तस्मात्कर्माणि निष्फलानि भवन्ति २३४

यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः २३५ यावदिति ते त्रयो यावज्जीवन्ति तावदन्यं धर्मं स्वातन्त्र्येण नानुतिष्ठेत् तदनुज्ञया तु धर्मानुष्ठानं शास्त्रविहितमेव किंतु तेष्वेव प्रत्यहं प्रियहितपरः शुश्रूषां कुर्यात् तदर्थमीप्सितसाधनं प्रियं भैषज्यपानादिवाहितम्

तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत् तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः २३६॥ तेषामिति तेषां शुश्रूषायामविरोधेन तदनुज्ञातो यद्यन्मनोवचनकर्मभिः परलोकफलं कर्मानुष्ठितं तत्तन्मयैतदनुष्ठितमिति पश्चात्तेभ्यो निवेदयेत् २३६

त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते २३७॥

त्रिष्विति इतिशब्दः कार्त्स्न्ये हि यस्माद्धेतौ यस्मादेतेषु त्रिषु शुश्रूषितेषु पुरुषस्य सर्वं श्रौतस्मार्तं कर्तव्यं समाप्तमनुष्ठितं भवति तत्फलावाप्तेस्तस्मादेष श्रेष्ठो धर्मः साक्षात्सर्वपुरुषार्थसाधनः अन्यस्त्वग्निहोत्रादिः प्रतिनियतस्वर्गादिरूपहेतुर्धर्मो जघन्यधर्म इति शुश्रूषास्तुतिः २३७॥

श्रद्दधानः शुभां विद्यामाददीतावरादपि अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि २३८॥

श्रद्दधान इति श्रद्धायुक्तः शुभां शास्त्रदृष्टशक्तिं गारुडादिविद्यामवरान्छूद्रादपि गृह्णीयात् अन्त्यश्चाण्डालः तस्मादपि जातिस्मरादेर्विहितयोगप्रकर्षात् दुष्कुलात्कुलीनोऽपि मोक्षोपायमात्मज्ञानमाददीत तथा श्रुतानमेवोपक्रम्य मोक्षधर्मे व्याख्यातं तत्र व्याख्या

म॰ सं॰
३१ 31

नतु विद्याल्लेपुराप्य श्रूद्रादपि नीचादपीत्तां श्रुतात्तयोग्रहयातेन निःग्नशाहिनंश्रुतिजन्मस्यविशेषनः मेधातिथिस्तत्तुतिसन्नपेन्त्यायापरोप्ययं मो
लौकिकः धर्मशास्त्रावस्थायामपि श्रुतमते इति तृडा लोध्ययदेशेमाविशेष्यमाचाभिन्नभिन्नायाइति वदन्तितमपि धर्मश्रुतिरहेतु प्रागल्भ्या
लौकिकं वस्तप्रयंधमितिब्रुवत् विचित्यापिसर्व स्त्रारामेधातिथिः मतास्त्रीरत्नमात्मापेन्त्यानिकृष्टकुलादपि परिणीतस्त्रीकर्याते २३८

विषादप्यमृतं ग्राह्यं बालादपि सुभाषितं अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनं २३९ ॥

विषादिति विषयद्यमृतं युक्तं भवति तदा विषमपसार्य तस्मादमृतं ग्राह्यं बालादपि हितवचनं ग्राह्यं शत्रुतोपि सज्जनवृत्तममेध्यादपि सुवर्णा दिके गृहीतव्यं २३९

स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितं विविधानि च शिल्पानि समादेयानि सर्वतः २४० ॥

स्त्रिय इति अवस्यादीनां उक्तानामपि दृष्टांततेनोपादनेयथास्यादयोनिकृष्टकुलादिभ्यो गृह्यंतेतथाश्रमान्यपि हितानि चित्रलिखनादीनि सर्वतः प्रतिगृह्य तव्यानि २४०

अब्राह्मणादध्ययनमापत्काले विधीयते अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः २४१

अब्राह्मणादिति ब्राह्मणादध्यायो द्विजः तद्विय तदभावे वैश्याद्वा तस्मादध्ययनमापत्काले ब्राह्मणाध्यापकासंभवे ब्रह्मचारिणो विधीयते अनुव्रज्यादि च गुरोः शुश्रूषा यावदध्ययनं तावत्
कार्या गुरुत्वेन पादप्रक्षालनोच्छिष्टप्राशनादि रूपा शुश्रूषा अस्मकामानकार्या तदर्थमनुव्रज्या चेति विशेषितं गुरुत्वमपि यावदध्ययनमेव क्षत्रियस्य
सामः संपन्नः क्षत्रियो विप्रे शुश्रूषावगमादिना प्राप्तविद्यो ब्राह्मणस्तथा न तस्य गुरुः स्मृतः ब्रह्मचारिणे नैष्ठिकस्यापि अब्राह्मणादध्ययनं प्रत्युक्तं

नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत् ब्राह्मणे वाननूचाने कांक्षन्गतिमनुत्तमां २४२ ॥ शृतिपर्यति २४२

नाब्राह्मण इति शृणोति केवलं यावज्जीविकं ब्रह्मचर्यं क्षत्रियादिके गुरौ ब्राह्मणे सांगवेदानध्येतरि अनुत्तमां गतिं मोक्षलक्षणामिच्छन् शिष्यो नानुतिष्ठे २४२

यदि त्वात्यन्तिकं वासं रोचयेत गुरोः कुले युक्तः परिचरेदेनमाशरीरविमोक्षणात् २४३ ॥

यदीति यदि तु गुरोः कुले नैष्ठिकब्रह्मचर्यात्मकमात्यन्तिकं वासमिच्छेत्तदा यावज्जीवनमुद्युक्तो गुरुम् शुश्रूषयेत् २४३ ॥

आसमाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुं स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतं २४४

अस्य फलमाह आसमाप्तेरिति समाप्तिः शरीरस्य जीवत्यागः तत्पर्यंतं यो गुरुं परिचर्यति स ततस्ततो ब्राह्मणः सद्मरूपमविनाशि प्राप्नोति ब्रह्मणि लीयत इत्यर्थः २४४

न पूर्वं गुरवे किंचिदुपकुर्वीत धर्मवित् स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत् २४५ ॥

न पूर्वमिति उपकुर्वाणस्यायं विधिः नैष्ठिकस्य स्नानासंभवात् गुरुदक्षिणादानधर्मज्ञो ब्रह्मचारी स्नानात्पूर्वं किंचित् गोवस्त्रादि यन्न गुरवे नावश्यं दद्यात
यदि तु यदृच्छातो लभेत तद्गुरवे दद्यादेव स्नानपवस्नानात्पूर्वं गुरवे दातुमाहृत्य स्नानः यदस्यानिष्टं यतो यथ्थः भवेत् दक्षिणा पत्ता मयपव ब्रह्म
चारिणोप ज्ञातिभ्यस्त्रतमिति स्नास्यन् पुनर्गुरुणाज्ञप्तः यथाशक्ति धनेन यावितापि प्रतिग्रहादिना पि गुरवे अर्थमाहृत्यावश्यं दद्यात् २४५ ॥

31A

क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनं धान्यं शाकं च वासांसि गुरवे प्रीतिमावहेत् २४६ किं तत्तदाह क्षेत्रमिति शक्त्याऽ
देयं माहे ...हिरण्यादिकं यथासामर्थ्यं विकल्पितं समुदितं वा गुरवे दत्वा तत्प्रीतिमर्जयेत् विकल्पपक्षे वा ततोऽपासमवे छत्रोपानहमपि द
द्यात् इति दद्यात् समुदितदानप्रदर्शनार्थं चेत्समभवे मदपि दद्यात् अतएवलघुहारीतः एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् पृथिव्यां नास्ति तद्द्रव्यं
आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते गुरुदारे सपिंडे वा गुरुवद्वृत्तिमाचरेत् २४७ ॥ यद्दत्वा चानृणी भवेत् अस्माद् भवेषा ह्यमपि
आचार्यं इति नैष्ठिकस्यायं उपदेशः आचार्ये मृते तत्पुत्रे विद्यादिगुणयुक्ते तदभावे गुरुपत्न्यां तदभावे गुरोः सपिंडे पितृव्यादौ गुरुवत् शुश्रूषामनुतिष्ठेत् दद्यात् २४६
एतेष्वविद्यमानेषु स्थानासनविहारवान् प्रयुंजानोऽग्निशुश्रूषां साधयेद्देहमात्मनः २४८ एतेष्विति एतेषु त्रिषु अविद्यमानेषु २४७
तेषु सत्तमाचार्यस्यैवाग्नेः समीपे स्थानासनविहारैः सायंप्रातरादौ समिद्धोमादिना चाग्नेः शुश्रूषां कुर्वन् आत्मनो देहमात्मदेहाभावप्राप्तिं जीवब्रह्मप्रा
एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः स गच्छत्युत्तमस्थानं न चेह जायते पुनः २४९ ॥ प्तियोग्यं साधयेत् २४८ ॥
इति श्रीमानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां द्वितीयोऽध्यायः २ ॥
एवं चरतीति आसमाप्तेः शरीरस्य यत्नेन यावज्जीवमाचार्यशुश्रूषया मोक्षलक्षणं फलमुक्तं इदानीमाचार्ये मृते पित्रादिकसमनेनानन्तरमोक्षविधिना
आचार्यपुत्रादीनामप्यग्निपर्यन्तानां शुश्रूषकोऽयं नैष्ठिको ब्रह्मचर्यमखंडितव्रतोऽनुतिष्ठति स उत्तमस्थानं ब्रह्मप्राप्त्यात्मकलयलक्षणं प्राप्नोति न
तेह संसारे कर्मवशाज्जन्म लभते २४९ ॥ इति श्रीमन्वर्थमुक्तावल्यां मनुवृत्तौ द्वितीयोऽध्यायः २ ॥
ॐ षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतं तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा १ ॥
एवं ह्यासमाप्तेः शरीरस्येत्यनेन नैष्ठिकब्रह्मचर्यमुक्तं न तत्राव्यपि पत्नी आसमावर्तनादित्यनेन नवोपकुर्वाणकस्य समावधिब्रह्मचर्यमुक्तं अतस्तस्ये
यं गार्हस्थ्यादिकारः न तु कियद्वर्षविधिर्वा ब्रह्मचर्यं तस्य गार्हस्थ्यमिति पर्यन्तं तायामाह षट्त्रिंशदाब्दिकमिति त्रयो वेदा ऋग्यजुः सामाख्यास्तेषां
माद्यः स्वी... ... नियममन्वहं पट्त्रिंशदाब्दिकमिति षट्त्रिंशद्वर्षाणि कालास्तत्र आसिद्धं प्रतिवेदं द्वादश वर्षाणि
नियतमनु प्रतिवेदं द्वादश वर्षाणि ब्रह्मचर्यं तदर्धिकमष्टादशवर्षाणि त्रय्याः प्रतिवेदं षड्वर्षाणि पादिकं नववर्षाणि त्रयी प्रतिवेदं
...यावता कालेन ... ... तावत्कालं वा ब्रह्मचर्यमिति ... ...
... ... नियम... ... ... विकल्पः तथाच श्रुतिः नियमनाधीतवीर्यवत्तरं भवतीति ग्रहणान्तिकपक्षे ... ...
... ... अथर्ववेदस्य ऋग्वेदांशत्वेऽपि ऋग्वेदं यजुर्वेदं सामवेदमथर्वाणं चतुर्थमिति ... ...
वेदत्वेन कीर्तनात् ... ... इति ... ... पृथग्... ... अथर्ववेदत्वेऽपि प्रायेणाभिचारार्थत्वात् यत्तु ...

मनु. स. ३२

मन्त्रप्रयोगाच्चातिदेशः तथा हि ऋग्वेदेनैव होत्रं क्रियते यजुर्वेदेनाध्वर्यवं सामवेदेनौद्गात्रं यदेव शेषं विद्यायेत् ऋक्षेतेन ब्रह्मत्वमिति श्रुतेस्त्रयाणां मेधाधा।
तेयन्नानां तायतेयेवमानवः वैदिकव्रतचर्याविधिश्चाथर्ववेदव्रतचर्यानिषेधयतितत्र सत्येवाकचभेदप्रसंगात् स्मृत्यन्तरे वृद्धमात्रे व्रतश्रवणाच्चयोगि

वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् २ याज्ञवल्क्यः प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दाह्वा। नि पंच वा १।

वेदानधीत्येति वेदशाखात्रयं भिन्नवेदशाखा वा परः स्वशाखाध्ययनपूर्वकं वेदशाखात्रयं द्वयमेकां वा शाखां मन्त्रब्राह्मणक्रमेणाधीत्य गृहस्थाश्रमं गृह
स्थविहितकर्मकलापरूपमनुतिष्ठेत् कृतदारपरिग्रहो गृहस्थः गृहशब्दस्य दारवचनत्वात् अविप्लुतब्रह्मचर्य इति पूर्वविहितस्त्रीसंयोगमधुमांस
भक्षणवर्जनरूपब्रह्मचर्यानुवादोयं प्रकृष्टाध्ययनार्गलापनार्थः ग्रहणशक्त्यपेक्षश्चायमेकद्वित्रिशाखाध्ययनविकल्पः यद्यपि व्रतानि वेदाध्य
यने च नित्यवदुपदिष्टत्वात्तानि मनुनोभयस्नातकपक्षप्रशस्तत्वादभिहितस्तथापि स्मृत्यन्तरादस्नातकोपि वोढव्यः तदाह हारीतः त्रयः स्नातका भवन्ति वि
द्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्चेति यः समाप्य वेदमसमाप्य व्रतानि समावर्तते स विद्यास्नातकः यः समाप्य व्रतान्यसमाप्य वेदं
समावर्तते स व्रतस्नातकः उभयं समाप्य समावर्तते यः स विद्याव्रतस्नातकः याज्ञवल्क्योप्याह वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वेति २॥

तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः । स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवा ३

तमिति तं ब्रह्मचारिधर्मानुष्ठानेनाख्यातं दीयत इति दायः ब्रह्मैव दायो ब्रह्मदायः तं हरतीति ब्रह्मदायहरं पितुः पितृतो गृहीतवेदमित्यर्थः पितृतोऽ
ध्ययनसम्भवाद् कश्चित्पितुरभावे वाचार्यो यस्याधीते वेदं मालयालङ्कृतं तल्पे शयने उपविष्टं गोमाशनमधुपर्केण पिता आचार्यो वा विवाहात्प्रथमं

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि । उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ४ पूजयेत् ३॥

गुरुणेति गुरुणा दत्तानुज्ञः सगृह्योक्तविधिना कृतस्नानसमावर्तनः समानवर्णां शुभलक्षणां कन्यां विवहेत् ४॥

असपिण्डा च या मातुरसगोत्रा च या पितुः । सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ५॥ असपिण्डा चेति मातुर्या सपिण्डा

न भवति सप्तमपुरुषपर्यन्तं सपिण्डतां वक्ष्यति सपिण्डता तु पुरुषे सप्तमे विनिवर्तत इति तेन मातामहादिवंशजाया न भवतीत्यर्थः
न सगोत्रापि मातृवंशपरम्पराजन्मनाम्नोः अपरिज्ञाने सति न विवाह्या तदिति यन्न मातृसगोत्रापि विवाह्येति संगृहीते तथा च व्यासः सगोत्रां मा
तुः केचिच्छूद्राहकर्माणि जन्मनाम्नोरविज्ञाने उद्वहेदविशङ्कितः यत्तु सुमन्तुः पिता पितृष्वसा मातृसगोत्रा निषिद्धा वचनं लिखितम्
परिणीय सगोत्रां तु समानप्रवरां तथा तस्यां कृत्वा समुत्सर्गं द्विजश्चान्द्रायणं चरेत् मातुलस्य सुतां चैवं मातृगोत्रां तथैव चेति तदपि मातृव
गोत्राजन्मनामपरिज्ञानविषयमेव असगोत्रा च या पितुरिति पितुर्या सगोत्रा न भवति चकारात् पितृसपिण्डापि पितृष्वस्रादिसन्ततिभवा या न भवति
सा प्रशस्ता द्विजातीनां दारत्वसम्पादके विवाहे प्रशस्ता मैथुने साध्वी अग्न्याधानकर्मयोग्यत्वापादनाद्दोषं चेति ५॥

३२७ महांत्यपि समृद्धानि गोजाविधनधान्यतः स्त्रीसंबंधे दशैतानि कुलानि परिवर्जयेत ६ ॥
महांत्यपीति उत्कृष्टान्यपि गवादिभिः समृद्धान्यपि इमानि दश कुलानि विवाहे त्यजेत ६ ॥
हीनक्रियं निष्पुरुषं निश्छंदो रोमशार्शसं क्षयामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ७ ॥
तानि कानीत्याह हीनक्रियमिति जातकर्मादिक्रियारहितं स्त्रीजनकं वेदाध्ययनशून्यं बहुदीर्घरोमान्वितं अर्शोनामव्याधियुक्तं क्षयरोगमंदा
मंदानलापस्मारश्वित्रकुष्ठयुक्तानां च कुलानि वर्जयेदिति पूर्वक्रियासंबंधः दृष्टमूलता चास्य प्रतिषेधस्य मातृवदपत्यानां प्रकृतेन तेन हीनक्रिया
दिकुलात् परिणीतायाः संततिरपि तादृशी स्यात् व्याधयः संचारिण इति वैद्यकाः पठंति सर्वसंक्रामिणो रोगा वर्जयित्वा प्रवाहिका इति अवेदमूला
कथमियं प्रमाणमिति वेदे दृष्टार्थत्वेनैव प्रमाणसंभवात् तदुक्तं भविष्यपुराणे सर्वापि तु वेदमूला दृष्टार्थाः परिहृत्य तु मीमांसाभाष्यकारेणापि स्मार्त
शिकरणाभिहितं ये दृष्टार्थास्ते तत्प्रमाणं ये त्वदृष्टार्थास्तेषु वैदिकप्रत्यक्षानुमानमिति ७ ॥
नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीं नालोमिकां नातिलोमां न वाचाटां न पिंगलां ८ ॥ कुलप्रतिषेध
मभिधाय कन्यास्वरूपाश्रयप्रतिषेधमाह नोद्वहेदिति कपिलकेशां षडंगुल्यादिकां नित्यव्याधितां अविद्यमानलोमां प्रचुरलोमां बहुपरुषभाषिणीं
नर्क्षवृक्षनदीनाम्नीं नांत्यपर्वतनामिकां न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकां ९ पिंगलाक्षीं कन्यां नोपयच्छेत् ॥ ८
नर्क्षेति ऋक्षं नक्षत्रं तन्नामिकां आर्द्रा रेवतीत्यादिकां पर्वतनदीम्लेच्छपर्वतपक्षिसर्पदासभयानकनामिकां कन्यां नोद्वहेत् ९ ॥ ९ ॥
अव्यंगांगीं सौम्यनाम्नीं हंसवारणगामिनीं तनुलोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रियं १० ॥
अव्यंगांगीमिति अव्यंगांगीं सुखोच्चार्यनाम्नीं हंसगजगतिविशेषगमनां सूक्ष्मलोमकेशदशनां कोमलांगीं कन्यामुद्वहेत् १० ॥
यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशंकया ११ ॥
प्रशस्तविधिनिषेधयोरभिधानमनिषिद्धविहितकन्यापरिणयनसमुच्चयार्थमिति दर्शयितुमाह यस्यास्त्विति यस्याः पुनर्भ्राता नास्ति तां पुत्रिका
शंकया नोद्वहेत् यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरमित्यभिसंधानमात्रादपि पुत्रिका भवति अभिसंधिमात्रात्पुत्रिकेत्येके इति गौतमस्मरणा
त् यस्याश्च विशेषेण पिता न ज्ञायते प्रतिनयप्रत्यनतितामपि नोद्वहेत् अत्र च पुत्रिकाधर्मशंकयेति न योजनीयमिति केचित् गोविंदराजस्तु
भिन्नपितृकायाः स्थेयात् मातृकयात्मीयत्वप्रसिद्धेः मद्भ्रातृकत्वेऽपि यस्या विशेषेण पिता न ज्ञायते तामपि पुत्रिकाशंकया नोद्वहेदिति मेधातिथि
स्त्वेकमेवेदं पक्षमाह यस्यास्तु भ्राता नास्ति तां पुत्रिकाशंकया नोपयच्छेत् पिता चेन्न ज्ञायते प्रोषितो मृतो वा तदा वाक्यहृष्टसंदर्शयितुः पितुरविषम
नेनदत्तं दीयवाक्यादेव पुत्रिकात्वाभावमुपगम्याभ्रातृकापि वोढव्येति अस्माकं तु विकल्पस्वरसादिदं प्रतिभाति यस्या विशेषेण पिता न ज्ञायते ॥

मो.
भा. म.

तामपि जातां जनेन तार्थमशंकेयेति नोद्वहेत् पुत्रिकाधर्मशंकयेति पुत्रिकाधर्मश्च तयोः श्लोकात् पुत्रिकाधर्मशंका न तयोरिति यथा मातुर्योज
नीयमत्र च प्रकरणे समगोत्राद्विपरिणयनं समगोत्रा वैवक्ष्यापि यच्छेन मातृवदेनाविभृयादिति परिमाणगश्रवणा पत्नीणीयसमगोत्रा चेति प्रायश्चित्तवाणा
चतत्रतत समभिव्याहृतेव मातृसपिण्डापरिणयने वा भार्यात्वमेव न भवति भार्याशब्दस्याह वनीयादिवत्संस्कारवचनत्वात् तेषां पुनरंशप्रणादोषम्
लके विरुद्धनिषेधार्थं यथा नेयमाहीनक्रियमिति न तदतिक्रमे भार्यात्वाभावः श्रुतपदमथ नामहत्यपि महानीत्यादिपृथक्करणकृत पतन्मयपा
पितृष्वसृदौहित्रादीनां मन्त्रीमिन्यापि पुत्रिकेयापि नभार्यात्वाभावफलकः किंतत्र शास्त्रातिक्रमात्प्रायश्चित्तमात्रम् ११ ॥

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोवराः १२ ॥

सवर्णाग्र इति ब्राह्मणक्षत्रियवैश्यानां प्रथमे विवाहे कर्तव्ये सवर्णा श्रेष्ठा भवति कामतः पुनर्विवाहे प्रवृत्तानामेना वक्ष्यमाणाश्चानुलोम्येन श्रेष्ठा भवे
युः १२

शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः १३ ॥

शूद्रैवेति शूद्रस्य शूद्रैव भार्या भवति न तु त्कृष्टा वैश्यापि वैश्यस्य वैश्या च शूद्रा च वैश्या च भार्ये मन्वादिभिः स्मृते क्षत्रियस्य वैश्या शूद्रा क्षत्रिया च ब्रा
ह्मणस्य क्षत्रिया वैश्या शूद्रा ब्राह्मणी च विशिष्टापि शूद्रा मध्ये कमन्तर्वर्तमिति द्विजातीनामन्यवर्जितम् शूद्राविवाहमाह १३ ॥

न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते १४ ॥ न ब्राह्मणेति ब्राह्मणक्षत्रि
ययोर्गार्हस्थ्यमिच्छतोः सर्वथा सवर्णालाभे कस्मिंश्चिदपि वृत्तान्ते इतिहासाख्याने पि शूद्रा भार्या नाभिधीयते पूर्वं सवर्णानुक्रमेणानुलोम्येन विवा
हाभ्यनुज्ञानात् श्रयं निषेधः प्रातिलोम्येन विवाहविषयो बोद्धव्यः ब्राह्मणक्षत्रिययोर्ग्रहणाच्चेदं दोषभूयस्त्वार्थम् ग्रन्तेन रहिजातय इति बहुवच

हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् १५ शूद्रैकनिषेधस्यापि गौरवं वक्तुमीणना
हीनजातिस्त्रियमिति सवर्णामपरिणीय हीनजातिं शूद्रां प्रमादाद्विवेकात्परिणयन्तो ब्राह्मणक्षत्रियवैश्यास्तत्र जातपुत्रपौत्रादिक्रमेण कुलान्येव सम
तिकानि शूद्रतां गमयन्ति ग्रत्र द्विजातय इति बहुवचनेन वैश्यस्यापि निषेधः कल्प्यते ब्राह्मणक्षत्रिययोस्तु पूर्वेणैव निषेधकल्प

शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः १६ नाविदाम्नात्रायेनेव १४॥

शूद्रावेदीति शूद्रां विन्दति परिणयतीति शूद्रावेदी सपतति पतितः स भवतीति इदमत्र मतेऽत्रेरुतथ्यतनयस्य गौतमस्य च ब्रह्मादियोर्ग्रहणमादरार्थेन ता
ब्राह्मणविषये शूद्रायां सुतोत्पत्त्या पतनीति शौनकस्य मतमेतत् क्षत्रियविषये शूद्रासुतत्नस्यतोत्पत्त्या पततीति भृगोर्मतं ग्रतः द्व्यविषयेऽपत्य
महर्षिमतत्रयस्य व्यवस्था सम्भवे विमतप्रापत्तेनविकल्पायोगात् मेधातिथिगोविन्दराजयोस्तु मतं शूद्रावेदी पततीति पूर्वोक्तशूद्राविवाहनिषे
धशेषः सुतोत्पत्त्या पततीति देवाज्ञातशूद्राविवाहस्य नोनोपयादितिविधानार्थं ऋतुकालगमनेसुतोत्पत्तेः तदपत्यतयेति तत्तामेव च

द्रोत्पत्तिमात्रेण पतति तदपत्यस्याप्यपत्यभावस्तदपत्यतया पततीति एतेनेदमुक्तं सजातीयपत्नीजातापत्यस्याभावे दोषाय न १६ ॥

शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते १७

शूद्रामिति सवर्णामपरिणीय दैवात् स्नेहाद्वा शूद्रां परिणीतवतो ब्राह्मणस्य गमननिषेधोऽयं तिर्यग्निषेधस्य त्वनुमानात् शूद्रागमनाद्ब्राह्मणो नरकं गच्छति जनयित्वा सुतं तस्यामिति ऋतुकालगमनेन निषेधपरं ब्राह्मण्यादेव हीयत इति दोषभूयस्त्वार्थम् १७ ॥

दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु नाश्नन्ति पितृदेवास्तं न च स्वर्गं स गच्छति १८

दैवेति यदि कथंचित्सवर्णानुक्रमेण वा शूद्रापि परिणीयेत तदा भार्यान्तरेण सह क्रियमाणानि तत्कर्तृकाणि दैवादीनि दैवं यागहोमादि पित्र्यं श्राद्धादि आतिथेयं अतिथिभोजनादि प्रधानानि यस्य शूद्रा संपादयति तद्धव्यकव्यं पितृदेवा नाश्नन्ति न चैतेनातिथ्येन स गृही स्वर्गं याति यतः तत्कारयेन्न मोहात्सजात्यां स्थितयान्ययेति सवर्णायामसन्निहितायां निषेधं वदति अयं तु सन्निहितायामपीत्यस्तु न हानिः १८ ॥

वृषलीफेनपीतस्य निःश्वासोपहतस्य च तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते १९ ॥

वृषलीति वृषलीफेनोऽधररसः स पीतो येन स वृषलीफेनपीतः वाहिताग्न्यादिष्विति परनिपातः अनेन शूद्राया अधररसपानं निषिध्यते निःश्वा-
सोपहतस्य चैकशय्यायां सहैकशय्यादोषः पुनर्निषेधः तस्यां जातापत्यस्य शुद्धिर्नोपदिश्यत इति ऋतुकालगमननिषेधानुवादः १९ ॥

चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत २० चतुर्णामिति चतुर्णा-
मपि वर्णानां ब्राह्मणादीनां परलोके इहलोके च कांश्चित् हितान् कांश्चिदहितान् इमानभिधास्यमानानष्टौ संक्षेपेण भार्याप्राप्तिहेतून् विवाहा-
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः २१ ॥ न्शृणुत २०

ब्राह्म इति एते नामतो निर्दि-
श्यन्ते ब्राह्मादयः अष्टमोऽधम इति निन्दाप्रदर्शनार्थं ब्रह्मण इवायं ब्राह्मः राक्षस इवायं राक्षसः तेन ब्रह्मादिदेवतानामविवाहानाम
यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् २२ भवति पश्चाच्च स्यायमनाभिधानेनिन्दा-
प्रायार्थः २१

य इति यमाचार्यप्रेतो धर्म्यः यो विवाहो यस्य वर्णस्य धर्म्यो यस्य विवाहस्य दोषगुणदोषौ इष्टानिष्टफले तच्च विवाहोत्पन्नापत्ये गुणागुणान् तत्सर्वं युष्माकं प्रकर्षेण
अभिधास्यामि वक्ष्यमाणानुकीर्तनमिदं शिष्याणां सावधानार्थम् २२ ॥

षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् २३ ॥

म. ३ से. ३४

षडिति ब्राह्मणस्य ब्राह्मादिक्रमेण षट् क्षत्रियस्य आद्योपरितनानामासुरादीनां चतस्रः विट्शूद्रयोः स्तेनानेव राक्षसवर्जितानामसुरगान्धर्वपैशाचानाम् अन्यमादन

चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः । राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥ २४ ॥ पीतान्न जानीयात् २३ ।

चतुर इति ब्राह्मणस्य प्रथमपठितान् ब्राह्मादीन् चतुरः राक्षसं क्षत्रियस्यैकमेव वैश्यशूद्रयोरासुरमेतान् प्रशस्तान् जानीयात् जानीतेति श्रुतपदब्राह्मणादिभाग

पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह । पैशाचश्चासुरश्चैव न कर्तव्यौ कदाचन ॥ २५ ॥ निरत्या गान्धर्वः २४

पञ्चानामिति इह पैशाचप्रतिषेधाडपरितनानां पञ्चानां प्राजापत्यादीनां ग्रहणं तेषु मध्ये प्राजापत्यगान्धर्वराक्षसास्त्रयो धर्म्या इतरौ प्राजापत्यः
त्रियादीनामप्राशस्त्यं विधीयते ब्राह्मणस्य विहितत्वादन्यस्य गान्धर्वस्य च चतुर्णामेव प्राशस्त्याद् द्वावधर्म्यौ राक्षसोऽपि वैश्यशूद्रयोर्विधीयते ब्राह्मणस्य
ति यत्नात् अवस्थितस्यापि आसुरपैशाचौ न कर्तव्यौ कदाचनेति विशेषाश्रवणात् सर्वेषामेव निषिध्यते अत्र यत्र वर्णप्रतिषेधः स विवाहस्य विधिनिषेधौ तस्य तत्प्रतिषि

पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ । गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ ॥ २६ ॥ क्षत्रस्य सम्यग्विहितामभवेवोढव्याः २५

पृथगिति पृथक् पृथगिति प्राग्जनावादन्यत्र मिश्रावपि विधीयते पृथक् पृथक् मिश्रौ वा पूर्वविहितौ गान्धर्वराक्षसौ तत्र मोदन्त्या यथमेयो
मत्वा दिभिः स्मृतो यदा स्त्रीपुंसयोः परस्परानुरागपूर्वकमेवादेन परिणीता युद्धादिना विजित्य ताम् उद्वहेत्तदा गान्धर्वराक्षसौ मिश्रौ भवतः २६ ॥

आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम् । आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥ २७ ॥ आच्छाद्येति आच्छाद
नमार्थं वस्त्रादिना प्राग्जनावाप्तविशेषवाससा कन्यां वरं वाच्छाद्य अलङ्कारादिना वपुज्य विद्याचारसंपन्नमप्रार्थितवरमानीय तस्मै कन्यादानं ब्राह्मो विवाहो

यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते । अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते ॥ २८ ॥ मन्वादिभिः स्मृतः २७ ॥
यज्ञ इति ज्योतिष्टोमादियज्ञे प्रारब्धे यथाविधि ऋत्विजे कर्म कुर्वते अलङ्कृत्य कन्यादानं दैवविवाहं मन्वादयो ब्रुवते २८ ॥

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः । कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥ २९ ॥ एकमिति स्त्रीगवी पुंगवश्च गोमि
थुनं तदेकं द्वे वा वरात् धर्मतः धर्मार्थं यागादिसिद्धये कन्यायै वा दातुं न तु शुल्कबुद्ध्या गृहीत्वा यथाविधि कन्यादानमार्षो विवाहो विधीयते २९ ॥

सहोभौ चरतां धर्ममिति वाचानुभाष्य च । कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥ ३० ॥
सहेति सह युवां धर्मं कुरुतामिति कन्याप्रदानकाले वचसा पूर्वं नियम्यार्चयित्वा यत् कन्यादानं स प्राजापत्यो विवाहः स्मृतः ३० ॥

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः । कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ॥ ३१ ॥

34A
ज्ञात्वमिति कन्याया ज्ञातिभ्यः पित्रादिभ्यः कन्यायै वा यत् यथाशक्ति धनं दत्त्वा कन्याया आस्वच्छन्दात् आदानं स्वीकारः स्वाच्छन्द्यादेव कन्याया न आर्ष इव शुल्की।

इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च। गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसं

धनजातिपरिमाणनियमो न सम्यगासुरो विवाह इत्युच्यते ३१

भवः ३२ इच्छयेति कन्यायाश्च वरस्य चान्योन्यानुरागेण यः परस्परसंयोग आलिंगनादिरूपः स गान्धर्वो ज्ञातव्यः संभवत्यस्मादिति संभवः। कामात् कन्यावरयोरभि लाषादसौ संभवति अत एव मैथुन्यो मैथुनाय हितः सर्वविवाहानामेव मैथुन्यत्वे यदस्य मैथुन्यत्वाभिधानं तत्स्यापि मैथुनेन विरोधयति इति प्रदर्शनार्थम् ३२॥

हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्। प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ३३ हत्वेति प्रसह्य बलात्कारेण कन्या याहरणं राक्षसो विवाह इत्येवं लक्षणं यदा तद्धर्तुः शक्त्यातिशयं ज्ञात्वा पित्रादिभिरुपेक्षितं तदा च सकंहननादि यदि कन्यापक्षाः प्रतिपक्षतां यान्ति तदा हन नादिकमपि कर्तव्यमित्यर्थप्रदर्शनमनूद्यते कन्यापक्षाविनाशपतेषामंगच्छेदं कृत्वा प्राकारादीन्भित्त्वा हा पित हा भ्रातरनाथाहं ह्रियेइति वदन्तीं अश्रूणि मु ञ्चन्तीं यत्कन्यां गृहादपहरति अनेन कन्याया अनिच्छा कन्यागान्धर्वाद्विवेकार्थम् ३३॥

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति। स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः ३४॥

सुप्तामिति निद्राभिभूतां मद्यमदविह्वलां स्वेनासंरक्षणेन रहितां विजनदेशे यत्र विवाहे मैथुनधर्मेणाप्रवर्तते स पापहेतुर्विवाहानां मध्येऽधमः पैशा चः ख्यातः ३४

अद्भिरेव द्विजाग्र्याणां कन्यादानं विशिष्यते। इतरेषां तु वर्णानामितरेतरकाम्यया ३५॥

अद्भिरिति उदकदानपूर्वकमेव ब्राह्मणानां कन्यादानं प्रशस्तं क्षत्रियादीनां पुनर्विनाप्युदकं परस्परेच्छया वाङ्मात्रेणापि कन्यादानं भवति [illegible] ३५

यो यस्यैषां विवाहानां मनुना कीर्तितो गुणः। सर्वं शृणुत तं विप्राः सम्यक्कीर्तयतो मम ३६॥

य इति यद्यपि गुणदोषौ च यस्य यौ विधिविशेषाभिधानमपि प्रतिज्ञातमेव तथापि बहूनामर्थानां नत्रवक्तव्यतया प्रतिज्ञातत्वात् विशेषज्ञापनार्थः पुनरुप न्यासः एषां विवाहानामिति निर्धारणे षष्ठी येषां मध्ये यस्य विवाहस्य यो गुणो मनुना कथितः तत्सर्वं कथितः तत्सर्वं हे विप्राः मम कथयतः शृणुत ३६॥

दश पूर्वान्परान्वंश्यानात्मानं चैकविंशकम्। ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः पितॄन् ३७॥

दशेति दश पूर्वान् पित्रादीन् परान् पुत्रादीन् दश आत्मानं चैकविंशकं ब्राह्मविवाहोढापुत्रो यदि सुकृतकृद्भवति तदा पापान्मोचयति पित्रादीन्नरकादुद्ध रति पुत्रादप्यप्युत्पन्नकुले निष्पापा जायन्ते इति मोचनार्थः तेषामनुत्पत्तेः पापध्वंसस्याशक्यत्वात् ३७॥

दैवोढाजः सुतश्चैव सप्त सप्त परावरान्। आर्षोढाजः सुतस्त्रींस्त्रीन्षट्षट्कायोढजः सुतः ३८ दैवोढेति दैवविवाहोढा याः पुत्रः सप्तपरान् पित्रादीन् सप्तावरान् पुत्रादींश्च आर्षविवाहोढायाः पुत्रः त्रीन् पित्रादीन् त्रींश्च पुत्रादीन् प्राजापत्यविवाहोढायाः पुत्रः षट् पित्रादीन् आत्मानं च नरकान्मोचयतीति सर्वमेव मनुवंशाः कायोढज इति ख्यापनः सम्भाव्यते दैवोढजः फलमिति हसितम् ब्राह्मादिषु विवाहेषु पराक्रमा[illegible]

मु॰ मे॰ ३५

दफलमपरोसेदवहूफलमप्युत्पत्ताफलमभिधानेब्राह्मादिविवाहादेशश्लोकपव कथमयंक्रमइतिचेत् एवंवा नोत्तरयोर्धर्मार्थत्वप्राजापत्यग्रहणमा श्रममयाश्रमेष्ववग्रहणात्स्यात् ३८

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसंमताः ३९

ब्राह्मेतिब्राह्मदैवार्षप्राजापत्येषुचतुर्षुक्रमादवस्थितेषु श्रुताध्ययनसंपत्तिकृतेजोयुक्ताःपुत्राःशिष्टप्रियाजायन्तेप्रिया यदिशिष्टसंमततया ... जायामितिनशिष्टासमासप्रतिषेधे समन्वयसामान्यविषयासहत्वेसमस्यते ३९ ॥

रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ४० रूपेतिरूपंमनोहराकृतिः सत्त्वंद्र

दयाध्यायेवदानाणांगुणादयाद्यःतेयुक्तायतिनःख्यातिमन्तोयशस्विनवस्त्रगाद्युलेपनादिभोगशालिनोधार्मिकाश्चपुत्राजायन्तइतिशतवर्षाणिजीवन्ति ४०

इतरेषु तु शिष्टेषु नृशंसानृतवादिनः जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ४१ ॥

इतरेष्वितिब्राह्मादिभ्यश्चतुर्भ्योमन्येषासुरादिषुचतुर्षुविवाहेषुक्रूरकर्माणामृषावादिनोवेदद्वेषिणोयागादिधर्मद्वेषिणःपुत्रजायन्ते ४१ ॥

अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा निन्दितैर्निन्दिता नॄणां तस्मान्निन्द्यान्विवर्जयेत् ४२ अनिन्दितैरितिमन्तेपेनवि

वाहानांफलकथनमिदंअगर्हितैर्भार्याप्राप्तिहेतुभिर्विवाहैरगर्हितामनुष्याणांसंततिर्भवतिगर्हितैस्तुगर्हितातस्माद्गर्हितविवाहान्नकुर्यात् ४२ ॥

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ४३ पाणीरितिसमानजातीयास

गृह्यमन्त्रोक्तत्वग्रहणलक्षणःसंस्कारोगृह्यादिशास्त्रेणविधीयतेविजातीयासुपुनरसमानासुविवाहकर्मणिपाणिग्रहणस्थानेवक्ष्यमाणश्लोकेवक्ष्यमाणोविधिर्ज्ञेयः ४३ ॥

शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ४४ ॥

शरइतिक्षत्रियापाणिग्रहणस्थाने ब्राह्मणविवाहेब्राह्मणहस्तपरिगृहीतकाण्डैकदेशोग्राह्यः वैश्ययाब्राह्मणक्षत्रियविवाहेब्राह्मणक्षत्रियहस्तप्रतोदै

कदेशोग्राह्यः शूद्रयापुनर्द्विजातित्रयविवाहे प्राहृतवसनदशाग्राह्या ४४ ॥

ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा पर्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया ४५ ॥

ऋतुरिति ऋतुर्नामशोणितदर्शनोपलक्षितोगर्भधारणयोग्यःस्त्रीणामवस्थाविशेषःतत्कालाभिगामीस्यादिदंयेननियमविधिःनतुपरिसंख्यास्वार्थहानि

परार्थकल्पनाप्राप्तबाधात्मकदोषत्रयदुष्टत्वात् ऋतुकालेपिरागतःप्रवृत्तगमनप्राप्तौयस्मिन्पक्षेप्राप्तिस्तत्रविधिःसमयजेनेतिवत् ऋतुपर्वस्वता

गमनेदोषमाहपराशरः ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छतिघोरायांभ्रूणहत्यायांपततेनात्रसंशयः ऋतुस्त्वेषुवस्यवायंनियमःब्राह्मणाहवे

नयप्रान्तिमिश्रं ... सर्वथायेनऋषिभिर्दृष्टत्वाच्छ्रुतिमूललेःश्यसंभवतिमूलं ...

क्रमात् तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियमिति च वक्ष्यति ततोऽर्थतत्कृतिमूलत्वमवगम्यते पुत्रोत्पादनं च शास्त्रस्य वेदाद्युत्पादनेनैव वचनीत्वार्थं ना
त् कामतो नियताविद्युरिति दर्शनादजातपुत्रस्यैव नियमः दृष्टार्थत्वात्पुत्रार्थे हीति मन्तव्यं तु पुत्र । प्रीमापरः जातपुत्रस्य [illegible] ऋतुकाले गमने नियमो।
न दर्शयेदेवावतिष्ठते स्वदारनिरतः सदेति नित्यं स्वदारसंतुष्टः स्यात् नान्यभार्यामुपगच्छेदिति विधानात् इति मोदृत्तवाक्यानर्थक्यात् स्वदारगमनस्य प्राप्तत्वात्
ऋतावविरागमने दोषश्रवणात्तु न नियमविधिः पर्ववर्जं व्रजेच्चैनामिति पर्वाण्यमावास्यादीनि वर्जयेत् भार्यामिति ऋतौ तु नाव
मुपेयात् अतएव रतिकाम्ययानृतुपुत्रोत्पादनं शास्त्रसिद्धं तस्मादिति चैवमिदमृतावुपेयादेव ब्रह्मचारी व्यानाणगच्छेत् अनृतावपि भार्याप्रीत्ये गच्छेदिति
अतएव गौतमः ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जं याज्ञवल्क्योऽप्याह यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् पर्ववर्जमिति ऋतावन्यत्र चाभयत्र स्वदारे ॥ ४५

ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः चतुर्भिरितरैः सार्धमहोभिः सद्विगर्हितैः ४६ ऋतुरिति स्त्रीरात्र्यहः षोडशाहा
त्रयो रोगीणि तदर्शनात्प्रभृति स्त्रीणां एकैकगमनादौ षिद्धिदिनैश्चतुर्भिरितरैः सह षोडशाहोरात्राणि मासि मासि स्त्रीणामृतुः स्वभावभवः स्वाभाविकः व्याख्या।
दिनानि ऋतुः अधिककालेऽपि भवति ४६
तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः ४७
तासामिति तासां पुनः षोडशानां रात्रीणां शोणितदर्शनात्प्रभृत्याद्याश्चतस्रो रात्रयः एकादशी च रात्रिर्गमने निन्दिताः अवशिष्टा दश रात्रयः प्रशस्ता भवन्ति ४७
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम् ४८ युग्मेति पूर्वोक्तासु दशस्वपि दशमयुग्मासु
षष्ठ्यष्टम्यादिषु रात्रिषु गमने पुत्रा उत्पद्यन्ते अयुग्मासु पञ्चमीसप्तम्यादिषु दुहितरः अतः पुत्रार्थी युग्मासु ऋतुकाले भार्यां गच्छेत् ४८ ॥
पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः समेऽपुमान्पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः ४९ पुमानिति शुक्रं पुंसो वीर्यमधिके
युग्मास्वपि पुत्रो जायते स्त्रीबीजेऽधिके युग्मास्वपि दुहितैव जायते एवं ज्ञात्वा हर्षाहारादिना निजबीजाधिक्ये भार्याया आहारलाघवादिना बीजाल्पत्वे सम्यग्... न्मा
युग्मास्वपि पुत्रार्थिना गन्तव्यामिति दर्शितम् स्त्रीपुंसयोस्तु बीजसाम्ये ऽपुमान्नपुंसकः जायते पुंस्त्रियौ वा यमौ वा निःसारत्वे वा भयोरेव बीजे गर्भस्यासम्भवः
४९
निन्द्यास्वष्टासु चान्यासु स्त्रियो रात्रिषु वर्जयन् ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन् ५०
निन्द्येति निन्द्यासु पूर्वोक्तासु षट्सु रात्रिषु अन्यासु चानिन्द्यास्वपि यासु कासुचिदष्टासु स्त्रियो वर्जयन् द्वाभ्यामवशिष्टपर्ववर्जिते ऋतुगमनं कुर्वन् ब्रह्म
चार्येव भवति यत्र तत्राश्रमे वसन्निति वानप्रस्थस्यापि पत्न्या तस्याभिभार्यया सह गमनप्रदेश ऋतुगमने प्रसक्ते न च वनस्थभार्यया ऋतुक्षेमं वर्ततीति वाच्यम्
वनं पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत् सह वा इति वर्षितत्वात् भार्याद्वितीयस्य गमनं प्रसक्तं तस्मात्प्रतिषेधोपपत्तिः मेधातिथिस्तु यत्र तत्राश्रमे वसन्निति गृहस्थेऽ
दस्मान् गृहस्थेन तत्राश्रमस्य गार्हस्थ्याद्युपयोजितं द्वितीयविधानात् रात्रिद्वयाभ्यनुज्ञानादेवाद्विसावाह गोविन्दराजस्तु ऋतुगमनविनष्टस्य स्वाश्रमात् एतत्पीक्षया पुत्रार्थं विहृत्य
गमने दोषाभावप्रतिपादनार्थमेतत् यत्र तत्राश्रमे वसन्निति वचनात्तु ब्रह्मचर्यमवेक्ष्यादिति च प्रशस्ततरत्वात्सत्यमवसत्प्रकारकत्वमिति गोविन्दराजेन विशे
न कन्यायाः पिता विद्वान्गृह्णीयाच्छुल्कमण्वपि गृह्णञ्छुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी ५१ ॥ षणविहायेवनावक्रमेणोक्तन्तस्यदा स्मर
न यतेः ५०

म॰ तु॰ मे॰ ३६

36

नेति कन्यायाः पिता यतः शुल्काद्दोषज्ञः अल्पमपि धनं कन्यादाननिमित्तकं न गृह्णीयात् यस्माल्लोभेन तद्गृह्णानः अपत्यविक्रयी भवति ५१ ॥

स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् ५२ ॥

स्त्रीधनानीति कन्यादाननिमित्तकशुल्कग्रहणनिषेधप्रसंगात् नवमाध्यायाभिधेयस्त्रीधनग्रहणनिषेधोयम् ये बान्धवाः पतिपित्रादयः कलड
दि स्त्रीधनानि गृह्णन्ति नारी स्त्री यानानि अश्वादीनि वस्त्रं चेति प्रदर्शनार्थमेवमेव धनं न ग्राह्यं ते गृह्णानाः पापकारिणो नरकं गच्छन्ति ५२ ॥

आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् अल्पोप्येवं महान्वापि विक्रयस्तावदेव सः ५३ ॥

आर्ष इति आर्षविवाहे गोमिथुनं शुल्कं वराद्ग्राह्यमिति केचिदाचार्या वदन्ति तत्तु न सत्यं यस्मादल्पमूल्यमाध्यमल्पो वा भवतु बहुमूल्यमाध्यमं वा
महान्वा भवतु सतावद्धि विक्रयो भवत्येव यत्तु वरादेकं गोमिथुनमिति पूर्वमुक्तं तत्परमतमिति गोविन्दराजः तदयुक्तम् मनुमतेन लक्षणमार्षस्य तत्स्या
देववराद्गोमिथुनग्रहणपूर्वककन्यादानस्यैवार्षविवाहलक्षणत्वात् मन्वभिमतत्वादेवार्षलक्षणमेकं गोमिथुनमिति परमिति चेत् एकं गोमि
थुनं द्वे वेत्यत्र परमतं यदि तदा तु न मतेनार्षलक्षणं किं तदुच्यताम् अष्टौ विवाहान्कथयन्नार्षं तत्र नैव गृणाति मनुः किं स्वमतेनार्षलक्षणं वक्ष्य
न्मतमः मेधातिथिस्तु पूर्वापरविरोधोपन्यासनिरासमेवं विवाहे गोमिथुनं शुल्कं मुक्तं वरूपमिति केचिदाचार्या वदन्ति मनोस्त्वमतेनेदमाहलि
धर्मितज्ञातिमाध्यकं ग्रहणे न शुल्करूपं शुल्कं तन्मूल्यास्तत्र महत्त्वेऽनुपयेममिति विक्रय एव तदा स्यात् किं सर्वो विवाहसम्पन्ने अवश्यकर्त
व्यया गोदिमिथुनकन्यायै वादातव्यं शास्त्रीयधर्मार्थमेव गृह्यते अतएवार्षलक्षणश्लोके वरादादाय धर्मतः इति धर्मतो न पुत्रार्थमिति न स्याच्छुल्कं भोगा
ल्लोभेनेति तयनाग्रहणं शुल्करूपमशास्त्रीयमतएव पुत्रलाभेन शुल्कं हि लोभेनेति उक्तो निंदा उक्तवान् तस्मान्मोलोपपद्यपर्यालोचनादार्षधर्मार्थं गो
मिथुनं यास्सन्ततं गोमिथुनमिति मनोर्नास्य मतमनुवर्णितम् ५३ ॥

यासां नाददते शुल्कं ज्ञातयो न स विक्रयः अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् ५४

आर्षे गोमिथुनं शुल्कमित्युक्तम् इदानीं कन्यार्थमपि यत्तस्य दानेन न शुल्कमित्याह यासामिति यासां कन्यानां प्रीत्या वरेण दीयमानं धनं पि
त्रादयो न गृह्णन्ति किंतु कन्यायै समर्पयन्ति सोपि न विक्रयः यस्मात्कुमारीणां पूजनं तद्दानृशंस्यमहिंसकत्वं केवलं तदनुकन्यारूपम् ५४

पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ५५

पितृभिरिति न केवलं विवाहकाले वरेण दत्तं धनं समर्पणीयम् किंतु तदनन्तरकालमपि पित्रादिभिः षंडमाश्रिताभिरेताभिर्भोजनादिना पू
जयितव्याः वस्त्रालंकारादिना भूषयितव्याश्च बहुधनादिसम्पद्वान्छाकामैः ५५ ॥

36 A

यत्र नार्यस्तु पूज्यंते रमंते तत्र देवता यत्रैतास्तु न पूज्यंते सर्वास्तत्राफलाः क्रियाः ५६

यत्रेति यत्र कुले पित्रादिभिः स्त्रियः पूज्यंते तत्र देवताः प्रसीदंति यत्र पुनरेता पूज्यंते तत्र देवताप्रसादाभावात् यागादिक्रियाः सर्वा निष्फला भवंतीति निंदार्थवादः ५६

शोचंति जामयो यत्र विनश्यत्याशु तत्कुलं न शोचंति तु यत्रैता वर्द्धते तद्धि सर्वदा ५७ ॥

शोचंतीति जामिः स्वसृकुलस्त्रियोरित्याभिधानिकाः यस्मिन् कुले भगिनीगृहपतिसंवर्द्धनीयसन्निहितसपिंडस्त्रियश्च पत्नीदुहितृस्नुषाद्याः परिधानादिना दुःखिन्यो भवंति तत्कुलं शीघ्र निर्द्धनी भवति दैवराजादिना च पीड्यते यत्रैतास्तु न शोचंति तद्धनादिना नित्यं वृद्धिमेति मेधातिथिगोविन्दराजौ तु नवोढादुहितृस्नुषाद्या जामय इत्याहतुः ५७ ॥

जामयो यानि गेहानि शपंत्यप्रतिपूजिताः तानि कृत्याहतानीव विनश्यंति समंततः ५८

जामय इति यानि गेहानि भगिनीपत्नीदुहितृस्नुषाद्या अपूजिताः सत्यः अभिशपंति इदमनिष्टमेषामस्त्विति तान्यभिचारहतानीव धनपश्वादिसहितानि विनश्यंति ५८

तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ५९

तस्मादिति यस्मादेवं तस्मात्कारणादेता भूषणाच्छादनाशनैर्नित्यं सत्कारेषु कौमुद्यादिषु उपनयनादिषु समृद्धिकामैर्नृभिः सदा पूजनीयाः ५९

संतुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ६० ।

संतुष्ट इति भार्यया भर्त्रा इति हेतौ तृतीया यत्र कुले भार्यया भर्ता प्रीतो भवति स्त्र्यंतराभिलाषादिकं न करोति भार्या च स्वामिना प्रीता भवति तस्मिन् कुले चिरं श्रेयो भवति कुलग्रहणान्न केवलं भार्यापती एव पुत्रपौत्रादिसंततिरपि श्रेयोभागिनी भवति ६० ॥

यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् अप्रमोदात्पुनः पुंसः प्रजनं न प्रवर्तते ६१ ॥

म॰नु॰ 37 यदीति दीप्त्यर्थो ऽत्र रुचिः यदि स्त्री वस्त्राभरणादिना शोभाजनकेन दीप्तिमती न स्यात्तदा स्वामिनं पुनर्न हर्षयेदेव हि शाद्वावधारणो अप्रहर्षाच्च स्वामिनः प्रजननं गर्भधारणं न संपद्यते ६१

से॰

३२

स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलं तस्यां त्वरोचमानायां सर्वमेव न रोचते ६२

स्त्रियामिति स्त्रियामलंकारादिना कांतिमत्यां भर्तुः स्नेहविषयतया परपुरुषसम्पर्कपरिहारात् तत्कुलं दीप्तं भवति तस्यां त्वरोचमानायां भर्तुर्विद्वेषितया नरांतरसंपर्कात्सकलमेव कुलं मलिनं भवति ६२

कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ६३

कुविवाहैरिति आसुरादिविवाहैर्यथावर्णं निषिद्धैर्जातकर्मादिलोपेन ब्राह्मणापूजनेन अप्रख्यातकुलान्यपकर्षं गच्छन्तीति ६३॥

शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ६४

शिल्पेनेति चित्रकर्मादिशिल्पेन कलायाधनप्रयोगात्मकव्यवहारेण केवलशूद्रापत्येन गवाश्वरथक्रयविक्रयादिना कृषिराजसेवाभ्यां कुलानि विनश्यन्तीत्युत्तरेण संबंधः ६४

अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणां कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः ६५

अयाज्येति अयाज्यव्रात्यादियाजनैः कर्मणां श्रौतस्मार्तादीनां नास्तिक्येन शास्त्रीयफलवत्कर्मसु फलाभावबुद्धिर्नास्तिक्यं वेदाध्ययनशून्यानि कुलानि दिप्रमपकर्षं गच्छन्तीति अत्र च विवाहप्रकरणे विवाहनिन्दाप्रसंगेन क्रियालोपादयोऽपि निन्दिताः निन्दया चैतत्र कर्तव्यमिति प्रवृत्ते च निषेधः कल्प्यते ६५

मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि संख्या ```` गच्छन्ति कर्षंति च महद्यशः ६६

इदानीं क्रियालोपादिप्राप्तप्रासंगिककुलनिन्दानुप्रसक्त्या कुलोत्कर्षमाह मन्त्रेति यद्यपि धनं न कुमितिलोके प्रसिद्धं तथाप्यल्पधनान्यपि कुलानि वेदाध्ययनतदर्थज्ञानानुष्ठानयुक्तानि उत्कृष्टकुलगणानायां गणयन्ते महतीं च ख्यातिमर्जयन्ति ६६ ॥

37A

वैवाहिकेऽग्नौकुर्वीतगृह्यंकर्मयथाविधि पंचयज्ञविधानंचपक्तिंचान्वाहिकींगृही ६७

विवाहप्रकरणमतिक्रांतं इदानींवैवाहिकाग्नौसाध्यमहायज्ञविधानंचेति नक्रमप्राप्तंमाश्रितंज्ञातंमहायज्ञानुष्ठानमाह वैवाहिक इति विवाहेभवोवैवाहिकः आवसथ्याख्योग्निः तस्मिन्नग्नौगृह्योक्तंकर्मसायंप्रातर्होमाष्टकादियथाशास्त्रमग्निसाध्यंपंच पंचमहायज्ञांतर्गतवैश्वदेवाद्यनुष्ठानंप्रतिदिनंपाकंचयाकंगृहस्थः कुर्यात् ६७ ॥

पंचसूनागृहस्थस्यचुल्हीपेषण्युपस्करः कंडनीचोदकुंभश्चबध्यतेयास्तुवाहयन् ६८ ॥

पंचेतिपञ्चवधस्थानंसूना सूनाइवसूनाहिंसास्थानत्वगुणयोगात् चुल्ह्यादयः पंचगृहस्थस्य जीवादिहिंसास्थानानिचुल्हीउद्धानंपेषणी दृषदुपलात्मिकाउपस्करः गृहोपकरणंकुंडसंमार्जन्यादिः कंडनी उलूखलमुसलेउदकुंभोजलाधारकलशः याःस्वकार्येयोजयन् पापेनसंबध्यते ६८

तासांक्रमेणसर्वासांनिष्कृत्यर्थंमहर्षिभिः पंचक्लृप्तामहायज्ञाःप्रत्यहंगृहमेधिनो ६९

तासामिति तासांचुल्ह्यादिसूनानांयथाक्रमेणनिष्कृत्यर्थंउत्पन्नपापनाशार्थं गृहस्थानांपंचमहायज्ञाःप्रतिदिनंमन्वादिभिरनुष्ठेयतयास्मृताः पंचस्वेवनिष्कृत्यर्थमित्यर्थमित्यभिधानात् हिंसास्थानत्वेनचक्रोतेनात् सूनादोषैर्नलिप्यतइतिवक्ष्यमाणत्वात् पंचसूनानाम्पापहेतुत्व कत्वंपंचयज्ञानांचतत्पापनाशकत्वमवगम्यते प्रत्यहमित्यभिधानात् प्रतिदिनंतत्पापक्षयसापेक्षितत्वात्संध्यावंदनादिवन्नित्यत्वमपि नदिश्यते ६९ ॥

अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणम् होमोदैवोबलिर्भौतोनृयज्ञोऽतिथिपूजनं ७०

अध्यापनमिति अध्यापनशब्देनाध्ययनमपिगृह्यतेजपोऽहुतइति वक्ष्यमाणत्वात्ततोध्यापनमध्ययनंचब्रह्मयज्ञः अग्रेमेवक्ष्यमाणोदकेनान्नेनोदकेनवाइतिपितृतर्पणंवक्ष्यतिसपितृयज्ञः अग्रेमेवक्ष्यमाणोदेवयज्ञःभूतबलिर्भूतयज्ञः अतिथिपूजनंमनुष्ययज्ञः अध्यापनादिष्वपतशब्दोमहत्त्वहे सर्वेषांगुणः

पंचैतान्योमहायज्ञान्नहापयतिशक्तितः सगृहेपिवसेन्नित्यंसूनादोषैर्नलिप्यते ७१

पंचेति शक्तितइत्यनेनहिधानार्थोयमनुवादः अनुकल्पेनापि यथासंभवमेते कर्तव्याः हापयतीतिप्रकृत्यर्थएवण्यंतादसन्नामिवजहातीत्यर्थः ७१

म॰नु॰
मे॰
३८

38

देवतातिथिभृत्यानां पितॄणामात्मनश्च यः न निर्वपति पंचानामुच्छ्वसन्न स जीवति ७२ ॥

देवदेवेति देवताशब्देन भूतानामपि ग्रहणं तेषामपि बलिहरणे देवतारूपत्वात् भृत्याश्चावश्यपोषणीयाः वृद्धा मातापित्रादयः सर्वतएवा
त्मानं ये पाययेदिति कृत्वा आत्मपोषणमप्यवश्यकर्तव्यं देवतादीनां पंचानां योऽन्नं न ददाति स श्वसन्नपि जीवितकार्याकरणात्तज्जी
वतीति निंद्यावश्यकर्तव्यता वोच्यते ७२ ॥

अहोतं च हुतं चैव तथा प्रहुतमेव च ब्राह्म्यं हुतं प्राशितं च पंचयज्ञान्प्रचक्षते ७३

अहुतं चेति नामभेदेपि न वाच्यभेद इति दर्शयितुं पंचमहायज्ञानां मुन्यन्तरकृतान्यहुतादीनि संज्ञान्तराण्यभिधेयानि तानि स्वयं व्या
चष्टे ७३

जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः ब्राह्म्यं हुतं द्विजाग्र्यार्चा प्राशितं पितृतर्पणम् ७४

जप इति अहुतशब्देन ब्रह्मयज्ञाख्यो जप उच्यते हुतशब्देन देवयज्ञाख्यो होमः प्रहुतशब्देन भूतयज्ञाख्यो भूतबलिः ब्राह्म्यहुतशब्देन मनुष्यय
ज्ञाख्यो ब्राह्मणश्रेष्ठस्यार्चा प्राशितशब्देन पितृयज्ञाख्यो नित्यश्राद्धम् ७४ ॥

स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्मणि दैवकर्मणि युक्तो हि बिभर्तीदं चराचरं ७५

स्वाध्याय इति यदा दारिद्र्यादिदो
षेणातिथिभोजनादिकं कर्तुं न क्षमते तदा ब्रह्मयज्ञे नित्ययुक्तो भवेत् दैवकर्मण्यग्निहोमे च होमस्य स्तुतिमाह यतो दैवकर्मपरः इदं स्थाव
रजंगमं धारयति ७५ ॥

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ७६

जनयत्यादित्याह अग्नाविति
ऽग्नौ मानेनाग्नावाहुतिः सम्यक् दिशारसाहरणाकारित्वादादित्यम् आदित्यं प्राप्नोति स चाहुतिरसस्तु आदित्याद्वृष्टिरूपेण जायते ततोऽन्नं तदु
पभोगेन जायते प्रजाः ७६

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ७७

यथेति यथा प्राणाख्यवायाश्र
येण सर्वप्राणिनो जीवंति तथा गृहस्थाश्रयेण सर्वाश्रमिणो निर्वहन्ति ७७ ॥:

38A

यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहं गृहस्थेनैव धार्य्यंते तस्माज्ज्येष्ठाश्रमो गृही ७८

गृहस्थः प्रशस्यः सर्वाश्रमिणामित्युक्तं तदेवोपपादयति यस्मादिति यस्माद्गृहस्थव्यतिरिक्तास्त्रयोऽप्याश्रमिणो वेदार्थव्याख्यानादन्नदानाभ्यां
नित्यं गृहस्थैरेवोपक्रियंते तस्माज्ज्येष्ठाश्रमो गृहस्थः ज्येष्ठ आश्रमो यस्य स तथेति बहुव्रीहिः ७८

स संधार्य्यः प्रयत्नेन स्वर्गमक्षयमिच्छता सुखं चेहेच्छता नित्यं योऽधार्य्यो दुर्बलेंद्रियैः ७९

स इति यत एवमतः स गृहस्थाश्रमः स्वर्गमक्षयमिच्छता अनंतमिव चिरस्थायिनात् इह लोके च स्त्रीमे भोगस्वाद्वन्नादिभोजनसुखं संततमिच्छता प्रयत्नेनानुष्ठेयः योऽसंयतेंद्रियैर्धारयितुं न शक्यते ७९

ऋषयः पितरो देवा भूतान्यतिथयस्तथा आशासते कुटुंबिभ्यस्तेभ्यः कार्यं विजानता ८०

ऋषय इति पितृगृहस्थेभ्यः सकाशात्प्रार्थयंते अतः शास्त्रज्ञेन तेभ्यः कर्तव्यम् ८०

स्वाध्यायेनार्चयेतर्षीन्होमैर्देवान्यथाविधि पि
पितॄन्श्राद्धैश्च नॄनन्नैर्भूतानि बलिकर्मणा ८१॥

किं तत्तदाह स्वाध्यायेनेति नानाप्रकारत्वाद्दर्शनस्य स्वाध्यायादेश्च
दर्शनमुचितं महायज्ञांतर्गतैः स्वाध्यायादिभिः ऋषिदेवपित्रतिथिभूतानि यथाशास्त्रं पूजयेत् ८१॥

कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ८२॥

तत्र पितृयज्ञं तावदाह कुर्यादिति प्रत्यहं यथासंभवं श्राद्धं कुर्यात् श्राद्धशब्दोऽयं कर्मविधिवाक्यवर्ती कौण्डपायिनामयनीयाग्निहोत्रश
ब्दवद्वक्ष्यमाणपार्वणश्राद्धधर्मातिदेशार्थः अन्नाद्येनेति तिलैर्व्रीहिभिर्यवैरित्यादेरुपादाने पयः सोदकम् ८२ ८२

एकमप्याशयेद्विप्रं पित्रर्थे पांचयज्ञिके न चैवात्राशयेत्किंचिद्वैश्वदेवं प्रति द्विजं ८३

एकमिति पितृप्रयोजने पंचयज्ञांतर्गते एकमपि
ब्राह्मणं भोजयेत् अपिशब्दात्संभवे बहूनपि पार्वणधर्मग्रहणाच्च वैश्वदेवब्राह्मणभोजनप्राप्तावाह न किंचिद्वैश्वदेवार्थं ब्राह्मणमत्र भोजयेत् ८३

म॰स्मृ॰ 39 वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकं आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् ८४ ॥
से॰ वैश्वदेवस्येति विश्वेदेवार्थः सर्वदेवतार्थो वैश्वदेवस्तस्य पक्वस्यान्नस्यावसथ्याग्नौ स्मृत्युक्तविधिना पर्युक्षणादीतिकर्तव्यतापूर्वकमाभ्यो वक्ष्यमा
३९ णदेवताभ्यो ब्राह्मणः प्रत्यहं होमं कुर्यात् ब्राह्मणग्रहणं द्विजातिप्रदर्शनार्थं त्रयाणां प्रकृतत्वात् ८४ ॥

अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च ८५

अग्नेरिति वचनद्वयं स्वाहाकारप्रदानात् ता होमार्थ इति कात्यायनस्मरणात् अग्नये स्वाहा सोमाय स्वाहेति निरपेक्षदेवताकं होमद्वयं कृत्वा अग्नीषोमाभ्यां स्वाहेति समस्तदेवताकं होमं कुर्यात् ततो विश्वेभ्यो देवेभ्यो धन्वन्तरये ८५

कुह्वै चैवानुमत्यै च प्रजापतय एव च सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः ८६

कुह्वै चेति कुह्वै अनुमत्यै प्रजापतये द्यावापृथिवीभ्याम् अग्नये स्विष्टकृत इत्येवं स्वाहाकारान्तान् होमान् कुर्यात् कृत्यन्तरेष्वग्निविशेषणात्स्विष्ट
कृतो विधानात्केवले स्विष्टकृन्निर्देशेऽपि अग्निविशेषणेनैव प्रयोगः पाठादेवोत्तमत्वे सिद्धे स्विष्टकृतेऽन्तत इत्यभिधानं स्मृत्यन्तरीयहोम
मध्ये चैषां न तत्तापनार्थम् ८६

एवं सम्यग्घविर्हुत्वा सर्वदिक्षु प्रदक्षिणं इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत् ८७

एवमिति एवमुक्तप्रकारेण सम्यगनन्यचित्तो देवताध्यानपर एव होमान्कृत्वा सर्वासु प्राच्यादिषु दिक्षु प्रदक्षिणमिन्द्रादिभ्यः सपुरुषेभ्यो ब-
लिं हरेत् तद्यथा प्राच्यामिन्द्राय नमः इन्द्रपुरुषेभ्यो नमः दक्षिणस्यां यमाय नमः यमपुरुषेभ्यो नमः पश्चिमायां वरुणाय नमः वरुणपु
रुषेभ्यो नमः उत्तरस्यां सोमाय नमः सोमपुरुषेभ्यो नमः यद्यपि शब्दाद्ग्रामस्य देवतात्वं सामान्यकाप्पतीन्दुशब्दैर्वेदोद्देशात्प्रयुक्तास्तथा
पि चानुष्ठानसंवादार्थं कृत्वा गृह्ये च यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यः सोमाय सोमपुरुषेभ्य इति प्रतिदिशमभिधानात्

मरुद्भ्य इति तु द्वारि क्षिपेदप्स्वद्भ्य इत्यपि वनस्पतिभ्य इत्येवं मुसलोलूखले हरेत् ८८

तदयं प्रयोगः मरुद्भ्य इति इतिशब्दः स्वरूपविवक्षार्थः मरुद्भ्यो
नम इति द्वार एव बलिं दद्यात् जलेऽद्भ्य इति मुसलोलूखलाभ्यामिति द्वन्द्वनिर्देशात्सह मुसलोलूखलयोर्वनस्पतिभ्य इति बलिं दद्यात् गुणानुरोधेन प्रधान

39A लिकर्मावृतेस्यायथावत ८८

उच्छीर्षके श्रियै कुर्याद्भद्रकाल्यै च पादतः ब्रह्मवास्तोष्पतिभ्यां तु वास्तुमध्ये बलिं हरेत ८९

उच्छीर्षके वास्तुपुरुषस्य शिरःप्रदेशे उत्तरपूर्वस्यां दिशि श्रियै बलिं दद्यात् तस्यैव पाददेशे दक्षिणपश्चिमायां दिशि भद्रकाल्यै अन्ये तु उच्छीर्षकं गृहस्थशयनस्य शिरःस्थानभूमिं पादतश्च इति तस्यैव चरणभूप्रदेशमाहुः ब्रह्मणे वास्तोष्पतये इति गृहमध्ये द्वन्द्वनिर्देशेपि ब्रह्मवास्तोष्पत्योः पृथगेव देवतात्वं यत्र द्वन्द्वे मिलितस्य देवतात्वमपेक्षितं तत्र सहशब्दं प्रयुङ्क्ते यथा सह द्यावापृथिवीभ्यां स्वाहेति ८९ ॥

विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च ९०

विश्वेभ्य इति विश्वेभ्यश्चैव देवेभ्य इति चशब्दादेके यमाहुतिः विश्वेभ्यो देवेभ्यो नम इति गृहाकाशे बलिं दद्यात दिवाचरेभ्यो भूतेभ्य इति दिवा नक्तंचरेभ्य इति नक्तं वेश्मगृह्यदर्शनादिव्यवस्था ९०

पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत ९१

पृष्ठेति गृहस्यापरियद्गृहं तत्पृष्ठवास्तु बलिदातुः पृष्ठदेशे भूभागे वा तत्र सर्वात्मभूतये नम इत्येव बलिं दद्यात उक्तबलिदानावशिष्टं सर्वमन्नं दक्षिणस्यां दिशि दक्षिणाभिमुखः स्वधा पितृभ्य इति बलिं हरेत प्राचीनावीतिना चायं बलिर्देयः स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षिणामुखो निनयेदिति वह्वृचगृह्यवचनात ९१

शुनां च पतितानां च श्वपचां पापरोगिणां वायसानां कृमीणां च शनकैर्निर्वपेद्भुवि ९२

शुनामिति श्वपचं चण्डालं मनुष्य पतितादीनां शनकैर्यथा रजसा न संपृक्तं तेन तथा भुवि दद्यात पापरोगी कुष्ठी क्षयरोगी वा ९२ ॥

एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति स गच्छति परं स्थानं तेजोमूर्तिः पथर्जुना ९३ ॥

एवमिति एवमुक्तप्रकारेण यः सर्वभूतान्यन्नदानादिना नित्यं पूजयति स परं स्थानं ब्रह्मात्मकं तेजोमूर्तिः स्वप्रकाशरूपं ऋजुना मार्गेण अर्चिरादिमार्गेण प्राप्नोति ब्रह्मणि लीयत इत्यर्थः ज्ञानकर्मभ्यां मोक्ष इति शास्त्रः तेजोमूर्तिरिति विसर्गपाठे प्रकृष्टब्रह्मबोधस्वभावो भूत्वेति व्याख्या ९३

कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशयेत भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ९४

म॰नु॰
मं॰
४

हन्तवेति एवमुक्तप्रकारेण मनुष्यबलिकर्म कृत्वा गृहमेधी भिक्षुभ्यः पूर्वमतिथिं भोजयेत् भिक्षवे परिव्राजे ब्रह्मचारिणे ग्रासमात्रं भिक्षां च विधिवत्स्वस्ति। वाच्य भिक्षादानमर्थं भिक्षेति गोत्रमात्रयुक्तं विधिना भिक्षे दद्यात् ग्रासश्च माणाच भिक्षा भवति ग्रासमात्रा भवेद्भिक्षेति शातातपवचनात् संभवेन पिकमपि दद्यात् ९४

यत्पुण्यफलमाप्नोति गां दत्वा विधिवद्गुरोः तत्पुण्यफलमाप्नोति भिक्षां दत्वा द्विजो गृही ९५

यद्दिति गुरवे गां दत्वा विधिवत्स्वर्णशृङ्गिकादिविधानेन यत्फलं प्राप्नोति तद्गृहस्थो विधिना भिक्षादानात्प्राप्नोति ९५ ॥

भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकं वेदतत्वार्थविदुषे ब्राह्मणायोपपादयेत् ९६

भिक्षामिति प्रचुरान्नाभावे ग्रासप्रमाणां भिक्षामपि व्यंजनादिना सत्कृत्य तदभावे जलपूर्णपात्रमपि फलपुष्पादिना सत्कृत्य तत्त्वतो वेदतदर्थज्ञानवते ब्राह्मणाय स्वस्तिवाच्यादिविधिपूर्वकं दद्यात् ९६

नश्यन्ति हव्यकव्यानि नराणामविजानतां भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः ९७

नश्यन्तीति मोहात्सुपात्रानभिज्ञतया देवपित्रुद्देशेन दत्तानि वेदाध्ययनतदर्थज्ञानानुष्ठानतेजःशून्यतया भस्मरूपेषु विप्रेषु दत्तानि दातृभिर्निष्फलानि भवन्ति ९७

विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात् ९८

विद्यातपःसमृद्धेष्विति विद्यातपस्तेजःसंपन्नविप्राणां मुखान्येवाग्निहोमाधिकरणत्वेनाग्नितया निरूपितानि तेषु हव्यकव्यादि प्रक्षिप्तमिह लोके दुर्लङ्घ्यात् व्याधिशत्रुराजपीडादिभयान्महतश्च पापान्नरकात्त्रायते ९८

संप्राप्ताय त्वतिथये प्रदद्यादासनोदके अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकम् ९९ ॥

संप्राप्तायेति स्वयमागतायातिथये आसनं पादप्रक्षालनायोदकं यथासंभवे व्यंजनादिभिः सत्कृतं चान्नमात्मवयस्याविद्यादिवदुपमाणा विधिपूर्वकं दद्यात् ९९ ॥

शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन् १०० ॥

शिलानिति निल्नूनकेदारशेष धान्यानि शिलास्तानपि उञ्छिन्वतो ह्यतिसंयमान्वितस्य त्रेताग्नयः सभ्यश्चेति पञ्चाग्नयः सभ्यो नामाग्निः शीतापनोदायार्थं यत्र क्रियते

४

४०७ पेचमत्स्यग्निषु होमे ऊर्ध्वं गाम्समर्वं शृति मंको चपेवाग्निहोत्रमार्जितत्रपमनर्चितोऽतिथिर्वत गृह्णाति अनयाचनिंदयातिथ्यर्चनस्य नित्यतावगम्यते
१००

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन १०१॥ तृणानीति अन्नासंभवेपि तृ

णादि श्रमभूमिपादप्रक्षालननार्थं जलप्रियवचनान्यपि धार्मिकगृहेष्वतिथ्यर्थं न कदाचिदुच्छिद्यन्ते अवश्यदेयानीति विधीयते तृणग्रह
णाशयनीयोपलक्षणार्थम् १०१॥

एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते १०२

अप्रसिद्धत्वादतिथिलक्षणमाह एकेति एकरात्रमेव परगृहे निवसन् ब्राह्मणोऽतिथिर्भवति अनित्यावस्थानात् विद्यते द्वितीया तिथिरस्येति
अतिथिरुच्यते १०२

नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोपि वा १०३

नैकेति एकग्रामनिवासिनं लोकेषु विचित्रपरिहासकथादिभिः संगत्या वृत्त्यर्थिनं भार्याग्नियुक्तगृहे वैश्वदेवकालोपस्थितमपि नातिथिं विद्या
त् एतेन भार्याग्निरहितस्य प्रवासिनो नातिथिरिति बोधितम् १०३ ॥

उपासते ये गृहस्थाः परपाकमबुद्धयः तेन ते प्रेत्य पशुतां व्रजन्त्यन्नादिदायिनाम् १०४ ॥

उपासत इति अतिथित्वकल्पनया तिथ्यलोभेन ये गृहस्थाः ग्रामान्तराणि गत्वा परान्नमेवन्ने तेनिषिद्धपरान्नदोषानभिज्ञास्तेन परान्नभोजनेन।
जन्मान्तरे अन्नादिदायिनो पशुतां व्रजन्ति तस्मादिदं न कुर्यादिति निषेधः कल्प्यते १०४

अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना काले प्राप्तस्त्वकाले वा नास्यानश्नन् गृहे वसेत् १०५ ॥

अप्रणोद्य इति सूर्योऽस्तमिति गृहस्थेनातिथिर्न प्रत्याख्येयः सूर्योणोढः प्रापितः रात्रौ स्वगृहगमनाशक्तेः द्वितीयवैश्वदेवकाले प्राप्तः अका
ले वा ... भोजने निहते पिनास्य गृहे अतिथिरनश्नन् वसेद् वपमस्मै भोजनं देयं शक्त्यात्यन्त प्रायश्चित्तगौरवार्थोऽयमारम्भः अतएव विस
ष्ठ ... सूर्योढविमुखे दिवातिथौ तु विमुखे गते यत्पातकं तत् तदेवाष्टगुणात्स्याद सूर्योढ विमुखे गते गोविंदराजस्तु प्रतिषिद्धा
निशीथ प्रतिप्रसवार्थ मिदमाह
१०५

न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् धन्यं यशस्यमायुष्यं स्वर्ग्यं वातिथिपूजनम् १०६ ॥

स

म॰नु॰ मे॰ भा॰ 41

नैवेदितियद्दुत्तस्यायुष्कर्ष्यमतिथिनेश्वस्यावधेतुत्तस्मैश्वदत्वानस्वयंभोक्तुं धनायहितंयनस्मिन्निक्षिप्तेनबाधन्यपवेयशसादयोपिशाह्वाः अतिथि।
भोजनफलकथनमिदम् नचानावसथवतापत्तिः सर्वसहकृतमादत्तेः इत्यादिदोषश्रवणात् १०६ ॥

आसनावसथौशय्यामनुव्रज्यामुपासनं उत्तमेषूत्तमंकुर्याद्धीनेहीनंसमेसमम् १०७ ॥

आसनेतिआसनंपीठंचर्मवाआवसथोविश्रामस्थानं शय्याखट्वादिः अनुव्रज्यागच्छतोऽनुगमनं उपासनंपरिचर्याएतत्सर्वंबहुष्वति।
थिषुयुगपदुपस्थितेषुइतरेतरापेक्षया उत्कृष्टापकृष्टमध्यमंकुर्यात् नपुनःसर्वेषांसमम् १०७

वैश्वदेवेतुनिर्वृत्तेयद्यन्योऽतिथिराव्रजेत् तस्याप्यन्नंयथाशक्तिप्रदद्यान्नबलिंहरेत् १०८ ॥

वैश्वेतिशाकुन्निर्वृत्तादतिथिभोजनपर्यन्ते वैश्वदेवेकृतेयद्यपरोऽतिथिरागच्छेत्तदातदर्थंपुनःपाकंकृत्वातस्माअन्नंदद्यात्बलिहरणंततोन
कुर्यात् बलिनिषेधादन्नसंस्काराभावोवैश्वदेवस्यावगम्यते अन्नसंस्कारपक्षेकथमसंस्कृतभोजनमनुज्ञानीयत १०८

उगलीनहरु

नभोजनार्थंस्वेविप्रःकुलगोत्रेनिवेदयेत् भोजनार्थंहितेशंसन्वान्ताशीत्युच्यतेबुधैः १०९ ॥

नेतिभोजनलाभार्थंब्राह्मणःस्वकुलकुलंनिवेदयेत् यस्माद्भोजनार्थंतेनकथयनउद्गीर्णाशीति पण्डितैःकथ्यते १०९ ॥

नब्राह्मणस्त्वतिथिर्गृहेराजन्यउच्यते वैश्यशूद्रौसखाचैवज्ञातयोगुरुरेवच ११०

नेतिब्राह्मणस्यक्षत्रियादयःअतिथयोनभवन्तिक्षत्रियादीनांब्राह्मणादपकृष्टजातित्वात् मित्रज्ञातीनामात्मसमत्वंधाकुर्गोश्चप्रभुत्वात् एवमेतेन
वर्णायेनक्षत्रियस्य उत्कृष्टोब्राह्मणःसजातीयश्च क्षत्रियोऽतिथिःस्यात्नापकृष्टौवैश्यशूद्रौएवंवैश्यस्यापिद्विजातयोऽतिथयोनशूद्रः ११०

यदित्वतिथिधर्मेणक्षत्रियोगृहमाव्रजेत् भुक्तवत्सुचविप्रेषुकामंतमपिभोजयेत् १११

यदीतियदिध्याप्तोगृहागतत्वादति।
थिकालोपस्थितत्वादतिथिधर्मेण क्षत्रियोविप्रगृहमागच्छेत्तदाविप्रगृहोपस्थितविप्रकृतभोजनेषुस्थितेषु इच्छातस्तमपिभोजयेत् १११

वैश्यशूद्रावपिप्राप्तौकुटुम्बेऽतिथिधर्मिणौ भोजयेत्सहभृत्यैस्तावानृशंस्यंप्रयोजयन् ११२ ॥

वैश्येति यदि वैश्यशूद्रावपि ब्राह्मणस्य कुटुंबे गृहे ग्रामान्तरादागतत्वादतिथिधर्मप्राप्तिनौ स्यातां तावपि दत्वा भोजनकालोत्पन्नो दंपती
इतरानपि सख्यादीन्संप्रीत्या गृहमागतान् सत्कृत्यान्नं यथाशक्ति भोजयेत्सह भार्यया ११२ भोजनार्थं दासभोजनकाले अनृशंसतामाश्रित्य भो-
जयेत ११२

कृतरानितिउक्तभोजनकाले क्षत्रियादिव्यतिरिक्तान्सखिसहाध्यायिप्रभृतीन संप्रीत्या गृहमागतान नत्वतिथिभावेन तान्प्रशस्तिपं धृतादियथाश
क्ति प्रकृष्टमन्नं कृत्वा भार्यया भोजनकाले भोजयेत गृहस्थस्यापि सपत्नभोजनकालः अवशिष्टं तु दंपती इति वक्ष्यमाणत्वात् स्वात्मना सह इति वक्त
व्ये वचनं वैचित्र्यमात्रार्थं सत्वरोऽस्तु भोजनकालानभिधानेऽप्यभुक्तेन स्वाधीनकालत्वात ११३ ॥

सुवासिनीः कुमारीश्च रोगिणो गर्भिणीः स्त्रियः अतिथिभ्योऽग्र एवैतान्भोजयेदविचारयन् ११४

सुवासिनीरिति सुवासिन्यो नवोढाः स्त्रियः स्नुषादुहितरश्च ताः कुमारान्रोगिणो गर्भिणीश्चातिथिभ्योऽग्रे पूर्वमेवातिथिभ्यो भोजयेत् कथमतिथिषु
अभोजितेषु भोजनमेषामिति विचारमकुर्वन् मेधातिथिस्तु नवोढा इति पठितानुगता नैवेति पठितानुगतानैवेतान्भोजयेत् अतिथिसमकाल
मिति व्याख्याय अन्यत्तु अग्र इति पठन्नदोषमुक्तवान ११४ ॥ अदत्वा तु य एतेभ्यः पूर्वं भुंक्ते विचक्षणः स भुंजानो न जानाति श्वगृध्रै-
र्जग्धिमात्मनः ११५

अदत्वेति एतेभ्योऽतिथ्यादिभृत्यपर्यन्तेभ्योऽन्नमदत्वा व्यतिक्रमभोजनदोषमजानन्यः पूर्वं भुंक्ते स मरणानंतरं श्वगृध्रै-
रात्मनो भक्षणं न जानाति व्यतिक्रमभोजनस्येदं फलमिति वचनेनैव स्पष्टं नोक्तं ११५

भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि भुंजीयातां ततः पश्चादवशिष्टं तु दंपती ११६ भुक्तेति विप्रेषु ज्ञातिषु भृत्येषु दासादि
षु कृतभोजनेषु ततोऽन्नादवशिष्टं भार्यापती पश्चादश्नीयाताम् ११६ ॥

देवानृषीन्मनुष्यांश्च पितॄन्गृह्याश्च देवताः पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत् ११७

देवानिति गृह्याश्च देवता इत्यनेन भूतयज्ञ उक्तः पश्चाद्यत्तावुज्ञानमन्नं अवशिष्टं तदश्नीयादित्यनेन शेषभोजनस्य च विहितत्वात् वक्ष्यमाणदोषक
थनार्थोऽयमनुवादः अथवा देवानित्यनेनैव भूतयज्ञस्यापि संग्रहः गृहे भवा गृह्या देवताः पूजयन्त्वेति वामदेवादि प्रतिकृतिपूजार्थ ध्यानार्थं न
मस्य ११७

म॰ कु॰ मे॰ ४२

42

अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् यज्ञशिष्टाशनं ह्येतत्सतामन्नं विधीयते ११८

अघमिति यस्त्वात्मार्थमेवान्नं पक्त्वा भुङ्क्ते देवादिभ्यो न ददाति स पापहेतुत्वात्पापमेव केवलं भुङ्क्ते नान्नं तथा च श्रुतिः केवलाघो भवति केवला
दीति यस्मात्पञ्चमहायज्ञावशिष्टमशनमन्नं मन्वादिभिः प्रोक्तं तदेव साधूनामन्नमुपदिश्यते इति ११८ ॥

राजर्त्विक्स्नातकगुरून्प्रियश्वशुरमातुलान् अर्हयेन्मधुपर्केण परिसंवत्सरात्पुनः ११९

अतिथिपूजाप्रसंगेन
राजादीनामपि गृहागतानां पूजाविशेषमाह राजेति राज्याभिषिक्तः क्षत्रियो राजा ऋत्विक् यज्ञेन यस्मार्त्विज्यं कृतं स्नातको विद्याव्रत
स्नातः प्रियो जामाता राजादीनेतान्गृहागतान्स्वगृह्योक्तेन मधुपर्काख्येन कर्मणा पूजयेत् परिसंवत्सरादिति संवत्सरं वर्जयित्वा तान्
गृहागतान्पुनर्मधुपर्केण पूजयेत् पञ्चम्यपाङ्परिभिरिति सूत्रेण वर्जनार्थपरियोगे पञ्चमी अत एव तत्त्वव्याख्याने जयादि
त्येनोक्तं अपेनमाह च व्याख्याने वर्जनार्थस्य ग्रहणमिति मेधातिथिस्तु परिसंवत्सरानिति पठित्वा परिगतो निष्क्रान्तः संवत्सरो येषां तान्
न पूजयेदिति व्याख्यातवान् उभयत्रापि पाठे संवत्सरमध्यागमने न मधुपर्कार्हता ११९ ॥

राजा च श्रोत्रियश्चैव यज्ञकर्मण्युपस्थितौ मधुपर्केण संपूज्यौ न त्वयज्ञ इति स्थितिः ॥१२०

राजस्नातकयोः पूजासंकोचार्थमाह राजेति राजस्नातकौ संवत्सरादूर्ध्वमपि यज्ञकर्मण्युपस्थितौ मधुपर्केण पूजनीयौ न त्वयज्ञ इति केचिन्न
मा भवत्यस्तु संवत्सरादूर्ध्वं यज्ञं विनापि मधुपर्कार्हाः संवत्सरमध्येऽपि सर्वेषां यज्ञविवाहयोरेव मधुपर्कः तदाह गौतमः ऋत्विगाचार्यश्वशुरपितृ
व्यमातुलादीनामुपस्थाने मधुपर्कः संवत्सरे पुनर्यज्ञविवाहयोरर्वाक् राज्ञः श्रोत्रियस्य च १२० ॥

सायं त्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत् वैश्वदेवं हि नामैतत्सायंप्रातर्विधीयते १२१ ॥

सायमिति दिनान्ते सिद्धस्यान्नस्य पत्नी
अमन्त्रं बलिहरणं कुर्यात् इदमयनमस्त्विति मन्त्रपाठवर्जमानमात्रदेवतोद्देशेन निधिप्यते यत एतद्वैश्वदेवं नाम अन्नसाध्यं होमबलिदानादि
विभजनात्मकं तत्सायंप्रातर्गृहस्थस्योपदिश्यते १२१ पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिके १२२

42A

श्राद्धकल्पं च शास्त्रतमित्यनुक्रमणिकायां प्रतिज्ञातं श्राद्धकल्पमुपक्रमते पितृयज्ञमिति साग्निरमावास्यायां पिण्डपितृयज्ञाख्यं कर्म कृत्वा श्रा।
द्धं कुर्यात् पितृयज्ञपिण्डानामनुपश्चादाह्रियत इति पिण्डान्वाहार्यकं श्राद्धं मासानुमासिकं मासश्चानुमासश्च तयोर्भवं प्रतिमासं कर्तव्यमित्यर्थः
अनेनास्य नित्यमुक्तं विप्रग्रहणं द्विजातिपरं त्रयाणां प्रकृतत्वात् १२२

पितॄणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः तच्चामिषेण कर्तव्यं प्रशस्तेन प्रयत्नतः १२३

इदानीं नामनिर्वचनेनोक्तमेव पितृयज्ञानन्तर्यं द्रढयति पितॄणामिति इदं मासिकं प्रतिमासं भवं श्राद्धं यस्मात्पितृयज्ञ
पिण्डानामनुपश्चादाह्रियते तेन पिण्डान्वाहार्यकमिदं पण्डिता जानन्ति ततो युक्तं पितृयज्ञानन्तर्यमस्य तच्चामिषेण वक्ष्यमाणमांसेन प्रशस्तेन मनोहरे
णाशुचिगन्धादिरहितेन प्रयत्नतः कर्तव्यं पिण्डानां मासिकं श्राद्धमिति वा पाठः पिण्डानां पितृयज्ञपिण्डानां शेषत्वम् १२३

तत्र ये भोजनीयाः स्युर्ये च वर्ज्या द्विजोत्तमाः यावन्तश्चैव यैश्चान्नैस्तान्प्रवक्ष्याम्यशेषतः १२४

तत्रेति तस्मिन् श्राद्धे ये भोजनीयाः ये च त्याज्याः यत्संख्यकाः यैश्चान्नैस्तत्सर्वं प्रवक्ष्यामि १२४

द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तरे १२५ ॥

अत्र यद्यपि पात्रमेव भोजनीया इति वक्ष्यति तथाप्यल्पवक्तव्यत्वात्प्रागेव संख्यामाह द्वाविति दैवश्राद्धे द्वौ ब्राह्मणौ पितृपितामहानां।
त्रीन् ब्राह्मणानथवा दैवे पित्रादिके चैकैकं ब्राह्मणं भोजयेत् उक्तातिरिक्तभोजने समर्थोऽपि नाधिकभोजने प्रवर्तेत मेधातिथिस्त्वाह पितृकृ
त्ये त्रीनिति पितुस्त्रीन् ब्राह्मणान् पितामहस्य त्रीन् ब्राह्मणान् प्रपितामहस्य त्रीन् ब्राह्मणान् भोजयेत् एकैकमुभयत्र वेति दैवे एकं पित्रादित्रयस्यै
कैकं तन्न एकैकं सर्वपित्रादित्रयस्य न त्वेकैकं सर्वेषां पिण्डैर्व्याख्यातमित्याश्वलायनगृह्यविरोधात् यथैकः पिण्डः पित्रादित्रयस्य निरूप्यते तथा
एकं ब्राह्मणं भोजयितव्य इत्यर्थः तस्मात् पित्रादित्रयस्यैकब्राह्मणभोजनं तदाश्वलायनगृह्यकारेणैव न त्वेवकं सर्वेषां पिण्डैर्व्याख्यातमिति।
पदिस्वाकाममन्नार्थे त्वभिहिते श्रूयमाणैव तु पित्रादिदेवताकश्राद्धानामाद्यमपिण्डीकरणमन्त्राभिमतं तद्व्यतिरिक्तश्राद्धेकामनेकः पित्रा
दिदेवत्र्यस्याद्य इत्यर्थः अथवानेनायमुक्तनीयद्व्याभावे एकोऽपि भावे एकोऽपि भोजयितव्यः उभयत्रापि व्याख्याने पार्वणादौ पित्रादित्रयस्यै
कब्राह्मणभोजनं गृह्यकृतैवोक्तं च मिश्रोऽपि यथैकं प्रजयेत् ततो ह्यद्वे दैवं तत्र कथं भवेत् श्रद्धेयपात्रे समुद्धृत्य सर्वस्य प्रकृतस्य देवतायतने कृत्वा।
यथाविधि प्रवर्तयेत् प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे इति सर्वस्मिन्नेकब्राह्मणभोजनमाह तस्माद्गृह्ये कृतैव व्याख्या प्रथमतो विस्तर
नेन विस्तार इति शास्त्रे खेदः समाननात् स्मृतीनां सर्वे विधयः छन्दसि विकल्पन्ते इति विस्तर इति रूपम् १२५ ॥

सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदः पंचैतान्विस्तरो हंति तस्मान्नेहेत विस्तरं १२६

सदिति सत्क्रियां ब्राह्मणानां पूजां दक्षिणदेशं दक्षिणाप्रवणत्वादि वक्ष्यमाणं कालमपराह्णं शौचं श्राद्धकर्तृभोक्तृब्राह्मणानां श्रेष्ठगुणवद्ब्राह्मणला
भं च ब्राह्मणविस्तरो नाशयति तस्माद्ब्राह्मणविस्तरं न कुर्यादिति सत्क्रियादिविरोधतो ब्राह्मणविस्तरनिषेधात्सत्क्रियादिसंभवे पित्रादेरेकै
कस्यापि ब्राह्मणत्रयाभ्यनुज्ञानं अत एव गोतमः नवावरान्भोजयेदयुजो वा यथोत्साहं वह्वृचगृह्यकारोपि अथातः पार्वणश्राद्धे काम्ये ।
आभ्युदयिक एकोद्दिष्टे ब्राह्मणान्नियुञ्ज्यादेकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन्वा वृद्धौ फलभूयस्त्वमित्याह द्वौ दैवे इति आभ्युदयिकश्राद्धवि
षयं स्मृत्यन्तरेषु तथा विधानात् अत्राभ्युदयिकस्त्वेकमयु १२६

प्रथिता प्रेतकृत्यैषा पित्र्यं नाम विधुक्षये तस्मिन्युक्तस्यैति नित्यं
प्रेतकृत्यैव लौकिकी १२७

प्रथितेति यदेतत्पित्र्यं कर्म श्राद्धरूपममावास्यायां प्रख्याता प्रेतकृत्या पितॄपकारार्था क्रिया प्रकर्षेण इतः प्रेताः पितृलोकस्थ एवोच्यते विधुक्षये अमावा
स्यायां तस्मिन्पित्र्ये कर्मणि युक्तस्यैतत्परस्य लौकिकी स्मार्ती प्रेतकृत्या पितॄपकारार्था क्रिया पुत्रपौत्रधनादिफलप्रदेष्टृरूपत्वा
कर्तारमुपतिष्ठते तस्माद्दैनंदिनं कर्तव्यं गोविन्दराजेन तु विधिः स्तवपदं इति पठितं व्याख्यातं च यो ग्रंथे नित्यमेवानित्यविधिः पिण्डकर्तृके नित्यं च तद्द्वये
गृहेणावतदस्मात्पठितव्यं मेधातिथिप्रभृतिभिर्गोविन्दराजादपि वृद्धतरैरनभ्युपेतत्वात्तत्पदमिति मंदमङ्गेशाच्च १२७ ॥

श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् १२८

श्रोत्रियेति छंदोमात्राध्यायी श्रोत्रियस्तस्मै दैवपित्र्यान्नानि यत्नतो देयानि अर्हत्तमाय श्रुताचारादिभिः पूज्यतमाय तस्मै दत्तं महाफलं भवति

एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् पुष्कलं फलमाप्नोति नामंत्रज्ञान्बहूनपि १२९

एकैकमिति दैवपित्र्ययोरेकैकमपि वेदतत्त्वविदं ब्राह्मणं भोजयेत् तदापि विशिष्टं श्राद्धफलं प्राप्नोति न त्वविदुषो बहूनपि न तु फलमस्मात्
ब्राह्मणभोजनमेव प्रधानं पिंडदानादिकं त्वंगमिति गोविन्दराजः वयं तु पित्र्युद्देशेन द्रव्यत्यागो ब्राह्मणस्वीकारपर्यंतेन श्राद्धशब्दवाच्यं प्रधान
ह्मः तदेवमनुतां पिंडदानादर्थाकं श्राद्धं कुर्यादिति विहितं आपस्तंबेन तु मनुदर्थमेव व्याख्यातत्वात् तदाह आपस्तंबः तथैतन्मनुः श्रा
द्धशब्दं कर्म प्रोवाच प्रजानिःश्रेयसार्थं मासि मासि अपरपक्षस्यापराह्णः श्रेयान् तिथिश्राद्धशब्दं प्राधान्यमिति शंखोवाचकोयस्तत्तथा ब्रा

43A श्रमसंस्तव आहवनीयार्थे आहवनीयवत्तत्पक्षद्वयप्रतिपत्तिस्थानत्वात् पितरो देवता इति नियतपितृदेवताकत्वाच्च श्राद्धस्य देवश्राद्धे दोषाद्ब्राह्मण
दृष्टत्वादर्थप्राप्ययोगोपाः कौंडपायिनामयनस्वाग्निहोत्रशब्दः पुष्कलफलशंसार्थमिति इति तु दृष्टेनरफलार्थिनो गुणफलविधिः सभोजनस्य
गार्थ्यपितृदा श्रयोन विरुद्धः आपस्तंबोप्यधात् श्राद्धकर्मैतत्पितृदेवतं मन्त्रार्थकथयं तस्माद्देवब्राह्मणभोजने १२९

दूरादेव परीक्षेत ब्राह्मणं वेदपारगं तीर्थं तद्धव्यकव्यानां प्रदाने सोतिथिः स्मृतः १३०

दूरादिति दूरादेव पितृपितामहाद्यभिजन
शुद्धिनिरूपणेन बहुतरं शाखाध्यायिनं ब्राह्मणं परीक्षेत यस्मात्तथाविधो ब्राह्मणो हव्यादीनां तीर्थं पात्रं प्रदाने सोतिथिरिव महाफलप्रदो हेतुत्वात् १३०

सहस्रं हि सहस्राणामनृचां यत्र भुंजते एकस्तान्मंत्रवित्प्रीतः सर्वानर्हति धर्मतः १३१ सहेति यत्र श्राद्धे ब्राह्मणामवेदविदां दश
लक्षाणि भुंजते तत्रैको वेदवित्भोजनेन परितुष्टो धर्मतो धर्मोत्पादनेन तान्सर्वानर्हति तीकर्तुं योग्यो भवति तद्भोजनजन्यफलजननयतीत्यर्थः
आदसत्वादेकवचनं श्रथवा बहुवचनान्तोस्यानेसहस्रमिति मनोभिमतं गोविंदराजस्त्वाह सहस्रं गच्छंतभूतानीति वेद १३१ ॥

ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुद्ध्यतः १३२ ॥ ज्ञानेति विद्यायाः उत्कृष्टा
यादुव्यानि कव्यानि च देयानि न मूर्खेभ्यः अर्थान्तरन्यासेनानालंकारः न हि रक्ताक्तौ हस्तौ रक्तेनैव विशुद्धौ भवतः किंतु विमलजलेन एवं मूर्खभो
जनेनजनितं दोषं न मूर्खभोजितोपहं
यावतो ग्रसते ग्रासान् हव्यकव्येष्वमंत्रवित् तावतो ग्रसते प्रेतो दीप्तशूलर्ष्ट्ययोगुडान् १३३
तिकिंतु विद्वान् १३२
अविद्वत्रिदयाविद्वद्दानमेवोक्तं वक्ताध्यासोनियावत् यतोमंत्रकान् ग्रासान् हव्यकव्येषु अविदविद्वद्भुंक्ते तत्संख्यकानेव प्रकृतश्राद्धकर्ताप्र
ज्वलितशूलष्टायोगोगुडान् अनेन पिंडान् ग्रसते श्राद्धकर्ता वेदमविद्वद्दानफलकथनेन तथा चव्यासः ग्रसते याचव्यासः ग्रसते तावतः शूलानग
तावेवं सततदये १३३

ज्ञाननिष्ठा द्विजाः केचित्तपोनिष्ठास्तथापरे तपःस्वाध्यायनिष्ठाश्च कर्मनिष्ठास्तथापरे १३४

ज्ञाननिष्ठा विद्यातत्त्वज्ञानपराः आत्मसाभवंति अन्ये शास्त्रापत्यादितपः प्रधानाः अपरे तपोध्ययननिरताः इतरे यागादिपराः १३४

ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः हव्यानि तु यथान्यायं सर्वेष्वेव चतुर्ष्वपि १३५

ततः किमतआह ज्ञानेति ज्ञानप्रधानेभ्यः पितृअर्थानि यत्नाद्दातव्यानि पुनः न्याया यावदर्थतार्थपशास्त्रानुसारेण चतुर्ष्वपि १३५ १३५ ॥

मनु स॰ ४४

अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः अश्रोत्रियो वा पुत्रः स्यात्पिता स्याद्वेदपारगः १३६

अश्रोत्रिय इति यः श्रोत्रियपितृकः स्वयं त्वश्रोत्रियः यः अश्रोत्रियपितृकः स्वयं वा श्रोत्रियः १३६ ज्यायांसमनयोर्विद्याद्यस्य स्याच्छ्रोत्रियः पिता मन्त्रसंपूजनार्थं तु सत्कारमितरोऽर्हति १३७ तयोः कः श्रेष्ठ इत्यपेक्षायां विशेषमाह ज्यायांसमिति अनयोः पूर्वश्लोकनिर्दिष्टयोर्मध्ये श्रोत्रियपुत्रं स्वयमश्रोत्रियमपि ज्येष्ठं जानीयात् पितृविद्यादरपरमिदं यः पुनरश्रोत्रियस्य पुत्रः स्वयं च श्रोत्रियः स तदधीतवेदपूजनार्थं पूजामर्हति वेद एव तद्द्वारेण पूज्यत इति पुत्रविद्यादरपरमिदं तस्माद्धव्यकव्ययोः श्रोत्रियपुत्रः स्वयं च श्रोत्रियः श्राद्धे भोजयितव्य इत्युक्तं न तु श्रोत्रियपुत्रस्स्वयमश्रोत्रिय एवाध्यनुज्ञातोऽश्रोत्रियायैव दद्यादिति विरोधात् एवं च हव्यादेव परीक्षेति विद्यावित्तिरिक्ता वा गादिपरीक्षार्थं तेनावतिष्ठते १३७

न श्राद्धे भोजयेन्मित्रं धनैः कार्योऽस्य संग्रहः नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेद्द्विजम् १३८

नेति श्राद्धे न मित्रं भोजयेत् धनैस्तु तस्य मैत्री संपादनीया न शत्रुं न च मित्रं यं जानीयात्तं ब्राह्मणं श्राद्धे भोजयेत् १३८

यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च १३९

यस्येति मित्रप्राधान्येन भावप्रधानाः यस्य मैत्रीप्रधानानि हव्यकव्यानि तस्य पारलौकिकं फलं न भवतीति फलाभावकथनपरमिदं प्रेत्येति परलोके हव्यकव्यशब्दौ तत्र मध्यममिदं न तु तत्क्रान्ते तेनासमानकर्तृकत्वे कथं क्त्वा इति नाशङ्कनीयं १३९॥

यः संगतानि कुरुते मोहाच्छ्राद्धेन मानवः स स्वर्गाच्च्यवते लोकाच्छ्राद्धमित्रो द्विजाधमः १४०

स्वर्गफलं श्राद्धस्य दर्शयितुं पूर्वोक्तफलाभावमेव विशेषेण कथयति य इति यो मनुष्यः संगतानि मित्रसंबन्धान् मित्रत्वानि श्राद्धेन कुरुते तथा श्राद्धे मित्रस्याभोजने तत्ता मित्रं यस्य स श्राद्धमित्रो द्विजाधमः स स्वर्गलोकाच्च्यवते तेन न प्राप्नोतीत्यर्थः श्राद्धस्यापि स्वर्गफलमाह याज्ञवल्क्यः आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च प्रयच्छन्ति तथा राज्यं प्रीता नॄणां पितामहाः १४०

संभोजनी साभिहिता पैशाची दक्षिणा द्विजैः इहैवास्ते तु सा लोके गौरन्धेवैकवेश्मनि १४१

संभोजनीति सा दक्षिणा दानक्रिया संभोजनी सहभुज्यते यया सा संभोजनी गोष्ठीवत् बहुपुरुषभोजनात्मिका पिशाचमैत्रीप्रयोजनत्वधर्मत्वात् पैशाची मन्वादिभिरुक्ता सा तेन श्रेयोजनकत्वात् न परलोकफला इहलोक एवास्ते यथान्धा गौरेकस्मिन्नेव गृहे तिष्ठति न गृहान्तरं गच्छति

44A

यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम् तथानृचे हविर्दत्त्वा न दाता लभते फलम् १४२

यथेति ईरिणमूषरदेशस्तत्र बीजमुप्तं न प्ररोहतीति तत्र यथा बीजवप्ता कर्षको न फलं प्राप्नोति एवमविद्वद्ब्राह्मणदानफलं दाता न प्राप्नोतीति १४२

दातॄन्प्रतिग्रहीतॄंश्च कुरुते फलभागिनः विदुषे दक्षिणां दत्त्वा विधिवत्प्रेत्य चेह च १४३

दातॄनिति वेदविदे यथाशास्त्रं दत्तमैहिकामुष्मिकफलभागिनो दातॄन्करोति ऐहिकं फलं यथाशास्त्रानुष्ठानेन लोके ख्यातिरूपमामुष्मिकमिति मेधातिथिगोविन्दराजौ वयं त्वायुरादिकमेवैहिकफलं ब्रूमः आयुः प्रज्ञां धनं विद्यामित्याद्यैहिकामुष्मिकादिफलत्वेनापि श्राद्धस्य याज्ञवल्क्यादिभिरुक्तत्वात् प्रतिग्रहीतॄंश्च श्राद्धलब्धधनानुष्ठितयागादिफलेन परलोके सफलान्कुरुते अन्यायार्जितधनानुष्ठितयागादेरफलश्रुतत्वात् इहलोके न्यायार्जितधनारब्धकृष्यादिफलातिशयलाभात्सफलान्कुरुते १४३ ॥

कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिम् द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् १४४

काममिति वेदविद्ब्राह्मणाभावे गुणवन्मित्रं भोजयेत् न तु विद्वांसमपि शत्रुं यतः शत्रुणा श्राद्धे भुक्तं परलोके निष्फलं भवति ध्येयोक्तपात्राभावे भवेदित्यतिप्रसवार्थमिदम् १४४

यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् शाखान्तगमथाध्वर्युं छन्दोगं तु समाप्तिकम् १४५

श्रोत्रियायैव देयानीत्यनेन छन्दोमात्राध्यायिनी श्रोत्रियशब्दप्रयोगात् तावन्मात्रमावश्यकमुक्तं इदानीं त्वधिकफलार्थं मन्त्रब्राह्मणात्मककृत्स्नशाखाध्यायिनि श्रोत्रियदानमाह यत्नेनेति ऋग्वेदे मन्त्रब्राह्मणात्मकशाखाध्यायिनं यत्नतो भोजयेत् तथाविधमेव यजुर्वेदिनं वेदस्य पारं गच्छतीति वेदपारगः शाखाया अन्तं गच्छतीति शाखान्तगः समाप्तिरस्यास्तीति समाप्तिकः सर्वत्रैव शाखाशब्देन मन्त्रब्राह्मणात्मककृत्स्नशाखाध्येताभिहितः १४५ ॥

एषामन्यतमो यस्य भुञ्जीत श्राद्धमर्चितः पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी १४६

उक्तब्राह्मणभोजनेऽधिकं फलमाह एषामिति एषां पूर्वोक्तशाखाध्यायिनां बह्वृचादीनां मध्यादन्यतमो यः सम्यक्पूजितः श्राद्धे भुङ्क्ते तस्य पुत्रादि सप्तपुरुषाणां शाश्वती अविच्छिन्ना पितॄणां तृप्तिः स्यात् साप्तपौरुषीति प्रपौत्रादिनाऽऽभयपदद्वयं(?) तस्याकृतिगणत्वात् १४६

एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः १४७ ॥

मातापित्रादि

पि जमाने

म.टी.
मं. 45
४५

पात्रमिति हव्यकव्ययोर्देवपित्र्यदाने यस्मै ब्राह्मणाय दीयते स एव पात्रं मुख्यः कल्पः उक्तः अयं पात्राभावे वक्ष्यमाणः अनुकल्पो ज्ञातव्यः सर्वदा साधुभिरनुष्ठितः १४७

मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम् दौहित्रं विट्पतिं बन्धुम् ऋत्विग्याज्यौ च भोजयेत् १४८

मातामहमिति स्वस्रीयो भागिनेयः गुरुर्विद्यागुरुराचार्यादिः विट् दुहिता तस्याः पतिः विट्पतिर्जामाता बन्धुर्मातृष्वसृपितृष्वसृपुत्रादिः

न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित् पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः १४९

तान्मातामहादीन्दृष्ट्वा गुणवत्त्वे श्रेयो विद्यायामभावे भोजयेत् १४८

धर्मज्ञो दैवश्राद्धे भोजनार्थं न ब्राह्मणं यत्नतः परीक्षेत स्वल्पपरीक्षाया इह मात्रेणासौ साधुतया भोजयितव्यः पित्र्ये पुनः कर्मण्युपस्थिते पितृपितामहाभिजनपरीक्षा कर्तव्येति परिभाषा हेमाद्रिः १४९

ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् १५०

स्तेनश्चौरः स च स्ववर्णाद्यो न्यूनः पतितः अन्यपतितं ब्राह्मणवधग्रहणात्पतितो महापातकी वा नपुंसकः नास्तिकवृत्तिर्नास्ति परलोक इत्येवं वृत्तिः प्रवर्तनं यस्य तान् दैवपित्र्ययोरुभयोरेवायोग्यान्मनुरब्रवीदिति मनुग्रहणं निषेधार्थं सर्वधर्माणामेव मनुनोक्तत्वात् १५० ॥

जटिलं चानधीयानं दुर्बालं कितवं तथा याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् १५१

जटिलमिति जटिलो ब्रह्मचारी मुण्डो वा जटिलो वा स्यादुक्तं ब्रह्मचारिणः पलक्षणात् जटिलं तस्य गुणेऽपि निषिद्धत्वे अनधीयानं वेदाध्ययनरहितं यस्योपनयनमात्रे कृते नवेदाध्ययनरहितं यस्योपनयनमात्रे कृते न वेदादेशः तेनापि कृतवेदस्यापि ब्रह्मचारिणो वेदाध्ययनकर्तृत्वस्यानुज्ञानार्थोऽयं निषेधः अतः श्रोत्रियाय देयानीति ब्रह्मचारीतरविषयं दुर्बालो दुश्चर्मा मेधातिथिस्तु दुर्बालमिति पठित्वा खल्वतिर्लोहितकेशो वा दुश्चर्मा वा इत्यर्थद्वयमुक्तवान् कितवो द्यूतकृत् पूगयाजकाबहुयाजकाः पूगः क्रमुकवृक्षयोगिनामभिधानिकाः अत एव बहुभिः यश्चापि बहुयाज्यः स्यात् यश्चायन यतेत बहूनिति तान् श्राद्धेन भोजयेदिति तान् श्राद्धेन भोजयेदिति न दैवे निषेधाय तत्राभ्यनुज्ञानिषेधा मनोरभिमताः तत्र हव्यकव्यग्रहणादुभयत्रोत व्याकरोति १५१

चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः १५२

चिकित्सेति चिकित्सको भिषक् देवलः प्रतिमापरिचारकः वर्तनार्थं तेनैतत्कर्म कुर्वतोऽयं निषेधः न तु धर्मार्थं देवकोशोपजीविनाम्ना।

पुजारी

45A देवलकोभवेदिति देवलवचनात् मांसविक्रयिणः सकृदपि मांसं पततिमांसेनेति लिङ्गात् विपणेन चेति विपणो वणिज्या तया जीवन्तः हव्य
कव्ययोरित्यभिधानात् दैवे पित्र्ये च वर्ज्याः १५२ प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वा
प्रेष्य इति भृतिग्रहणपूर्वकं ग्रामाणां राज्ञश्चाज्ञाकारी कुत्सितनखः स्वभावकृष्णदंतः गुरुप्रतिकूलाचरणशील र्धुषिस्तथा १५३
त्यक्ताग्निः स्मार्ताग्निकलोपजीविनश्च हव्यकव्ययोर्वर्ज्याः इति सर्वत्रैवाचनुषंगः उत्तरत्र च १५३ ॥
यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च १५४ ॥ यक्ष्मीति यक्ष्मी क्षयरोगी
पशुपालो वृत्त्यर्थं न यागमेधादिपोषकः परिवेत्तृपरिवित्ती वक्ष्यमाणलक्षणौ निराकृतिः पंचमहायज्ञानुष्ठानरहितः तथा च छंदोग
परिशिष्टं निराकर्त्तामराद्यो नाम वित्तेयो निराकृतिः ब्रह्मद्विट् ब्राह्मणानां द्वेष्टा गणाभ्यंतरो गणार्थोत्सृष्टधनोपजीवी १५४ ॥
कुशीलवोऽवकीर्णी च वृषलीपतिरेव च पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे १५५ ॥
कुशीलव इति कुशीलवो नर्त्तकः अवकीर्णी स्त्रीसम्पर्कजयोत् विलुप्तब्रह्मचर्यः प्रथमाश्रमी यतिश्च वृषलीपतिः सवर्णामनु
पश्चात्कृतशूद्राविवाहः पौनर्भवः पुनर्भूपुत्रो वक्ष्यमाणः उपपतिर्यस्य जाया जारो गृहेऽस्ति १५५ ॥
भृतकाध्यापको यश्च भृतकाध्यापितस्तथा शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ १५६ भृतेति भृतिर्वेतनं तद्गृ
हीत्वा भृतकः सन् योऽध्यापकः स तथा एवं भृतकाध्यापितः शूद्रशिष्यो व्याकरणादौ गुरुश्च तत्सेव वाग्दुष्टः परुषभाषी अभिशस्त इत्यन्ये कुण्डगोलौ
अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः १५७ कौ वक्ष्यमाणौ १५६ ॥
अकारणेति अन्यतः पितृगुरूणां च परित्यागकारणं विना त्यक्ता शुश्रूषादेः कर्त्ता पतितैः ब्राह्माध्यापनकन्यादानादिभिः संबंधैः सम्पर्कं गतः पतित
तः देवा स्मृतिषु इति चेत् न संवत्सरान्यागादं भविष्यति संवत्सरेण पततीति वक्ष्यमाणत्वात् १५७
अगारदाही गरदः कुण्डाशी सोमविक्रयी समुद्रयायी वन्दी च तैलिकः कूटकारकः १५८ अगारेति गृहदाहकः मर
णहेतुद्रव्यस्य दाता कुण्डान्नस्य वक्ष्यमाणस्य योऽन्नमश्नाति प्रदर्शनार्थत्वात् कुण्डस्य गोलकस्यापि ग्रहणं ग्रन्थवदेवलः मृते जारजः कुण्डो मृते भ

म॰ नु॰
से॰
४६

तैरिगोलकः यस्तयोरन्नमश्नाति स कुंडाशीति कस्यचिन्मते सोमलताविक्रेता समुद्रे यो वहित्रादिना द्वीपांतरं गच्छति वंदी स्तुतिपाठकः तैलार्थं ति-

पित्रा विवदमानश्च कितवो मद्यपस्तथा । पापरोग्यभिशस्तश्च दांभिको रसविक्रयी १५९ लादिवीजानां मेषादीनां विवादे कुक्कुटस्य मूषकस्य वा केषकर्ता

पत्रेति पित्रा सह शास्त्रार्थे लौकिके वा वस्तुनि निरर्थं यो विवदते कितवो यः स्वयं देवितमनभिज्ञः स्वार्थं परान् देवयति न स्वयं देविता तस्यापि कितवत्वात् १५८

न च सभिकः तस्य द्यूतवृत्तिपदेनाभिधास्यमानत्वात् केकर इति पाठे तिर्यग्दृष्टिः रसानां तिक्तमद्यपानादीनां विक्रेता पापरोगी महापातका

धनुःशराणां कर्ता च यश्चाग्रेदिधिषूपतिः । मित्रध्रुक् द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च १६० दीजाताभिशापः खयमनाधमंकार्ये हत्यादि रसविक्रेता ११।

धनुरिति धनुर्विशरांश्च यः करोति ज्येष्ठायां सोदरभगिन्यामनूढायां यस्याः कनिष्ठा विवाहेन दीयते साग्रेदिधिषूस्तस्याः पतिः तथा च लौगाक्षिः ज्ये-

ष्ठायां यद्यनूढायां कन्यायामुह्यतेनुजा सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृता गोविंदराजस्तु भ्रातुर्मृतस्य भार्यायामनियमेनाग्रेदिधिषूपतिरेव

वृत्तिवशादग्रेशब्दलोपेन दिधिषूपतिरिति मनुना वक्ष्यते भ्रातुर्मृतस्य इत्याह मित्रध्रुक् यो मित्रस्यापकारे वर्तते द्यूतवृत्तिः सभिकः पुत्रेणाध्यापितः पिता पुत्राचार्यस्तेषामसंभवात्

भ्रामरी गंडमाली च श्वित्र्यथो पिशुनस्तथा । उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिंदक एव च १६१

भ्रामरीति अपस्मारी गंडमालाव्याधियुक्तः श्वेतकुष्ठयुक्तः दुर्जनः उन्मादवानन्धश्च चक्षुर्विहीनः वेदनिंदाकरः १६१॥

हस्तिगोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति । पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च १६२

हस्तीति हस्तिगवाश्वोष्ट्राणां विनेता नक्षत्रशब्देन ज्योतिःशास्त्रमुपलक्ष्यते तेन यो वर्तते पक्षिणां श्येनशुकादीनां क्रीडार्थं पोषयिता युद्धा-

स्रोतसां भेदको यश्च तेषां चावरणे रतः । गृहसंवेशको दूतो वृक्षारोपक एव च १६३ र्थमायुधविद्योपदेशकः १६२

स्रोतसामिति प्रवहज्जलानां सेतुभेदादिना देशांतरनेता तेषामेवावरणकर्ता निजगतिप्रतिबंधकः गृहसन्निवेशोपदेशको वास्तुविद्योप-

जीवि दूतो राजग्रामप्रेष्यकर्ता वृक्षारोपयिता वेतनग्रहणेन न तु धर्मार्थी पश्चादारोपी नरकं ययातीति विधानात् १६३ ॥

श्वक्रीडी श्येनजीवी च कन्यादूषक एव च । हिंस्रो वृषलवृत्तिश्च गणानां चैव याजकः १६४ ॥

46A

पक्षीदीति क्रीडार्थं पुनः पोषयति श्येनैर्जीवति क्रयविक्रयादिना कन्याभिगामी हिंस्रः शूद्रोपपतिः वृषलपुत्र इति पाठांतरे वृषा लपूर्वकबलाः पुत्रा यस्य ... यागकृत् १६४

आचारहीनः क्लीवश्च नित्यं याचनकस्तथा कृषिजीवी श्लीपदी च सद्भिर्निंदित एव च १६५

आचारहीनो निरुद्धवृत्तिः शास्त्रोक्ताचारवर्जितः क्लीबो धर्मकृत्यादौ निरुत्साहः नपुंसकस्योक्तत्वात् नित्यं याचनेन परोद्वेजकः स्वयंकृत्वा कृष्या यो जीवति कृषंतं तेऽपि वा ... स्वयंकृतया पि श्लीपदी व्याधिना स्थूलचरणः केनापि निमित्तेन साधूनां निंदाविषयः १६५

औरभ्रिको माहिषिकः परपूर्वापतिस्तथा प्रेतनिर्हारकश्चैव वर्जनीयाः प्रयत्नतः १६६

औरभ्रिकेति मेषमहिषजीवनः परपूर्वा पुनर्भूस्तस्याः पतिः प्रेतनिर्हारकोधनग्रहणेन तद्धर्मार्थं प्रेतदेहपरमेतपोऽयं ... प्रेतनिर्हारकस्य विहितत्वात् १६६

एतान्विगर्हिताचारानपांक्तेयान्द्विजाधमान् द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् १६७

एतान्निंदितानस्तेनादीनिह जन्मनि निंदिताचारान्कृष्णादींश्च पूर्वजन्मार्जितनिंदितकर्मशेषलब्धकाणादिभावान्सर्वानभिः सहैक पंक्तिभोजनायोग्यान् ब्राह्मणाधमान् ब्राह्मणश्रेष्ठः श्राद्धे दैवे पित्र्ये च त्यजेत् १६७ ॥

ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते १६८ ॥

ब्राह्मण इति तृणाग्निर्यथा न हविर्दहनसमर्थो हविषि प्रक्षिप्ते शाम्यति निष्फलस्तत्र होमः एवं वेदाध्ययनशून्यो ब्राह्मणस्तृणाग्निसम स्तस्मै दैवे हव्यं ... न दातव्यं यतो भस्मनि न हूयते श्रोत्रियायैव देयानीत्यनेनैवानधीयानस्यापि प्रतिषेधः सिद्धस्तेनादिवत्प्र ति हव्यकव्यज्ञापनार्थं पुनर्वचनं ... दैवे चानधीयान एव वर्जनीयः अधीतस्तु काणादिरपि शारीरदोषयुक्तो ग्राह्य इत्येतदर्थमस्य नवचनं अत एव वशिष्ठः अथ चेन्मंत्रवियुक्तः शारीरैः पंक्तिदूषणैः अदूष्यं तं यमः प्राह पंक्तिपावन एव सः श्वत्रादिकाणादिभि र्न तु स्वयमुत्पादितैस्तेनादिभिः १६८

अपांक्तदाने यो दातुर्भवत्यूर्ध्वं फलोदयः दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः १६९

अपांक्तदानीति पंक्तिभोजनानर्हब्राह्मणाय दैवे हविषि पित्र्ये वा दत्ते दातुर्यो दानादूर्ध्वं फलोदयस्तमशेषमभिधास्यामि १६९

47

मनु० टी० ४७

अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्रादिभिस्तथा अपांक्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते १७० ॥

अव्रतैरिति वेदग्रहणार्थव्रतरहितैस्तथा परिवेत्रादिभिरन्यैश्च अपांक्तेयैः स्तेनादिभिर्यत् हव्यकव्यं भुक्तं तद्रक्षांसि भुञ्जते निष्फलं तत्कृत्यं भवतीत्यर्थः १७०

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः १७१ ॥

अप्रसिद्धत्वात्परिवेत्रादिलक्षणमाह दारेति अग्निहोत्रशब्दोऽयमग्निहोत्राद्याधानपरः यः सहोदरे ज्येष्ठे भ्रातरि अनूढे अनग्निके च दारपरिग्रहं श्रौतस्मार्ताग्निपरिग्रहं वा कुरुते स परिवेत्ता ज्येष्ठश्च परिवित्तिर्भवति १७१ ॥

परिवित्तिः परिवेत्ता यया च परिविद्यते सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः १७२

अप्रसंगात्परिवेदनसंबन्धिनां पञ्चानामप्यनिष्टफलमाह परीति परिवित्तिः परिवेत्ता च यया च कन्यया परिवेदनं क्रियते कन्याप्रदाता याजकश्च तद्विवाहहोमकर्ता एते पञ्च सर्वे नरकं व्रजन्ति १७२

भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः १७३

भ्रातुरिति मृतस्य भ्रातुर्वक्ष्यमाणनियोगधर्मेणापि नियुक्तायां भार्यायां सकृत्सकृद्गतानृतादिकात्यादिविधिं हित्वा कामेनानुरागं भावयेदाश्लेषचुम्बनादि कुर्यात् असकृद्वा प्रवर्तेत स दिधिषूपतिर्ज्ञातः अतः श्राद्धनिषिद्धपात्रमध्यपाठात् स्मापि हव्यकव्ययोः पात्रतयानिषेधः कल्पनीयः १७३

परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः १७४

परेति परदारेषु कुण्डगोलकाख्यौ द्वौ सुतावुत्पद्येते तत्र जीवत्पतिकायामुत्पन्नः कुण्डो मृतपतिकायां च गोलकः १७४ ॥

तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् १७५

ताविति तौ परभार्यायां जातौ कुण्डगोलकौ वक्ष्यमाणगुणयोगात् प्राणिनाविति व्यपदिष्टौ ब्राह्मणत्वे पितृकार्याभावात् अदृष्टफलाभावात् परलोके चानुषंगिककीर्त्यादिफलाभावादिहत्वान्नि हव्यकव्यानि दातृणां नाशयेते नाशयतः प्रदायिभिर्दत्तानि हव्यकव्यानि निष्फलानि कुरुतः १७५

अपांक्तेयो यावतः पांक्त्यान्भुञ्जानाननुपश्यति तावतां न फलं तत्र दाता प्राप्नोति बालिशः १७६

मनु॰ टी॰ भा॰

48

इतरेषु त्वपांक्त्येषु यथोद्दिष्टेष्वसाधुषु मेदोऽसृङ्मांसमज्जास्थि वदन्त्यन्नं मनीषिणः १८२

इतरेष्विति इतरेष्वतोऽविशेषेणानुक्तफलेभ्यः पंक्तिभोजनानर्हेभ्यः स्तेनादिभ्यो यथाकीर्तितेभ्यो यद्दत्तमन्नं तद्दातृभोजनार्थं मेदोरुधिरमांसमज्जास्थि भवतीति पंडिता वदंति अत्रापि जन्मान्तरे मेदःशोणितादिभोजनं जातिषु जायन्त इत्यर्थः १८३ ॥

अपांक्त्योपहता पंक्तिः पाव्यते यैर्द्विजोत्तमैः तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान्पंक्तिपावनान् १८३ ॥

अपांक्तेयैरिति एकपंक्त्युपविष्टैः नादिदूषिता पंक्तिर्यैर्ब्राह्मणैः पवित्रीक्रियते तान् पवित्रीकारकान् ब्राह्मणानशेषेणाभूयं शृणुत।
निषेधादेकपंक्तिभोजनासंभवेपि स्तेनादीनां रहस्यकृतानां तद्दोषत्वेन साधकत्वादप्रसवचनम् १८३ ॥

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः १८४

अग्र्या इति सर्वेषु वेदेषु वक्तव्येष्वपि अग्र्याः श्रेष्ठाः सम्यग्गृहीतवेदा ब्राह्मणाः पंक्तिपावनाः अत एव यमः पंक्तिपावनगणनायां चतुर्वेदविदं चैवेति पठितवान् तथा प्रकर्षेणोच्यते वेदार्थो यैरिति प्रवचनान्यंगानि तेष्वप्यग्र्याः षडंगविदस्ते च चतुर्वेदिनोपि पंक्तिपावनाः न्यायविस्तु षडंगवदिति पंक्तिपावनमध्ये यमेन पृथक्पठितत्वात् तथाच्छेदसा श्रुह्नदशपूरुषं स्मृतो वचनाद्दशपुरुषपर्यंतमविच्छिन्नवेदसंप्रदायेन ये जाताः पंक्तिपावनाः १८४

त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित् ब्रह्मदेयात्मसंतानो ज्येष्ठसामग एव च १८५

त्रिणाचिकेत इति त्रिणाचिकेतः अध्वर्युवेदभागः तद्व्रतं तद्योगात्पुरुषोपि त्रिणाचिकेतः पञ्चाग्निरग्निहोत्री तथा च हारीतः पवनः पावनस्त्रे-
तापहाः ग्रयोगृह्ये साग्निमान् प्रदीप्यते स विप्रः पंक्तिपावनः पवनस्त्वावसथ्याग्निः पावनः सभ्योऽग्निः ब्रः शीतापनोदनायर्थे बहुषु देशेष्वपि वि-
धीयंते त्रिसुपर्णो बह्वृचवेदभागः तद्व्रतं तद्योगात्पुरुषोपि त्रिसुपर्णः षडंगानि शिक्षादीनि यो व्याचष्टे स षडंगवित् सर्वप्रवचनेष्वित्यनेनेन
षडंगाध्येतोक्तः ब्राह्मदेया ब्राह्मविवाहोढा तस्या आत्मसंतानः पुत्रः ज्येष्ठसामानि सामान्यारण्यके गीयंते तेषां गाता एते षड्विज्ञेयाः पंक्ति-

वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः शतायुश्चैव विज्ञेया ब्राह्मणाः पंक्तिपावनाः १८६

पावनाः इत्यनेन श्लोकेन संबंधः १८५

वेदेति अनधीत्यापि वेदांगानि उपदेशादधिगतवेदार्थः प्रवक्ता वेदार्थस्यैव ब्रह्मचारी प्रथमाश्रमी सहस्रद इति देयविशेषानुपादानेपि गावो॰

47A श्राणामिति सद्भिः सहैकपङ्क्तिभोजनानर्हः स्तेनादिर्यत्संख्यान्पङ्क्तिभोजनार्हान्पश्यति तावत्संख्यानां भोजनस्य फलं न तत्र श्राद्धे दाता न प्राप्नोति वालिशोऽज्ञः श्रुतास्तेनादिर्यथा न पश्यति तथा कर्तव्यम् १७६

वीक्ष्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य च पापरोगी सहस्रस्य दातुर्नाशयते फलम् १७७॥

वीक्ष्यतीत्यन्धस्य वीक्षणासंभवात् वीक्षणयोग्यदेशसन्निहितोऽन्धः यावतां नवतेर्भोजनफलं नाशयति एवं काणः षष्टेः श्वेतकुष्ठी शतस्य पापरोगी रोगराजोपहतः सहस्रस्य यादिसन्निधिनिमित्तं चैव वचनेन फलस्य संख्याभिधानं चेह संख्यापचये दोषगौरवं तत्र च प्रायश्चित्तगौरवमिति दर्शयितुं १७७

यावतः संस्पृशेदङ्गैर्ब्राह्मणाञ्छूद्रयाजकः तावतां न भवेद्दातुः फलं दानस्य पौर्तिकं १७८

यावत इति शूद्रस्य यत्तादोः स्मृतिकया वा तत्संख्यान्ब्राह्मणान्स्पृशति श्राद्धे समानेनैकपङ्क्त्युपवेशिति आसनेनाभेदस्य वक्ष्यमाणत्वात् मुख्यस्पर्शासंभवे यावतो श्राद्धभोजिनो पङ्क्तावुपविशति तावतां संबन्धि पौर्तिकं फलं श्राद्धीयं दातुर्न भवति तावतां पौर्तिकं फलं दर्शितं दानेन यत्फलं तन्न भवतीति मेधातिथिगोविन्दराजौ श्रुतस्तत्रैव निंदया निषिद्धगणपठितस्यापि शूद्रयाजकस्य भोजने निषेधः कल्प्यते १७८॥

८ वेदविच्चापि विप्रोऽस्य लोभात्कृत्वा प्रतिग्रहं विनाशं व्रजति क्षिप्रमामपात्रमिवांभसि १७९

प्रसंगाच्छूद्रयाजकप्रतिग्रहं निषेधयति लाघवार्थमन्यत्र निषेधकरणे शूद्रयाजनकस्य लोभात्प्रतिग्रहं कृत्वा क्षिप्रं प्राणादिना विनाशं गच्छति मृत्तमयमपक्वमृन्मयपात्रं वारिविनिक्षिप्तमिवोदके १७९

सोमविक्रयिणे विष्ठा भिषजे पूयशोणितं नष्टं देवलके दत्तमप्रतिष्ठं तु वार्धुषौ १८०

सोमविक्रयिण इति सोमविक्रयिणे यद्दत्तं श्राद्धभोजनार्थं विष्ठामेव यत्तत्तन्मातरेषु विष्ठाभोजिना जातो जायते इत्यर्थः एवं पूयशोणिते भिषग्भ्यो येन दत्तं नाशमायाति यानि निष्फलं देवलके दत्तं अप्रतिष्ठमनाश्रयतया निष्फलमेव १८०॥

यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे १८१

यत्तु वाणिजकाय यद्दत्तं श्राद्धे तन्नेहानुषंगिककीर्त्यादिफलाय नापि पारलौकिकफलाय भवति पुनर्भूपुत्राय यद्दत्तं तद्भस्मनि हुतहविःसमं निष्फलमित्यर्थः १८१

48A वेयत्नममातरःपुत्रादिविशेषप्रवृत्तत्वनिदर्शनात् गोमहिषद्दानावहुप्रदेवाधात् अयुग्मनवर्षवयाः श्रोत्रियायैवदेयानीतिनियमात् इति श्रोत्रियायैव तु क्रतुगुणयोगात्पंक्तिपावनत्वं १८६

पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते निमंत्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितान् १८७

पूर्वेद्युरिति श्राद्धकर्मणि प्राप्ते श्राद्धात्पूर्वदिने तदसंभवे श्राद्धदिन एवोक्तलक्षणान् ब्राह्मणान् सम्यगिति सत्कारपूर्वं निमंत्रयेत् त्र्यवरान्युग्मान् घाते त्र्यवराः न त्वतानेव एकैकभोजनस्याभुक्तत्वात् १८७॥

निमंत्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा न च छन्दांस्यधीयीत यस्य श्राद्धं च तद्भवेत् १८८

निमंत्रित इति श्राद्धे निमंत्रितो ब्राह्मणो निमंत्रणादारभ्य श्राद्धाहोरात्रं यावत् मैथुननिवृत्तिसंयमसंयमवान् स्यात् अवश्यकर्तव्यजपादिवर्जं वे। दाध्ययनं च न कुर्यात् श्राद्धकर्तापि तथैव स्यात् १८८

निमंत्रितान्हि पितर उपतिष्ठन्ति तान्द्विजान् वायुवच्चानुगच्छन्ति तथासीनानुपासते १८९

निमंत्रितानि पूर्वनियमविधेरयमनुवादः यस्मात्तान् ब्राह्मणान्निमंत्रितान् दृश्यरूपेण पितरोऽधितिष्ठन्ति प्राणवायुवत् गच्छतोऽनुगच्छन्ति तथोपविष्टेषु समीपमुपविशन्ति तस्मान्नियता भवेयुः १८९॥

केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः कथंचिदप्यतिक्रामन्पापः सूकरतां व्रजेत् १९०

केतित इति हव्यकव्ये यथाशास्त्रं निमंत्रितो ब्राह्मणः स्वीकृत्य केनापि प्रकारेण भोजनमकुर्वाणः तेन पापेन जन्मान्तरे सूकरो भवति १९०

आमंत्रितस्तु यः श्राद्धे वृषल्या सह मोदते दातुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते १९१

नियतात्मा भवेत्सदेत्यनेनैव मैथुने निषिद्धेऽपि वृषलीगमनस्याधिकदोषज्ञापनार्थमाह आमंत्रितस्त्विति वृषली शूद्रा तत्र मुख्यत्वात् श्राद्धे निमंत्रितः सवर्णयापि वृषल्या सार्द्धं स्त्रीपुंसधर्मेण स्मरणादिना रमते स दातुर्यत्पापं तत्प्राप्नोति पापोत्पत्तिमात्रं विवक्षितं अन्यथा दातरि अपापेन पापेन जायते न चेदं दातुः प्रायश्चित्तं न यथाविहितं येनासौ पापान्मुच्यते मेधातिथिगोविन्दराजौ तु समानार्थेन ब्रह्मचर्य स्वविधानात् वृषस्यन्ती भर्तारमिति योगाश्रयणेन स्वभार्याभोगोऽप्यत्र ब्राह्मणस्यापि वृषलीभिमता इत्याहतुः

मनु. टी.
४९

अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः १९२

अक्रोधना इति क्रोधरहिताः बहिः शौचं मृद्वारिभ्यां अन्तःशौचं रागद्वेषादित्यागस्तद्युक्ताः सर्वदा स्त्रीसंयोगादिशून्याः त्यक्तयुद्धाः दयाय ष्टगुणयोगे महाभागास्ततद्वन्तः अनादिदेवतारूपाः पितरस्तस्मात् क्रोधादिरहितेन भोक्त्रा कर्त्रा च भवितव्यं १९२

यस्मादुत्पत्तिरेतेषां सर्वेषामप्यशेषतः ये च यैरुपचर्याः स्युर्नियमैस्तान्निबोधत १९३

यस्मादिति एतेषां सर्वेषां पितॄणां यस्मात्सकाशादुत्पत्तिर्ये च पितरो ये ब्राह्मणादिभिर्यैर्नियमैः शास्त्रोक्तकर्मभिरुपचरणीया भवन्ति तान्माकल्येन शृणुत १९३

मनोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः १९४

मनोरिति हिरण्यगर्भापत्यस्य मनोर्ये मरीच्यादयः पुत्राः पूर्वमुक्ताः मरीचिमत्र्यंगिरसादिव्यादिनां तेषामृषीणां सर्वेषां सोमपदादयः पितृगणाः पुत्राः मन्वादिभिः स्मृताः १९४

विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः अग्निष्वात्ताश्च देवानां मारीचा लोकविश्रुताः १९५

विराडिति विराट्सुताः सोमसदो नाम साध्यानां पितरः अग्निष्वात्ता मरीचेः पुत्रा लोकविख्याता देवानां पितरः १९५

दैत्यदानवयक्षाणां गंधर्वोरगरक्षसां सुपर्णकिन्नराणां च स्मृता बर्हिषदोऽत्रिजाः १९६

दैत्येति दैत्यादीनां स्वधमाध्याये दितिभेदानां अत्रिपुत्रा बर्हिषदो नाम पितरः स्मृताः १९६

सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः वैश्यानामाज्यपा नाम शूद्राणां तु सुकालिनः १९७

सोमेति ब्राह्मणप्रभृतीनां चतुर्णां वर्णानां सोमपाप्रभृतयश्चत्वारः पितरः स्मृताः १९७

सोमपास्तु कवेः पुत्रा हविष्मन्तोऽङ्गिरःसुताः पुलस्त्यस्याज्यपाः पुत्रा वसिष्ठस्य सुकालिनः १९८

सोमेति कवेर्भृगोः सोमपाः पुत्राः हविर्भुजपदहविष्मन्तः अंगिरसः पुत्राः आज्यपाः पुलस्त्यसुताः सुकालिनो वसिष्ठसुताः १९८ ॥

49A

अग्निदग्धाननग्निदग्धान्काव्यान्बर्हिषदस्तथा अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत्
अग्नीति अग्निदग्धानग्निदग्धकाव्यबर्हिषदग्निष्वात्तसौम्याख्यान्पितॄन्विप्राणामेव जानीयात् १९९ ॥ १९९

य एते तु गणा मुख्याः पितॄणां परिकीर्तिताः तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकम् २००
य इति य एते प्रधानभूताः पितृगणा उक्तास्तेषामपीह जगति पितर एव पुत्रपौत्रा यत्ते ता विज्ञेयाः पुत्रपौत्र[illegible]इति गवाश्वप्रभृती
ति चेन्यिकवद्भावः एतच्छ्लोकसूचितानेव बर्हीवेणपट्यादयोऽन्येपि पितृगणा मार्कण्डेयादिपुराणे[illegible]षु श्रूयन्ते २००

ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः २०१
ऋषिभ्य इति ऋषिभ्यो मरीच्यादिभ्य उक्तक्रमेण पितरो जाताः पितृभ्यो देवदानवा जाताः देवेभ्यश्च जंगमस्थावरं जगत्क्रमेण ।
जातं तस्मात्सोमपादिप्रभवत्वात् स्वपितृपितामहप्रपितामहानां श्राद्धे सोमपादयोपि पूजनीयाः तेपूजिताः सन्तः श्राद्धफ
लदानाय कल्पन्त इति प्रकृतश्च पित्रादिश्राद्धस्तुत्यर्थं सोमपादिपितृगणोपन्यासः अथवा आवाहनकाले निजपित्राद
यो ब्राह्मणादिभिः सोमपादिरूपेण ध्येया एवं व्यवस्थाज्ञानमनुष्ठानपरतां च स्यात् २०१ ॥

राजतैर्भाजनैरेषामथो वा रजतान्वितैः वार्यपि श्रद्धया दत्तमक्षयायोपकल्पते २०२
राजतैरिति एषां पितॄणां रूप्यमयपात्रैः रूप्ययुक्तैर्वा ताम्रादिपात्रैर्जलमपि श्रद्धया दत्तमक्षयत्वाय देवेनुः संपद्यते किं पुनः प्रशस्तपायसादी
ति २०२

दैवकार्याद्द्विजातीनां पितृकार्यं विशिष्यते दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतम् २०३ ॥
दैवेति देवानुद्दिश्य यत्क्रियते तद्दैवकार्यं ततः पितृकार्यं द्विजातीनां विशेषेण कर्तव्यमुपदिश्यते अनेन पितृश्राद्धस्य शेषभूतं दैवं त
दंगमित्याह एतदेव स्पष्टयति यतो दैवकर्म पितृकर्मणः पूर्वं संपादनाय नेपरिपूरकं स्मृतम् २०३ ॥

तेषामारक्षभूतं तु पूर्वं दैवं नियोजयेत् रक्षांसि हि विलुम्पन्ति श्राद्धमारक्षवर्जितं २०४ तेषामिति आरक्षो तेषां पितॄणां
रक्षाभूतं दैवं विश्वेदेवब्राह्मणं पूर्वं निमन्त्रयेत् यस्माद्रक्षावर्जितं श्राद्धं राक्षसा आच्छिंदति २०४ ॥

म॰ वृ॰
टी॰
५॰

दैवाद्यन्तं तदीहेत पित्राद्यन्तं न तद्भवेत् पित्राद्यन्तं त्वीहमानः क्षिप्रं नश्यति सान्वयः २०५

दैवेति यत एवमतः तच्छ्राद्धं दैवाद्यन्तं दैवकर्मणा आद्यन्ताभ्यां भवमानं यस्य तत्तथा एतेनेदमुक्तं निमंत्रणादौ सर्वं दैवपूर्वं विसर्जनं तद्दैवानां शेषे अत एव देवलः यत्तत्र क्रियते कर्म पैतृकं ब्राह्मणान् प्रति तत्सर्वं तत्र कर्तव्यं वैश्वदैविकपूर्वकं न तत्तच्छ्राद्धं पित्र्यपक्रमावसानं पित्राद्यन्तं न तदनुतिष्ठन् ससंतानः शीघ्रं विनश्यति २०५

शुचिं देशं विविक्तं च गोमयेनोपलेपयेत् दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् २०६

शुचिमिति अस्थ्याद्यनुपहतं देशं निर्जनं च गोमयेनोपलेपयेत् दक्षिणादिगवनतं च प्रयत्नतः संपादयेत् २०६

अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा २०७ ॥

अवेति चोक्षाः स्वभावशुचयोऽरण्यादिप्रदेशास्तेषु नद्यादितीरेषु तथा निर्जनप्रदेशेषु दत्तेन श्राद्धादिना सर्वदा पितरस्तुष्यंति २०७

आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक् पृथक् उपस्पृष्टोदकान् सम्यग् विप्रांस्तानुपवेशयेत् २०८

आसनेष्विति तत्र च देशे आसनेषु पृथक् विन्यस्तेषु सकुशेषु प्राणाचमितान् ब्राह्मणान् सम्यक् कृतस्नानाचमनानुपवेशयेत् अत्र देवब्राह्मणासने कुशद्वयं पित्र्यासनेषु च प्रत्येकं दक्षिणाग्रमेकं कुशं देयं तदाह देवलः यथात्र विश्वेदेवानां विप्राः पूर्वं निमंत्रिताः प्राङ्मुखान्यासनान्येषां द्विदर्भोपहितानि च दक्षिणामुखयुक्तानि पितॄणामासनानि च दक्षिणाग्रैकदर्भाणि प्रोक्षितानि तिलोदकैः दक्षिणामुखयुक्तानि दक्षिणाग्राणि श्रंग्रं कुशमूलान्यपत्यान्यपि २०८

उपवेश्य तु तान् विप्रान् आसनेष्वजुगुप्सितान् गन्धमाल्यैः सुरभिभिरर्चयेद्दैवपूर्वकम् २०९ ॥ उपवेश्येति तान् विप्रान् निंदितानामसनानि अनिंदितेषु उपवेश्य कुंकुमादिगंधमाल्यधूपादिभिः सुरभीणीयथार्थैर्दैवपूर्वमर्चयेत् २०९

तेषामुदकमानीय सपवित्रांस्तिलानपि अग्नौ कुर्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह २१०

तेषामिति तेषां ब्राह्मणानामर्घोदकं पवित्रं तिलान्संमिश्रान् दत्वा तैर्ब्राह्मणैः सहानुज्ञातो अग्नौ वक्ष्यमाणं होमं कुर्यात् अनुज्ञा सामर्थ्यात् ग्रंथनाभिपूर्वकं कर्तव्या सा च स्वगृह्यानुसारेण करवाणि करिष्ये इत्यादिकानुज्ञा अपि श्रौतमिन्धनमग्नौ करणं क्रियतामिति वा २१० ॥

50A

अग्नेः सोमयमाभ्यां च कृत्वाप्यायनमादितः। हविर्दानेन विधिवत्पश्चात्संतर्पयेत्पितॄन्॥ २११

अग्नेरिति अग्निसोमयमयोश्च विधिवत्पर्युक्षणादिपूर्वं हविर्दानेन प्रीणनमादौ कृत्वा पश्चादन्नादिना पितॄंस्तर्पयेत् सोमयमयोर्द्वंद्वनिर्देशोपि
पृथगेव देवतात्वं स्वाहादिशब्दप्रयोगाभावात्। यत्र माहितं विवदितं तत्र स्वाहादिशब्दं करोतीत्युक्तं प्राक्॥ २११

अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्। यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते॥ २१२

अग्न्यभावे त्विति अग्न्यभावे पुनर्ब्राह्मणहस्त एवाहुतित्रयं दद्यात्। यस्माद्य एवाग्निः स एव ब्राह्मण इति वेदविद्भिर्ब्राह्मणैरुक्तं।
अग्न्यभावश्चानुपनीतस्य संभवति उपनीतस्य समावृत्तस्य च पाणिग्रहणात्पूर्वं मृतभार्यस्य वा॥ २१२

अक्रोधनान्सुप्रसादान्वदन्त्येतान्पुरातनान्। लोकस्याप्यायने युक्ताञ्छ्राद्धदेवान्द्विजोत्तमान्॥ २१३

अक्रोधेति क्रोधशून्यान्सुप्रसादान् प्रसन्नमुखान् प्रवाहनादितया पुरातनान् अग्निः शक्ता हुतिस्याप्यायेन लोकवृद्धये युक्तान् श्राद्धपात्र
भूतान् मन्वादयो वदन्ति तस्माद्देवतुल्यत्वात् छायब्राह्मणस्य तु हस्ते दातव्यमिति पूर्वविध्यनुवादः॥ २१३॥

अपसव्यमग्नौ कृत्वा सर्वमावृत्य विक्रमम्। अपसव्येन हस्तेन निर्वपेदुदकं भुवि॥ २१४॥

अपेति अग्नौ पर्युक्षणादिकं अग्नौकरणहोमानुष्ठानक्रमं अपसव्यं दक्षिणसंस्थं कृत्वा ततोपसव्येन दक्षिणहस्ते पिंडाधारभूतायां भु

त्रींस्तु तस्माद्धविःशेषात्पिंडान्कृत्वा समाहितः। औदकेनैव विधिना निर्वपेद्दक्षिणामुखः॥ भुदकं क्षिपेत् २१४

त्रीनिति तस्मादग्न्यादिहोमाद्भुक्तावशिष्टान्त्रीन्पिंडान्कृत्वा औदकेनैव विधिना दक्षिणहस्तेन समाहितोऽनन्यमना दक्षिणामुख
स्तेषु दर्भेषु निवपमाणान्नाह दर्भेषु दद्यात्॥ २१५

न्युप्य पिंडांस्ततस्तांस्तु प्रयतो विधिपूर्वकं। तेषु दर्भेषु तं हस्तं निमृज्याल्ले
पभागिनां॥ २१६

न्युप्येति विधिपूर्वकं स्वगृह्योक्तविधिना दर्भेषु तान् पिंडान्दत्वा दर्भमूलेषु करावघर्षणमिति विस्तरवचनात्।
तेषु दर्भेषु मूलदेशे हस्तं निर्लेपं कुर्वीत प्रपितामहपित्रादीनां त्रयाणां लेपभुजां तृप्तये॥ २१६॥

मा॰ वृ॰ टी॰ ५१

आचम्योदक् परावृत्य त्रिरायम्य शनैरसून् षड्ऋतूंश्च नमस्कुर्यात्पितॄनेव च मंत्रवित् २१७

आचम्येति उत्तरतामुपस्पृश्योदङ्मुखो भूत्वा यथाशक्ति प्राणायामत्रयं कृत्वा वसंताय नमस्तुभ्यमित्यादिना षड्ऋतून्नमस्कुर्यात् पितॄंश्च नमो वः पितर इत्यादिमंत्रमुक्तैरद्भिः पर्यावृत्येति पृष्ठदर्शनात् दक्षिणामुखो नमस्कुर्यात् २१७

उदकं निनयेच्छेषं शनैः पिंडांतिके पुनः अवजिघ्रेच्च तान्पिंडान्यथान्युप्तान्समाहितः २१८ उदकमिति पिंडदानात्पूर्वं पिंडाधारदेशदत्तोदकशेषमुदकपात्रस्थं प्रतिपिंडसमीपे तद्देशे क्रमेण पुनरुत्सृजेत्तांश्च पिंडान्यथान्युप्तानेव क्रमेणादत्तान् तेनैव क्रमेणावजिघ्रेत्समाहितोनन्यमनाः २१८

पिंडेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः तानेव विप्रानासीनान्विधिवत्पूर्वमाशयेत् २१९ पिंडेभ्य इति अल्पिकेति अत्राल्पमात्राश्रवणभागाः पिंडेभ्यस्तत्र ताननल्पभागान् पितृपिंडक्रमेणैव गृहीत्वा तानेव पित्रादिब्राह्मणान्भोजनकाले भोजनात्पूर्वं भोजयेत् विधिवदिति अनुष्ठानवत् पितरमुद्दिश्य यः पिंडो दत्तस्तदवयवं पितृब्राह्मणं भोजयेत्

ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् विप्रवद्वापि तं श्राद्धे स्वकं पितरमाशयेत् २२० एवं पितामहप्रपितामहपिंडयोरपि २१९

ध्रियमाण इति ध्रियमाणे जीवति पितरि मृतानां पितामहादित्रयाणां श्राद्धं कर्तव्यं अथवा पितृविप्रस्थाने तमेव स्वपितरं भोजयेत् पितामहप्रपितामहयोश्च ब्राह्मणौ भोजयेत् पिंडद्वयं च दद्यात् २२०

पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहं २२१

पितेति नामकीर्तनं मंत्रोपलक्षणार्थं पितुर्जीवनापवादायं वाशब्दः यस्य पुनः पिता मृतस्तस्य पितामहो जीवति स पितृप्रपितामहयोः श्राद्धं कुर्यात् गोविंदराजस्तु यस्य पितृप्रपितामहौ प्रेतौ स्यातां स पित्रे पिंडं निधाय पितामहात्परं द्वाभ्यां दद्यादिति विष्णुवचनात्प्रपितामहतत्पितृभ्याम् दद्यादिति व्याख्यातवान् २२१॥

पितामहो वा तच्छ्राद्धं भुंजीतेत्यब्रवीन्मनुः कामं वा समनुज्ञातः स्वयमेव समाचरेत् २२२

पितेति यथा जीवत्पिता भोज्यस्तथा पितामहोपि पितामहब्राह्मणस्थाने भोज्यः पितृप्रपितामहयोश्च ब्राह्मणभोजने पिंडदानं च कुर्यात् अथवा जीवता पितामहेन तेनैव यथारुचि अनुज्ञातो दत्तानुज्ञः स्वरुच्या पितामहं वा भोजयेत् पितृप्रपितामहयोर्वा श्राद्धद्वयं कुर्यादिति

विस्तुवचनात्पितृप्रपितामहवृद्धप्रपितामहानां श्राद्धत्रयं जपेदिति २२२ तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकं तत्पिण्डाग्रं प्रयच्छेत स्वधैषामस्त्विति ब्रुवन् २२३ ॥

तेषामिति पिंडेभ्यस्त्वल्पिकां मात्रामिति यदुक्तं तस्यायं काले विधिः तेषां ब्राह्मणानां हस्तेषु सदर्भं तिलोदकं दत्त्वा तत्पिंडाग्रं पित्रे स्वधास्त्वित्येवमादि ब्रुवन् पित्रादिब्राह्मणेभ्यस्तेभ्यः क्रमेण दद्यात् २२३

पाणिभ्यां तूपसंगृह्य स्वयमन्नस्य वर्धितं विप्रान्तिके पितॄन्ध्यायन् शनकैरुपनिक्षिपेत् २२४

पाणिभ्यामिति अन्नस्येति तृतीयार्थे षष्ठी वर्धितं पूर्णं स्थितं पात्रं स्वयं पाणिभ्यां गृहीत्वा पितॄंश्चिंतयन् स्वमहानसात् आनीय ब्राह्मणानां समीपे परिवेषणार्थं मन्दं स्थापयेत् २२४

उभयोर्हस्तयोर्मुक्तं यदन्नमुपनीयते तद्विप्रलुम्पन्त्यसुराः सहसा दुष्टचेतसः २२५

उभयोरिति अधिकरणे सप्तमी उभयोः करयोर्मुक्तमस्थितं यदन्नं ब्राह्मणान्तिकमानीयते तदसुरा दुष्टबुद्धय आच्छिन्दन्ति तस्मान्नैकहस्तेनानीय परिवेष्टव्यं २२५

गुणांश्च सूपशाकाद्यान्पयो दधि घृतं मधु विन्यसेत्प्रयतः सम्यक् भूमावेव समाहितः २२६

गुणानिति गुणानन्नं व्यञ्जनानि अन्नोपकरणाः प्रधान्यात् गुणभूतान् वा सूपशाकादीन् प्रयतः शुचिः समाहितः अनन्यमनाः सम्यग्यथा न विशीर्यन्ते तथा भूमावेव न पात्रस्थानस्थापयेत् न दारुफलकादौ २२६

भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च हृद्यानि चैव मांसानि पानानि सुरभीणि च २२७

भक्ष्यमिति भक्ष्यं खरविशदमभ्यवहरणीयं मोदकादि भोज्यं पायसादि नानाप्रकारं फलमूलानि हृद्यमनःप्रियाणि मांसानि सुगन्धीनि

उपनीय तु तत्सर्वं शनकैः सुसमाहितः परिवेषयेत प्रयतो गुणान्सर्वान्प्रचोदयन् २२८ ॥ भूमावेव विन्यसेदिति पूर्वेणान्वयः २२७

उपनीयेति एतत्सर्वं भक्ष्यादिकं ब्राह्मणसमीपमानीय प्रयतः शुचिरनन्यमनाः क्रमेण परिवेषयेत् इदं मधुरमिदमम्लमित्येवं माधुर्यादिगुणान् कथयन् २२८ नास्रमापातयेज्जातु न कुप्येन्नानृतं वदेत् न पादेन स्पृशेदन्नं न चैतदवधूनयेत्

म.वृ.
टी. 52
५२

नयेत् २२९ नास्रमिति अश्रुपातनं क्रोधं मृषाभाषणं च न कुर्यात् न पादेन चान्नं स्पृशेत् न चोत् क्षिप्योत्क्षिप्यान्नमात्रेऽहितं यतनपुरुषा
र्थं न यास्रपातितद्विश्वयोरपि क्रोधानृतयोः श्राद्धांगतत्तापनार्थो यमिति निषेधः २२९

अस्रं गमयति प्रेतान्कोपोरीनन्नृतं शुनः पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननं २३०

अस्रमिति अश्रु क्रियमाणं प्रेतान् भूतविशेषान् श्राद्धान्नानि प्रापयति न पितॄणामुपकारकं भवति क्रोधः शत्रून्मृषावादः कुक्कुरा
न्पादस्पर्शो रक्षांसि दुष्कृतान् अवधूननमपापकारिणः तस्मादेतदनादि कुर्यात् २३० ॥

यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः ब्रह्मोद्याश्च कथाः कुर्यात्पितॄणामेतदीप्सितम् २३१

यदिति यद्द्विजानामीप्सितं व्यञ्जनादि तत्तदमत्सरो दद्यात् परमात्मनिरूपणपराः कथाश्च कुर्यात् यतः पितॄणामेतदपेक्षि
तं २३१

स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि आख्यानानीतिहासांश्च पुराणानि खिलानि च २३२

स्वाध्यायमिति स्वाध्यायं वेदं मानवादीनि धर्मशास्त्राणि आख्यानानि सौपर्णमैत्रावरुणादीनि इतिहासान्महाभारतादीन्पुराणानि
ब्रह्मपुराणादीनि खिलानि श्रीसूक्तशिवसंकल्पादीनि श्राद्धे ब्राह्मणान् श्रावयेत् २३२

हर्षयेद्ब्राह्मणांस्तुष्टो भोजयेच्च शनैः शनैः अन्नाद्येनासकृच्चैतान् गुणैश्च परिचोदयेत् २३३

हर्षयेदिति स्वयं हृष्टः सन्प्रियवचनादिभिर्ब्राह्मणान्परितोषयेत् अत्वरया भोजयेत् मिष्टान्नेन पायसादिभिः पायसमिदं स्वादु
मोदकोयं इत्येवं गुणाभिधानेन पुनः पुनः ब्राह्मणान्प्रेरयेत् २३३

व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् कुतपं चासने दद्यात्तिलैश्च विकिरेन्महीम् २३४ ॥

व्रतेति ब्रह्मचारिणमपि दौहित्रं श्राद्धे प्रयत्नतो भोजयेत् अपिशब्दादब्रह्मचारिणमपि कुर्यात् कल्पिकमथ्यापदितस्यापि ब्रह्मचारिणो यत्नव
चनाच्छ्रेष्ठत्वं कथयति नेपालकंबलं चासने दद्यात् दौहित्रमंतरेणापि तिलांश्च श्राद्धे भूमौ विकिरेत् २३४

त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम् २३५

त्रीणीति पूर्वोक्तान्येव त्रीणि दौहित्रादीनि श्राद्धे पवित्राणीति ज्ञाप्यन्ते त्रीणि चात्र शौचादीनि प्रशंसन्ति २३५ ॥

अत्युष्णं सर्वमन्नं स्याद्भुञ्जीरंस्ते च वाग्यताः न च द्विजातयो ब्रूयुर्दात्रा पृष्टा हविर्गुणान् २३६

अत्युष्णमिति उष्णमेवान्नं स्यात् फलादेर्भोजनं मुखे तेन उष्णान्न्यतात् फलायपि अतएव शेषं उष्णमन्नं द्विजातिभ्यः श्रद्धया विनिवेदयेत् अन्नफलमूलेभ्यः पानकेभ्यश्च पाद्विजातः नियतवाचश्च ब्राह्मणा अश्नीयुः किमिदं स्वादु इमाऽद्वेति दात्रा आत्रादिगुणा न इष्टा वक्तव्यमिति येनापि ब्रूयुः वाक्यतस्तान्येव विधानात् २३६

यावदुष्णं भवत्यन्नं यावदश्नन्ति वाग्यताः पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः २३७ ॥

यावदिति यावदन्नं उष्णं भवति यावच्च मौनिनो भुञ्जते यावच्च हविर्गुणा नोच्यन्ते तावत् पितरोऽश्नन्तीति पूर्वोक्तस्यैवार्थस्य प्रशंसा २३७

यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते २३८

यदिति वस्त्रादिवेष्टितशिरा यदन्नं भुङ्क्ते तथा दक्षिणामुखः सपादकश्च तत् सर्वं रक्षांसि भुञ्जते न पितरस्तस्मादेवंरूपं न कर्तव्यं २३८

चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान् २३९

चाण्डाल इति चाण्डालग्रामसूकरकुक्कुटकुक्कुरादयो यथा ब्राह्मणान् भोजनकाले न पश्येयुस्तथा कार्यम् २३९

होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते दैवे कर्मणि पित्र्ये वा तद्गच्छत्ययथातथम् २४०

होम इति यस्मात् होमेऽग्निहोत्रादौ प्रदाने गोहिरण्यादौ भोज्ये साभ्युदयार्थं ब्राह्मणभोजने दैवे हविषि दर्शपौर्णमासादौ पित्र्ये श्राद्धादौ यदेभिर्वीक्ष्यते क्रियमाणं कर्म तत् यदर्थं क्रियते तन्न साधयति २४०

घ्राणेन शूकरो हन्ति पक्षवातेन कुक्कुटः श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः २४१

म.नु.
टी.
५३

घ्राणेनेति शूकरस्तद्घ्राणेनैव तत् श्राद्धकर्म निष्फलं करोति तस्मात्तद्घ्राणायोग्यदेशमसौ नीयमानीयः कुक्कुटः पक्षवातेन तेन सोऽपि पक्षवातयोग्यदेशादपगमनीयः श्वा दर्शनेन शूद्रोऽङ्गादिस्पर्शेन निषिद्धमपि दोषभूयस्त्वज्ञापनार्थं पुनरभिहितं अथवा दृष्टिनिपातेनेति श्राद्धकर्तृभोक्तृणां दृष्टिनिपातविषयत्वेन अवरवर्णः शूद्रस्तस्माज्जातोऽवरवर्णजः शूद्रपत्र स्पर्शेन द्विजाति श्राद्धं निष्फलयति नातीयं अवपक्वत्वात् २४१

षण्ढो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत्। हीनातिरिक्तगात्रो वा तमप्यपनयेत्ततः २४२ ॥

षण्ढो वेति यदि गतित्रिकालः काणो वा दातुर्दासः शूद्रस्तस्यैव प्रेष्यत्वविधानात् अपि शब्दात् अन्योऽपि शूद्रो न्यूनाधिकाङ्गः स्यात् दिवा स्थानदान तमपि ततः श्राद्धदेशादपसारयेत् २४२

ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम्। ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् २४३

ब्राह्मणेति ब्राह्मणमतिथिरूपं अन्यं वा भिक्षणशीलं भोजनार्थं तत्कालोपस्थितं श्राद्धपात्रब्राह्मणैरनुज्ञातो यथाशक्त्यन्नभोजनेन भिक्षादानेन वा पूजयेत् २४३

सार्ववर्णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा। समुत्सृजेद्भुक्तवतामग्रतो विकिरन्भुवि २४४

सर्वेति वर्णशब्दः प्रकारवाची सर्वप्रकारमन्नादिकं व्यञ्जनादिभिरेकीकृत्य उदकेन प्लावयित्वा कृतभोजनानां ब्राह्मणानां पुरतो भूमौ दर्भेषु विकिरं स्वयं परित्यजेत् स्मरणात् दर्भोपरि निक्षिपन् त्यजेत् २४४

असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्। उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः २४५ ॥

असंस्कृतेति नास्य कार्योऽग्निसंस्कार इति निषेधात् संस्कारानर्हबालानां तथा कुलस्त्रीणां अदुष्टदोषाणां त्यक्तानां तेषां पात्रस्थमुच्छिष्टं दर्भेषु यो विकिरः स भागः स्यात् असंस्कृतत्यागिनामिति गुर्वादित्यागिनां कुलयोषितामिति स्यात् गोविन्दराजस्तु त्यागिनां कुलयोषितामिति सामान्याभिधानेऽपि प्रकमाद् विशेषाभिधानं संस्कृतेष्वपि तत्ततः संकुलं भक्ष्यागतानां कुलस्त्रीणामित्याह २४५

उच्छेषणं भूमिगतमजिह्मस्याशठस्य च। दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते २४६

उच्छेषणमिति उच्छिष्टं यद्भूमिगतं तद्दासवर्गस्यावक्रस्यानलसस्याकुटिलस्य पित्र्ये श्राद्धकर्मणि भागधेयं मन्वादयो वदन्ति २४६

53A

असपिंडक्रियाकर्म द्विजातेः संस्थितस्य तु अदैवं भोजयेच्छ्राद्धं पिंडमेकं तु निर्वपेत् २४१ असपिंडेति मर्यादायां नाभि
विधौ सपिंडीकरणश्राद्धपर्यंतमचिरमृतस्य द्विजातेर्वैश्वदेवब्राह्मणभोजनं ... एकं च पिंडं दद्यात् अयमेव श्राद्धस्यानुष्ठाने एकोद्दिष्टे दैवही
नमेकार्घ्यैकपवित्रकं आवाहनाग्नौकरणरहितं ह्यपसव्यवदिति याज्ञवल्क्यादिस्मृतिषु वर्णितव्यम् २४१

सहपिंडक्रियायां तु कृतायामस्य धर्मतः अनयैवावृता कार्यं पिंडनिर्वपणं सुतैः २४८
सहपिंडेति यस्य एकोद्दिष्टं विहितं तस्य धर्मतः स्वगृह्यादिविधिना सपिंडीकरणश्राद्धे कृते अनयैवावृता अमावास्याविहितेन विधिना
कर्तव्यतया पिंडनिर्वापणम् पार्वणविधिना श्राद्धं पुत्रैः सर्वत्र मृताहादौ कर्तव्यं ननु अनयैवावृता इत्यनेन प्रकृतमेकोद्दिष्टमेव हि किमिति
न परामृश्यते उच्यते तद्धि सपिंडीकरणात्पूर्वमेकोद्दिष्टं सपिंडीकरणे कृते पुनः अनयैवावृता इति भेदनिर्देशो यस्मात् ... तिक
तव्यमेव प्रतीयते २४८

श्राद्धं भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति स मूढो नरकं याति कालसूत्रमवाक्शिराः २४९
श्राद्धमिति श्राद्धं भुक्त्वा य उच्छिष्टं दानप्रसक्तावयं निषेधः श्राद्धभोजनोच्छिष्टं यः शूद्राय ददाति स मूर्खः कालसूत्रनामनरकमधो
मुखो गच्छति २४९

श्राद्धभुग्वृषलीतल्पं तदहर्योऽधिगच्छति तस्याः पुरीषे तन्मासं पितरस्तस्य शेरते २५०
श्राद्धेति वृषलीशब्दोऽत्र स्त्रीपरः तथाहुः निरुक्तं च वृषं वर्तित वृषस्यंती चपलयति भर्तारमिति वृषली ब्राह्मणस्य परिणीता ब्राह्मण्यपि वृष
लीति श्राद्धं भुक्त्वा तदहो यस्त्रिया स्त्रीसंयोगं करोति तस्य पितरस्तस्याः पुरीषे मासं शेरत इति निकृष्टयोनिदा २५० ॥

पृष्ट्वा स्वदितमित्येवं तृप्तानाचामयेत्ततः आचांतांश्चानुजानीयादभितो रम्यतामिति २५१ ॥
पृष्ट्वेति तृप्तान्ब्राह्मणान् स्वदितमिति पृष्ट्वा तेषामाचमनं कारयेत् कृताचमनाञ्श्च भो इति संबोध्य अभिरम्यतामिति ब्रूयात् अभि
तो इति पादे अभिरम्यतां स्वगृहे वा
स्वधास्त्वित्येव तं ब्रूयुर्ब्राह्मणास्तदनंतरं स्वधाकारः पराशीः सर्वेषु पितृकर्मसु २५२ गृहे दासनामिच्छन्ति २५१
स्वधेति अनुज्ञानंतरं ब्राह्मणाः श्राद्धकर्तारं स्वधास्त्विति ब्रूयुः यस्मात्सर्वेषु श्राद्धतर्पणादिपितृकर्मसु स्वधाशब्दोच्चारणं प्रकृष्टाशीः २५२

ततो भुक्तवतां तेषामन्नशेषं निवेदयेत् यथा ब्रूयुस्तथा कुर्यादनुज्ञातस्ततो द्विजैः २५३ ॥
तत इति सर्वेषां शेषाचारणानन्तरं कृतभोजनानां ब्राह्मणानां शेषमन्नमस्तीत्येव विसृष्टमन्नं निवेदयेत् ते ब्राह्मणा यदिदमनेनान्नशेषेण विनि
पित्र्ये स्वदितमित्येव वाच्यं गोष्ठेषु सुशृतं सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि २५४ योगं कुर्या २५३
इदानीं श्राद्धे गावाच्छ्राद्धान्तरेषु विशेषविधिमाह पित्र्य इति पित्र्ये निरपेक्षपितृमातृदेवताके एकोद्दिष्टश्राद्धे तृप्तिप्रश्नार्थं स्वदितमि
ति वाच्यं तथा च गोभिलः आश्वलायनोऽपि स्वदितमिति तृप्तिप्रश्नः मेधातिथिगोविन्दराजौ तु श्राद्धकालागतेनान्येन पित्र्ये स्वदितमित्ये
व कर्तव्यमिति तृप्तिप्रश्नः मेधातिथिगोविन्दराजौ तु श्राद्धकालागतेनान्येन पित्र्ये स्वदितमित्येतद्वाच्यमन्येन केनचित् नाम
कृतमिदं विहितं हृदयं शृङ्खलीमहि गोष्ठे गोष्ठीश्राद्धे सुशृतमिति वाच्यं गोष्ठ्यां शुद्ध्यर्थमष्टमनिर्दिष्टा दशविधश्राद्धगणनायां गो
ष्ठीश्राद्धमपि विश्वामित्रेणापठितम् अभ्युदये वृद्धिश्राद्धे सम्पन्नमिति वाच्यं दैवे देवतोद्देशेन श्राद्धे रुचितमिति वचनीयं दैवश्राद्धे
भविष्यपुराणोक्तं देवानुद्दिश्य यच्छ्राद्धं तत्तु दैविकमुच्यते हविष्येन विशिष्टेन सप्तम्यादिषु यत्नतः २५४
अपराह्णस्तथा दर्भा वास्तुसम्पादनं तिलाः सृष्टिर्मृष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्मसु सम्पदः २५५
अपराह्ण इति अमावास्याश्राद्धस्य प्रकृतत्वात् तद्विषयोऽयमपराह्णकालः प्रातर्वृद्धिनिमित्तमित्यादिना वृद्धिश्राद्धादौ अन्य
त्रेवेप्रातः कालादिविधानात् विष्टरार्थं दर्भाः गोमयादिना श्राद्धदेशसंशोधनं तिलाश्च विकिरणाय यथोक्तं सृष्टिः अकार्प
ण्येनान्नादिविसर्गः मृष्टिरन्नादेः संस्कारविशेषः पङ्क्तिपावनाद्यश्च ब्राह्मणाः एताः श्राद्धे सम्पत्तयः तदभिधानाद्गुणत्वं च पदं
दर्भाः पवित्रं पूर्वाह्णो हविष्याणि च सर्वशः पवित्रं यच्च पूर्वोक्तं विज्ञेया हव्यसम्पदः २५६ प्रकृष्टतमसम्पादि
दर्भा इति पवित्रं मन्त्राः पूर्वाह्णः कालः हविष्याणि मुन्यन्नादीनि सर्वाणि यच्च पवित्रं पावनं वास्तुसम्पावनादि पूर्वमुक्तं एताश्च
२५५
मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतं अक्षारलवणं चैव प्रकृत्या हविरुच्यते २५७ देवार्थस्य कर्मणः सम्पदः
हव्यशब्दो देवकर्मोपलक्ष
मुन्यन्नानीति मुनेर्वानप्रस्थस्यान्नानि नीवारादीनि पयः क्षीरं सोमलतारसः अनुपस्कृतमविकृतं पूतिगन्धादिरहितं मांसं णार्थः २५६

54A

मं श्वेताल्लवणात्कृत्रिमलवणं सैन्धवादि प्रकृत्या स्वभावतो हविर्मन्वादिभिरभिधीयते २५७

विसृज्य ब्राह्मणांस्तांस्तु नियतो वाग्यतः शुचिः दक्षिणां दिशमाकांक्षन्याचेतेमान्वरान्पितॄन् २५८

विसृज्येति तान्ब्राह्मणान्विसृज्य अनन्यमनाः मौनी पवित्रो दक्षिणां दिशं वीक्षमाणः एतान्वक्ष्यमाणान् अभिलषितान्वरान्पितॄन्प्रार्थये
त २५८

दातारो नोऽभिवर्द्धन्तां वेदाः संततिरेव च श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्त्विति २५९

दातार इति अस्मत्कुले दातारः पुरुषा वर्द्धन्तां वेदाश्चाध्ययनाध्यापनतदर्थबोधनतदर्थयागाद्यनुष्ठानैर्वृद्धिमाप्नुवन्तु पुत्रपौत्रादिकं च वर्द्धं
तां श्रद्धा चास्मत्कुले न व्यपैतु दानयोग्यं च धनादिकं बहु भवतु २५९

एवं निर्वपणं कृत्वा पिंडांस्तांस्तदनन्तरं गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत् २६०

एवमिति एवमुक्तप्रकारेण पिंडनिर्वपणं कृत्वा प्रकृतवरयाचनानन्तरं तान्पिंडान् गां ब्राह्मणं छागं वा भोजयेत् अग्नौ जले वा क्षिपे
त् २६०

पिंडनिर्वपणं केचित्पुरस्तादेव कुर्वते वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनलेऽप्सु वा २६१ ॥

पिंडेति पिंडप्रदानं केचिदाचार्या ब्राह्मणभोजनानन्तरं कुर्वते अन्ये पक्षिभिः पिंडान्खादयन्ति इयं च पश्चाद्भोजनरूपेति पतिरस्फुटकप्र
तपयोर्वैकल्पिकीति दर्शयितुमुक्तयोरप्यभिधानम् २६१

पतिव्रता धर्मपत्नी पितृपूजनतत्परा मध्यमं तु ततः पिंडमद्यात्सम्यक्सुतार्थिनी २६२

पतिव्रतेति धर्मार्थकामेषु मनोवाक्कायकर्मभिः पतिरेव मया परिचरणीय इति व्रतं यस्याः सा पतिव्रता धर्मपत्नी सवर्णा प्रथमोढा ।
श्राद्धक्रियायां श्रद्धाशालिनी पुत्रार्थिनी तेषां पिंडानां मध्यमं पितामहपिंडं भक्षयेत् आधत्त पितरो गर्भमित्यादिसूत्रोक्तमंत्रेण २६२

आयुष्मन्तं सुतं सूते यशोमेधासमन्वितं धनवन्तं प्रजावन्तं सात्त्विकं धार्मिकं तथा २६३

आयुष्मन्तमिति तेन पिंडभक्षणेन दीर्घायुषं कीर्तिधारणात्मकबुद्धियुक्तं धनपुत्रादिसंततिधर्मानुष्ठानसत्त्वाख्यगुणान्वितं पुत्रं जनयति २६३

प्रक्षाल्य हस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत् ज्ञातिभ्यः सत्कृतं दत्वा बान्धवानपि भोजयेत् २६४

प्रक्षाल्येति तदनु हस्तौ प्रक्षाल्य ज्ञातिप्रायमन्नं कुर्यात् ज्ञातीन्प्रेति गच्छतीति ज्ञातिप्रायं कर्मणः पारणात् ज्ञातीन्भोजयेदित्यर्थः तेभ्यः पूजापूर्वकमन्नं दत्वा मातृपक्षानपि बान्धवान्भोजयेत् २६४

उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः २६५

उच्छेषणमिति तद्ब्राह्मणोच्छिष्टं तावत्काले तिष्ठेत् यावद्ब्राह्मणानां विसर्जनं ब्राह्मणेषु तु निर्गतेषु मार्हव्यमित्यर्थः ततः संपन्ने श्राद्धे गृहे वैश्वदेवबलिहोमकर्माणि भिक्षाद्यातिथिभोजनानि कर्तव्यानि बलिशब्दस्य प्रदर्शनार्थत्वात् अत एव मत्स्यपुराणे निर्वर्त्य प्रणिपत्याथ पर्युक्ष्याग्निं ज्ञमन्त्रवित् वैश्वदेवं प्रकुर्वीत नैत्यकं विधिमेव चेति २६५

हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते पितृभ्यो विधिवद्दत्तं तत्प्रवक्ष्याम्यशेषतः २६६

यच्चानेति हविर्यच्चिरक मपि च यदानन्त्याय वृद्धिर्यस्याप्यस्य प्रतिपत्तये पुनर्वचनम् यतः प्रतिजानीते हविरिति चिररात्रायपदमत्र चिरकालवाचि अत एव चिररात्राय चिरस्थायि चिरार्थकाः शब्दा आभिधानिकाः यच्च हविः पितृभ्यो यथाविधि दत्तं चिरकालतृप्तये अनन्तं तृप्तये च संपद्यते तदशेषेणाभिधास्यामि २६६

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा दत्तेन मासं प्रीयन्ते विधिवत्पितरो नृणां २६७

तिलैरिति तिलधान्ययवमाषजलमूलफलानामन्यतमेन यथाशास्त्रं श्राद्धे दत्तेन मनुष्याणां मासं पितरस्तृप्यन्ति कृष्णा माषास्तिलाश्चैव श्रेष्ठाः सर्वेषु शालयः इति वायुपुराणवचनात् माषा इति कृष्णा माषा बोद्धव्याः २६७

द्वौ मासौ मत्स्यमांसेन त्रीन्मासान्हारिणेन तु औरभ्रेणाथ चतुरः शाकुनेनाथ पंच वै २६८

द्वाविति पाठीनादिमत्स्यानां मांसेन द्वौ मासौ पितरः प्रीयन्त इति सर्वत्र संबन्धः त्रीन्मासान्हारिणेन मांसेन चतुरो मेषमांसेन पंच द्विजातिभक्ष्य। दिमांसेन २६८

षण्मासांश्छागमांसेन पार्षतेन च सप्त वै अष्टावेणस्य मांसेन रौरवेण नवैव तु २६९

षण्मासानिति षण्मासांश्छागमांसेन प्रीयन्ते पृषतश्चित्रमृगस्तन्मांसेन सप्त एणमांसेनाष्टौ रुरुमांसेन नव एणरुरू हरिणजातिविशेषौ २६९

दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः शशकूर्मयोस्तु मांसेन मासानेकादशैव तु २७०

55-A

दशेति दशमासान् वराहमहिषमांसेन तृप्यन्ति एकादशमासान् शशकच्छपमांसेन २७०

संवत्सरं तु गव्येन पयसा पायसेन च वार्द्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी २७१

संवत्सरमिति वर्षं पुनर्गो भवतीत्येषा तन्माप्रितो दद्देन च तद्गव्येन तत्रैव पायसेन शास्त्रप्रसिद्धेन तृप्तिर्भवति वार्द्ध्रीणसस्तु निगमे व्याख्यातः त्रिपिबं। इन्द्रियक्षीणं श्वेतं वृद्धमजापतिं वार्द्ध्रीणसं तं तु याज्ञिकाः पितृकर्मणि नयादोपयः पिबतो यस्य वीणि जलं स्पृशंति कर्णौ जिह्वा च त्रिभिः पिबतीति त्रिपिबः २७१ वार्द्ध्रीणसस्य मांसेन द्वादशवर्षपर्यंतं पितृः

कालशाकं महाशल्काः खड्गलोहामिषं मधु आनंत्यायैव कल्प्यंते मुन्यन्नानि च सर्वशः २७२

कालेति कालशाकाख्यं शाकं महाशल्का इति मत्स्यविशेषा इति ... मत्स्यविशेषा इति वचनात् खड्गो गंडकः लोहो लोहितवर्णः छागः ... छागेन सर्वलोहेनानंत्यमिति पैठीनसिवचनात् ... आमिषं मांसं मधु माक्षिकं मुन्यन्नानि नीवारादीनि आरण्यकानि सर्वाणि पत्रमूलानि तृप्तये संपद्यंते २७२

यत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीं तदप्यक्षयमेव स्याद्वर्षासु च मघासु च २७३

यदिति मघासु त्रयोदश्यां ... यत्किंचिदितिप्रसिद्धं मधुसंयुक्तं वर्षाकाले मघायां त्रयोदश्यां दीयते तदप्यक्षयतृप्तये भवति त्रयोदश्याश्च प्रकरणे ... अल्पीयसी च मघा हस्तो द्वितीया २७३

अपि नः स कुले जायाद्यो नो दद्यात्त्रयोदशीं पायसं मधुसर्पिर्भ्यां प्राक्छाये कुंजरस्य च २७४

अपीति वर्षासु मघायुक्तत्रयोदशी पूर्वोक्ता विवक्षिता तत्रापि ... मघायुक्तां त्रयोदशीं ... हि कर्तव्यं मधुना पायसेन चेति ... वचनात् कृष्णत्रयोदशी पूर्वं ... पितरः किलैवमाशासते अपि नाम तथाविधः कश्चिदस्माकं कुले भूयात् यो ... त्रयोदश्यां तत्र ... पूर्वादिदिग्गतायां मधुसर्पिर्भ्यां युक्तं पायसं ... हस्तिच्छाययोः समुच्चयः यथाह विष्णुः अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः प्रावृट्काले सिते पक्षे त्रयोदश्यां समाहिताः मधूत्कटेन यः श्राद्धं पायसेन समाचरेत् कार्तिकं सकलं वापि प्राक्छाये कुंजरस्य च २७४

यद्यद्ददाति विधिवत्सम्यक्श्रद्धासमन्वितः तत्तत्पितॄणां भवति परत्रानंतमक्षयं २७५

यदिति यद्यद्ददातीति वीप्सया सर्वमन्नमप्रतिषिद्धं यथाशास्त्रं सम्यक् श्रद्धायुक्तः पितृभ्यो ददाति तदनंतं सर्वकालमक्षयमनश्वरं परलोके पितॄणां तृप्तये भवति अतस्तत्फलार्थिना श्रद्धया देयमिति विधीयते २७५ ॥

म.नु.
टी.
५६

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीं श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः २७६

कृष्णेति कृष्णपक्षे दशमीमारभ्य चतुर्दशीं त्यक्त्वा श्राद्धे यथा तिथयः श्रेष्ठा महाफला न तथैतदन्याः प्रतिपदादयः २७६

युक्षु कुर्वन्दिनर्क्षेषु सर्वान्कामान्समश्नुते अयुक्षु तु पितॄन्सर्वान्प्रजां प्राप्नोति पुष्कलां २७७

युक्ष्विति दिनशब्दोऽत्र तिथिपरः युक्षु युग्मासु तिथिषु द्वितीयाचतुर्थ्यादिषु युग्मेषु नक्षत्रेषु भरणीरोहिण्यादिषु श्राद्धं कुर्वन्सर्वानभिलषितान् प्राप्नोति अयुग्मासु तिथिषु प्रतिपत्तृतीयाप्रभृतिषु अयुग्मेषु च नक्षत्रेषु अश्विनीकृत्तिकादिषु श्राद्धेन पितॄन्पूजयन्विद्यादिसंततिलक्षणां पुष्कलां प्रजां धनविद्यादिपरिपुष्टां २७७

यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते २७८

यथेति चैत्रसितादया मासा इति ज्योतिःशास्त्रविधानात् शुक्लपक्षोपक्रमत्वान्मासानामपरः पक्षः कृष्णपक्षः स यथा शुक्लपक्षात् श्राद्धे श्रेष्ठफलदो भवति एवं पूर्वाह्णाद्दिवसः प्रकृष्टफलो विशिष्यत इति वचनात्पूर्वाह्णे पि श्राद्धकर्तव्यतां न्याय्यं भवति न तु शुक्लपक्षवाद कृष्णपक्षस्यापरपक्षत्वं कथं दृष्टान्तत्वप्रसिद्धो हि दृष्टान्तो भवति उच्यते कृष्णपक्षे दशम्यादावित्यत्रैव विशिष्टविधावुत्कर्षाभिधानात् २७८

प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना २७९

प्राचीनेति दक्षिणांसे गृहीतयज्ञोपवीतेनानलसेन दर्भहस्तेन अपसव्येन पितृतीर्थेन यथाशास्त्रं सर्वं पितृसंबन्धि कर्म आनिधनादासमाप्तेः कर्तव्यं आनिधनाद्यावज्जीवमिति मेधातिथिगोविन्दराजौ २७९

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते २८०

रात्राविति रात्रौ श्राद्धं न कर्तव्यं यस्माच्छ्राद्धविनाशनगुणायोगात् राक्षसी मन्वादिभिरसौ कथिता संध्ययोश्च न कुर्यात् आदित्ये चाचिरोदिते त्वादित्यकालश्चापेतायां त्रिमुहूर्तः प्रातःकालोऽत्र स्मृतः यथोक्तं विष्णुपुराणे रेखाप्रभृत्यथादित्ये त्रिमुहूर्तं गते रवेः प्रातस्तनः स्मृतः कालो भागः सोऽह्नः स पञ्चमः अपराह्णस्य श्राद्धाङ्गतया विधानात् कथमयमप्रसक्तप्रतिषेध इति चेन्नायं प्रतिषेधः स हि राग प्राप्तस्य वा स्यात् विधिप्राप्तस्य वा नाद्यः नात्र रागतो नित्यस्य निषेधः षोडशिग्रहणाग्रहणवत् विकल्पः स्यात् स्नानस्य पुंदासोः येनाद्यपि पूर्वाह्णे तत्कालेऽश्राद्धं कुर्यात् अनुयाजेन यजतिषु येयजामह इति मन्त्रवत् अपराह्णविधिश्च प्राशस्त्यार्थः अतएवोक्तं यथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यत इति २८०

56A

अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञिकमन्वहम् २८१

अनेनेति अमावास्यायां मासिकमिति प्रतिमासं श्राद्धं विहितं तदसंभवे विधिरयं चतुर्भिर्मासैरर्कस्तेनैकः संवत्सरेण त्रीन् परपक्षः अस्तिः व्याख्यते अनेनोक्तविधानेन संवत्सरमध्ये त्रीन् वारान् हेमन्तग्रीष्मवर्षासु श्राद्धं कर्तव्यं न च समस्यावाशक्तौ भवेत् पञ्चयज्ञान्तर्गतं पञ्चमहायज्ञान्तर्गतं पितृयज्ञं प्रत्यहं कुर्यादिति पूर्वोक्तानुवादार्थं २८१

न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः २८२

नपैत्रिति अग्नेः सोमाय यमाय वेत्यनेन विहितपितृयज्ञाङ्गभूतो होमो न लौकिके श्रौतस्मार्तव्यतिरिक्ताग्नौ विधीयते तस्माल्लौकिकाग्नौ अग्नौकरणहोमः कर्तव्यः निरग्निना तत्राग्न्यभावे विप्रस्य पाणावित्यभिधानात् विप्रपाणौ होमः करणीयः आहिताग्नेर्द्विजन्मनः अमावास्याव्यतिरेकेण कृष्णपक्षे दशम्यादौ श्राद्धं विधीयते मृताहश्राद्धं तु नियतत्वात्कृष्णपक्षेऽपि तिथ्यन्तरेण निषिध्यते २८२

यदेव तर्पयत्यद्भिः पितॄन्स्नात्वा द्विजोत्तमः तेनैव कृत्स्नमाप्नोति पितृयज्ञक्रियाफलम् २८३

यदेवेति पार्वणश्राद्धं संभवे विधिरयं यत्स्नानानन्तरमुदकतर्पणं द्विजः करोति तेनैव समस्तं नित्यश्राद्धफलं प्राप्नोति द्विजोत्तमपदं द्विजपरं २८३

वसून्वदन्ति तु पितॄन्रुद्रांश्चैव पितामहान् प्रपितामहांस्तथादित्यान् श्रुतिरेषा सनातनी २८४

वसूनिति यस्मादियं श्रुतिर्वसवः पितर इति यथाऽनादिभूता श्रुतिरस्ति अतः पितॄन्वसुरूपान्देवान्पितामहान्रुद्ररूपान्प्रपितामहानादित्यरूपानादद्यो वसवादिरूपेण ध्यायेदिति विधिकल्पते अत एव पैठीनसिः यथा वसुरुद्रादित्यरूपान्पितॄनेव समर्चयेत् वसुरुद्रादित्यास्तु पितरः श्राद्धदेवताः इति मेधातिथिगोविन्दराजौ तु पितॄन्देवतारूपत्वेन पितृकर्मणि प्रवर्तेरन्निति प्रशंसार्थं देवतानां ध्यानोपयोगि पितृणामस्तीति वचनम् २८४ ॥

विघसाशी भवेन्नित्यं नित्यं वामृतभोजनः विघसो भुक्तशेषं तु यज्ञशेषं तथामृतम् २८५

विघसाशीति सर्वदा विघसभोजनः स्यात् सर्वदा वामृतभोजनो भवेत् विघसामृतपदयोरप्रसिद्धत्वादर्थं व्याकरोति विप्रादिभुक्तशेषं विघस उच्यते दर्शपौर्णमासादियज्ञशिष्टं पुरोडाशाद्यमृतं सामान्याभिधानेऽपि प्रकृतत्वात् श्राद्धे विप्रभुक्तशेषभोजनार्थोऽयं विधिः अत एव भुञ्जीतातिथिसंयुक्तः सर्वं पितृनिषेवितमिति स्मृत्यन्तरे श्रुतिप्राद्यादिविशेषभोजनतत्त्वव्याख्यानमनुष्ठानविशेषानन्तर प्रकरणिकं च २८५ ॥

म.कु. टी. ५७

एतद्वोऽभिहितं सर्वं विधानं पाञ्चयज्ञिकं द्विजातिमुख्यवृत्तीनां विधानं श्रूयतामिति २८६ इति मानवे धर्म
शास्त्रे भृगुप्रोक्तायां संहितायां तृतीयोऽध्यायः ३॥

एतदिति इदं पंचयज्ञभवमनुष्ठानं सर्वं युष्माकमुक्तं पार्वणश्राद्धमपि दिवेशपि पंचयज्ञैकरूपं महायज्ञत्वेषामभ्यर्हितत्वज्ञापनार्थः मंगलार्थं इति तिसृभ्यः थाति
स्थिगोविंदाज्ञो इदानीं द्विजानां मुख्योपलक्षणत्वस्य वृत्तीनां ऋतादीनामनुष्ठानं श्रूयतामिति वक्ष्यमाणाध्यायैकदेशोपन्यासः २८६ इति वारे
न्द्रवासीयभट्टदिवाकरात्मजश्रीकुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यां मनुवृत्तौ तृतीयोऽध्यायः ३

चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः द्वितीयमायुषो भागं कृतदारो गृहे वसेत् १

ब्राह्मणकर्तव्यानंतरं वृत्तीनां लक्षणं चैवेति वृत्तिषु वक्तव्यासु इति ज्ञानाम् वृत्त्यधीनत्वात् गार्हस्थ्यस्यानंतरं वक्तव्यास्तद्ब्रह्मचर्यपूर्वकमेव गार्ह
स्थ्यं इत्येव वक्ष्यमाणवृत्तय इति दर्शयितुं ब्रह्मचर्यकाले गार्हस्थ्यकालं च वदति चतुर्थमिति चतुर्थमायुषो भागमनुक्तं ब्रह्मचर्यकालोप
लक्षणार्थं श्रुतिपरिमाणात् आयुषश्चतुर्थभागसदृशत्वात् न च यत्तायुर्वै पुरुष इति श्रुतेः पंचविंशतिवर्षपरत्वं षट्त्रिंशदाब्दिकं च
र्यमित्यादिविरोधात् आश्रमसमुच्चयपक्षमाश्रितो ब्राह्मणोऽकृतब्रह्मचर्यकालं जन्मापेक्षयाद्यं यथाशक्ति गुरुकुले स्थित्वा द्वितीयमायु
षश्चतुर्थभागं कृतदारो गृहस्थाश्रमानुतिष्ठेत् गृहस्थस्य यदा पंचपत्यतियतत्वात् द्वितीयमायुषो भागमित्यपि गार्हस्थ्यकालमेव १

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि २

अद्रोहेणेति परस्य पीडया जीविकया विना दिद्रोहः इषत्पीडया विना दिरल्पद्रोहः नत्वहिंसैव द्रोहः तस्याः निषिद्धत्वात् अद्रोहेण तदसंभवे
अल्पद्रोहेण वा या वृत्तिर्जीवनोपायः तदाश्रयेण भार्यादिभृत्यसंचयनानुष्ठानयुक्तो ब्राह्मणोऽनापदि जीवेत् आपदि तु अग्रे
विधिं वक्ष्यति अयं च सामान्योपदेशो याजनाध्यापनविशुद्धप्रतिग्रहादिसंग्रहार्थः वक्ष्यमाणऋतादिविशेषमात्रनिष्ठत्वेन उक्तावितन
स्वरवहासिरनधिकारापत्तेः याजनादेर्वृत्तिप्रकरणान्निवेशाश्रवणात् तयापि जीवेत् २॥

यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः अक्लेशेन शरीरस्य कुर्वीत धनसंचयं ३

यात्रेति यात्रा प्राणस्थितिः शास्त्रीयकुटुंबभरणनित्यकर्मानुष्ठानपूर्वकशरीरस्थितिमात्रार्थं स्वस्ववर्णतया शास्त्रविहितानन्यरूपैः कर्मभिः ऋ
तादिवक्ष्यमाणैः कायक्लेशं विनाऽर्थसंग्रहं कुर्वीत ३॥

ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ४

उंछत्व श्वातेष्टाङ्गुलीभ्यां कणानां
ग्रहणं उञ्छः कणिश इत्यमरः

57A कैः कर्मभिरित्यत आह ऋतामृताभ्यामिति वक्ष्यमाणाभ्यामुक्ताभ्यामापदि जीवेत् सेवया न तु कदाचिद्वर्तेत श्वसदृशत्वाद्दासीवृत्तेः

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ५ वाचके ५

ऋतमुञ्छशिलमिति सर्वापि तस्यानेक प्रसिद्धावाते च धान्यप्रतिग्रहणावकाशे प्रयुज्यते यथा यो विधिरेतेन तत्रैकैकस्याङ्गुलीभ्यां एकैकं कणं समुच्चीय
तेति बौधायनदर्शनात् एकैकयाङ्गुल्यादिगुडकोच्चयनमुञ्छः मञ्जर्यात्मकानेकधान्योच्चयनं शिलः उञ्छश्च शिलश्चेत्येकवद्भावः तत्सत्यसमानफ
लत्वादृतमित्युच्यते अयाचितोपस्थितममृतमिव सर्वहेतुत्वादमृतं प्रार्थितप्राप्तं भैक्षं तत्प्रतिग्रहासत्कारस्ये मरणसमपीडाजनकत्वान्मृतं एतच्च स्नातकाग्र
गृहस्थस्य भैक्षमपकृतं दलादिरूपं न तु सिद्धान्नरूपं ग्रासीप्रपकेन भाग्ये होमाभावात् कर्षणं च भूमिगतप्राणिमरणनिमित्तत्वात् बहुदुःख
सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ६ फलकेषु केषुणसत्यमिव
सत्यानृतमिति विशेषेण सत्यानृतव्यवहारसाध्यत्वात्सत्यानृतं वाणिज्यं न तु वाणिज्ये सर्वाणि सत्यानृतानि भवन्तीति तेन चैवापि जीव्यते इति विशेषेण मृतेष्व
वाणिज्यमृतमपि स्यान्न कुसीदमपि गृह्यते पूर्वश्लोकोक्ता कृषिरिति नश्लोके च वाणिज्यकुसीदे च नायं होमवृत्तेः सायकृतानेन निवेदकवा
निवयाद्यापीतम् कृषिवाणिज्ये सर्वत्रोक्ते कुसीदं च सेवातदीनष्टिरित्यदर्शनमामितजेन नीचक्रियादिधर्मयोगात् श्ववृत्तिरतः
श्ववृत्तिरुक्ता तस्मात्तां श्ववृत्तिं परिवर्जयेत् ६ कुसूलधान्यको वा स्यात्कुम्भीधान्यक एव वा त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा
कुसूलधान्यक इति कुसूलो व्रीह्यागारं स्यादिष्टकादिनिर्मितागारधान्यसंचयो भवेत् तत्र कालविशेषापेक्षायांस देवा ७
त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये अधिकं वापि विद्येत स सोमं पातुमर्हतीति मनूक्तपर्यवकालोपग्राह्यः तेन निसर्गमितिकथं मांकुसपाद्य वर्षमहि
तस्य गृहिणो यावता धान्यादिपरेन तद्वर्षत्रयसमर्थिकं वा निर्वाहो भवति तावद्धा कुसूलधान्यक उच्यते वर्षनिर्वाहोचितधान्यादियुतः कुम्भीधान्यः
ग्राहकोमिक्यीः क्रियाः कुर्यात् यस्मात्त्रैमासिकं मेवेदिति यत्तु वर्षेण गृहस्थस्य त्रैवार्षिकसंचयाभ्यनुज्ञानात् मेधातिथिस्तु वानप्रस्थस्य सा
मान्यतय वत्सरेण तत्समासंचयवत्याति तदपेक्षया बहुपोष्यवर्गस्य गृहिणाः समुचितः संवत्सरसंचयः मेधातिथिस्तु यावतायास्याच्छ्रयेनेन
बहुभृत्यदारादिमतः त्रिसंवत्सरास्थितिर्भवति तावद्धान्यादियवव्रीहिपि कुसूलधान्यस्तस्य धान्यस्य कुम्भी उष्ट्रिकाषाण्मासिकधान्यादिविषयः कु
म्भीधान्यकत्वस्य तस्याद्वेषे उष्ट्रिकाप्रमाणधान्यादिसंचयो वा षड्हमात्रपर्याप्तयतः द्वादशाहे कुशूलेन हृतिः कुम्भ्यादिनाति षड्हमासम
त्या गोविन्दराजोक्तिनानुरूपस्त्र्यहैहिकेन त्र्यहपर्याप्तमेहिकयत्नयत्नसमर्थं त्र्यहैहिकः तथा वा स्यात् दिनत्रयनिर्वाहोचितधनमा
सर्वः सोमवन्त्यमेन्ते भक्तेन रसास्तीति सर्वधीयमिकं कृत्वानेन समाप्तः तथा वा भवेत् ७ ॥

वर्षपनिवाहोचितधान्यादियुक्
कुम्भीधान्यः कथ्यते
त्र्यहैहिको नाम दिनत्रयनिर्वाहो
चितधनं तदर्थं
तथा दिनैकभोजनयोग्यधन
संचयः श्वस्तनिकः

धान्यादिधनेन वर्ष
त्रयसमर्थिवर्जितेन
भवति तावद्वा कुश
लधान्य उच्यते

तस्या म न.४ अ=७

म. नु. टी. ५८

चतुर्णामपि चैतेषां द्विजानां गृहमेधिनां ज्यायान्परः परो ज्ञेयो धर्मतो लोकजित्तमः ८॥ चतुर्णामपीति एषां च चतु-
र्णामपि कुसूलधान्यकादीनां गृहस्थानां ब्राह्मणानां मध्ये यो यः शेषपठितः स श्रेष्ठो ज्ञातव्यः यतोऽसौ वृत्तिसंकोचाद्धर्मेण स्वर्गादिलोकजित्तम इति
षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ९॥ षट्कर्मेति एषां गृहस्था-
नां मध्ये कश्चिद्गृहस्थो यो बहुपोष्यवर्गः स पूर्वोक्तैः ऋतायाचितभैक्ष्यकृषिवाणिज्यैः पञ्चभिस्तेनैवमनेनैव वाशब्दसूचितेन कुसीदेन सह षड्भिः क-
र्मभिः षट्कर्मा भवति षड्भिर्जीवति कृषिवाणिज्यकुसीदानामस्वयंकृतानां विगर्हितत्वाभावात् अन्यः पुनस्ततोऽल्पपरिकरः त्रि-
भिर्याजनाध्यापनप्रतिग्रहैर्द्रोहेणान्यतन् लोकसंगृहीतः प्रवर्तते प्रशस्तः नथ(?)कोऽवर्तत इसथः अपरः पुनः प्रतिग्रहः प्रत्यवरः इति वक्ष्यमा-
णात्वात् तत्परित्यागेन द्वाभ्यां याजनाध्यापनाभ्यां प्रवर्तते उक्तत्रयापेक्षया चतुर्थः पुनर्ब्रह्मसत्रेणाध्यापनेन जीवति यानि षिस्तरेषाम्
कुसूलधान्यकादीनां मध्यादेकः कुसूलधान्यकः पूर्वोक्तैरुञ्छशिलायाचितकृषिवाणिज्यैः षट्कर्मा भवति षड्भिर्जीवति अन्यो द्विती-
यः कुम्भीधान्यकः कृषिवाणिज्ययोर्निवृत्तस्त्रिभिर्वर्तेत एकस्त्र्यहैहिको याचितलाभम् विहायोञ्छशिलायाचितानां मध्यादिच्छया द्वा-
भ्यां वर्तेत चतुर्थः पुनरश्वस्तनिको ब्रह्मसत्रेण जीवति ब्रह्मसत्रं शिलोञ्छवृत्तिरमनवाहूतिः ब्रह्मणो ब्राह्मणस्य सततमवर्तनात् सत्रमिव सत्र-
वर्तयंस्तु शिलोञ्छाभ्यामग्निहोत्रपरायणः इष्टीः पार्वायणान्तीयाः केवला निर्वपेत्सदा १०॥ मित्याह ९
वर्तयंस्त्विति शिलोञ्छाभ्यां जीवन् यत्साध्यकर्मासु तदनुष्ठानासामर्थ्यात् अग्निहोत्रनिष्ठ एव स्यात् पार्वायणान्तीयाश्चेष्टीः केवला प्रतिष्ठेत
पर्वाविश्रयनेव पर्वयेत् तयोरन्तस्तु च भवादर्शपौर्णमासाग्रयणात्मिकाः १०॥ न लोकवृत्तं वर्तेत वृत्तिहेतोः कथञ्चन अजिह्मामशठां
शुद्धां जीवेद्ब्राह्मणजीविकाम् ११॥ न लोकवृत्तमिति लोकावृत्तमसत्प्रियाख्यानेर्विचित्रपरिहासकथादिकं जीविकार्थं न कुर्यात्
अजिह्मामनृताभिमुग्धाभिधानादिपापरहितां अशठां दम्भादित्यागात् शुद्धां वैश्यादिवृत्तेरसंकीर्णां ब्राह्मणजीविकामनुतिष्ठेत् अव-
कार्थनात् तां अनुष्ठानार्थीयजीवतीति निमकमना ११ सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् सन्तोषमूलं हि सुखं
दुःखमूलं विपर्ययः १२॥ सन्तोषमिति यथासंभवभूतात्मत्राणात् याज्ञादिवक्ष्यमाणकर्मानुष्ठानमात्रेण चिन्तयतः धनार्जनाद्विरतो
तोषः न मतिशयतं साल्वे व्यवहारायनार्जने संयमं कुर्यात् यतः सन्तोषहेतुकमिह सुखं परत्र चाविहितविहितानुष्ठानात् स्वर्गादिसुखं विपर्य-
यस्तु असन्तोषो दुःखमूलं बहुधनार्जनप्रयासेन प्रचुरदुःखोदयात् असन्तोषो विपर्ययेऽकेशात् १२ ॥

८

58A

अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः स्वर्गायुष्ययशस्यानि व्रतानीमानि धारयेत् १३ ॥

अतोन्यतमयेति प्रवृद्धकुटुम्बस्यैकवृत्त्या निर्वाहसंभवे समस्तमन्यतमयेति विधीयते बहुकुटुम्बस्य तु संभवे षट्कर्मैको भवत्येषामिति विहितत्वात् प्र
थवा एकवाक्यतावगमात् अतनिविधायकत्वात् अथवा एकवाक्यतावगमात् अनिविधायकत्वाद्वा समस्तमन्यतमयाकृतेसमस्तवृत्तेरेकतमादेकतमस्य विवर्तिते
उक्ता वृत्तीनामन्यतमया वृत्त्या जीवन् स्नातको ब्राह्मणादिर्मानि वक्ष्यमाणानि यथा संभवं स्वर्गायुर्यशो हितानि व्रतानि कुर्यात् इदं मया कर्तव्यमि

वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिं १४ देनकर्तव्यमिममेवोक्तः संकल्पविशेषो
वेदोदितमिति वेदोक्तं स्मार्तमपि वेदमूलत्वाद्वेदोक्तमेव स्वकं स्वाश्रमोक्तं यावज्जीवमतन्द्रितोऽनलसः कुर्यात् हि हेतौ यस्मात्तत्कुर्वन्यथासामर्थ्यं व्रतं १३
परमां गतिं मोक्षलक्षणां प्राप्नोति नित्यकर्मानुष्ठानात् पापक्षये सति निष्कामतः करोति ब्रह्मसाक्षात्कारात् मोक्षः तदुक्तं मानवधर्मे ज्ञानस्य
मयते पुंसां क्षयात् पापस्य कर्मणः तत्रादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि यथात्मनि यतः करोति १४॥ नेहेतार्थान्प्रसङ्गेन न विरुद्धेन

नेहेतार्थान्प्रसङ्गेन न विरुद्धेन कर्मणा न विद्यमानेष्वर्थेषु नार्त्यामपि यतस्ततः १५॥ नेहेतार्थानिति प्रसज्यते यत्र पुरुषः सप्रसङ्गो गीतवादित्रादिः तेन ना
र्थानर्जयेत् नापि शास्त्रनिषिद्धेन कर्मणा अयाज्ययाजनादिना न च विद्यमानेषु धनेषु न चाप्यविद्यमानेष्वपि प्रकारान्तरसंभवे यतस्ततः पतिता

इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः अतिप्रसक्तिं चैतेषां मनसा संनिवर्तयेत् १६ ॥ दिष्ट्यापि १५
इन्द्रियार्थेष्विति इन्द्रियाणामर्थाः रूपरसगन्धस्पर्शादयः तेषु निषिद्धेष्वपि स्वदारगमनादिषु न प्रसज्येत तानि प्रसक्ति संभवत्वेसेवनात्मिकां कुर्यात्
कामतः इच्छया तथा प्रतिप्रसक्तिनिवृत्त्युपायमाह अतिप्रसक्तिं चैतेषामिति विषयाणामस्थिरत्वस्वर्गापवर्गात्मकश्रेयो विरोधित्वादिभावनया मनसा

सर्वान्परित्यजेदर्थान्स्वाध्यायस्य विरोधिनः यथा तथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता १७ सम्यक् निवर्तयेत् १६
सर्वानिति वेदाभ्यासविरोधिनः अर्थान्प्रसक्तिसरस्वहोपनाकुलित्वकथादयः तान्सर्वान्परित्यजेत् कथं तर्हि कुटुम्बस्य पोषणमित्याशङ्क्या
ह यथा तथा केनाप्युपायेन स्वाध्यायाविरोधिना कुटुम्बं पोषयन् यस्मादस्य स्नातकस्य कृतकृत्यता यदिदं स्वाध्यायपरता १७ ॥

वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च वेषवाग्बुद्धिसारूप्यमाचरन्विचरेदिह १८ वयसइति वयसः क्रियाया धनस्य
तस्य कुलस्य चानुरूपेण वेषवाग्बुद्धिराचरन्नलोके प्रवर्तेत यथा यौवने स्वग्गन्धलेपनादि यथा मंगलवेषानुसारी भाषा गम्भीरा सर्वकर्मादिरर्थश्रये

बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान् १९ ॥

म. वृ. टी. ५४ 59

बुद्धेर्वृद्धिकराणि शीघ्रं बुद्धिवृद्धिजनकानि व्याकरणमीमांसास्मृतिपुराणन्यायादीनि शास्त्राणि धन्यानि धनाय हितानि अर्थशास्त्रा
णि तथा धर्म्याणि धर्माय हितानि औशनसादीनि तथा हितानि दृष्टोपकारकाणि वैदिकान् ज्योतिषादीनि तथा पर्यायकथनेन वेदार्थावबोधकानि गृ... ॥१९॥

यथा यथा हि पुरुषः शास्त्रं समधिगच्छति तथा तथा विजानाति विज्ञानं चास्य रोचते ॥२०॥

यथा यथेति यस्माद्यथा यथा पुरुषः शास्त्रं सम्यगभ्यस्यति तथा तथा विशेषेण जानाति शास्त्रान्तरविषयमपि चास्य विज्ञानं रोचते उज्ज्वलं भवति दीप्यते
ना बुद्धेरभिलाषात्मनाभावात् अध्ययनाभ्यासादिति न संशयः ॥२०॥ ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा नृयज्ञं पितृ
यज्ञं च यथाशक्ति न हापयेत् ॥२१॥ ऋषियज्ञमिति स्वाध्यायादीन् पञ्चयज्ञान् यथाशक्ति न त्यजेत् तृतीयाध्यायविहितानामपि
पञ्चयज्ञानामिह निर्देशः स्नातकव्रतविशेषविध्यर्थः स्नातकव्रतबोधनार्थश्च ॥२१॥ एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः अ
नीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥२२॥ एतानेक इत्येके गृहस्था बाह्ययज्ञानुष्ठानशास्त्रज्ञाः पञ्च महायज्ञान् बा
ह्ययज्ञान् ... बहिश्चेष्टमानाः पञ्चसु बुद्धीन्द्रियेषु पञ्चरूपज्ञानादिसंयमरूपेण सम्पादयन्ति यज्ञानाहो मनसानुपपन्नेषु अपाद
नार्थोऽयं श्लोकः ॥२२॥
वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयाम् ॥२३॥
वाच्येक इत्येके गृहस्था ब्रह्मविदो वाचि प्राणे वा यज्ञनिर्वृत्तिमक्षयफलां जानन्तः सततं वाचि प्राणं जुह्वति वाचं च प्राणे भाषमाणा न वाचि
प्राणं जुहोमीति अभाषमाणा तूष्णीं सन्तः प्राणे वाचं जुहोमीति ध्यायन्तः ... यथा कौषीतकि रहस्य ब्राह्मणे यावद्वै पुरुषो भाष
ते न तावत्प्राणितुं शक्नोति प्राणं तदा वाचि जुहोति यावद्वै पुरुषः प्राणिति न तावद्भाषितुं शक्नोति वाचं तदा प्राणे जुहोति एते अनन्ते अमृते आहु
ती जाग्रच्च स्वपंश्च सततं जुहोति अथ या अन्या आहुतयः अन्तवत्यस्ताः कर्ममय्यो हि भवन्ति एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवाञ्चक्रु
रिति ॥२३॥
ज्ञानेनैवापरे विप्रा यजन्त्येतैर्मखैः सदा ज्ञानमूलां क्रियामेषां पश्यन्तो ज्ञानचक्षुषा ॥२४॥
ज्ञानेनैवेति अपरे विप्रा ब्रह्मनिष्ठाः सर्वदा ब्रह्मज्ञानेनैव एतैर्मखैर्यजन्ति एतान् यज्ञाननुतिष्ठन्ति कथमेतदित्याह ज्ञानेन ब्रह्म सत्यं ज्ञानमनन्त
मित्यादिश्रुतिप्रसिद्धं ज्ञानमूलामेषां यज्ञानां क्रियामुत्पत्तिं जानन्तः ज्ञायतेऽनेनेति ज्ञानं वेदाख्यं चक्षुः ज्ञानचक्षुषा उपनिषदा ... अ
ध्यात्मिकानि ब्रह्मात्मकान्यध्यायन्तः ... ज्ञानस्य यज्ञफलं सम्पूर्णं ...
क ... ब्रह्मनिष्ठानां वेदसंन्यासिनां गृहस्थानामयं विधिः ॥२४॥ अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि

59-A

मासेनैवहि २५ ॥

अग्निहोत्रमिति द्युनिशोः उदितपर्यायः उदितहोमपक्षे दिनस्यादौ निशायाश्चादौ अनुदितहोमपक्षे दिनस्यान्ते निशायाश्चान्ते यद्वा उदितहोमप
क्षे दिनस्यादौ दिने नैव अनुदितहोमपक्षे निशादौ निशान्ते च अग्निहोत्रं कुर्यात् कृष्णपक्षान्ते कार्ये दर्शमासेन दर्शयागेन कर्मणा शुक्लपक्षा
न्तकार्ये पौर्णमासेन याजेन यजेत २५ सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजोऽध्वरैः पशुना त्वयनस्यादौ समान्ते सौ
मिकैर्मखैः २६ सस्यान्त इति पूर्वार्जितधान्यादिशेषे समाप्ते शारदिकवानामिति कारवचनात् अप्रसमाप्तेऽपि पूर्वशस्येन शस्यान्ते आ
ग्रयणेन यजेत शस्यस्य सस्यानियतत्वात् यतिनामवह्निहोत्रयज्ञो विनियतयागसंभवाच्च शस्यान्त ग्रहणाच्च नवशस्यासंभवे वाभिन्नेवा निप
तत्वात् सत्याः अन्यथा निमित्तत्वान्न तेः ऋतुः संवत्सरः समतन्त्रताश्चयणे नवमास्यात्रमामास्तत्र तदन्तेः अध्वरैश्चातुर्मास्यैर्यागैर्यजेत अयन
योः उत्तरदक्षिणयोरादौ पशुनायजेत पशुबन्धाख्ययागमनुतिष्ठेत सोमतिप्रासैर्वसन्ते शुक्लप्रतिपदादिवर्षणानात् शिशिरणसमासे वर्षे वसन्ते
नानिष्ट्वा नवशस्येष्ट्या पशुना चाग्निमान्द्विजः नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः सौमिकैः समान्ते अग्निष्टोमादियागैर्यजेत २६
नानिष्ट्वेति आहिताग्निर्दीर्घमायुर्जीवितुमिच्छन् आग्रयणमकृत्वा नवान्नं नभक्षयेत् नवपशुयागमकृत्वा मांसमश्नीयात् २७ ॥
नवेनानर्चिता ह्यस्य पशुहव्येन चाग्नयः प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्धिनः २८ ॥
नवेनेति यस्मादेवंकथयन्ति मन्नाममन्त्रा आहु यस्मान्नवहव्येन पशुहव्यदानेन वानर्चिता अकृतयागास्यग्नयो नवान्नमांसाभिलाषिणः स्याहिताग्ने
प्राणानेवात्तुमिच्छन्ति गर्धः अभिलाषातिशयः गृध्ये वर्जनं मस्य रूपमेतः स्यात् तीति गर्धी मनर्थायर्दनः २८ ॥
आसनाशनशय्याभिरद्भिर्मूलफलेन वा नास्य कश्चिद्वसेद्गेहे शक्तितोऽनर्चितोऽतिथिः २९ ॥
आसनेन शनेन शय्यया वाक्यामनभोजनार्थैर्भिरनर्चितोः तिथिरस्य गृहस्थस्य गृहे न वसेत अतन शक्तितो अतिथिपूजयेदित्यक्रमपि अप्रायमनूद्यते २९ ॥
पाषंडिनो विकर्मस्थान्वैडालव्रतिकाञ्छठान् हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ३० ॥
पाषंडिन इति पाषंडिनो वेदबाह्यव्रतलिंगधारिणः शाक्यभिक्षुपणकादयः विकर्मस्थाः प्रतिषिद्धवृत्तिजीविनः वैडालव्रतिकः वकवृत्तीव
लक्षणावलक्षणाः शठाः वेदेष्वश्रद्दधानाः हैतुकाः वेदविरोधिमत्तर्कव्यवहारिणः एतानतिथिकालोपस्थितान् वाङ्मात्रेणापि न पूजयेत् ।
पूजारहितं अन्नदानमात्रं तु शक्तितोः पश्मात्रेणवत्तानमेव ३० ॥

वेदस्नातकः व्रतस्नातक उभयस्नातक स्तेऽपि गृह्यन्ते

म.नु.
टी.
८
60

वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः। पूजयेद्धव्यकव्येन विपरीतांश्च वर्जयेत् ३१ ॥

वेदविद्येति वेदविद्याव्रतस्नातानिति विद्यास्नातकव्रतस्नातकोभयस्नातकास्त्रयोऽपि गृह्यन्ते यथाह हारीतः यः समाप्य वेदमसमाप्य व्रतानि समावर्तते स विद्यास्नातकः यः समाप्य व्रतानि समावर्तते स विद्यास्नातकः असमाप्य वेदं समावर्तते स व्रतस्नातकः उभयं समाप्य यः समावर्तते स विद्याव्रतस्नातकः यद्यपि स्नातकप्रकरणे नैव स्नातकमात्रग्रहणं सिद्धं तथापि श्रोत्रियत्वविवक्षया तान् स्नातकान् श्रोत्रियान् हव्यकव्येन पूजयेत् विपरीतांश्च वर्जयेत् ३१ ॥

शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना। संविभागश्च भूतेभ्यः कर्तव्योऽनुपरोधतः ३२ ॥

शक्तित इति अपचमाना ब्रह्मचारिपरिव्राजकाः पाषण्डादयः ब्रह्मचारिपरिव्राजकानामुक्तमपि अन्नदानमपचमानार्थत्वात् तथा तिथ्यर्थं स्नातक व्रततार्थं च पुनरुच्यते मेधातिथिगोविन्दराजौ तु भिक्षां च पुनरुच्यते मेधातिथिगोविन्दराजौ तु भिक्षां च भिक्षवे दद्यादिति विधिः ब्रह्मचारिणां इति ब्रह्मचारिपरिव्राजकयोरुक्तत्वात् पाषण्डादिविषयमेवास्य इत्याहतुः स्वकुटुम्बानुपरोधेन तृणादिपर्यन्तं प्राणिभ्योऽपि जलादिनापि संविभागः कर्तव्यः ३२ ॥

राजतो धनमन्विच्छेत् संसीदन् स्नातकः क्षुधा। याज्यान्तेवासिनोर्वापि न त्वन्यत इति स्थितिः ३३ ॥

राजत इति राज्ञः प्रतिग्रहणीयाद्राजन्यप्रसक्तिरिति विषयात् राजशब्दोऽत्र क्षत्रियनृपतिपरः स्नातकः क्षुधा अवसीदन् द्विजातिप्रतिग्रहसम्भवेऽपि यथाशास्त्रवर्तिनः क्षत्रियाद्याज्यान्तेवासिशिष्याभ्यां वा प्रथमं धनमभिलषेत् राज्ञो महाधनत्वेनापीडाविरहात् याज्यशिष्ययोश्च कृतोपकारत्वाच्च स्वप्रकाशत्वव्यवहारात् तदसंभवे तु तस्मादपि द्विजादेर्न मा ददीत तदभावे तु सर्वतः प्रतिगृह्णीयादिति आपद्यसत्यपि एव ज्ञानायादि प्रथमं क्षत्रियनृपयाज्यशिष्येभ्यः प्रतिग्रहनियमार्थं वचनं अतएवाह न त्वन्यत इति स्थितिः शास्त्रमर्यादा न च संसीदन्निति सन्निधानादापद्विषयत्वमस्य वाक्यस्य अभिधानादनापत्करणान् संसीदन्निति समर्थं नोपात्तं यथा नाभावमात्रापन्न किन्तु तस्मिन्नपि विहितोपायासंभवात् अन्यथा असंयतः अक्षालितकायायापद्वृत्तिः स्यात् यदि अपद्विषयत्वमस्य भवेत् तदा तनसतन् इत्यनेन सर्वतः प्रतिगृह्णीयादिति विरुद्धं न यत्र यस्य करणे सीदद्भिः कुप्यमिच्छद्भिर्धनं वा पृथिवीपतिः याच्यः स्यादित्युक्तं तन्मूलत्वं नृपतिविषयं एव राजादिप्रतिग्रहसंभव ३३

न सीदेत् स्नातको विप्रः क्षुधा शक्तः कथंचन। न जीर्णमलवद्वासा भवेच्च विभवे सति ३४ ॥

न सीदेदिति विद्यादियोग्यत्वात् शक्तोऽपि स्नातको ब्राह्मणो राजादिप्रतिग्रहलाभे सति न क्षुधावसन्नो भवेत् तनवधनेन संभवति जीर्णमलिनेन च वाससा विभवे सति ३४

क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः। स्वाध्याये चैव युक्तः स्यान्नित्यमात्महितेषु च ३५ ॥

कॢप्तकेशेति कल्पनं छेदनं तेन लूनकेशनखश्मश्रुः दान्तस्तपःक्लेशसहः शुक्लवासा बाह्याभ्यंतरशौचवान् स्वाध्याये वेदाभ्यासे युक्तः प्रायश्चित्तयोगादिनात्महि तेषु स्यात् ३५

वैणवीं धारयेद्यष्टिं सोदकं च कमंडलुं यज्ञोपवीतं वेदं च शुभे रौक्मे च कुंडले ३६ ॥

वैणवीमिति वेणुमयीं यष्टिमुदकसहितं च कमंडलुं यज्ञोपवीतं कुशमुष्टिं शोभने च सौवर्णे कुंडले धारयेत् ३६ ॥

नेक्षेतोद्यंतमादित्यं नास्तं यांतं कदाचन नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ३७ ॥

नेक्षेतेत्युद्यंतमस्तमयनं यंतं च सूर्यं विंबमसूर्यं च नेक्षेत उपसृष्टं ग्रहोपरक्तं राहुग्रस्तं वारिस्थं च वारिस्थं जलप्रतिबिंबितं मध्यंदिनसमये ३

न लंघयेद्वत्सतंत्रीं न प्रधावेच्च वर्षति न चोदके निरीक्षेत स्वरूपमिति धारणा ३८ ॥

न लंघयेदिति वत्सबंधनरज्जुं न लंघयेत् वर्षति मेघे च प्रधावेत् न च स्वदेहप्रतिबिंबं जले निरीक्षेत इति शास्त्रनिश्चयः ३८ ॥

मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम् प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन् ३९ ॥

मृदमिति प्रस्थितः सन् मृदं उद्धृतमृत्तिकां गां ब्राह्मणं दैवं घृतं मधु चतुष्पथं महाप्रमाणान् ज्ञातान् वनस्पतीन् दक्षिणहस्तमार्गेण कुर्या त् प्रदक्षिणानीति नपुंसकमनपुंसकेनेकवच्चास्यान्यतरस्यामिति नपुंसकत्वम् ३९ ॥

नोपगच्छेत्प्रमत्तोऽपि स्त्रियमार्तवदर्शने समानशयने चैव न शयीत तया सह ४० ॥

नोपगच्छेदिति प्रमत्तः कामार्तोऽपि रजोदर्शने निषिद्धस्पर्शदिनत्रये स्त्रियं नोपगच्छेत् सर्वनिषेधे नैवतासामायाश्चतस्र इति निषेधसिद्धो प्रायश्चि त्तगौरवार्थं स्नानकत्वेनास्योपदेशः नवा गच्छेदपि तया सहैकशय्यायां स्वप्यात् ४० ॥

रजसाभिप्लुतां नारीं नरस्य ह्युपगच्छतः प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रहीयते ४१ ॥

रजसाभिप्लुतामिति यस्माद्रजस्वलां स्त्रियं पुरुषस्योपगच्छतः प्रज्ञावीर्यं बलं चक्षुरायूंषि नश्यंति नश्यंतीति तस्मात्तां नोपगच्छेत् ४१ ॥

तां विवर्जयतस्तस्य रजसा समभिप्लुताम् प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रवर्धते ४२ ॥

म.नु.
टी.
६१

नामिति गोत्रजस्त्रीला भगच्छेत् तस्य च नाद्यो वर्द्धते तस्मात्तां नोपेयात् ४२ ॥ नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीं क्षु
वतीं जृम्भमाणां वा न चासीनां यथासुखं ४३ ॥ नाश्नीयादिति भार्यया सहैकपात्रे नाश्नीयात् एनां च भुंजानां नेक्षेत तथा क्षुवतीं जृम्भमाणां यथास्व
रं निविष्टां प्रदेशावस्थितां च नेक्षेत ४३ ॥ नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृतां न पश्येत्प्रसवन्तीं च तेजस्कामो द्विजोत्तमः
नाञ्जयन्तीमिति तथा स्वनेत्रयोरञ्जनं कुर्वतीं तैलाद्यभ्यक्तां चानावृतां स्तनावरणरहितां नग्नां न पश्येत् न चापत्यं प्रसुवानां तेजस्कामो द्विजोत्तमः
नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत् न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ४५ ॥ वक्ष्यमाणानां प्रथमं त्वशक्तौ ना स्नानं निषेधयति ४५
नान्नमद्यादिति एकवस्त्रो नान्नं भुंजीत उपस्थाच्छादनवासोरहितो न स्नायात् मूत्रग्रहणमथः कायमलोपलक्षणार्थं तेन मूत्रपुरीषवर्जनं भस्मनि गोष्ठे च
न फालकृष्टे न जले न चित्यां न च पर्वते न जीर्णदेवायतने न वल्मीके कदाचन ४६ ॥ न कुर्यात् ४४
न फालकृष्ट इति यथा फालकृष्टे तथा चोदके यज्ञार्थेष्टकाचये पर्वते च जीर्णदेवागारे कृमिकृतमृत्तिकाचये च विण्मूत्रोत्सर्गं न कदाचन कुर्यात् ४६
न ससत्त्वेषु गर्त्तेषु न गच्छन्नपि च स्थितः न नदीतीरमासाद्य न च पर्वतमस्तके ४७ ॥
न ससत्त्वेष्विति तथा न ससत्त्वेषु बिलेषु न व्रजन् न चावस्थितो न नदीतटमाश्रित्य नापि पर्वतशृङ्गे मूत्रपुरीषे कुर्यात् पर्वते निषेधादेव तच्छृङ्गे निषेधे सि
द्धे पुनः पर्वतशृङ्गनिषेधस्तदितरपर्वते विकल्पार्थः तत्रेच्छाविकल्पार्थः तत्रेच्छाविकल्पस्यायोगात् निषेधादेव व्यवस्थितविकल्पः प्रायेणाश्र
वाय्वग्निविप्रमादित्यमपः पश्यंस्तथैव गाः न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनं ४८ विकल्पः प्रथमनाशे सपर्वतेन दोषाभ्यसनदोषः
वाय्वग्निविप्रमिति वायुमग्निं ब्राह्मणं सूर्यं जलं गाश्च पश्यन् कदापि मूत्रपुरीषोत्सर्गं कुर्यात् वायोरनुपेतस्य दर्शनासम्भवेऽपि तदभिमुखतादि निषेधो
तिरस्कृत्योच्चरेत्काष्ठलोष्ठपत्रतृणादिना नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः ४९ ॥ ये ४८
तिरस्कृत्योच्चरेदिति अन्तर्धाय काष्ठादिना भूमिं यज्ञानर्हैः पत्रादिभिर्गोमयादिभिर्वा तिरस्कृत्य मूत्रपुरीषोत्सर्गं कुर्यात् यज्ञे न तृणादिना नरात्तदन्येन वा
मुन्मयभाजनेनापि यज्ञतृणादिना वक्ष्यमाणविधिवचनात् शुष्काणि काष्ठपत्रतृणानि ज्ञेयानि ४९ ॥ ६१

मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः। दक्षिणाभिमुखो रात्रौ संध्ययोश्च यथा दिवा ॥ ५० ॥

मूत्रोच्चारसमुत्सर्गमिति मूत्रपुरीषोत्सर्गं समर्थनं संध्ययाश्चोदङ्मुखः अभिमुखो रात्रौ च दक्षिणामुखः कुर्यात् यज्ञोपवीतं च कर्णस्थं कुर्यात्। यथाह यमः। उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः। रात्रौ दक्षिणतश्चैव तथा चास्य न हीयते इति। आचारे तु अन्यथा स्मृतिर्नास्तीत्यर्थः ॥

छायायामन्धकारे वा रात्रावहनि वा द्विजः। यथासुखमुखः कुर्यात्प्राणबाधभयेषु च ॥ ५१ ॥

छायायामिति रात्रौ छायायामन्धकारे वा अहनि च यदा दिशो न ज्ञायन्ते तदा यथासुखमुखः कुर्यात्। तथा चौरव्याघ्रादिकृतप्राणविनाशभयेषु ॥

प्रत्यग्निं प्रतिसूर्यं च प्रतिसोमोदकद्विजान्। प्रति गां प्रति वातं च प्रज्ञा नश्यति मेहतः ॥ ५२ ॥

प्रत्यग्निमिति वायुअग्निप्रभृतीनभिमुखं मेहतो मूत्रयतः प्रज्ञा नश्यति। एषु च मूत्रपुरीषे न कुर्यात् ॥

सर्वाभिमुखमूत्रपुरीषे कुर्वतः प्रज्ञा नश्यति तस्मादेतत् कर्तव्यं प्रति वातमिति समस्तानेव प्रतिषेधमभिसंधाय वदति ॥ ५२ ॥

नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम्। नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् ॥ ५३ ॥

नाग्निमिति नाग्निं मुखेन धमेत् किं तर्हि व्यजनादिना। नग्नां स्त्रियं नेक्षेत मैथुनादन्यत्रेति मेधातिथिः। अमेध्यं मूत्रपुरीषादिकं नाग्नौ क्षिपेत्। न च पादौ प्रतापयेत्। प्रत्यक्षमग्नौ पादौ प्रतापयेत् इत्युक्ते प्रकारान्तरेण प्रतापने न दोषः ॥ ५३ ॥

अधस्तान्नोपदध्याच्च न चैनमभिलङ्घयेत्। न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेत् ॥ ५४ ॥

अधस्तादिति खट्वादिधः अग्निं नोपदध्यात्। न चाग्निं लङ्घयेत्। न चैनं पादतः कुर्यात्। न च प्राणपीडाकरं कर्म कुर्यात् ॥

नाश्नीयात्संधिवेलायां न गच्छेन्नापि संविशेत्। न चैव प्रलिखेद्भूमिं नात्मनोऽपहरेत्स्रजम् ॥ ५५ ॥

नाश्नीयादिति संध्याकाले भोजनं ग्रामान्तरगमनं निद्रां च न कुर्यात्। न च रेखादिना भूमिं प्रलिखेत्। न च मालां स्वयमेवापनयेत् ॥ ५५ ॥

नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत्। अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ॥ ५६ ॥

नाप्सु मूत्रमिति मूत्रपुरीषश्लेष्माणं मूत्राद्यमेध्यलिप्तं वस्त्रादि अन्यद्वा रुधिरं विषाणि च कृत्रिमाकृत्रिमभेदभिन्नानि न जले क्षिपेत् ॥ ५६ ॥

नैकः सुप्याच्छून्यगेहे श्रेयांसं न प्रबोधयेत्। नोदक्ययाभिभाषेत यज्ञं गच्छेन्न चावृतः ॥ ५७ ॥

श्री

मनु टी॰ 62

नैकइति उत्सन्नगृहवासगोहेनैकःशयीत विजनविषयादिभिरपि केवलमेनप्रबोधयेत् रजस्वलांसंभाषणंनकुर्यात् यज्ञंचाकृतवरणोऽन्यकृतत्विक
नगच्छेत्दर्शनार्थंचकुशापि गच्छेत् दर्शनार्थंकाममितिगौतमवचनात् ५७ ॥

अग्न्यगारेगवांगोष्ठेब्राह्मणानांचसन्निधौ स्वाध्यायेभोजनेचैवदक्षिणंपाणिमुद्धरेत् ५८

अग्न्यगारइति अग्निगृहेगवांनिवासेब्राह्मणानांवहूनांसमीपे स्वाध्यायभोजनकालयोश्चदक्षिणंपाणिमुत्तरीयाद्वहिःकुर्यात् ५८

नवारयेद्गांधयंतींनचाचक्षीतकस्यचित् नदिवींद्रायुधंदृष्ट्वाकस्यचिद्दर्शयेद्बुधः ५९ ॥ नवारयेदिति गांवत्संक्षीरंवा
पिबंतींननिवारयेत्दोहनार्थंवारणादन्यत्र निषेधः नापिपरकीयक्षेत्रादिपिबंतींतमस्यकथयेत् नचेंद्रधनुराकाशेदृष्ट्वानिषिद्धदर्शनेरागतःकस्यचिद्दर्शयेत्

नाधार्मिकेवसेद्ग्रामेनव्याधिबहुलेभृशं नैकःप्रपद्येताध्वानंनचिरंपर्वतेवसेत् ६० नाधार्मिकइति अधार्मिकइत्यनेनयत्राधा
र्मिकावसंति तत्रवासोऽयुक्तः यत्रवानिरितउद्भिकित्सिनव्याधिपीडितावहवोजनास्तत्रभृशमत्यर्थंवासोनयुक्तःपथ्यानमेकःकदाचिनगच्छेत्पर्वतेवसेत्

नशूद्रराज्येनिवसेन्नाधार्मिकजनावृते पाखंडिगणाक्रांतेनोपसृष्टेऽन्त्यजैर्नृभिः ६१ ॥ कालेनवसेत् ६०

नशूद्रराज्यइति यत्रदेशेशूद्रोराजातत्रनवसेत् नाधार्मिकइत्यनेन यत्राधार्मिकजनैश्चवाहितःपरिवृतेग्रामादौनवसेत् नाधार्मिकइत्यनेव य
त्राधार्मिकावसंतितत्रवासोनिषिद्धः अनेनत्वाहृत्यापिपरिवृतइतिप्रतक्तिः पाखंडिभिश्चवेदबाह्यलिंगधारिभिर्वशीकृतेचांडालादिभिश्चोपसृष्टेपद्रुतेत
वेमवसेत् ६१

नभुंजीतोद्धृतस्नेहंनातिसौहित्यमाचरेत् नातिप्रगेनातिसायंनसायंप्रातराशितः ६२ नभुंजीतेति उद्धृतस्नेहंपिण्याककादिनभु
जीतअतितृप्तिंवाहवेपिनकुर्यात्जठरपूरयेदहुमेमेभोगाज्जलेनव वायोःसंचरणार्थंचतुर्थमवशेषयेदिमादिविस्मरणात् सूर्योदयकालसूर्यास्तमयेच
भोजनंनकुर्यात्प्रातराशितोऽतितृप्तःसायंनभुंजीत ६२॥ नकुर्वीतवृथाचेष्टांनवार्यंजलिनापिबेत् नोत्संगेभक्षयेद्भक्ष्यान्नजातुस्यात्कुतूहली

नकुर्वीतेति दृष्टादृष्टार्थशून्यंव्यापारंनकुर्यात् अंजलिनाचजलंनपिबेत् ऊर्वोरुपरिनिधायभक्ष्यादीन्नभक्षयेत् अप्रयोजनेनकिमेतदितिजिज्ञासाकुतू
ननृत्येदथवागायेन्नवादित्राणिवादयेत् नास्फोटयेन्नचक्ष्वेडेन्नचरक्तोविरावयेत् ६४ ॥ हलंनत्वेकदाचिन्नकुर्यात् ६३

नानृत्येदिति शास्त्रीयानिनृत्यगीतवाद्यानिनाचरेत् पाणिनावाहोधनिदूपमास्फोटनंनकुर्यात् अव्यक्तदंतशब्दात्मकंक्ष्वेडनंनकुर्यात् नचरागान्वितोऽ
सम्बद्धरावंकुर्यात् ६४

नपादौधावयेत्कांस्येकदाचिदपिभाजने नभिन्नभांडेभुंजीतनभावप्रतिदूषिते ६५ ॥

न पादाविति कांस्यपात्रे कदाचित्पादौ न प्रक्षालयेत् ताम्रभाजनस्य वर्णनं नाभिन्नमभिन्नमिति न दोष इति पाठीनसिवचनाद्देशान्तरे भिन्नमि[?] नो

उपानहौ च वासश्च धृतमन्यैर्न धारयेत् उपवीतमलंकारं स्रजं करकमेव च ६६ ॥ ...भाजन...न प्रथमनो विचिकि त्सादिन...

उपानहाविति उपानद्वस्त्रयज्ञोपवीतालंकारपुष्पमालकमण्डलून्स्वयमन्यधृतान्न धारयेत् ६६ ॥ न भिन्नशृंगाक्षिखुरैर्न वालधिविरूपितैः ६७ ॥

नाविनीतैर्व्रजेद्धुर्यैर्न च क्षुद्व्याधिपीडितैः तथा व्याधितावपीडितैर्भिन्नशृंगाक्षिखुरैश्छिन्नवालधिभिश्च न यायात् ६७ ॥

नाविनीतैरिति प्रग्रहणादिभिर्वोढुमशिक्षितैरदमितैः वर्णरूपोपसंपन्नैः प्रतोदेनातुदन्भृशम् ६८ ॥

विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः शोभनवर्णाकृतिभिः प्रतोदेनात्यर्थमपीडयन्नगच्छेत् ६८ ॥

विनीतैस्त्विति दमितैः शीघ्रगामिभिः शुभसूचकलक्षणोपेतैः न छिन्द्यान्नखरोमाणि दन्तैर्नोत्पाटयेन्नखान् ६९ ॥

बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनं न छिन्द्याच्च नखान्... कन्यार्कातपः[?] प्रथमोद्गच्छमानसवितृतापः भग्नासनं च प

-बालातप इति वर्ज्य... दिनादिसन्तापो बालातपः सवत्सरतत्र... तिथिः... दन्तैश्च नखान्नोत्पाटयेत् ६९ ॥

तानि... नाकार्याणि... न कर्म निष्फलं कुर्यान्नायत्यामसुखोदयम् ७० ॥

न मृल्लोष्टं च मृद्नीयान्न छिन्द्यात्कररजैस्तृणम् निष्प्रयोजनं मृल्लोष्टमर्दनं नखैश्च तृणच्छेदनं न कुर्यात् ।

न मृल्लोष्टमिति नाकार्यं मृल्लोष्टं मृद्नीयात् तृणानि च नखैश्छिन्द्यात् एवमसंवचनात् निष्प्रयोजनं मृल्लोष्टमर्दनं नखैश्च तृणच्छेदनं न कुर्यात् । अत एवानन्तरं लोष्टमर्दीति

...प्रतिषेधमिति दोषभूयस्त्वप्रायश्चित्तगौरवं च दर्शयितुं विशेषेण निषेधः ... देहव्यापारः सर्वथा चेष्टाशब्देन निषिद्धः

न कुर्वीत वृथा चेष्टामिति... न कुर्वीत वृथा चेष्टामित्यनेनास्य पुनरुक्तिः उच्यते चेष्टा देहव्यापारः ... यथा अग्निहोत्रभोजनादिना दृष्टेन कु

र्वीत इष्टादृष्टफलशून्यं च कर्म न कुर्यात् ... आगामिकाले... ...र्यात् ७०

अतएव निष्फलं मनोव्यापारादि... कर्म... मानसं निषिध्यते लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः स विनाशं व्रजत्याशु सूचकोऽशुचिरेव च ७१ ॥

लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः तथा सूचकः परदोषान् स मतः... अशौचरहितः शीघ्रमेत

लोष्टमर्दीति लोष्टमर्दिनाना... तथा यो मनुष्यः तथा सूचकः ... परसदोषान... ... अशौच... ७२ ॥ देहयनादिना विनश्यति

न विगर्ह्य कथां कुर्याद्बहिर्माल्यं न धारयेत् गवां च यानं पृष्ठेन सर्वथैव विगर्हितम् ७२ ॥ केशकलापाद्बहिर्माल्यं न धारयेत् गवां च पृष्ठेन यानं सर्वदैव

न विगर्ह्य कथामिति न वाभिनिवेशेन कथां शास्त्रीयमन्यलौकिकीं वा कुर्यात् ...

...पृष्ठेन गमनं गवां यानाद्युष्ट्रशकटादिना न दोषः ७२ ॥

७१

म. त. टी.

63

अद्वारेण च नातीयाद्ग्रामं वा वेश्म वावृतम् रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत् ७३ ॥

अद्वारेणेति आवृतं प्राकारादिना ग्रामं गृहं च द्वारव्यतिरिक्तप्रदेशेन प्राकारादिलंघनं कृत्वा न विशेत् रात्रौ च वृक्षमूलानि दूरतस्त्यजेत् ७३ ॥

नाक्षैः क्रीडेत्कदाचित्तु स्वयं नोपानहौ हरेत् शयनस्थो न भुञ्जीत न पाणिस्थं न चासने ७४ नाक्षैरिति हास्यादिविनाकदा चिदपि परिहासेनापि नाक्षादिभिः क्रीडयेत् स्वयमित्यभिधानात् उपानहौ पादव्यतिरिक्तेन हस्तादिना देशान्तरं न नयेत् शय्यावस्थितश्च न भुञ्जीत हस्ते च अञ्जलीकृत्वा क्रमेणान्नादेत् आसने भाजनपात्रं निधाय न भुञ्जीत ७४ ॥

सर्वं च तिलसम्बद्धं नाद्यादस्तमिते रवौ न च नग्नः शयीतेह न चोच्छिष्टः क्वचिद्व्रजेत् ७५ ॥

सर्वमिति यत्किञ्चित्तिलसंमिश्रं कृसरमोदकादि न दस्तमिते रवौ न खादेत् उपस्थाच्छादनवासोरहितो नेह लोके स्वप्यात् उच्छिष्टश्च न क्वचिद्गच्छेत्

आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात् ७६ ॥

आर्द्रपाद इति जलार्द्रपादो भोजनमाचरेत् नार्द्रपादः स्वप्यात् यस्मादार्द्रपादो भुञ्जानः शतायुर्भवति ७६

अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हिचित् न विण्मूत्रमुदीक्षेत न बाहुभ्यां नदीं तरेत् ७७ ॥

अचक्षुर्विषयमिति तरुगुल्मलतागहनत्वेनाचक्षुर्गोचरं सर्पाद्यादिदुष्टं दुर्गं नाक्रामेत सर्पचौरादेरनर्थसंभवात् पुरीषं मूत्रं च न निरीक्षेत बाहुभ्यां च नदीं न तरेत् ७७

अधितिष्ठेन्न केशांस्तु न भस्मास्थिकपालिकाः न कार्पासास्थि न तुषान्दीर्घमायुर्जिजीविषुः ७८

अधितिष्ठेदिति दीर्घमायुर्जीवितुमिच्छुः केशादीनुपरि न तिष्ठेत् भग्नमृन्मयभाजनशकलानि कपालिकाः ७८ ॥

न संवसेच्च पतितैर्न चाण्डालैर्न पुल्कसैः न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ७९ ॥

न संवसेदिति पतितादिभिः सह न संवसेत् एकतरुच्छायादौ न समीपे वसेत् शूद्रान्निषादस्त्रियां जातः पुल्कसः वक्ष्यति च जातो निषादाच्छूद्रायां जात्या भवति पुल्कसः इति अवलिप्तो धनादिमदगर्वितः अन्त्या रजकादयः अन्त्यावसायिनो निषादस्त्रियां चण्डालाज्जाताः वक्ष्यति च निषादस्त्री तु चाण्डालात्पुत्रमन्त्यावसायिनम् ७९ ॥

न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ८० ॥

न शूद्रायेति शूद्राय मतिं दृष्टार्थोपदेशं न दद्यात् धर्मोपदेशस्य पृथङ्निर्देशात् अदासशूद्राय उच्छिष्टं न दद्यात् दासं गोचरत्वात् उच्छिष्टमन्नं दातव्यमिति भोजनविधिः दानं उच्छिष्टदाननिषेधोऽपि यथासंभवलब्धविषयः हविष्कृतमिति यस्यैकदेशो हुतः महाविः शेषान्नदानं तदा धर्मोपदेशा ८३

न शूद्रस्य कर्तव्यः अतो वा मध्यप्रायश्चित्तरूपं साक्षाच्चोपदेशेन किंतु ब्राह्मणं मध्ये कृत्वा तदुपदेशः कर्तव्य यथानात् यथाह हारीतः तथा शूद्रं समा
साद्य सदा धर्मपुरःसरं अन्तरा ब्राह्मणं कृत्वा प्रायश्चित्तं समादिशेत् प्रायश्चित्तमिति सकलधर्मोपदेशस्योपलक्षणार्थम् ॥ ८० ॥

यो ह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतं सोऽसंवृतं नाम तमः सह तेनैव मज्जति ८१ यो ह्यस्येति यस्मादेतस्य शूद्रस्य
संवृतं प्रायश्चित्तमुपदिशति स तेन शूद्रेण सह असंवृताख्यं नरकं प्रविशति एवमुपदेशकस्योक्तो दोषः कथं तं प्रायश्चित्तगौरवार्थं ८१

न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः स्पृशेच्चैतदुच्छिष्टो न च स्नायाद्विना ततः ८२ ॥
न संहताभ्यामिति संश्लिष्टाभ्यां पाणिभ्यामात्मनः शिरः कण्डूयेत् उच्छिष्टः सशिरो न स्पृशेत् शिरसा विना उन्मज्जनं यतिरिक्तं शिरो न स्नानमिति
कस्नानेन कुर्यात् इहार्थं शिरोव्यतिरिक्ते गात्रे प्रक्षालने न दोषः स्नानशक्तस्य चायं निषेधः अशक्तस्य तु अशिरस्कमेव स्नानं स्नानाशक्तो

केशग्रहान्प्रहारांश्च शिरस्येतान्विवर्जयेत् शिरःस्नातश्च तैलेन नाङ्गं किंचिदपि स्पृशेत् अशिरस्कं स्नानमिति जाबालेनाविहितमेव ८२
केशग्रहानिति कोपेन केशग्रहं शिरसि प्रहारांश्च वर्जयेत् कोपनिमित्तत्वादात्मनः परस्य च प्रतिषेधः अनयत्र सम्भ्रमे कामिन्या केशग्रहस्या
निषेधः सशिरस्कस्नातस्तैलेनेति काकाक्षिवदुभयत्र सम्बध्यते तैलेन शिरःस्नातः तैलेन पुनः किंचिदङ्गं न स्पृशेत् अतो गो
विन्दराजमते तैलशिरःस्नानान्तं तैलेन पादाभ्यङ्गं समाचाराद्विरुद्धम् ८३ ॥

न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ८४ ॥
न राज्ञ इति राजशब्दः क्षत्रियवचनं अक्षत्रियप्रसूतस्य राज्ञो धनं न प्रतिगृह्णीयात् राजनो धनमनिच्छेदिति अर्थविशेषोऽयं सूनाच
क्रध्वजवतां चक्रवतां ध्वजवतां च सूना प्राणिवधस्थानं तद्यस्यास्तीति सूनावान् पशुमांसानि विक्रीय जीवि चक्रवान्
तैलनिष्पीडनविक्रयजीवी तैलिकः ध्वजवान्मद्यविक्रयजीवी शौण्डिकः वेशः पण्यस्त्रियाभृतिः तया ये जीवन्ति वेश्यानां वेशवान् एतेभ्यश्च न प्र

दशसूनासमं चक्रं दशचक्रसमो ध्वजः दशध्वजसमो वेशो दशवेशसमो नृपः ८५ ॥ तिगृह्णीयात् ८४
दशसूनेति समं चक्रं दशचक्रसमो ध्वजः इति गोविन्दराजः दशवेश्यासमो नृप इति पठन्ति मेधातिथिप्रभृतयः अन्ये दशवेशसमो नृप इति पठन्ति
सूनादिशब्दैस्तद्वानुपलक्ष्यते दशसूनावतां यावान्दोषस्तावानेकस्मिन्चक्रवति तैलिके यावान्दशसु तैलिकेषु दोषस्तावानेकध्वजवति
शौण्डिके यावान्दशसु ध्वजवत्सु दोषस्तावानेकस्मिन्वेशवति यावान्दशसु वेशवत्सु दोषस्तावानेकस्मिन्राजनि अस्योत्तरनिन्दार्थं वर्षसहस्रसंभवेन

म. तु. टी. ४ 64

सुवर्णचर्मत्वार्थमोपदृष्टपयपयोग ८५ दशसूनासहस्राणि यो वाहयति सौनिकः। तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः ८६
दशसूनासहस्राणीति सूनया चरतीति सूनिकः एवं सकलनगरीयः सौनिको दशसूनासहस्राणि स्वार्थं व्यापारयति तेन तुल्यो राजा मन्वादिभिः
स्मृतः तस्मात्तस्य प्रतिग्रहो नरकहेतुतया घोरः तत्कालविषसाषिव ८६ ॥

यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः। स पर्यायेण यातीमान्नरकानेकविंशतिम् ८७
यो राज्ञ इति यो राज्ञः कृपणस्य शास्त्रोल्लंघनेन प्रवर्तमानस्य प्रतिग्रहं करोति स क्रमेणैतान् पद्यमाणान् एकविंशतिनरकान् गच्छति ८७ ॥
तामिस्र ` ` मन्धता ` ` मिस्रं महारौरवरौरवौ। नरकं कालसूत्रं च महानरकमेव च ८८ पूर्वश्लोके सामान्येनोक्तान्नरकानि
मानेकविंशतिमिदानीं नामनिर्देशतो निर्दिशति तामिस्रमिति त्रिभिः एतेषां नरकाणां स्वरूपं मार्कण्डेयपुराणादिषु विस्तरेणोक्तं तत एवावगन्तव्यम् ८८
संजीवनं महावीचिं तपनं संप्रतापनम्। संहातं च सकाकोलं कुड्मलं पूतिमृत्तिकम् ८९ लोहशङ्कुमृजीषं च पन्थानं शा
ल्मलीं नदीम्। असिपत्रवनं चैव लोहदारकमेव च ९० एतद्विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः। न राज्ञः प्रतिगृह्णन्ति
प्रेत्य श्रेयोऽभिकाङ्क्षिणः ९१ एतद्विदन्त इति प्रतिग्रहो विविधनरकहेतुरिति जानन्तो ब्राह्मणाः शास्त्रपुराणादिविदो वेदाध्यायिनो जन्मान्तरश्रे
यः कामयन्तो न राज्ञः प्रतिगृह्णन्ति विद्वांसो हि प्रतिग्रहणाज्जीवन्तः एतान्नरकान् तस्मादविद्वानेव भीयादिति तेषामपि निषिद्धराजप्रतिग्रहः प्रत्यु
त्पन्नवायफलकहेतिदर्शयितुं विद्वद्ग्रहणं ब्रह्मवादिग्रहणं च ९१ ॥ ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत्। कायक्लेशांश्च तन्मू
लान् वेदतत्त्वार्थमेव च ९२ ब्राह्म इति ब्राह्मो मुहूर्तो रात्रेः पश्चिमो यामः ब्राह्मी भारती तस्या बोधहेतुत्वात् मुहूर्तशब्दोऽत्र कालमात्रवचनः न त्रयहा
न दहतेणापि प्रदोषपश्चिमौ वेदाभ्यासेन तौ नयेत् यामद्वयं शयानो हि ब्रह्मभूयाय कल्पते इति वचनात् तत्र प्रबोधः अभिमुक्तः गोविन्दराजस्तु यामे
पश्चिमे मुहूर्ते बुध्येतेत्याह धर्मार्थौ च परस्पराविरोधेनानुष्ठानार्थमवधारयेत् तथा धर्मार्थार्जनहेतुकान् कायक्लेशानिरूपयेत् यदि हि बहुका
यक्लेशांल्लघुधर्मार्थौ वा तदा तत्परिहरेत् वेदस्य तत्त्वार्थं ब्रह्मकर्मात्मकं निश्चिन्तयात् तस्मिन् समये बुद्धिप्रकाशात् ९२ ॥
उत्थायावश्यकं कृत्वा कृतशौचः समाहितः। पूर्वां संध्यां जपंस्तिष्ठेत्स्वकाले चापरां चिरम् ९३ ॥
उत्थायेति ततः उत्थः काले शय्यायाश्चोत्थाय सति वेगे मूत्रपुरीषोत्सर्गं कृत्वा कृतवक्ष्यमाणशौचोऽनन्यमनाः पूर्वां संध्यां चिरं गायत्रीं जपं कुर्वन्नवतिष्ठेत्
आर्कदर्शनादयविधिस्थानः सायाह्न्यामुक्ताः उदयाद्दूर्ध्वमपि जपेत् अङ्गिरादिकामश्चेति विधानार्थोऽयमारम्भः अपरामपि संध्यां स्वकाले यावन्नक्षत्रदर्शनात्
दर्याद्बृहस्पतिजपमासीत ९३ ॥ ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः। प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च ९४ ॥

64-A

श्राश्रादिकामाधिकारमितिदर्शयन्नाह ऋषय इति संध्याशाहोः अत्र संध्यानुष्ठेयजपादिपरः यस्मादृषयो दीर्घसंध्यानुष्ठानात् दीर्घमायुःप्रज्ञां जी।
र्वं तो यशोः नृनं कीर्तिमध्ययनादिसंपत्त्रयग्राश्रुब्राश्रुः तस्मादायुरादिकामस्तु दीर्घसंध्यामुपासीत ९४॥

श्रावण्यांप्रौष्ठपद्यांवाप्युपाकृत्ययथाविधिः युक्तश्छंदांस्यधीयीतमासांविप्रोर्द्धपंचमान् ९५ ॥

श्रावण्यामिति श्रावण्यांपौर्णमास्यां भाद्रपद्यां वा स्वगृह्यानुसारेण उपाकर्माख्यं कर्म कृत्वा सार्धांश्चतुरो मासान् अवहितो युक्तो वेदानधीयीत ९५

पुष्येतुछंदसांकुर्याद्बहिरुत्सर्जनंद्विजः माघशुक्लस्य प्राप्तेपूर्वाह्णेप्रथमेःहनि ९६ ॥ पुष्येति ततः पंचार्धे।
के पुष्ये तदुर्ध्वमासे पुष्यः पुष्ययुक्तायामाह हिर्ग्रामात्स्वगृह्यानुसारेणोत्सर्गाख्यं कर्म कुर्यात् अथवा माघशुक्लस्य प्रथमे हनि पूर्वाह्णे कुर्यात् स्वगृह्ये च विधिः

यथाशास्त्रंतुकृत्वैवमुत्सर्गंछंदसांबहि विरमेत्पक्षिणींरात्रिंतदेवैकमहर्निशं ९७ स्वगृह्ये यथा नोपाकर्मकृतं तत्र हि सर्वः ९८

यथाशास्त्रमिति एवमुक्तशास्त्रानुसारेणाग्रामाद्बहिश्छंदसामुत्सर्गाख्यं कर्म कृत्वा पक्षिणीं रात्रिं विरमेत् नाधीयीत वाहिदिने पूर्वापरपक्षाविव यस्याम
उभयतोदिनाभ्यां पक्षिणी रात्रिः अथवा तदेवैकमहोरात्रं अहिनो यद्दिने वाहिनाध्ययनं द्वितीयरात्रिं तस्यैव तं मध्ये अवस्थानमेवैकमुत्सर्गाहोरात्रमत

अत ऊर्ध्वंतुछंदांसिशुक्लेषुनियतःपठेत् वेदांगानिचसर्वाणिकृष्णपक्षेषुसंपठेत् ९८ अर्थाद्रूप्यात्वियाने वृणएकामग्रसमृहा
गजानग्यायविधिः

अत ऊर्ध्वमिति उत्सर्गानध्ययनादूर्ध्वं मंत्रब्राह्मणात्मकं वेदं शुक्लपक्षेषु संयतः पठेत् सर्वाणि वेदांगानि शिक्षाव्याकरणादीनि कृष्णपक्षेषु पठे
त ९८

नाविस्पष्टमधीयीतनशूद्रजनसंनिधौ ननिशांतेपरिश्रांतोब्रह्माधीत्यपुनः स्वपेत् ९९ ॥

नाविस्पष्टमिति स्वरवर्णादिव्यक्तिशून्यं शूद्रसंनिधौ च नाधीयीत तथा रात्रेः पश्चिमे यामे सश्रांतो वेदमधीत्य श्रांतो न पुनः स्वपेत् ९९

यथोदितेनविधिनानित्यंछंदस्कृतंपठेत् ब्रह्मछंदस्कृतंचैवद्विजोयुक्तोह्यनापदि १०० यथोदितेनेति यथोक्तवि
धिना नित्यं छंदस्कृतं गायत्र्यादिछंदोयुक्तं मंत्रजातं पठेत् मंत्राणामेव कर्मांगतया प्राधान्यात् अनापदि समग्रपाठासामर्थ्ये सति ब्राह्मणानामत्र जा

इमान्नित्यमनध्यायानधीयानोविवर्जयेत् अध्यापनंचकुर्वाणःशिष्याणांविधिपूर्वकं १०१ नच यथोक्तविधिना युक्तः सहित
पठेत् १००

इमान्नित्यमिति इमान्वक्ष्यमाणाननध्यायान्सर्वदाध्यायो यथोक्तविधिनाधीयानः शिष्याध्यापनं च कुर्वाणो गुरुर्वर्जयेत् १०१ ॥

कर्णश्रवेऽनिलेरात्रौदिवापांशुसमूहने एतौवर्षास्वनध्याय—— ——ताःप्रचक्षते १०२ ॥

कर्णश्रव इति रात्रौ कर्णश्रवणयोग्यशब्दजनके वायौ वाति गोविंदराजस्तु कर्णाभ्यामेव श्रवणयोग्यतेः निशयविवक्षया कर्णश्रवस्य ज्ञम

तेनापि तथैव वृत्तिर्वा यो वातोऽनध्यायमभिहितवान् दिवा च अनध्यायो नाकालिकाध्ययनविधिज्ञा मेधातिथ्यादयः कथयन्ति १०२ ॥

विद्युत्स्तनितवर्षेषु महोल्कानां च सम्प्लवे आकालिकमनध्यायमेतेषु मनुरब्रवीत् १०३ ॥

विद्युदिति विद्युद्गर्जितवर्षेषु द्वन्द्वनिर्देशाद्युगपदुपस्थितेषु महतीनां चोल्कानां संप्लवे इतस्ततः पातेऽपि आकालिकमिति निमित्तकालादारभ्यापरेद्युर्यावत्स एव कालस्तावन्तं कालमनध्यायमेतेषु मनुरब्रवीत् १०३

एतांस्त्वभ्युदितान्विद्याद्यदा प्रादुष्कृताग्निषु तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने १०४

एतानिति एतान्विद्युदादीन् यदा होमार्थं प्रकटीकृताग्निकालेषु संध्यासु युगपदुत्पन्नाञ्जानीयात् तदानध्यायं वर्षासु कुर्यात् ऋतौ सर्वदा अनृतौ तु प्रादुष्कृताग्निकालेषु मेघदर्शनमात्रेऽपि अनध्यायो न वर्षासु १०४ ॥

निर्घाते भूमिचलने ज्योतिषां चोपसर्जने एतानाकालिकान्विद्यादनध्यायानृतावपि १०५ ॥

निर्घात इति अन्तरीक्षे उत्पातध्वनौ भूकम्पे सूर्यचन्द्रतारागणानां चोपसर्गे सति अनध्यायानिमानाकालिकान्जानीयात् आकालिकशब्दार्थो व्याकृत एव ऋतावपि वर्षास्वपि किल मुख्यकाले यद्यनध्यायो दोषावह इत्यभिप्रायेण ऋतावपीत्युक्तम् अपिशब्दादनृतावपि १०५

प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा १०६ ॥

प्रादुष्कृतेति होमार्थं प्रकाशितेष्वग्निषु संध्यायां यदा विद्युद्गर्जितशब्दावेव भवतो न तु वर्षं तदा सज्योतिरनध्यायः स्यात् न त्वाकालिकः तत्र यदि प्रातः संध्यायां विद्युद्गर्जितशब्दौ तदा यावत्सूर्यज्योतिस्तावदनध्यायो दिनमात्रमेव यदि सायंसंध्यायां तदा यावन्नक्षत्रज्योतिस्तावदनध्यायो रात्रिमात्रमिति विद्युत्स्तनितवर्षेष्विति त्रयाणां पूर्वोक्तानां शेषे वर्षे त्वृतौ जाते यथा दिवानध्यायस्तथा रात्रावपि अहोरात्रं यावदनध्याय इत्यर्थः १०६

नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च धर्मनैपुण्यकामानां पूतिगन्धे च सर्वदा १०७

नित्यानध्याय इति नैपुण्यकामानामतिशयधर्मार्थिनां ग्रामनगरयोः सर्वदानध्यायः स्यात् कुत्सितगन्धे च सर्वस्मिन्नपि ग्रामादौ नैपुण्यकामस्य कदाचिदध्ययनमनुजानाति गोविन्दराजः केचिद्गृहीतवेदाध्यायाध्ययननियमजन्मादृष्टेच्छव एव धर्मनैपुण्यकामाः केचित्प्रथमाध्येतारो विद्यातिशयमात्रार्थिनस्ते द्विविधा नैपुण्यकामाः १०७ ॥

अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ अनध्यायो रुद्यमाने समवाये जनस्य च १०८ ॥

अन्तर्गतेति अन्तर्गतः शवो यस्मिन्ग्रामे तादृशे तत्र वृषलो अधार्मिकस्तस्य सन्निधौ न तु शूद्रः तस्य शूद्रजनसन्निधाविति निषेधात् रुद्यमाने रोदनध्वनौ आर्तवत्कारे कार्यार्थं बहुजनमेलके अनध्यायः १०८ ॥

65-A

उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने उच्छिष्टः श्राद्धभुक्चैव मनसापि न चिंतयेत् ॥१०९॥
उदक इति उदकमध्ये मध्यरात्रे च मुहूर्तचतुष्टये निशायां चतुर्मुहूर्तमिति गौतमस्मरणात् गोविंदराजस्तु रात्रिमध्यप्रहरद्वयमुक्त-
वान् तथा मूत्रपुरीषोत्सर्गकाले ऽन्नभोजनादिना चोच्छिष्टो निमंत्रणसमयादारभ्य श्राद्धभोजनादहोरात्रं यावत् मनसापि वेदं न चिंतये-
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनं त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥११०॥ त् ॥१०९॥
प्रतिगृह्येति एकमुद्दिश्य यत्र श्राद्धं तदेकोद्दिष्टं नवश्राद्धं तत्र केतनं निमंत्रणं गृहीत्वा निमंत्रणादारभ्य क्षत्रियस्य जनपदेश्वरस्य
पुत्रजन्मादिसूतके राहोश्चंद्रसूर्योपरागे त्रिरात्रं वेदं नाधीयीत ॥११०॥

यावदेकानुदिष्टस्य गंधो लेपश्च तिष्ठति विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् ॥१११॥
यावदिति यावदेकमुद्दिश्यानुद्दिष्टस्य उच्छिष्टस्य कुंकुमादेर्गंधो लेपश्च श्राद्धभोक्तुर्विदुषो देहे तिष्ठति तावद्वेदमपि वेदं नाधीयीत ॥१११॥
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकां नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥११२॥
शयान इति शय्यायां पतितो गात्रप्रसारितः प्रौढपादः कृत्वावसक्थिकां वा मांसं जग्ध्वा जननमरणाशौचिनोऽन्नं भुक्त्वा नाधीयीत ॥११२॥
नीहारे बाणशब्दे च संध्ययोरेव चोभयोः अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ॥११३॥
नीहार इति नीहारे हेलिकायां बाणशब्दे शरस्य नो बाणा वीणाविशेषस्य इमे प्रातः सायं संध्ययोरमावास्याचतुर्दशीपौर्णमास्यष्टमीषु ना-
धीयीत अष्टकासु तासु निषेधात् माघ्यां पौर्णमास्या दिना हव्यां अष्टकाशब्दोऽष्टमीति यिप्परः ॥११३॥

अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्जयेत् ॥११४॥
विशेषदोषमाह अमावास्येति यस्मादमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी वेदं चाष्टमी पौर्णमास्यौ विस्मारयतः तस्मात्ता अध्ययने ताः
पांसुवर्षे दिशां दाहे गोमायुविरुते तथा श्वखरोष्ट्रे च रुवति पंक्तौ च न पठेद्द्विजः ॥११५॥ परिवर्जयेत् ॥११४॥
पांसुवर्ष इति धूलीवर्षे दिशां दाहे शृगालकुक्कुरगर्दभोष्ट्रश्वखरुवति पंक्तौ चोपविश्य पठनं न कुर्यात् शृगालश्वखरादीनामेव ब्राह्म-
णा न पठेत् ॥११५॥
नाधीयीत श्मशानांते ग्रामांते गोव्रजेऽपि वा वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥११६॥

म.नु.
टी. 66

नाधीयीतेति श्मशानसमीपे गोष्ठे वा मैथुनसमये धृतवासः परिधाय श्राद्धीयं च प्रतिगृह्य नाधीयीत ११६ ॥

प्राणि वा यदि वाऽप्राणि यत्किंचिच्छ्राद्धिकं भवेत् तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृतः ११७

प्राणीति श्राद्धिकमन्नादि भुक्त्वा तावदनध्यायो भवतीत्युक्तं प्राणि वा यदि वाऽप्राणि वा हस्तमात्रादि श्राद्धकाले हस्तेन गृहीत्वानध्यायो भवति यस्मात्पाणिरेवास्यं यस्य स पाण्यास्यो हि ब्राह्मणः स्मृतः ११७

चौरैरुपप्लुते ग्रामे सम्भ्रमे चाग्निकारिते आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु च ११८

चौरैरिति चौरैरुपप्लुते ग्रामे गृहदाहादिकृते भये दिव्यान्तरीक्षभौमेषु चाद्भुतेषूत्पातेषु आकालिकमनध्यायं जानीयात् ११८

उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम् अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ११९ उपाकर्मणीति उपाकर्मणि उत्सर्गे च त्रिरात्रमध्ययनक्षेपणं उत्सर्गे पक्षिणीमहोरात्रं वानध्याय उक्तो ...णिकामं श्रुति त्रिरात्रोपदेशः तथाष्टकासु ... स्वपन्ता इत्यष्टम्यां नियमः अहोरात्रमनध्यायः दिवाकल्पामात्रमहोरात्रं पिण्डाष्टकासु ... यावदष्टमीत्वनध्यायः इत्यष्टमीपक्षे ... ऋत्वन्तासु ऋतूनामन्त्यासु रात्रिष्वहोरात्रमनध्यायः ११९

नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनम् न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः १२०

नाधीयीतेति नरुणा ... नावं उष्ट्रारूढः तथोषरदेशस्थः शकटादियानेन गच्छन्नाधीयीत १२० ॥

न विवादे न कलहे न सेनायां न संगरे न भुक्तमात्रे नाजीर्णे न वमित्वा न शुक्तके १२१ ॥ न विवाद इति विवादे वाक्कलहे कलहे दण्डादण्डि सेनायां ... संगरे युद्धे भोजनानन्तरं च यावदार्द्रहस्तो यावदार्द्रपाणिरिति वसिष्ठस्मरणात् अजीर्णे वमनं च कृत्वा ... उद्गारे च नाध्येतव्यम् १२१

अतिथिं चाननुज्ञाप्य मारुते वाति वा भृशम् रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते १२२

अतिथिमिति अध्ययनं करोमीति यावदतिथिरनुज्ञापितो न भवति मारुते वात्यर्थं वाति रुधिरे च गात्रात्स्रुते रुधिरस्रावे विना शस्त्रेण ... क्षते नाधीयीत १२२

सामध्वनावृग्यजुषी नाधीयीत कदाचन वेदस्याधीत्य वाऽप्यन्तमारण्यकमधीत्य च १२३

सामध्वनाविति सामध्वनौ श्रूयमाणे ऋग्यजुषोः कदाचिदध्ययनं न कुर्यात् वेदं समाप्य आरण्यकाख्यं च वेदैकदेशमधीत्य तदहोरात्रं नाधीयीत १२३

ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः १२४ ॥

ऋग्वेदेति सामगानश्रुतौ ऋग्यजुषोरनध्याय उक्तः तस्यायमनुवादः ऋग्वेदो देवदैवत्यो देवताश्रयत्वेनेति देवदैवत्यः यजुर्वेदो मानुषो मानुषदेवताकत्वात्
ज्योतिष्टोम मानुषकर्मोपदेशाद्वा मानुषः सामवेदः पित्र्यः पितृदेवताकत्वात् पितृकर्मकृतात्र जलोपस्पर्शनस्मरणेन तस्मात्तस्याशुचिरिव ध्वनिः न तु नाशुचिः वयमत्र तस्मिन्नश्रुयमाणे ऋग्यजुषी

एतद्विद्वन्तो विद्वांसस्त्रयीनिष्कर्षमन्वहं क्रमतः पूर्वमभ्यस्य पश्चाद्वेदमधीयते २५ ॥ नाधीयीत २५

एतद्विदन्त इति एतदृग्यजुःसामवेदत्रयस्य देवमनुष्यपितृदेवताकत्वं जानन्तः त्रयीसारस्त्रयीनिष्कर्षं सारोऽङ्कारो व्याहृतिसावित्र्यात्मकं प्रणव
व्याहृतिसावित्रीः क्रमेण पूर्वमधीत्य पश्चाद्वेदाध्ययनं कुर्वन्ति द्वितीयाध्यायोक्तो ह्ययमर्थः पुनरनध्याय प्रकरणेऽभिहितः यथैव यथोक्तानध्यायेषु प्रणव
व्याहृतिसावित्रीमुपदिनामध्यनध्यायनमेवं कर्तव्यमिति स्नातकानामयमर्थश्च २५॥

पशुमण्डूकमार्जारश्वसर्पनकुलाखुभिः अन्तरागमने विद्यादनध्यायमहर्निशम् २६ ॥

पशुमण्डूकेति पश्वादिः मण्डूकविडालकुक्कुरसर्पनकुलमूषकैः शिष्योपाध्याययोर्मध्यागमने अनध्यायमहोरात्रं जानीयात् २६

द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः २७ ॥

मृतादिविधानेनश्रुतकामैः श्रुतिपूर्वोक्तानध्यायविकल्पार्थमाह द्वावेवेति स्वाध्यायभूमिं चोच्छिष्टायमेध्यापहृतां आत्मानं चाशुचिमिति द्वा
वेवानध्यायौ नित्यं प्रयत्नतो वर्जयेत् न तु पूर्वोक्तान् तेषामपि यत्र नित्यग्रहणाश्रुतदोषा नित्यम् चापकौषस्तानापि नित्यं वर्जयेत प्रयत्नत्र

अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः २८ विकल्पः २७

अमावास्यामिति अमावास्यादिषु ऋतावपि स्नातको द्विजो न स्त्रियमुपगच्छेत् एवं वर्जं अजेच्चैव तामिति नैनैव नित्यं यस्मिहोऽस्नातकव्रतकुर्वन्
लोपप्रायश्चित्तार्थमिहस्थानवर्जं २८

न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि न वासोभिः सहाजस्रं नाविज्ञाते जलाशये

न स्नानमिति नित्यस्नानमुभोजनानन्तरमतुरश्च व्याध्यत्वादिस्पर्शनिमित्तकमपि मुहूर्तमपि शक्तिविषयेऽन्यप्रियतः स्यादिमामस्तं च
महानिशि यामाविषये न नित्यं नैमित्तिकमपि स्नानं न च कुर्यात् किं तु यथाशक्ति महासञ्चि
स्मरणात् निषिद्धमयोग्यत्वात् यदुक्तास्नानमिदं भोजनान्तरं त्रिविधमतनियोगी नैमित्तिकमपि स्नानं न च कुर्यात् किं तु यथासामर्थ्य
शरीरकमवेत स्नानस्नानाशक्ततं कर्मणा आर्द्रेण वाससा मार्जनेन दैहिकं विदुः इत्यादिजपं लघुक्तमत्र संस्पृश्य तथा महानि
शास्त्विति यामध्यस्थप्रहरद्वयं तस्मिन् स्नानं न कुर्वीत काम्यं नैमित्तिकादन्यत् इति देवलवचनात् न स्नायात् बहुवासांश्च नित्यं न स्नायात्
नैमित्तिकं वोऽग्लादिस्पर्शे सतितस्नानं बहुवाससैवाप्यनिषिद्धं ग्राह्यताज्ञाना गाम्यपूतनया च विशेषणाज्ञाते जलाशये २९ ॥

देवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य च ३० ॥

म.स्मृ. 67
टी.

देवतानामिति देवतानां पाषाणादिमयीनां गुरोः पित्रादेर्नृपतेः स्नातकस्याचार्यस्य च गुरुतनेष्याचार्यस्य छायामविवक्षया एषा हि देश
बभ्रुणः कपिलस्य यज्ञे दीक्षितस्य च भूतस्नानामस्वेमिछया कामतो नाक्रामेत् वशाद्वा चाण्डालादीनामपि कामतस्तन्निषेधनात् एवं हि
दृष्टेनैकेन दोषः ३०

मध्यंदिनेऽर्धरात्रे च श्राद्धं भुक्त्वा च सामिषम् । संध्ययोरुभयोश्चैव न सेवेत चतुष्पथम् ३१ ॥
मध्यंदिन इति दिवा रात्रेश्च मध्ये प्रहरद्वये समांसश्राद्धं भुक्त्वा प्रातः सायं संध्ययोश्चिरं चतुष्पथं नाधितिष्ठेत् ३१ ॥

उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च । श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः ३२ उद्वर्तनमिति उद्वर्तनमभ्यं
गमलापकर्षणं पिष्टकादिना अपस्नानं स्नानोदकं मूत्रपुरीषरुधिरं च श्लेष्माणं निष्ठ्यूतमपि चर्वितपरित्यक्तं तृणताम्बूलादि वान्तं भुक्तोद्गीर्णं
भक्तादि एतानि कामतो नाधितिष्ठेत् अधिष्ठानेन उपर्यवस्थानम् ३२ ॥

वैरिणं नोपसेवेत सहायं चैव वैरिणः । अधार्मिकं तस्करं चैव परस्यैव च योषितम् ३३ ॥
वैरिणमिति शत्रुं तन्मित्रं च मध्यस्थशीलं चौरं परदारांश्च न सेवेत चोरस्याधार्मिकत्वेऽप्यन्तर्गर्हितत्वज्ञापनार्थः पृथगुद्देशः ३३ ॥

न हीदृशमनायुष्यं लोके किंचन विद्यते । यादृशं पुरुषस्येह परदारोपसेवनम् ३४ ॥
न हीदृशमिति यस्मादीदृशमनायुष्यमिह लोके पुरुषस्य न किंचिदस्ति यादृशं परदारगमनं तस्मादेतन्न कर्तव्यम् ३४ ॥

क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् । नावमन्येत वै भूष्णुः कृशानपि कदाचन ३५ ॥
क्षत्रियमिति वृद्धिं प्राप्तुमिच्छुः भूष्णुः धनायुरादिवर्धनशीलः क्षत्रियं सर्पं बहुश्रुतं च ब्राह्मणं नावजानीयात् कृशानपि तत्काले प्रतीकाराक्षमा
ना च ३५

एतत्त्रयं हि पुरुषं निर्दहेदवमानितम् । तस्मादेतत्त्रयं नित्यं नावमन्येत बुद्धिमान् ३६
एतत्त्रयमिति एतत्त्रयमवमानितं सद्दवमन्तारं विनाशयति क्षत्रियसर्पौ दृष्टप्रकारेण ब्राह्मणस्त्वभिचारादिना दृष्टेन तस्मात्कल्याणबुद्धिरेत
त्त्रयमवज्ञानानवजानीयात् ३६ ॥

नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः । आमृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् ३७
नात्मानमिति प्रागुद्यमे धनाद्युद्यमे कृतेऽतत्संपन्नतानामसंपन्नतिमित्तं मन्दभाग्योऽहमिति नात्मानमवजानीयात् किंतु मरणपर्यन्तं लक्ष्मीसिद्धये
यत्नं कुर्यात् न तामतिदुर्लभां बुध्येत ३७

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियं । प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ३८

समं ब्रूयादिति यथादृष्टश्रुतं तं न ब्रूयात् यथा शीनिमाय न ब्रूयात् स्वम्नेते जातादति यथादृष्टश्रुतमस्य प्रियं पुत्रस्ते जातइत्याहि न वदेत् प्रि

भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् शुष्कवैरं विवादं च न कुर्यात्केनचित्सह ३१ यमपि न मिथ्या वदेत् एष धर्मः मूल

भद्रमिति प्रथमं भद्रपदमभद्रार्थं द्वितीयं भद्रं शब्दपर्यायपरं अभद्रं धनं द्रव्यनाशं पुत्रमरणादि शब्देन न ब्रूयात् तथा वा तथानिमाय मः

पस्तवः नाभद्रमभद्रं ब्रूयात् पुण्यं प्रशस्तमिति ब्रूयात् भद्रमित्येवेति भद्रपदमेव वाक्ये योज्यं शुष्कं निष्प्रयोजनं वैरं निवादं न केनचि

नातिकल्यं नातिसायं नातिमध्यंदिने स्थिते नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ४० स्सह कुर्यात् ३९

नातिकल्यमिति अत्यन्तप्रत्यूषे प्रदोषे च दिवा संपूर्णे मध्याह्ने च अज्ञातकुलशीलेन पुरुषेण शूद्रैश्च सह न गच्छेत् नैकः अपयेन्यान नमि।

न केचित् प्रतिषेधेऽपि पुनर्नैक इति प्रतिषेधः स्नानकर्म तत्र लोप प्रायश्चित्त गौरवार्थः ४० ॥

हीनाङ्गानतिरिक्ताङ्गान्विद्याहीनान्वयोऽधिकान् रूपद्रव्यविहीनांश्च जातिहीनांश्च नाक्षिपेत् ४१

हीनाङ्गानतिरिक्ताङ्गान्विद्याहीनान्वयोऽधिकान् हीनाङ्गानिति हीनाङ्गान्मूर्ख वृद्धकुरूप अर्थहीन हीनजाती काणशब्दाद्युद्धादिना

न स्पृशेत्पाणिनोच्छिष्टो विप्रो गो ब्राह्मणाननलान् न चापि पश्येदशुचिः सुस्थो ज्योतिर्गणान्दिवा ४२ निंदेत ४१

न स्पृशेदिति कृतभोजनः कृतमूत्रपुरीषो वा अमनोवा ब्राह्मणो हस्तादिना गो ब्राह्मणाग्नीन्न स्पृशेत् न वाशुचिः सन् सुस्थः अनातुरोऽदि

विष्टाभ्यन्तर्यसूर्यचन्द्रग्रहादि ज्योतिर्गणान्न पश्येत् ४२ स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् गात्राणि

चैव सर्वाणि नाभिं पाणितलेन तु ४३ स्पृष्ट्वैतानिति एतानगवादीनशुचिः सन् स्पृष्ट्वा कृताचमनः पाणिना गृहीताभिर।

द्भिः प्राणांश्चक्षुरादीनीन्द्रियाणि शिरःस्कन्ध जानुपादादीनाभिं च स्पृशेत् अयं कार्यो वेदशास्त्रप्रायश्चित्ताभिधानला सवार्थं च

अनातुरः स्वानि खानि न स्पृशेदनिमित्ततः रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत् ४४ गुह्यनामी पक्षतेव्यपात ४३

अनातुर इति अनातुरः सन् खानींद्रियच्छिद्राणि चक्षुरादीनि अनिमित्तं पश्यन्न तादि गतानि रोमाणि न स्पृशेत् ४४ ॥

मङ्गलाचारयुक्तः स्यात्प्रयतात्मा जितेन्द्रियः जपेच्च जुहुयाच्चैव नित्यमग्निमतन्द्रितः ४५ ।

मंगलाचारयुक्तः स्यादिति अभिप्रेतार्थसिद्धिर्मंगलं तद्धेतुत्वेन गोरोचनादिधारणमपि मंगलं गुरुसेवादिकमाचारस्तद्युक्तः स्यात्

68 मे.वृ. टी.

वातामंत्रराशौचोपेतो जितेंद्रियश्च भवेत् गायत्र्यादिजपं विहितहोमं च नित्यं कुर्यात् अतंद्रितः अनलसः प्रथमाचारादीनामुक्तानामपि विते पातकृतसंबंधनामनरभिधाने ४५
मंगलाचारयुक्तानां नित्यं च प्रयतात्मनां जपतां जुह्वतां चैव विनिपातो न विद्यते ४६
मंगलाचारयुक्तानामिति मंगलाचाराभ्यां युक्तानां नित्यं शुचीनां जपहोमपराणानां देवमानुषोपद्रवो न जायते ४६ ॥
वेदमेवाभ्यसेन्नित्यं यथाकालमतंद्रितः तं ह्यस्याहुः परं धर्ममुपधर्मोऽन्य उच्यते ४७ वेदमेवेति नित्यं क्रमाद्यवसा
रे श्रेयो हेतुतया अपवर्गाद्यादिकं वेदमेवानलसो जपेत् यस्मात्ताह्मणास्य श्रेष्ठं धर्ममन्वादयो वदंति अन्यः पुनस्तदपेक्षयोपधर्मो गुणानिम्न
यो ह्युक्तस्यैव वेदाभ्यासादेः पूर्वजातिस्मरणहोरणामिदं हेतुत्वं वदितुं पुनरभिधानम् ४७ ॥
वेदाभ्यासेन सततं शौचेन तपसैव च अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम् ४८ ॥
वेदाभ्यासेनेति सततवेदाभ्यासशौचतपोऽहिंसाभिः पूर्वभवसंजातिं स्मरति ४८ ॥
पौर्विकीं संस्मरन् जातिं ब्रह्मैवाभ्यसते पुनः ब्रह्माभ्यासेन चाजस्रमनंतं सुखमश्नुते ४९ ॥
ततः किमत आह पौर्विकीमिति पूर्वजातिस्मरणं जातिमित्येकत्वमलाकोदिततयाद्विवक्षितं बहूनि जन्मानि स्मरंस्तेषु च गर्भजन्मम
रणमरणादिदुःखान्यपि स्मरन् संसाराद्विरज्य ब्रह्मैवाभ्यसते ब्रह्माभ्यासेन श्रवणमननध्यानसाक्षात्कारानित्यानंदत्वाविनाशलक्षणं मोक्षमाप्नोति ४९
सावित्रान् शांतिहोमांश्च कुर्यात्पर्वसु नित्यशः पितॄंश्चैवाष्टकास्वर्चेन्नित्यमन्वष्टकासु च ५०
सावित्रानिति सवितृदेवताकान् होमान् अरिष्टनिवृत्यर्थं शांतिहोमान् पर्वणामावास्ययोः सर्वदा कुर्यात् तथाष्टायष्टाय
एषामष्टकाश्च मीमाष्टकाष्टकाश्वन कर्मणा श्राद्धेन च तदनंतरितत्कृत्येष्वनवमीषु वा नाष्टकाष्वनपरलोकगतान् पितॄन् पूजयेत् ५०
दूरादावसथान्मूत्रं दूरात्पादावसेचनम् उच्छिष्टान्ननिषेकं च दूरादेव समाचरेत् ५१ ॥
दूरादावसथादिति नैऋत्यां दिशि विक्षेपमतीतामापि कं भुवः इति विलम्बमाणाव वचनाद्दैवविद्यादीनां गृहस्य दूरान्मूत्रपुरीषपादप्र
क्षालनमुच्छिष्टान्नानि निषिच्य ततान्निषेकं रेतःशोधनं कुर्यात् ५१ ॥ मैत्रं प्रसाधनं स्नानं दंतधावनमंजनम् पू
र्वाह्ण एव कुर्वीत देवतानां च पूजनम् ५२ मैत्रमिति मित्रदेवताकर्म मानसं प्रसाधनं केशादिमार्जनं मूत्रपुरीषोत्सर्गं तथा देहप्र
साधनं स्नानं दंतधावनांजनं देवार्चनादि पूर्वाह्ण एव कुर्यात् एवं ह्याह शंखरात्रिशेषे दिनपूर्वभागेऽपिह विवेकतोऽवद्यते सम

68A

त्रिविधिपरत्वांचस्यपाठक्रमोपिनादरणीयः नहिस्नानानंतरंदंतधावनम्. ५२ ॥

दैवतान्यभिगच्छेत्तुधार्मिकांश्चद्विजोत्तमान् ईश्वरंचैवरक्षार्थंगुरूनेवचपर्वसु ५३ ॥

दैवतानीति पाषाणादिमयानिधर्मप्रधानांश्चब्राह्मणान् रक्षार्थंराजादिकंगुरूंश्चपित्रादीनमावास्यादिपर्वसु द्रष्टुमभिमुखोगच्छेत् ५३

अभिवादयेद्वृद्धांश्चदद्याच्चैवासनंस्वकं कृतांजलिरुपासीतगच्छतःपृष्ठतोन्वियात् ५४ ॥

अभिवादयेदिति गृहागतान्वृद्धानभिवादयेत्तेषांचस्वीयमासनं उपवेष्टुंदद्यात् बद्धांजलिश्चगुरुसमीपमासीत गच्छतश्चपृष्ठदेशेऽनुगच्छेत्

श्रुतिस्मृत्युदितंसम्यङ्निबद्धंस्वेषुकर्मसु धर्ममूलंनिषेवेतसदाचारमतंद्रितः ५५ ॥ उक्तोपथ्यमभिवादनाद्याचारफ लाभिधानायश्रुतस्य

श्रुतिस्मृत्युदितमिति वेदस्मृतिभ्यां सम्यगुक्तंस्वेषुकर्मसुअध्ययनादिषुअंगत्वेनसंबद्धंधर्मस्यहेतुंसाधूनामाचारमनल ते ५५

सःसेवेतानंतमेवेतेति सामान्येनाचारानुष्ठानोपदेशःफलकथनाय ५५ ॥

आचाराल्लभतेह्यायुराचारादीप्सिताःप्रजाः आचाराद्धनमक्षय्यमाचारोहंत्यलक्षणम् ५६.

आचारादिति आचारादेवोक्तमायुर्लभतेअभिमताश्चप्रजाःपुत्रपौत्रादिहितात्मिकाअभुक्तंचदेहस्थमलक्षणमाचारोनिष्फलइति आचाराद्व ५६

धर्मगाललक्षणस्तुचितारिष्टनाशाय

दुराचारोहिपुरुषोलोकेभवतिनिंदितः दुःखभागीचसततंव्याधितोल्पायुरेवच ५७

दुराचारोहीति यस्माद्दुराचारःपुरुषोलोकेगर्हितःस्यात्सर्वदुःखानिनोरोगभवान् अल्पायुश्च भवतितस्मात्सदाचारयुक्तःस्यात् ५७

सर्वलक्षणहीनोपियःसदाचारवान्नरः श्रद्दधानोनसूयश्चशतंवर्षाणिजीवति ५८ ॥

सर्वलक्षणहीनोपीति यःसदाचारवान् श्रद्धानितःपरदोषानभिधाताश्च सम्यक्शुभलक्षणशून्योपि शतायुर्भवति. ५८ ॥

यद्यत्परवशंकर्मतत्तद्यत्नेनवर्जयेत् यद्यदात्मवशंतुस्यात्तत्तत्सेवेतयत्नतः ५९ ॥

यद्यदिति यद्यत्कर्मपराधीनंपरप्रार्थनादिसाध्यंतद्यत्नेनवर्जयेत् यद्यत्स्वाधीनंदेहव्यापारसाध्यंपरमात्मध्यानादितद्यत्नतोऽनुतिष्ठेत् ५९

सर्वंपरवशंदुःखंसर्वमात्मवशंसुखं एतद्विद्यात्समासेनलक्षणंसुखदुःखयोः ६० ॥

म.नु. 69
टी.
श्री

स्वदेहत आह सर्वं परवशमिति सर्वं परप्रार्थनादिसाध्यं दुःखहेतुः सर्वमात्माधीनं सुखहेतुः एतत्सुखदुःखयोः कारणं जानीयात् ६० ॥
यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः । तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् ६१ । यत्कर्मेति यत्कर्म कुर्व-
तोऽस्यान्तरात्मनः परितोषः स्यात्तत्प्रयत्नेन कुर्वीत अतोऽन्यथाभूतं वर्जयेत् एतच्चाविहिताप्रतिषिद्धगोचरं वैकल्पिकविषयं
आचार्यं च प्रवक्तारं पितरं मातरं गुरुम् । न हिंस्याद्ब्राह्मणान्गाश्च सर्वांश्चैव तपस्विनः ६२ ॥ व ६१
आचार्यं चेति आचार्यमुपनयनपूर्वकवेदाध्यापकं व्याख्यातारं गुरुं मुख्यं बहुवा सम्यक् आचार्यादीन्न हिंस्यात् इति कुल्लूकभट्टेनाहिंसा
शब्दः गोविंदराजस्तु सामान्येन हिंसानिषेधात् अतनापि ताडनमपि न हिंस्यादिति व्याख्यातवान् ताडने पुत्रं गुरुं वा बालवृद्धौ वा दमने ।
नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम् । द्वेषं दम्भं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत् ६३ ॥ न विरोध्यात् ६२
नास्तिक्यमिति नास्ति परलोक इति बुद्धिं वेदस्य देवतानां च निन्दां मात्सर्यं धर्मोत्साहाभिमानकोपक्रौर्याणि त्यजेत् ६३ ॥
परस्य दण्डं नोद्यच्छेत्क्रुद्धो नैव निपातयेत् । अन्यत्र पुत्राच्छिष्याद्वा शिष्ट्यर्थं ताडयेत्तु तौ ६४ परस्य दण्डमिति परस्य ह-
ननार्थं क्रुद्धः सन् दण्डादिकं नोत्क्षिपेत् न च परस्योपरि निपातयेत् पुत्रशिष्यभार्यादासादेः स्वकृतापराधेन तु शासनार्थं ताडने न दोषः
ब्राह्मणायावगुर्यैव द्विजातिर्वधकाम्यया । शतं वर्षाणि तामिस्रे नरके परिवर्तते ६५ द्रव्यादिवत्समागतकारणा
ब्राह्मणायेति द्विजातिरपि ब्राह्मणस्य हननार्थं दण्डादिकमुद्यम्यैव न च निपात्य वर्षशतं तामिस्राख्ये नरके परिभ्रमति ६५ ताडयेत ६४
ताडयित्वा तृणेनापि संरम्भान्मतिपूर्वकम् । एकविंशतिमाजातीः पापयोनिषु जायते ६६ ॥
ताडयित्वा तृणेनापीति तृणेनापि क्रोधाद्बुद्धिपूर्वकं ब्राह्मणं ताडयित्वा एकविंशतिजन्मानि पापयोनिषु कुक्कुरादियोनिषु जायते ६६
अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः । दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः ६७ ॥
अयुध्यमानस्येति अयुध्यमानस्य ब्राह्मणस्याङ्गाच्छरीराद्रक्तमुत्पाद्य शोणितमुत्पाद्य परलोके महद्दुःखमाप्नोति ६७ ॥
शोणितं यावतः पांसून्संगृह्णाति महीतलात् । तावतोऽब्दानमुत्रान्यैः शोणितोत्पादकोऽद्यते ६८ ॥

69A रुधिरमुत्पादयितुमिति विद्वान् द्विजस्तु ब्राह्मणस्य गात्रनिर्गतं रुधिरं भूमिपतितं यावतो धूलिकणान् पिण्डीकरोति तावतो वर्षाणि परलोके श्वादिभिः
भक्ष्यते । ६८ ॥ न कदाचिद् द्विजे तस्माद् विद्वानवगुरेदपि । न ताडयेत् तृणेनापि न गा-
त्रात् स्रावयेदसृक् ॥ ६९ ॥ न कदाचिदिति तस्माद्वगोरणादिदोषाभिज्ञो ब्राह्मणे दण्डमुद्यमनमपि न कुर्यात् । न तृणेनापि प्रहरेत् । न गात्राद्रुधिरं स्रावयेत् । नाधर्मिक
इति पूर्वोक्तक्रियायाः उपसंहारः ॥ ६९ ॥ अधार्मिको नरो यो हि यस्य चाप्यनृतं धनम् । हिंसारतश्च यो नित्यं नेहासौ सुखमे-
धते ॥ अधार्मिको नरो यो हीति यस्य चाप्यनृतं धनमिति अधर्मेण व्यवहरतीति अधार्मिकः शास्त्रप्रतिषिद्धाचरणाद् यस्तु हानाधो धनं ७० ।
मानुषः यस्य च साक्षिव्यवहारनिर्णयादौ मिथ्याभिधानमेव धनोपायः अन्यस्य मिथ्याभिधायी वा यो नित्यं परहिंसाभिरतः
नासाविह लोके सुखं प्रवर्धते तस्मादेतन्न कर्तव्यमिति निषेधः कल्प्यते ७० ॥
न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत् । अधार्मिकाणां पापानामाशु पश्यन् विपर्ययम् ॥ ७१ ॥
न सीदन्नपीति शास्त्रविहितधर्ममनुतिष्ठन् धनाभावेन अवसीदन्नपि कदाचिदधर्मे बुद्धिं कुर्यात् यस्मादधर्मव्यवहारिणां यस्मा-
धार्मिको न धर्मसम्पद्धानिना अपि दृश्यन्ते तस्मात् अधार्मिकाणां अधर्मेण व्यवहारिणां पापिनां तज्जनितदण्डशालिनां आशु
विपर्ययं धनादिविपर्ययमपि दृश्यते तेन यत्नपूर्वं अधर्मे धियं दद्यादिति शिष्यहिताय दृष्टमर्थं दर्शितवान् ७१ ॥
नाधर्मश्चरितो लोके सद्यः फलति गौरिव । शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति ॥ ७२ ॥
नाधर्म इति शास्त्रप्रणीतनियमितकालपरिपाकत्वात् शुभाशुभकर्मणां नाधर्मोऽनुष्ठितः तत्कालमेव फलति गौरिवेह भूमिप
सस्याय मध्ये दृष्टान्तः यथा भूमिरुप्तबीजा समनन्तरं देवपृथ्वी पृथ्वी सलिलसमफलवृष्टिस्तत्क्षणमेव लभ्यते न भवति किन्तु नियमफलपाकसम-
यमासाद्य प्रसूयते अधर्मे दृष्टान्तः यथा पशुर्गौर्दोहदोहाभ्यां सद्यः फलति नैवमधर्मः किन्तु क्रमेणावर्तमानः फलोन्मुखो भवन् क-
र्तुः कर्तुर्मूलानि छिनत्ति मूलच्छेदेन सर्वनाशं लक्ष्यते दृष्टधनाद्यनिष्टं न पश्यति ७२ ॥
यदि नात्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु । न त्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः ॥ ७३ ॥
यदीति यदि ह्यधर्मः कर्तुर्देहधनादिनाशं फलं न जनयति तदा तत्पुत्रेषु नो चेत् पौत्रेषु जनयति न तु निष्फल एव भवतीत्यनुमानम् ।
ननु परकृतः कथमन्यत्र फलजनकत्वं उच्यते पुत्रादिनाशस्यापि पितृक्लेशहेतुत्वात् शास्त्रीमात्रा सामर्थ्यस्य नो विश्वासः ७३ ॥
अधर्मेणैधते तावत् ततो भद्राणि पश्यति । ततः सपत्नाञ्जयति समूलस्तु विनश्यति ७४

मनु टी 70

अधर्मेणेति अधर्मेण परद्रोहादिना तावदपानतोयाम्यपनादिना वर्द्धते ततो भद्राणि बहुभृत्यगवाश्वादीनि हस्त्यादि लभते ततः सपत्ना-
न्समादपहृत्य जयति पश्चात्कियता कालेनाधर्मपरिपाकवशात् देहधनात्मपुत्रादिसहितो विनश्यति ७४ ॥

सत्यधर्मार्यवृत्तेषु शौचे चैवारमेत्सदा। शिष्यांश्च शिष्याद्धर्मेण वाग्बाहूदरसंयतः ७५ ॥ सत्यधर्मार्यवृत्ति त्रि-
ति सत्यधर्मे सदाचारे शौचे च सर्वदा रतिं कुर्यात् शिष्यांश्चानुशासनीयान् भार्यापुत्रदासच्छात्रान् धर्मेण वाग्दण्डेन वेतिप्रकारेण शासये-
त् उक्तानामप्यभिधानमनुष्ठानादरार्थं वाग्बाहूदरसंयतस्तु संयतवाक्यः सत्यभाषितो बाहुसंयतो बाहुबलेन न कस्याप्युपपीडकः उदरसं- ७५

परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ। धर्मं चाप्यसुखोदर्कं लोकविक्रुष्टमेव च ७६ यतोऽपथ्याल्पत्वाल्पभोजने
परित्यजेदिति यावदर्थकामौ धर्मविरोधिनौ भवेतां तौ परिहरेत् चौर्यादिनार्थोपपादनं दोलादिने यजमानस्य पत्न्युपगमः उदर्कः
उत्तरकालः तत्रासुखविषयं धर्मं तद्धर्ममपि परित्यजेत् यथा पुत्रादिबहुपोष्यवर्गसमस्तस्वदानं लोकविक्रुष्टं यत्र लोका नाभिरु- ७६

न पाणिपादचपलो न नेत्रचपलोऽनृजुः। न स्याद्वाक्चपलश्चैव न परद्रोहकर्मधीः ७७ चिः यथा कलौ मधुपर्के गोवधादि
न पाणिपादचपल इति पाण्यादिचालनं निष्प्रयोजनं तत्र पञ्चवर्णकृतवस्तुपादाननादिपाणिचापलं निष्प्रयोजनं अभ्रमणादि पादचापलं परस्त्री-
ह्यवलोकनादिनेत्रचापलं बहुप्रलापादि वाक्चापलं अनृजुः कुटिलो न स्यात् परद्रोहे हिंसात्मके चेष्टिते बुद्धिं न कुर्यात् ७७ ॥

येनास्य पितरो याता येन याताः पितामहाः। तेन यायात्सतां मार्गं तेन गच्छन्न रिष्यते ७८ ॥
येनेति बहुविधशास्त्रार्थसंभवेऽपि पितृपितामहाद्युपदिष्टमेव शास्त्रार्थो उपादेयः तेन गच्छन्न रिष्यते नाधर्मेण हिंस्यते ७८

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः। बालवृद्धातुरैर्वैद्यैर्ज्ञातिसंबन्धिबान्धवैः ७९ ॥
ऋत्विगिति वचनद्वयं ऋत्विगादिभिर्वाक्कलहं न कुर्यात् शान्त्यादिकर्ता पुरोहितः संश्रिता अनुजीविनः ज्ञातयः पितृपक्षा
संबन्धिनः श्यालकादयः बान्धवा मातृपक्षाः यामिर्भगिनी स्नुषाद्या ७९ ॥

मातापितृभ्यां यामीभिर्भ्रात्रा पुत्रेण भार्यया। दुहित्रा दासवर्गेण विवादं न समाचरेत् ८० एतैर्विवादान्संत्य-
ज्य सर्वपापैः प्रमुच्यते। एभिर्जितैश्च जयति सर्वांल्लोकानिमान्गृही ८१ ॥
एतैरिति एतैः ऋत्विगादिभिः सह विवादमपरित्यज्य ज्ञातानज्ञातान् सर्वपापैः प्रमुच्यते तथैतैर्विवादे परिवर्जिते त्रिमानव्यवस्थापनात् सर्वांल्लोकान् गृहस्थो जय-
ति ८१

आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः। अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः ८२

आचार्यइति आचार्यो ब्रह्मलोकस्य प्रभुः तेन सह विवादपरित्यागेन तं तोष्य च ब्रह्मलोकप्राप्तेरेषां ब्रह्मलोकेशत्वम् एवं प्राजापत्यलोके प्राजापत्ये पिता च प्रभुः अतिथिरिन्द्रलोके देवलोकस्य चर्त्विजः एवमुत्तरत्रापि तत्तल्लोकेशत्वं बोद्धव्यम् ८२ ॥

जामयोऽप्सरसां लोके वैश्वदेवस्य बान्धवाः संबन्धिनो ह्यपां लोके पृथिव्यां मातृमातुलौ ८३ ॥

जामयइति अप्सरसां लोके जामयः प्रभवन्ति वैश्वदेवलोके बान्धवाः वरुणलोके मातृमातुलौ ८३ ॥

आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः ८४

आकाशेशास्त्विति कृशः कृशधनः संश्रितो विवक्षितः बालवृद्धसंश्रितातुरा अन्तरीक्षे प्रभवन्ति भ्राता च ज्येष्ठः पितृतुल्यः तस्मात्सोऽपि प्रजापतिलोके प्रभुः भार्या पुत्रश्च स्वशरीरमेव अतः कथमात्मनैव सह विवादः संभवति ८४ ॥

छाया स्वो दासवर्गश्च दुहिता कृपणं परं तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा ८५ ॥

छायेति सदासवर्गस्तु नित्यानुगतत्वात् आत्मच्छायेव न विवादार्हः दुहिता च परं कृपणपात्रं तस्मादेतैरधिक्षिप्तः सन्नसंतापः सहेत न तु विवदेत ८५ ॥

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति ८६ प्रतिग्रहसमर्थोऽपीति विद्यातपोयुक्तः संपन्नतया प्रतिग्रहेऽधिकार्यपि तत्र पुनः पुनः प्रवृत्तिं त्यजेत् यस्मात्प्रतिग्रहेणास्य वेदाध्ययनादिनिमित्तप्रभावः शीघ्रमेव विनश्यति याज्ञवल्क्योऽपि प्रतिग्रहसमर्थोऽपि नादत्ते या सा सं... आत्मना जेन संकोचे विशेषेण प्रतिग्रहसंबन्धप्रभावप्रशमनफलतत्कथनार्थं वचनम् ८६ ॥

न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे प्राज्ञः प्रतिग्रहं कुर्यादवसीदन्नपि क्षुधा ८७ ॥

न द्रव्याणामिति द्रव्याणां प्रतिग्रहे धर्मार्थहितं विधानं यथा देवताप्रतिग्रहमन्त्रादिकमज्ञात्वा क्षुधावसादं गच्छन्नपि प्राज्ञो न प्रतिगृह्णीयात् किं पुनरनापदि ८७

हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतं प्रतिगृह्णन्नविद्वांस्तु भस्मीभवति दारुवत् ८८

हिरण्यमिति स्वर्णादीनज्ञात्वा स्वाध्यायहीनः प्रतिगृह्णानोऽग्निसंयोगेन दारुवद्भस्मीभूतो भवति पुनरुत्पत्तिं न लभते ८८ ॥

हिरण्यमायुरन्नं च भूर्गौश्चाप्योषतस्तनुं अश्वश्चक्षुस्त्वचं वासो घृतं तेजस्तिलाः प्रजाः ८९ हिरण्यमिति अविदुषः प्रतिगृहीतं भूर्गौश्च शरीरं प्लोषेण दहतः अश्वदाहे भौवादिकसंस्पर्शे रूपं मन्यते द्वितीयविवक्षायां द्विवचनं एवं हिरण्यमन्नं चायुः प्लोषतः अश्वश्चक्षुस्तिला दिश विभक्तिविपरिणामा-

अतपास्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः अम्भस्यश्मप्लवेनेव सह तेनैव मज्जति ९० दीपतीत्येव वचनात् तस्मात्प्रयत्नः ८९

अतपास्त्विति अतपोविद्याशून्यः प्रतिग्रहेच्छुः ब्राह्मणो भवति स प्रतिग्रहाधिकारी न भवति बुद्धिस्थेन तेनैव निमज्जति न केवलं दातारं प्रतिग्रहप्रत्यवायपापेन सह नरके

मनु॰
टी॰
७१

ज्जति यथा पाषाणमये नौडुपे वा भवतरन्ते तेनैव सह अम्भसि मग्नो भवति १९० ॥

तस्मादविद्वान्बिभियाद्यस्मात्तस्मात्प्रतिग्रहात् स्वल्पकेनाप्यविद्वान्हि पंके गौरिव सीदति १९१

तस्मादविद्वानिति यस्मादेवमसद्द्रव्यप्रतिग्रहेणापि मूर्खः पंके गौरिव नरके अवसन्नो भवति तस्माद्यतः कुतश्चिन्स्वर्णादिद्रव्यविनिक्रमी स काष्ठमसत्प्रतिग्रहादपि बिभेतु १९१

न वार्यपि प्रयच्छेत्तु वैडालव्रतिके द्विजे न बकव्रतिके विप्रे नावेदविदि धर्मवित् १९२ ॥

न वार्यपीति प्रतिग्रहे तद्दोषमभिधाय अधुना दातृगतदोषमाहः येभ्यो दीयते तदपि वैडालव्रतिके भ्यो धर्मज्ञो न दद्यादित्यतिशयो ज्ञापयित्वाऽनन्तरदानं निषिद्धे न तत्र वारिदानमेव पापाधिदिनो विकर्मस्थानि स्मरेन्न वैडालव्रतिकाय प्रतिपद्येत न सत्कृतार्थदानादि निषिद्धमिह तद्धनदानं निषिध्यते अन्तएव विधिनाप्यर्जितं धनमिति वक्ष्यति नावेदविदीति वेदार्थानभिज्ञे एतच्च विहितं सम्भवे देववित् निषिध्यते १९२ ॥

त्रिष्वप्येतेषु दत्तं हि विधिनाप्यर्जितं धनम् दातुर्भवत्यनर्थाय परत्रादातुरेव च १९३ ॥

त्रिष्वपीति एतेषु त्रिष्वपि वैडालव्रतिकादिषु न्यायार्जितमपि धनं दत्तं दातुः प्रतिग्रहीतुश्च परलोके नरकहेतुत्वादनर्थाय भवति १९३ ॥

यथा प्लवेनौपलेन निमज्जत्युदके तरन् तथा निमज्जतोऽधस्तादज्ञौ दातृप्रतीच्छकौ १९४ यथा प्लवेनेति यथा पाषाणमये नौडुपादिना जलं तरंस्तेनैव सह अधो गच्छति एवं दानप्रतिग्रहशास्त्रानभिज्ञौ दातृग्राहकौ नरकं गच्छतः अतएव तयोर्यानं इति प्रतिग्रहीतृग्राह्ययेन निषेधका दातृप्रतिग्रहयोर्नरकहेतुत्वम् १९४

धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः १९५

धर्मध्वजीति यो बहुजनसमक्षं धर्ममाचरति स्वतः परतश्च लोके ख्यापयति स धर्मो ध्वजमिव ख्यातिमिच्छति धर्मध्वजी लुब्धः परधनाभिलाषुकः छद्मना व्याजेन चरतीति छाद्मिकः लोकदम्भको निःस्नेहपापहारादिना जनवञ्चकः हिंस्रः परहिंसाशीलः सर्वाभिसन्धकः परगुणासहनतया सर्वाक्षेपकः विडालव्रतेन चरतीति वैडालव्रतिकः विडालो हि प्रायेण मूषिकादिहिंसार्थं विनया ध्याननिष्ठ इव विनीतः सन्नवतिष्ठ इति तद्धर्मा विडालव्रतप्राप्तः १९५ ॥

अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः १९६ ॥

अधोदृष्टिरिति अधोदृष्टिर्निजविनयख्यापनाय सततं समक्षमवनिरीक्षते निष्कृतिः निष्ठुरता तया चरतीति नैष्कृतिकः स्वार्थसाधनतत्परः परार्थं विडेनेन शठो वक्रः मिथ्याविनीतः कपटविनयवान् बकव्रतञ्चरतीति बकव्रतचरः बको हि प्रायेण मीनहननरुचिरसौ मिथ्याविनीतः सन्नेवैवशीलो भवतीति गौणो बकव्रतशाठ्यः १९६

ये बकव्रतिनो विप्रा ये च मार्जारलिङ्गिनः ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा १९७ ॥

ये बकव्रतिन इति ये बकव्रतं विडालव्रतं चरन्ति ते ब्राह्मणास्तेन पापहेतुना कर्मणा अन्धतामिस्रनाम्नि नरके पतन्तीति १९७ ॥

71A

न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् व्रतेन पापं प्रच्छाद्य कुर्वन्स्त्रीशूद्रदम्भनम् १९८ ॥
न धर्मस्येति पापं कृत्वा प्रायश्चित्तरूपं व्रतं ज्ञायमानादिवृत्तेन पापमपनयन्नेदं प्रायश्चित्तं किंतु धर्मार्थमहमनुतिष्ठामीति स्त्रीशूद्रमूर्खादिजनमोह
प्रेत्येह चेदृशा विप्रा गर्ह्यन्ते ब्रह्मवादिभिः छद्मनाचरितं यच्च व्रतं रक्षांसि गच्छति १९९ प्र नं कुर्वन्नानुतिष्ठेत् १८
अलिङ्गी लिङ्गिवेषेण यो वृत्तिमुपजीवति स लिङ्गिनां हरत्येनस्तिर्यग्योनौ च जायते २०० ॥
प्रेत्येह इति श्लोकद्वयं प्रथमं सर्वार्थं ब्रह्मचार्यादिर्यो ब्रह्मचर्यादिलिङ्गमेव लाञ्छनं दण्डादिवाधोपलक्षितं तत्कृत्वा भिक्षाश्रमादिना जी
वति स ब्रह्मचर्याद्याश्रमिणां यत्तदाश्रममाहरति कृतकृत्यादिति तिर्यग्योनौ च जायते तस्मादेतन्न कर्तव्यमिति निषेधः कल्प्यते १९९ २००
परकीयनिपानेषु न स्नायाच्च कदाचन निपानकर्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते २०१ ॥
१० परकीयेति निपानं जलाधारः परकृतेषु पुष्करिण्यादिषु न कदाचित्स्नायात् तत्स्नाता पुष्करिण्यादिकर्तुर्यत्पापं तत्पापांशेन वक्ष्यमाणाच
तुर्थभागरूपेण संबध्यते असकृत्त्विमन्यायसंभवे परकृतेष्वपि पुष्करिण्यादौ प्राक् पुण्यानाम् पञ्च पिण्डानुद्धृत्य स्नातव्यं यदाह याज्ञवल्क्यः प
ञ्च पिण्डाननुद्धृत्य न स्नायात्परवारिषु उद्धृत्य चतुरः पिण्डान्पापकृत्स्नानमाचरेत् स्नानाचरणप्रतिषेधो नित्यस्नानविशेषतः २०१ ॥
यानशय्यासनान्यस्य कूपोद्यानगृहाणि च अदत्तान्युपभुञ्जान एनसः स्यात्तुरीयभाक् २०२ ॥
यानशय्येति अस्येति प्रकृतः परः परामृश्यते परस्य यानादीन्यदत्तानि उपभुञ्जानस्तदीयपापचतुर्थभागभागी भवति अदत्तानीति
परस्यानुमत्यभावविवक्षितः तेन सर्वार्थानुसृष्टमव कूपादौ उदपानयोगाभ्यनुज्ञानादौ न विरोधः २०२ ॥
नदीषु देवखातेषु तडागेषु सरःसु च स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च २०३ ॥
नदीष्विति नद्यादिषु सर्वदा स्नानमाचरेत् देवखातेष्विति तडागविशेषणं देवसंबन्धित्वेन प्रसिद्धेषु अष्टधनुःसहस्रेभ्यो न्यूनगतिषु वा
हृदोदकेषु रोगापविशिष्टे धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते न ता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः चतुर्हस्तप्रमाणास्तु प्रस्रवणेषु
ति ... एषु च परकीयनिपानव्याहृतिनिषेधो यस्य स्वच्छन्ददानो यो न्यूनतडागादिषु स्नानाभ्यनुज्ञानार्थं तदपि न पापसंभवे २०३
यमान्सेवेत सततं न नित्यं नियमान्बुधः यमान्पतत्यकुर्वाणो नियमान्केवलान्भजन् २०४
यमानिति नियमापेक्षया यमानुष्ठानं गौरवज्ञापनार्थमिदं न तु नियमनिषेधार्थं द्वयोरवश्यानुष्ठेयत्वात् यमनियमविवेकश्च मुनिभि
रेव कृतः तदाह याज्ञवल्क्यः ब्रह्मचर्यं दया क्षान्तिर्ध्यानं सत्यमकल्कता अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः स्नानमौनोपवा
सेज्यास्वाध्यायोपस्थनिग्रहाः नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादता यमनियम[illegible]ततः समस्तस्नानादिनियमत्यागेनाहिंसा

दिव्यैर्गमनमनुतिष्ठेत् नियमाननुतिष्ठन्नपि यमानुष्ठानरहितः पतति यस्माद्यमानेव सेवेत मेधातिथिगोविन्दराजौ हिंसादिप्रति
षेधार्थका यमाः वेदमेव जपेन्नित्यमित्यादयो विध्यर्था नियमा इति व्याचक्षाते अहिंसा सत्यवचनं ब्रह्मचर्यमकल्कता अस्तेयमिति
पञ्चैते यमाः परिकीर्तिताः अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् अप्रमादश्च सततं पञ्चैते नियमाः स्मृताः २०४ ॥

नाश्रोत्रियतते यज्ञे ग्रामयाजिहुते तथा स्त्रिया क्लीबेन च हुते भुञ्जीत ब्राह्मणः क्वचित् २०५

नाश्रोत्रियेति अनधीतवेदेनोपक्रान्ते यज्ञे ग्रामो बहवो याजका यस्य तेन हुतेऽपि भोजनयोग्यसमये ब्राह्मणो न भुञ्जीत तथा बहूनां याजकेन ऋत्विजा।
स्त्रिया नपुंसकेन च यत्र हूयते तत्र ब्राह्मणः कदाचिन्न भुञ्जीत २०५

अश्लीकमेतत्साधूनां यत्र जुह्वत्यमी हविः प्रतीपमेतद्देवानां तस्मात्तत्परिवर्जयेत् २०६

अश्लीकमिति पूर्वोक्ता बहुयाजकादयो यत्र होमं कुर्वन्ति तत्कर्म शिष्टानामश्लीकमफलं स्यात् अलङ्कारः देवानां प्रतिकूलं तस्मात्तान्होमांस्त्यजेत्। २०६

मत्तक्रुद्धातुराणां च न भुञ्जीत कदाचन केशकीटावपन्नं च पदा स्पृष्टं च कामतः २०७ ॥

मत्तक्रुद्धातुराणामिति क्षीवक्रुद्धव्याधितानामन्नं तथा केशकीटसंसर्गदुष्टं पादेन च ज्ञानतः स्पृष्टमन्नं न भुञ्जीत २०७ ॥

भ्रूणघ्नावेक्षितं चैव संस्पृष्टं चाप्युदक्यया पतत्रिणावलीढं च शुना संस्पृष्टमेव च २०८ ॥

भ्रूणघ्नेति भ्रूणघ्नः स्यादलक्षणात् गोत्रघ्नस्यादिपतितेनावेक्षितं रजस्वलया च स्पृष्टं पक्षिणा च काकादिना स्वादितं कुक्कुरेण स्पृष्टमन्नं न भु-

गवा चान्नमुपघ्रातं घुष्टान्नं च विशेषतः गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम् २०९ ञ्जीत २०८

गवेति यदन्नं गवाघ्रातं घुष्टान्नं को भोक्तेत्याहूय यद्दीयते विशेषत इति भूरिदोषतया प्रायश्चित्तगौरवार्थम् गणान्नम
बहुब्राह्मणसम्बन्ध्यन्नं गणिकाया वेश्याया अन्नं शास्त्रविदा च यद्दुष्टमिति निन्दितं तदन्नं न भुञ्जीत २०९ ॥

स्तेनगायनयोश्चान्नं तक्ष्णो वार्धुषिकस्य च दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च २१०॥

स्तेनेति चौरगायनवृत्तिजीविनोः तथा तक्ष्णः वृद्ध्युपजीविनश्चान्नं न भुञ्जीत तथा यज्ञे दीक्षितस्याग्नीषोमीयात् प्राक् कदर्यस्य
कृपणस्य निगडस्येति तृतीयार्थे षष्ठी निगडैर्बद्धस्य गोविन्दराजस्तु बद्धस्येति वधेन विनापि यो निगडैर्निगडितस्तस्य निगडस्येति व्या-

अभिशस्तस्य षण्ढस्य पुंश्चल्या दाम्भिकस्य च शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेव च २११ ख्यातवान् २१०

अभिशस्तस्येति महापातकेन संजातलोकापवादस्य नपुंसकस्य पुंश्चल्या व्यभिचारिण्याः अगणिकायाः अपि दाम्भिकस्य छद्मना धर्माचारिणो वैडाल-

72A

इति कादेशेनन भुञ्जीत । शुक्तं यत्स्वभावतो मधुरं दध्यादिमंपर्कवशेन उदकादीनां चाम्लादिभावं गतं पर्युषितं रात्र्यन्तरितं शूद्रस्य चान्नं न भु
ञ्जीतेति संबन्धः उच्छिष्टं च भुक्तावशिष्टान्नमविशेषात्कस्यापि न भुञ्जीत गुरूच्छिष्टस्य विहितत्वात् भोज्यगोविदराजस्तु शूद्रस्योच्छिष्टं गुरोर्वासिष्ठं

चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः । उग्रान्नं सूतिकान्नं च पर्याचान्तमनिर्दशं ॥ २१२ ॥ गुरूच्छिष्टमपि न भुञ्जीत इत्याह

चिकित्सकस्येति चिकित्साजीविनः मृगयोर्मांसविक्रयार्थं मृगादिपशुहन्तुः क्रूरस्यानृजुप्रकृतेः निषिद्धोच्छिष्टभोक्तुरन्नं न भुञ्जीत उग्रो दारुण ।
ताकर्मा तस्यान्नं गोविन्दराजो मन्वर्थमुक्तावलीकृद्‌वान् मेधातिथिश्च शूद्रायां क्षत्रियाज्जातमुग्रमाहुः यस्मान्मेदोक्तेर्यातिवल्कीयेषु गोविन्दराजेनिवादन
प्रश्नेऽस्मिन्मेते स्वकीयहृदिभूषणां सूतिकान्नं सूतिकायोद्देश्येन यत् क्रियते तदन्नं न तत्कुलजैरपि न भक्ष्यं पर्याचान्तं पङ्क्तिस्थाने स्यात्तमानवम
भ्युपगत्य भुञ्जानेष्वाचमनं क्रियते तत्सर्वं पर्याचान्तम् अनिर्दशं सूतिकान्नं प्रेतान्नं सर्वदशाहमाण्यात् न भुञ्जीत २१२ ॥

अनर्चितं वृथामांसमवीरायाश्च योषितः । द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतं ॥ २१३ ॥

अनर्चितमिति अवज्ञया यद्दत्तमर्चितं वृथामांसं देवतादिमुद्दिश्य यन्न कृतं अवीरायाः पतिपुत्ररहितायाः शत्रुनगरपतितानामवक्षुत्तं तत्क्षुतं वान्नं न भु
ञ्जीत २१३

पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्तथा । शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च ॥ २१४ ॥

पिशुनेति पिशुनः परोक्षपरदोषवादी भाषणशीलः अनृतीति अतिशयेनानृतवादी कूटसाक्ष्यादिः क्रतुविक्रायकः मदीयस्य यागस्य फलं तव भवतिति मू
ल्यमादाय यो यथार्थं गृह्णाति शैलूषो नटः तुन्नवायः सौचिकः कृतघ्नो यः कृतोपकारस्यापकारे प्रवर्तते तेषां सर्वेषामन्नं न भुञ्जीत २१४ ॥

कर्मारस्य निषादस्य रङ्गावतारकस्य च । सुवर्णकर्तुर्वेणस्य शस्त्रविक्रयिणस्तथा ॥ २१५

कर्मारस्येति कर्मारस्य लोहकारस्य निषादस्य माध्यायोक्तस्य नटगायनव्यतिरिक्तस्य रङ्गावतरणाज्जीविनः सुवर्णकारस्य वेणोर्भेदनेन यो जी
वति वरुडइति प्रसिद्धः शस्त्रं लोहः तद्विक्रयिणश्चान्नं न भुञ्जीत २१५ ॥

श्ववतां शौण्डिकानां च चैलनिर्णेजकस्य च । रञ्जकस्य नृशंसस्य यस्य चोपपतिर्गृहे २१६ श्ववतामिति श्वक्रीडका
र्थं श्वपोषकानां मद्यविक्रयिणां वस्त्रधावकस्य कुसुम्भादिना वस्त्ररागकृतः निर्दयस्य यस्य चोपपतिर्गृहे जारस्तद्वस्याज्ञातो न तेन गृहे स्थितस्तस्य गो।

मृष्यन्ति ये चोपपतिं स्त्रीजितानां च सर्वशः । अनिर्दशं च प्रेतान्नमतुष्टिकरमेव च ॥ २१७ ॥ २१६ ॥ इत्यादि

मृष्यन्तीति ये चोपपतिं स्त्रीजितानां तीति गृहस्थमनुष्यजाते गृहेतावं भार्याजारं ये सहन्ते तेषामन्नं न भुञ्जीत तेन न गृह्णात निःसारितायां तावत्सहनेऽपि दोषः ।
तथा सर्वकर्मसु स्त्रीपरतन्त्राणां अनिर्गताशौचं च सूतकान्नं अतुष्टिकरमेव च न भुञ्जीत २१७ ॥

म.तु.
टी.
७३

73

राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् । आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः ॥ २१८ ॥ राजान्नमिति राजान्नं
तेजो नाशयतीति इत्येवं दोषदर्शनात् तदन्नमक्षत्रियविषयः कल्प्यते एवमुत्तरत्रापि पूर्वमनिषिद्धस्य दोषदर्शनादेव निषिद्धकल्पनं नाद्याच्छूद्रस्य
पक्वान्नमित्यतिनिषेधप्राप्तं तदक्रमणफलकथनमिदं शूद्रस्य पक्वान्नमध्ययनादिनिमित्तं तेजो नाशयति सुवर्णकारस्यान्नमायुः चर्मकारान्नं
कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च । गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति ॥ २१९ ॥ ख्यातिं नाशयति २ १८
कारुकान्नमिति कारुकस्य सूपकारादेरन्नं प्रजां प्रसन्नं निहन्ति चर्मकारादेः कारुकत्वेऽपि पृथग्वचनं दोषगौरवार्थम् निर्णेजकस्यान्नं बलं हन्ति गणा
गणिकयोरन्नं कर्मार्जितान् लोकेभ्यः स्वर्गादिलोकेभ्यः छिनत्ति २१९ ॥ पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् । वि-
ष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ॥ २२० ॥ पूयमिति चिकित्सकस्यान्नं पूयं पूयभक्षणसमदोषप्रदं पुंश्चल्यास्त्वन्नं इन्द्रि-
यं शुक्रं वार्धुषिकस्यान्नं पुरीषं लोहादिविक्रयिणोऽन्नं विष्ठावदिति विक्रेयादि गोविन्दराजस्तु चिकित्सकान्नभक्षणेन तथाविधफलं प्रजानां नाशयेत्थं
य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्तिताः । तेषां त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः ॥ २२१ ॥ इत्ययुक्तमभिधानमाह २०
य एते इत्यन्ये त्विति पदनिर्देशाद्ये अभोज्यान्नाः अभिमन्यकरणोपपठिताः प्रायदर्शनं तत् त्वगस्थिरोमाणि तदीयान्नं वाक्यकरणस्य प्रायोऽभुक्ता ।
भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम् । मत्या भुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेव च ॥ २२२ ॥ नोदेश्यः स्यवनदन्नमपि भुक्ता स्वबाहुवः २२१
भुक्त्वेति एषामभोज्यान्नानामन्यतमस्यान्नममत्या ज्ञात्वा भुक्त्वा त्र्यहमुपवासः ज्ञात्वा तु कृच्छ्रं एवं रेतोविण्मूत्रभोजनेऽपि एतच्च ज्ञानतश्च प्रायश्चित्तं द्वितीयनिर्दे-
शात् मत्यादिसंबंधिनः परिग्रहः दुष्टान्नस्यैव प्रायश्चित्तं न संसर्गदुष्टस्य केशकीटादिपतनादेः वापि कालदुष्टस्य पर्युषितान्नादेर्नापि निमित्तदुष्टस्य शुनाव-
लीढस्य एककारणोपदेशात् स्नातकव्रतलोपनार्थं प्रायश्चित्तं स्यात् तदा भुक्त्वातोऽन्यतमस्येति तत्समानत्वात् तस्मादेकप्रकरणपठितत्वात्
पिरस्यत्वात् प्रायश्चित्तमिदं भुक्त्वादौ न दत्तं एककारणोपप्रायश्चित्तस्याभिधानं लाघवार्थं तन्न क्रियमाणमन्तरे दृष्टिकत्वमस्यात् २२२
नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः । आददीताममेवास्मादवृत्तावेकरात्रिकम् ॥ २२३ ॥
नाद्यादिति अविशेषणात् शूद्रान्नं प्रतिषिद्धं तस्येदानीं विषयविशेषः प्रोच्यते अश्राद्धिनः श्राद्धादिपंचयज्ञशून्यस्य शूद्रस्य शास्त्रविद् द्विजः पक्वान्नं भुंजीत ।
किंतु तदभावे सति एकरात्रनिर्वाहोचितमाममेवान्नमस्माद्गृह्णीयात् नतु पक्वान्नम् २२३ ॥
श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः । मीमांसित्वोभयं देवाः सममन्नमकल्पयन् ॥ २२४ ॥
श्रोत्रियस्येति एको रोगी वेदाध्यायी कृपणश्च अपरो दाता वृद्धिजीवी च तयोरुभयोरपि गुणदोषवत्त्वं विचार्य देवास्तत्समं तन्मन्यन्ते इति निरूपितवंतः उभयोरपि

73A

गुणदोषास्यात् २२४ तान्प्रजापतिराहैत्य माकृढ्वं विषमं समम् श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् २२५ ॥

तानिति तान्देवगणम् ब्रह्माप्रजापतिराह विषमं समं ते मा समं कुरुत विषमं समीकरणमनुचितं कः पुनरनयोर्विशेषः इत्यपेक्षायामयमर्थो वोचत् दा
नशीलवार्धुषिकस्यापि श्रद्धयान्नं पवित्रं भवति कृपणस्य पुनरश्रद्धया हतं दूषितं प्रथमश्रोत्रियप्रतिषेधेपि श्रद्धानादविहाद्वार्धुषिकस्यापि विशे।

श्रद्धयेष्टं च पूर्तं च नित्यं कुर्यादतन्द्रितः श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्धनैः २२६ ॥ द्वितीयमन्यदपीदं २२५

अतएवाह श्रद्धयेति इष्टमन्तर्वेदियज्ञादिकर्म पूर्तं तडागारामादिकूपवाप्यारामादि तदेवमनलसः सन्नित्यं कामसर्गादिफलरहितं श्रद्धया
कुर्यात् यस्मात्ते इष्टपूर्ते न्यायार्जितधनेन श्रद्धया कृते अक्षये मोक्षफले भवतः २२६ ॥

दानधर्मं निषेवेत नित्यमैष्टिकपौर्तिकम् परितुष्टेन भावेन पात्रमासाद्य शक्तितः २२७ ॥

दानधर्मं निषेवेत नित्यमैष्टिकपौर्तिकं श्रौतवैदिके बहिर्वेदिके च सर्वदा वियाति योग्यं कृत्वा प्रणामासाद्यपरितोषात्मनोन्तःकरणधर्मेण युक्तः यथाशा।

यत्किंचिदपि दातव्यं याचितेनानसूयया उत्पत्स्यते हि तत्पात्रं यत्तारयति सर्वतः २२८ ॥ किं कुर्यात् २२७

यत्किंचिदिति प्रार्थितेन परगुणासूयारहितेन यथाशक्ति दातव्यं यस्मात्सर्वदा दानशीलस्य कदाचित्तादृशं पात्रमागमिष्यति तत्सर्वस्मात्कृपा तदेनो दुःखात्तारयि ष्यति २२

वारिदस्तृप्तिमाप्नोति सुखमक्षयमन्नदः तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् २२९

वारिद इति जलदः तृप्तिमाप्नोति क्षुत्पिपासादिवर्जितं सुखमन्नदः प्राप्नोति तिलप्रदः इष्टां प्रजामाप्नोति दीपदश्चक्षुरुत्तमं प्राप्नोति २२९ ॥

भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् २३०

भूमिद इति भूमिदो भूमिं गाप्नोति दीर्घमायुः सुवर्णदः चिरंजीवितम् गृहदः श्रेष्ठानि वेश्मानि रूप्यदः सकलजननयनमनोहरं रूपं लभते २३०

वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम् २३१ ॥

वासोद इति वस्त्रदश्चन्द्रसमानलोकतां प्राप्नोति चन्द्रलोके चन्द्रसमविभूतिर्वसतीति एवमेवाश्विलोकं प्राप्नोति अनडुहः बलीवर्दस्य दाता प्रकृष्टां श्रियं पुष्टां गोदो ब्रध्नस्य सूर्यस्य लोकं प्राप्नोति २३१

यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसार्ष्टितां २३२

यानशय्येति रथादियानस्य शय्यायाश्च दाता भार्यां शुभां अभयप्रदः प्राणिनामहिंसकः ऐश्वर्यं धान्यस्य व्रीहियवमाषमुद्गादिकस्य दाता शाश्वत
सुखम् ब्रह्मवेदस्तत्प्रदो वेदस्याध्यापको व्याख्याता च ब्राह्मणः सार्ष्टितां समानगतिं तेन तुल्यतां प्राप्नोति २३२ ॥

सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते वार्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषाम् २३३ ॥

सर्वेषामिति उदकान्नधेनुभूमिवस्त्रतिलसुवर्णघृतादीनां सर्वेषामेव यानि दानानि तेषां मध्यात् वेददानं विशिष्यते प्रकृष्टफलं दं भवति २३३

येन येन तु भावेन यद्यद्दानं प्रयच्छति तत्तत्तेनैव भावेन प्राप्नोति प्रतिपूजितः २३४ येन येनेति ग्रवथा मोन शतु हर्षः येन ॥
येनैव भावेनाभिप्रायेण फलाभिसंधिकः स्वर्गो मे स्यादिति मुमुक्षुर्मोक्षाभिप्रायेण निष्कामो यद्यद्दानं ददाति तेनैव भावेनोपलक्षितं तस्मै तद्दानफलं प्रा

योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव च तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये २३५ प्राप्नोति तस्मात् प्रतिपूजितः सन् प्राप्नोति ॥
योऽर्चितमिति यः श्रद्धापूर्वकमेव दानं ददाति यश्च प्रतिग्रहीता श्रद्धापूर्वकमेव दत्तं प्रतिगृह्णाति तावुभौ स्वर्गं गच्छतः अर्चितदानप्रतिग्रहेण नरकं प्रा
प्नोति प्रतिग्रहे अर्चितमेव मया ग्रहीतव्यं नाम यथेति नियमात्म फललाभो न विरुद्धः २३५ ॥

न विस्मयेत तपसा वदेदिष्ट्वा च नानृतम् नार्तोऽप्यपवदेद्विप्रान्न दत्त्वा परिकीर्तयेत् २३६ ॥
न विस्मयेतेति चान्द्रायणादितपसा कृतेन कथं मयेदं दुष्करमनुष्ठितमिति विस्मयं न कुर्यात् कृत्वा नानृतं वदेत् कृतेऽपि प्रकृष्टे यज्ञे यतः न वदे
निषेधे कृतार्थाय सुवर्णनिषेधः ब्राह्मणैः पीडितोऽपि न तान्निन्देत् गवादिकं च दत्त्वा मयेदं दत्तमिति परस्मै न कथयेत् २३६ ॥

यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् आयुर्विप्रापवादेन दानं च परिकीर्तनात् २३७ ॥
यज्ञ इति अनृतेन हेतुना यज्ञः क्षरति सम्यगेनैव स तत्फलं साधयति एवं तपःप्रभृतिदानेन च यो ऽसौ विप्रनिन्दया चायुः क्षीयते २३७ ॥

धर्मं शनैः सञ्चिनुयाद्वल्मीकमिव पुत्तिकाः परलोकसहायार्थं सर्वभूतान्यपीडयन् २३८
धर्ममिति सर्वप्राणिनामपीडां परिहरन् परलोकसहायार्थं यथाशक्तिः शनैः शनैर्धर्ममनुतिष्ठेत् यथा पुत्तिकाः पिपीलिकाः प्रभेदाः शनैः शनैर्महान्तं

नामुत्र हि सहायार्थं पिता माता च तिष्ठतः न पुत्रदारं न ज्ञातिर्धर्मस्तिष्ठति केवलः २३९ मृत्तिकाकूटं संचिन्वन्ति २३८
नामुत्रेति यस्मात् परलोके सहायकार्यसिद्ध्यर्थं न पितृमातृपुत्रपत्नीज्ञातयस्तिष्ठन्ति किं तु धर्म एवैकोऽवतिष्ठते धर्मो नोपकारार्थं भवतिष्ठते तस्मात्तु प्रा

एकः प्रजायते जन्तुरेक एव प्रलीयते एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् २४० दिव्यापि सहायकारकं धर्मम
अनुतिष्ठेत् २३९
एक इति एक एव प्राणी उत्पद्यते नं बान्धवैः सहितः एक एव च म्रियते सुकृतफलमपि स्वर्गादिकं दुरितफलं च नरकादिकं एव भु
ङ्क्ते न पुत्रादिभिः सह तस्मात् पुत्रादिभिः सह तस्मात् पुत्राद्यपेक्षया पि धर्मं न त्यजेत् २४० ॥

मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति २४१ ॥
मृतमिति मृतं शरीरं मनः प्राणादि रहितं काष्ठवदचेतनं भूमौ त्यक्त्वा पराङ्मुखा बान्धवा यान्ति न मृतं जीवमनुयान्ति धर्मस्तमनुगच्छति २४१

74A

तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः धर्मेण हि सहायेन तमस्तरति दुस्तरं २४२ ॥ तस्मादिति यस्माद्धर्मेणाप्य सहायेन तम
स्तरति मोक्षः कालादि दुःखं तरति तस्माद्धर्मं सहायभावेन नित्यं शनैः शनैः रनुतिष्ठेत् २४२ धर्मप्रधानं पुरुषं तपसा हतकिल्बिषं परलोकं नयत्याशु भा
स्वंतं खशरीरिणं २४३ धर्मप्रधानमिति धर्मपरं पुरुषं देवादुपजातेऽपि पापे प्रायश्चित्तादि तपसा क्षपित पापं दीप्तिमंतं प्रकृतत्वं पुरुषं प्रकाशमानं परलोकं
दिव्यं परलोकं नयति ... ब्रह्मशरीरी ... यथा ... नयति २४३ ॥
इत्यनुष्ठानं ... धर्ममनुतिष्ठेत् ...
उत्तमैरुत्तमैर्नित्यं संबंधानाचरेत्सह निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् २४४ उत्तमैरिति कुलमुत्कर्षं नेतुमिच्छन्नित्य
...
उत्तमानुत्तमानेव गच्छन् हीनांस्तु वर्जयन् ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम् २४५ ... २४५
... ब्राह्मणः श्रेष्ठतां गच्छति प्रत्यवायेन विपरीताचारेण हीनैः सह संबंधे ... शूद्रत्वमेति २४५ ॥
दृढकारी मृदुर्दान्तः क्रूराचारैरसंवसन् अहिंस्रो दमदानाभ्यां जयेत्स्वर्गं तथाव्रतः २४६ दृढकारीति प्रारब्धमापादयिता दृढका
री मृदुरनिष्ठुरः ... क्रूराचारैः ... अहिंसानिरतः तथा ... नियमद
... २४६ ...
एधोदकं मूलफलमन्नमभ्युद्यतं च यत् सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणां २४७ ...
एधोदकमिति ... मूलफलमन्नं ...
... पितृनिग्रहणीयात ... २४७
आहृताभ्युद्यतां भिक्षां पुरस्तादप्रचोदितां मेने प्रजापतिर्ग्राह्यामपि दुष्कृतकर्मणः २४८ ॥
आहृताभ्युद्यतामिति ... प्रजापतिर्ग्राह्यां मेने २४८
नाश्नंति पितरस्तस्य दश वर्षाणि पंच च न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते २४९ ॥
नाश्नंतीति ... दश वर्षाणि पंच च पितरो न भुंजते न च ... हव्यमग्निर्वहति देवान्प्रापयति ... २४९
शय्यां गृहान्कुशान्गंधानपः पुष्पं मणीन्दधि धाना मत्स्यान्पयो मांसं शाकं चैव न निर्णुदेत् २५० शय्यामिति ...
... मत्स्यान् पयः ... २५०

म.नु.
टी.
७५ 75

गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन् सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः २५१ ॥

गुरूनिति मातापित्रादीन्गुरून् भृत्यांश्च भार्यादीनवश्यभर्तव्यान् उद्धर्तुमिच्छन् पितृदेवतादीनर्चयिष्यन् सर्वतः शूद्रादेरसाधुभ्यश्च प्रतिगृह्णीयात् न तु तेन तथा स्वयं वर्तेत २५१

गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन् आत्मनो वृत्तिमन्विच्छन्गृह्णीयात्साधुतः सदा २५२

गुरुष्विति मातापित्रादिषु मृतेषु तैर्वा जीवद्भिरपि सयोगाद्वा स्थितैर्विना गृहान्तरे वसन्नात्मनो वृत्तिमन्विच्छन्सर्वदा साधुभ्यो गृह्णीयादेव २५२

आर्धिकः कुलमित्रं च गोपालो दासनापितौ एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् २५३ ॥

आर्धिकः कर्षकः सेवाविशेषात् योऽस्य कृषिं करोति स तस्य भोज्यान्नः एवं स्वकुलस्य मित्रं योऽस्य गोपालो योऽस्य दासो योऽस्य नापितः ऽरो ति यो यस्मिन्नात्मानं निवेदयति उगोतिरहं त्वदीयसेवां कुर्वीतेति तस्यामीति शूद्रस्तस्य भोज्यान्नः २५३ ॥

यादृशोऽस्य भवेदात्मा यादृशं च चिकीर्षितम् यथा चोपचरेदेनं तथात्मानं निवेदयेत् २५४

यथात्मनिवेदनं शूद्रेण कर्तव्यं तदाह यादृश इति अस्य शूद्रस्य कुलशीलादिभिर्यादृश आत्मा स्वरूपं यच्चास्य कर्म कर्तुमीप्सितं यथा चानेन सेवा कर्तव्या तेन प्रकारेणात्मानं कथयेत् २५४

योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते स पापकृत्तमो लोके स्तेन आत्मापहारकः २५५

योऽन्यथेति यदिति सामान्यनिर्देशात् ब्राह्मणः शूद्रादमोपि यः कश्चित्कुलादिभिरन्यथाभूतमात्मानमन्यथा साधुषु कथयति स लोकेऽतिशयेन पापकारी चौरः यस्मादात्मापहारकः अन्यः स्तेनो द्रव्यान्तराणि अपहरति अयं तु सर्वश्रेष्ठमात्मानमेवापहरति २५५ ॥

वाच्यर्था नियताः सर्वे वाङ्मूला वाग्विनिःसृताः तांस्तु यः स्तेनयेद्वाचं स सर्वस्तेयकृन्नरः २५६ ॥

वाच्यर्था इति सर्वेऽर्थाः शब्देषु नियता वाच्यत्वेन नियता वाच्येन नियताः वाङ्मूलाश्च शब्दा येषां प्रतिपत्तौ शब्देभ्य एव प्रतीयन्ते प्रतीतिद्वारेण शब्देभ्य एवावगम्य चानुष्ठीयन्ते इति वाग्विनिर्गतास्ते उच्यन्ते अतएव वेदशब्देभ्य एवादावनिर्वर्तनोपि वेदशब्दमूला एवोक्ता अतो य एतां वाचं स्तेनयेत् स्वार्थव्यभिचारिणीं वाचयति स नरः सर्वार्थस्तेयकृद्भवति २५६ ॥

महर्षिपितृदेवानां गत्वानृण्यं यथाविधि पुत्रे सर्वं समासज्य वसेन्माध्यस्थ्यमाश्रितः २५७ ॥

75A

महर्षीति गृहस्थस्यैव संन्यासप्रकारोऽयमुच्यते महर्षीणां स्वाध्यायेन पितॄणां श्राद्धेन देवानां यज्ञैर्यथाशास्त्रमानृण्यं गतो यो।
पुत्रे सर्वं कुटुम्बचिन्ताभारमारोप्य माध्यस्थ्यमाश्रितः पुत्रदारधनादौ संसक्तमना ब्रह्मबुद्ध्या सर्वत्र समदर्शनो गृह एव वसेत् २५७ ॥

एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति २५७

एकाकीति काम्यकर्मणां यथार्जनं सर्वकृतसंन्यासः सर्वाध्यायेषु प्रमाणाः प्रतिपादितवृत्तिरेकाकी निर्जनदेशे आत्महितं जीवस्य ब्रह्मभावं।
चिन्तयेत् सर्वदा ध्यायेत् यस्मात् ध्यायन् आत्मसाक्षात्कारेण परं श्रेयो मोक्षलक्षणं प्राप्नोति २५८ ॥

एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती
स्नातकव्रतकल्पश्च सत्त्ववृद्धिकरः शुभः २५९

एषेति प्रथमाध्यायार्थोपसंहारः एषा स्नानादिवृत्तिर्गृहस्थस्य ब्राह्मणस्योक्ता शाश्वती नित्या प्रतिपादिता नित्यावसाने स्नातकव्रतविधिश्च सत्त्वगुण
वृद्धिकरः प्रशस्त उक्तः। २५९

अनेन विप्रो वृत्तेन वर्तयन्वेदशास्त्रवित् व्यपेतकल्मषो
नित्यं ब्रह्मलोके महीयते २६० इति मानवे धर्मशास्त्रे भृगु
प्रोक्तायां संहितायां चतुर्थोऽध्यायः ४ ॥

अनेनेति सर्वस्योक्तस्य फलकथनमिदं अनेन शास्त्रोक्ताचारेण वेदविद्ब्राह्मणो वर्तमानो नित्यकर्मानुष्ठानात्क्षीणपापः सन्स्वकर्मानुप्रकर्षेण ब्रह्मैव
लोकः तस्मिन् लोके महिमानं सर्वोत्कर्षं प्राप्नोति २६० इति श्रीकुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यां चतुर्थोऽध्यायः ४ ॥

म.त्तु.
टी.
७८
76

श्रुत्वैतानृषयो धर्मान् स्नातकस्य यथोदितान् इदमूचुर्महात्मानमनलप्रभवं भृगुम् १

श्रुत्वैतानिति ऋषयः स्नातकस्यैतान् यथोदितधर्मान् श्रुत्वा महात्मानं परमार्थपरं भृगुमिदं वचनमब्रुवन् यद्यपि प्रथमाध्याये दशप्रजाप
तिमध्ये भृगुं नारदमेव चेति भृगुर्हिरपि मनुतनयोक्तस्तथापि कल्पभेदेनाग्निप्रभवत्वमप्यविरुद्धं तथा च श्रुतिः तस्य यद्रेतसः प्रथममदीप्यत तदसावा।
दित्योऽभवत् यद्द्वितीयमासीद्भृगुरिति अनलप्रभवत्वाद्देवं महसत्वमाद्भृगुः १॥

एवं यथोक्तं विप्राणां स्वधर्ममनुतिष्ठताम् कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो २॥

एवमिति एवं यथोक्तं स्वधर्ममनुतिष्ठतां ब्राह्मणानां श्रुतिशास्त्रज्ञानां वेदोदितायुषः पूर्वं कथं मृत्युः प्रभवति आयुरल्पत्वहेतोः धर्माचरणस्याभावा
त् सकलसंशयोच्छेदनसमर्थत्वात्प्रभो इति संबोधनम् २

स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः श्रूयतां येन दोषेण मृत्युर्विप्राञ्जिघांसति ३

स तानिति स मनोः पुत्रो भृगुर्धर्मस्वभावो येन दोषेणाल्पकाले विप्रान् हन्तुमिच्छति मृत्युस्स दोषः श्रूयतामित्येवं तान्महर्षीन् जगाद ३॥

अनभ्यासेन वेदानामाचारस्य च वर्जनात् आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति ४॥

अनभ्यासेति वेदानामनभ्यासात् स्वीयाचारपरित्यागात् सामर्थ्ये सत्यवश्यकर्तव्याकरणात् उत्साहलक्षणादालस्यात् अन्नीयदोषाच्च मृत्युर्विप्रान्हन्तुमि।
च्छति एतेषामधर्मोत्पादनद्वारेणायुःक्षयहेतुत्वात् ४॥

लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च अभक्ष्याणि द्विजातीनाममेध्यप्रभवाणि च ५॥

वेदानभ्यासादेरुक्तत्वादनुक्तमन्नदोषमाह लशुनमिति लशुनं गृञ्जनपलाण्डू द्वाव्यौ निर्यासाश्च लवकं दशाकानि कवकं छत्राकममेध्यप्रभवानि वि।
ड्जातानि तण्डुलीयादीनि विड्जातानीति याज्ञवल्क्यवचनात् एतानि द्विजातीनामभक्ष्याणि द्विजातिग्रहणं शूद्रस्य दोषाभावार्थम् ५॥

लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथा शेलुं गव्यं च पेयूषं प्रयत्नेन विवर्जयेत् ६ ॥

लोहितानिति लोहितवर्णान्वृक्षनिर्यासान् कठिनतां यातान् व्रश्चनं तत्प्रभवान् लोहितानपि तथा वर्जयेदिति शेषः श्रुतिः। अथो खलु य एव लोहितो यो वा व्रश्चनान्निर्यसति तस्य नाश्यकाममन्यस्येति शेलुर्बहुवारकफलं गोमयं पेयूषं च नवप्रसूताया गोः क्षीरमग्निसंयोगात्कठिनं भवति एतान्प्रयत्नतस्त्यजेत् अनिर्दशाया गोः क्षीरमित्यनेनैव पेयूषस्यापि निषेधसिद्धावधिकदोषज्ञापनार्थं प्रायश्चित्तगौरवज्ञापनार्थं पुनरुद्देशः अतः प्रयत्नतस्त्यजेदित्युक्तम् ६ ॥

वृथाकृसरसंयावपायसापूपमेव च अनुपाकृतमांसानि देवान्नानि हवींषि च ७ ॥

वृथाकृसरेति देवताद्युद्देशेनात्मार्थं यत्पच्यते तद्वृथा कृसरस्तिलेन सहसिद्ध ओदनः तथा च छन्दोगपरिशिष्टं तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते संयावः घृतक्षीरगुडगोधूमचूर्णसिद्ध उत्कारिकेति प्रसिद्धः क्षीरतण्डुलमिश्रः पायसः अपूपः पिष्टकः एतान्वृथापक्वान्विवर्जयेत्। पशुयागादौ मन्त्रबहुलेन यज्ञीयपशोः स्पर्शनमुपाकरणं तद्रहितः पशुरनुपाकृतः तस्य मांसानि देवान्नानि नैवेद्यार्थमन्नानि प्राङ्निवेदनात् हवींषि पुरोडाशादीनि होमात्प्राग्वर्जयेत् अनुपाकृतमांसानीत्यत्र विशेषनिषेधदर्शनात् अन्यत्र वृथामांसमिति सामान्यनिषेधो गोबलीवर्दन्यायेनानुपाकृतमांसेतरश्राद्धाद्युद्देशमांसभक्षणपर्यवस्यति ७ ॥

अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः ८ ॥

अनिर्दशाया इति प्रसूताया अनिर्दशाया गोरुग्रं गोरिति निषेधो पशूपलक्षणार्थं तेनाजामहिष्योरपि दशाहमध्ये प्रतिषेधः तथा च यमः। अनिर्दशाहं गोःक्षीरमाजं माहिषमेव च [illegible] एकवारं सन्धिमेषभवं सन्धिमेषभवं सन्धिनी या ऋतुमती वृषमिच्छति तस्याः क्षीरं तथा च हारीतः सन्धिनीं वृषस्यन्तीं तस्याः पयो न पिबेत् ऋतुमती भवति विवत्सायाः मृतवत्सायाः असन्निहितवत्सायाश्च क्षीरं वर्जयेत् धेन्वा पिकरणन्यायेन वत्सग्रहणादेवं गोविलक्षणाः पुनर्गोग्रहणं गोरेवान्तर्गता अजामहिष्योरिति ज्ञापनार्थं ८ ॥

आरण्यानां च सर्वेषां मृगाणां माहिषं विना स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ९ ॥

आरण्यानां चेति मृगशब्दोऽत्र महिषपर्युदासात्पशुमात्रपरः महिषं क्षीरं वर्जयित्वा सर्वेषामारण्यपशूनां हस्त्यादीनां क्षीरं स्त्रीक्षीरं च सर्वाणि शुक्तानि वर्जनीयानि स्वभावतो मधुरादिरसानि यानि कालवशेनोदकादिना चाम्लीभवंति तानि शुक्तशब्दवाच्यानि शुक्तस्याम्लविकारत्वेन निवृत्त्यर्थं शुक्तेऽपि शुक्तप्रतिषेधे दध्यादिप्रतिप्रसवार्थं पुनरिहोच्यते ९ ॥

म. नु. मे. ७७

77

दधिभक्ष्यंचशुक्तेषुसर्वंचदधिसंभवम् यानिचैवाभिषूयन्तेपुष्पमूलफलैः शुभैः १० ॥

दधिभक्ष्यंचेति शुक्तेषुमध्येदधिभक्ष्यंदधिसंभवंचसर्वंतक्रादियानितुपुष्पमूलफलैरुदकेनसंधीयन्तेतानिचभक्षणीयानितुपुष्पमूलफलै। रुदकेनसंधीयन्ते तानिचभक्षणीयानि शुभैरितिविशेषणोपादानात् मोहादिविकारकारिभिः कृतसंधानस्य प्रतिषेधः तथाच बृहस्प। तिः कंदमूलफलैः पुष्पैः शस्तैः शुक्तंतुयत्कृतम् अविकारिभवेद्द्रव्यमभक्ष्यंतेहिकारकृत १० ॥

क्रव्यादान्शकुनीन्सर्वान्तथाग्रामनिवासिनः अनिर्दिष्टांश्चैकशफांष्टिट्टिभंचविवर्जयेत् ११

क्रव्यादानिति आममांसंयेभक्षयंतितेक्रव्यादास्तान्सर्वान् गृध्रादीन् पक्षिणोवर्जयेत् तथाग्रामनिवासिनश्चपक्षिणःपारावतादीं तथाकृत्तोकेचिदेकशफाभक्ष्यत्वेननदिष्टाः तथाचाहेवाड्वमालभेतनप्यचमांसमश्नीयादितिकेचित्वानिर्दिष्टारासभादयः तेषांमांस वर्जयेत् येपियज्ञांगत्वेन विहितास्तेषामपि यज्ञएवमांसमक्षणानसर्वदा टिटिभाख्यंचपक्षिणंवर्जयेत् ११ ॥

कलविंकंप्लवंहंसंचक्राह्वंग्रामकुक्कुटं सारसंरज्जुवालंचदात्यूहंशुकसारिके १२ ॥

कलविंकमिति कलविंकचटकंतस्यग्रामारण्यभेदवासिनात् नग्रामवासिनएवनिषेधः इमारण्यस्याप्यभक्ष्यतार्थंजातिशब्देननिषे धः प्लवाख्यपक्षिणान्तथाहंसचक्रवाकग्राममकुक्कुटसारसरज्जुवालदात्यूहशुकसारिकाख्यान्पक्षिणोवर्जयेत् यद्यपिजालपादेनि षेधेनैवहंसचक्रवाकयोरपिनिषेधसिद्धो पृथनिषेधोऽस्मिन्नापदिजालपादानांविकल्पार्थः सचक्रवाकस्यनोविकल्पः आपदिभक्षा नत्वानपदिइत्थंविकल्पस्यागानएवग्रामेः ग्रामकुक्कुटेतग्रामग्रहणामारण्यकुक्कुटभक्षणानार्थंततेनस्मानिविकग्रामवासि विकल्पार्थंस्यदानुगतप्रयोजनसंभवेसतिवाक्यांतरगतविशेषणवयारण्यपरतस्मान्याय्यत्वात् १२ ॥

प्रतुदान्जालपादांश्चकोयष्टिनखविष्किरान् निमज्जतश्चमत्स्यादान्सौनंवल्लूरमेवच १३ ॥

प्रतुदानिति प्रतुद्यचंच्वायेभक्षयन्तितान् दार्वाघाटादीन्जालपादानितिजालाकारपादांशरारिप्रभृतीन्कोयष्ट्याख्यपक्षिणाम न खविष्किरान्चैविकीर्ष्ययेभक्षयन्तितान्भयतुत्वान्तारण्यकुक्कुटादिव्यतिरिक्तान्श्येनादीन्नयथानिमज्ज्येमत्स्यान्खादंतितान् नक्रप्रभृतीन्सूनामारणस्थानेतत्रस्थितयत्मांसंभक्ष्यमपिवल्लूरंशुष्कमांसंपतानिवर्जयेत् १३ ॥

77A

बकं चैव बलाकां च काकोलं खञ्जरीटकं मत्स्यादान्विड्वराहांश्च मत्स्यानेव च सर्वशः १४ ॥

बकं चैवेति बकबलाकाद्रोणकाकखञ्जनान् तथा मत्स्यादान्पक्षिव्यतिरिक्तानपि नक्रादीन् विड्वराहांश्च विडिति विशेषणाद्ग्राम्यशूकरान्। भक्ष्यत्वेनानुक्तान्मत्स्यांश्च सर्वान्वर्जयेत् १४

यो यस्य मांसमश्नाति स तन्मांसाद उच्यते मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान्विवर्जयेत् १५

मत्स्यभक्षणनिन्दामाह यो यस्येति यो यदीयं मांसं खादति स तन्मांसाद एव परं व्यपदिश्यते यथा मार्जारो मूषिकादः मत्स्यादः पुनः सर्वमांसभक्षकत्वेन व्यपदेष्टुं योग्यः तस्मान्मत्स्यान्न खादेत् १५॥

पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः राजीवान्सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः १६

इदानीं भक्ष्यमत्स्यानाह पाठीनरोहिताविति पाठीनरोहितौ मत्स्यभेदौ भक्षणीयौ हव्यकव्ययोर्नियुक्ताविति समस्तवाक्यमार्गभक्षणानिषिद्धोपलक्षणार्थं तेन श्राद्धेऽन्यदापि वा दोषः तथा राजीवाख्यान् सिंहतुण्डांश्च सशल्कांश्च सर्वान्वक्ष्यमाणलक्षणोपेतानद्यात् मेधातिथिगोविन्दराजौ तु पाठीनरोहितौ दैवपैत्र्यादिकर्मणि नियुक्तावेवादनीयौ न तु मत्स्यादा राजीवसिंहतुण्डशल्कमत्स्यास्तु हव्यकव्याभ्यामन्यत्रापि । भक्षणीया इत्यावक्षतः तन्न मनोहरं पाठीनरोहितौ श्राद्धे नियुक्तौ श्राद्धभोक्त्रैव भक्षणीयौ न तु श्राद्धं विनापि भक्ष्याविति प्रमाणाभावात् सर्वैश्च रोहितपाठीनराजीवादीनां तुल्यत्वेनाभिधानात् तथा च शंखः राजीवाः सिंहतुण्डाश्च सशल्काश्च तथैव च पाठीनरोहितौ चापि भक्ष्या। मत्स्येषु कीर्तिताः याज्ञवल्क्यः भक्ष्याः पञ्चनखाः सेधा गोधाः कच्छपशल्यकाः शशश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः तथा पाठीनराजीवसशल्काश्च द्विजातिभिः हारीतः सशल्कान्मत्स्यान् मायापयत्रान भक्षयत एवं च भोक्त्रैवादनीयौ न कर्त्रापि श्राद्धे पाठीनरोहितौ राजीवाश्च सशल्कानीति व्याख्यानं मुनिसम्मतं १६

न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान् भक्ष्येष्वपि समुद्दिष्टान्सर्वान्पञ्चनखांस्तथा १७

न भक्षयेदिति नियमकाकिनः श्येनादयः सर्पादयस्तानेकचरान् तथा ये अभियुक्तैरपि नामजातिभेदेन यथार्थं विभागतश्च मृगपक्षिणो न ज्ञायन्ते तानज्ञातान् भक्ष्येष्वपि समुद्दिष्टानिति मामाम विशेषनिषेधाभावेन भक्ष्यत्वेन विहितान् भक्ष्यत्वेन समुद्दिष्टांश्च तथा सर्वान् एवं नखान्पाटीनं न भक्षयेत् १७॥

श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा भक्ष्यान्पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः १८

म.नु.
से.
७८
78

प्रत्यग्निप्रसवमाह स्वविषयमिति श्वाविधं सेधाख्यप्राणिभेदं शल्यकं तत्सदृशं स्थूललोमानं तथा गोधा गण्डक कच्छप शशान् पञ्चनखेषु भक्ष्यान्
मन्वादयः प्राहुः तथा उष्ट्रवर्जितानेकतोदन्तयुतान् १८॥

छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः १९

छत्राकमिति कवकं ग्रामसूकरलशुनादीनां प्रसङ्गमेव बुद्धिपूर्वकं गुरुप्रायश्चित्तोपदेशात् अभ्यासतो भक्षयित्वा द्विजातिः पतति तत्र पतित
प्रायश्चित्तं कुर्यात् गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षडिति १९॥ अमत्यैतानि षड्जग्ध्वा कृच्छ्रं सान्तपनं चरेत् यति

चान्द्रायणं वापि शेषेषूपवसेदहः २०

अमत्येति एतानि छत्राकादीनि षट् अबुद्धिपूर्वकं भक्षयित्वा
न्वयस्त्विति तेन साहित्यस्याविवक्षितत्वात् एकादशाध्याये वक्ष्यमाणस्वरूपं कृच्छ्रसान्तपनं यतिचान्द्रायणं वाचरेत् एतद्व्यति
रिक्तेषु लोहितवृक्षनिर्यासादिषु प्रत्येकं भक्षणादहोरात्रोपवासं कुर्यात् छत्राकादीनां च प्रायश्चित्तोपदेशो वर्जनार्थः शेषेषूपवसेदहरि
तिलाचवार्थं तत्र हि क्रियमाणो लोहितवृक्षनिर्यासग्रहणमपि कर्तव्यं स्यात् २०॥

संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः २१॥

संवत्सरस्येति द्विजोत्तमपदं द्विजातिपरं त्रयाणां प्रकृतत्वात् एतदुक्तं द्विजातीनामिच्छया संहाराच्च द्विजातिः संवत्सरमध्ये एकमपि कृच्छ्रं
प्राजापत्यं नानातस्तादात्म्यमज्ञातभक्षणादोषोपशमनार्थमनुतिष्ठेत् ज्ञातस्य पुनः अभक्ष्यभक्षणदोषस्य विशेषतोऽयं त्रयाद्विहितम
नेदेव प्रायश्चित्तं कुर्यात् एतत्त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्मषम् अद्भिर्निर्णिक्तं वचसा प्रशस्तमिति तदुक्तं द्विप्रक
रणपठितप्रायश्चित्तव्यतिरिक्तं द्रव्यशुद्धिविधेयेऽवतिष्ठते २१॥

यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरा २२

इदानीं भक्षणप्रसङ्गेन यागाद्यर्थं हिंसामप्यनुज्ञानाति यज्ञार्थमिति ब्राह्मणादिभिर्यागार्थं प्रशस्तास्तत्र विहिता मृगपक्षिणो वध्याः भृ
त्यानां चावश्यभरणीयानाम् वृद्धमातापित्रादीनां संवर्धनार्थं यस्मादगस्त्यो मुनिः पूर्वं तथा कृतवान् परकृतिरूपोऽयमर्थवादः २२॥

बभूवुर्हि पुरोडाशा भक्ष्याणां मृगपक्षिणां पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च २३॥

बभूवुरिति यस्मात्पुरातनेष्वपि ऋषिकर्तृकयज्ञेषु च भक्ष्याणां मृगपक्षिणां मांसेन पुरोडाशा अभवन् तस्माद्यज्ञार्थमधुनातनैरपि मृगप
क्षिणो वध्याः २३॥ यत्किंचित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम् तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत् २४॥

इदानीं पर्युषितप्रतिप्रसवार्थमाह यत्किंचिदिति यत्किंचित्खाद्यविशदम् अभ्यवहार्यं मोदकादि अगर्हितम् उपघातेनागर्हितम् तत्पर्यु
षितम् रात्र्यन्तरितमपि घृततैलदध्यादिसंयुक्तं भक्षणीयम् तत्प्रायोवचनात्स्नेहसंयुक्तं तत्पर्युषितं भक्षणीयमिति व्याख्येयं तथा स
ति विशेषस्य स्नेहसंयोगावश्यंभावात् यत्किंचित्स्नेहसंयुक्तमित्यनेनैव भक्षणसिद्धेर्हविःशेषस्य यद्भवेदित्यनर्थकं स्यात् स्मृत्यन्त
रे भक्षणकालपरिमितत्वमुपदिश्यते तथा च यमः मक्षुरमाषसंयुक्तं तथा पर्युषितं च यत् तत्र स्मालितं कृत्वा भुंजीत गोमिचोरि
तम् हविःशेषं च पुरोडाशादि पर्युषितमपि भोजनकाले स्नेहसंयोगशून्यमेव भक्षणीयं पृथगुपदेशात् २४॥

चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः यवगोधूमजं सर्वं पयसश्चैव विक्रिया २५॥

चिरस्थितमिति अनेकरात्रान्तरितान्यपि यवगोधूमदुग्धविकाराः स्नेहसंयोगरहिता अपि द्विजातिभिर्भक्षणीयाः २५॥

एतदुक्तं द्विजातीनां भक्ष्याभक्ष्यमशेषतः मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्जने २६॥

एतदुक्तमिति एतद्द्विजातीनां भक्ष्याभक्ष्यमुक्तम् अतऊर्द्ध्वं मांसस्य भक्षणवर्जनेन विधानं निःशेषं वक्ष्यामि २६॥

प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया यथाविधि नियुक्तस्तु प्राणानामेव चात्यये २७॥

प्रोक्षितमिति प्रोक्षितं भक्षयेदिति परिसंख्या वा स्यान्नियमविधिर्वा तत्र परिसंख्याने प्रोक्षितादन्यन्न भक्षणीयमिति वाक्यार्थः स्यात्
नुपाकृतमांसानीत्यनेनैव निषिद्धत्वात् तस्मान्मन्त्रकृतप्रोक्षणादिसंस्कारयुक्तं यज्ञहुतपशुमांसं भक्षणीयमिदम् यज्ञाङ्गविधीयते
प्रत्यवायसंस्कृतानामपि ... ब्राह्मणानां च यदा कामना भवति तदावश्यं मांसं भोक्तव्यमिति तदपि नियमतएव क
दाचिद्भक्षयेत् सकृद्ब्राह्मणकाम्ययेति नियमवचनात् तथा श्राद्धे मधुपर्के च पशुमांसं मधुपर्क इति गृह्यवचनात् नियुक्तस्तु यथान्याय।

म.वृ.
से.
७९
79

ं।स्यति न स दोषं वक्ष्यति प्राणात्यये वाहारान्तराभावनिमित्तके व्याधिहेतुके वा नियमेन मांसं भक्षयेत् २७ ॥

प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयेत् स्थावरं जंगमं चैव सर्वं प्राणस्य भोजनम् २८ ॥

प्राणात्यये मांसभक्षणानुवादमाह प्राणस्यान्नमिदमिति प्राणानीति प्राणो जीवः शरीरान्तर्गतो भोक्ता तस्यादनीयं सर्वमिदं ब्रह्मा कल्पि-
तवान् किं तदाह जंगमं पश्वादि स्थावरं व्रीहियवादि स्थावरं व्रीहियवादि सर्वं सम्भोजनं तस्मात् प्राणात्यये जीवो मांसं भक्षयेत् २८

चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः अहस्ताश्च सहस्तानां शूराणां चैव भीरवः २९ ॥

प्राणस्यान्नमिदं सर्वमित्येतत् प्रपंचयति चराणामिति जंगमानां हरिणादीनाम् अजंगमास्तृणादयः सहस्तानां मनुष्यादीनाम् अहस्ता।
मत्स्यादयः शूराणां सिंहादीनां भीरवो हस्त्यादयः अदनीया एतत्प्राणात्ययविधानार्थमेव सृष्टं २९ ॥

नात्ता दुष्यत्यदन्नाद्यान् प्राणिनोऽहन्यहन्यपि धात्रैव सृष्टा ह्याद्याश्च प्राणिनोऽत्तार एव च ३० ॥

नात्तेति भक्षयिता भक्षणार्हान् प्राणिनः प्रत्यहमपि भक्षयन् दोषं प्राप्नोति यस्माद्विधात्रैव भक्षणार्हा भक्षयितारश्च निर्मिता इति विभि-
न्नेति के: प्राणात्यये मांसभक्षणस्तुतिरियं ३० यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ३१

प्रोक्षितभक्षणनियमार्थवादमाह यज्ञायेति यज्ञसम्पत्त्यर्थं तदंगभूतं मांसस्य जग्धिर्भक्षणाय तदेव मनुष्याणां दैवकार्यमिति … ।
रागप्राप्त्या आत्मार्थमेव पशुव्यापादनं मांसभक्षणेषु प्रवृत्ती राक्षसोचितमनुष्ठानम् इत्यत्राग्रे वक्ष्यमाणमांसभक्षणनिवृत्त्यनुवादः ३१

क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा देवान् पितॄंश्चार्चयित्वा खादन्मांसं न दुष्यति ३२ ॥

क्रीत्वेति क्रीत्वा आत्मना वोत्पाद्य स्वयमेव वा केनाप्यानीय दत्तं मांसं देवपितॄनभ्यर्च्य खादन् दोषं भक्षयन् न पापं प्राप्नोति अतः प्रोक्षितादिवत्
प्रयभक्षणाविधेदं नियतं भक्षणं न दुष्यतीत्यभिधानात् वर्षे वर्षेऽश्वमेधेन इत्यादिवक्ष्यमाणमांसवर्जनविधिरयं न हि विषयपदावि-
न ३२ ॥ नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः जग्ध्वा ह्यविधिमांसं त्यजे ``` रद्यतेऽवशः ३३ ॥

79A

नाद्यादिति मांसभक्षणानुष्ठाने दोषो नास्ति नापदि न तु देवाद्यर्चनविधानेन विना मांसं भक्षयेत् यस्मादविधानेन यो मांसं खादति स
मृतः सन् यन्मांसमनेन भक्षितं तैः प्राणिभिः परलोके सह भक्ष्यमाणः स्यादयं तदर्थं लोकानुवादः ३३ ॥

न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः यादृशं भवति प्रेत्य वृथा मांसानि खादतः ३४ ॥

न तादृशमिति मृगवधजीविनो व्याधादेर्धनेन निमित्तेन मृगाणां हन्तुर्न तथाविधं पापं भवति यादृशमदेवपितृशेषभूतमांसानि खादतः परलो
के भवतीति पूर्वानुवाद एव ३४॥ नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः स प्रेत्य पशुतां याति संभवानेकविंशतिं ३५

नियुक्तस्त्विति श्राद्धे मधुपर्के च यथाशास्त्रं नियुक्तः सन् यो मनुष्यो मांसं न खादति स मृतः सन्नेकविंशतिजन्मानि पशुर्भवति यथाविधि नियुक्त
स्त्वित्येतन्नियमातिक्रमफलविधानमिदं ३५ ॥ असंस्कृतान्पशून्मंत्रैर्नाद्याद्विप्रः कदाचन मंत्रैस्तु संस्कृतानद्याच्छाश्वतं विधि

मास्थितः ३६ ॥ असंस्कृतानिति वेदविहितमंत्रविनिप्रोक्षणादिसंस्काररहितान्पशून् विप्रादिः कदाचिन्नाश्नीयात् शाश्वतं प्रवाहानादितया
नित्यं पशुयागादिविधिमास्थितो मंत्रसंस्कृतानश्नीयादिति प्रोक्षितं मांसं भक्षयेन्मांसमित्येतस्यार्थव्याकारार्थमेतत् ३६ ॥ ॥

कुर्याद्घृतपशुं संगे कुर्यात्पिष्टपशुं तथा न तु वृथा हन्तुं —— पशुमिच्छेत्कदाचन ३७ ॥

कुर्यादिति संगे प्राप्तसंगो पशुभक्षणानुरागो घृतमयीं पिष्टमयीं वा पशुप्रतिकृतिं कृत्वा खादयेत् न पुनर्देवताद्युद्देशं विनैव पशून्क
दाचिदपि हन्तुमिच्छेत् ३७॥ यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणं वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि ` ` ३८

यावन्तीति देवताद्युद्देशमन्तरेणात्मार्थं यः पशून्हंति स वृथापशुघ्नो मृतः सन् यावत्संख्यानि पशुरोमाणि तावत्संख्याकं जन्मनि जन्मनि
मारणं प्राप्नोति तस्माद्वृथा पशून्न हन्यात् तावत्कृत्व इति वचनेनाक्रियाभ्यावृत्तिगणने कृत्वसुच्प्रत्ययः इह ह शब्दः प्राग्भवप्रसिद्धसूचना
र्थः ३८ ॥ यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा यज्ञोऽस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ३९ ॥

यज्ञार्थमिति पशुवधे न दोष इत्याह यज्ञार्थं पशव इति यज्ञसिद्ध्यर्थं प्रजापतिना ब्रह्मणात्मनैवादरेण पशवः सृष्टाः यज्ञश्चाग्नौ प्रास्ताहुतिन्या
यात् सर्वस्यास्य जगतो विवृद्ध्यर्थः तस्माद्यज्ञे वधोऽवध एव तज्जन्यदोषाभावात् ३९ ॥

म.व.
मे.
८ 80

ओषध्यः पशवो वृक्षास्तिर्यंचः पक्षिणस्तथा यज्ञार्थं निधनं प्राप्ताः प्राप्नुवंत्युत्सृतीः पुनः ४० ॥

किंच ओषध्य इति ओषध्यो व्रीहियवाद्याः पशवश्छागाद्या वृक्षा यूपाद्यर्थाः तिर्यंचः कूर्मादयः पक्षिणः कपिंजलाद्या यज्ञार्थं विनाशं गताः पुनरुत्कर्षं प्राप्नुवंति ४०॥ मधुपर्के च यज्ञे च पितृदैवतकर्मणि अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ४१ ॥

मधुपर्के चेति समासो मधुपर्क इति विधानान्मधुपर्के च यज्ञे च ज्योतिष्टोमादौ पित्र्ये दैवे च कर्मणि श्राद्धादौ पशवो हिंसनीयाः नान्यत्रेति मनुरभिहितवान् ४१॥ एष्वर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद्द्विजः आत्मानं च पशुं चैव गमयत्युत्तमां गतिम् ४२

एष्वर्थेष्विति एषु मधुपर्कादिपदार्थेषु पशून् हिंसन् आत्मानं पशुं च उत्तमां गतिं स्वर्गाद्युपभोगयोग्यविलक्षणदेहदेशादिसंबंधं प्रापयति वेदतत्त्वार्थविदिति विद्वदधिकारत्वेऽपि नार्थं तत्त्वाधिकारिके कर्मणि कथमनर्थिकृतस्य पश्वादेरुत्तमगतिप्राप्तिः फलं उच्यते। शास्त्रप्रमाणकत्वात् अस्यार्थस्य पित्र्यधिकारिकायां जातेष्टावनधिकारिणोऽपि पुत्रस्य फलप्राप्तिवत् इहापि पश्वादिगतफलसंभवात् यजमानस्य कारुणिकतया पशुगतफलविशिष्टमेव फलं कामयिष्यति अत एवात्मानं च पशुं चेत्यभिधानात् यजमानव्यापारादेव पशुगतफलसिद्धिरुक्ता ४२॥

गृहे गुरावरण्ये वा निवसन्नात्मवान्द्विजः नावेदविहितां हिंसामापद्यपि समाचरेत् ४३

गृहे गुरावरण्ये वेति गृहाश्रमे ब्रह्मचर्याश्रमे वानप्रस्थाश्रमे च प्रशस्तात्मा द्विजो निवसन् नापद्यपि नाशास्त्रीयां हिंसां समाचरेत् ४३

या वेदविहिता हिंसा नियतास्मिंश्चराचरे अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ४४ ॥

कथं तर्हि तत्त्वे हिंसात्वे वैदिकी देवतादिपशुहिंसा नाधर्मायेत्यत आह या वेदविहितेति याऽस्मिन् विहिता कर्मविशेषदेशकालादिनियता अस्मिन् जगति स्थावरजंगमात्मनि अहिंसामेव तां जानीयात् हिंसाजन्याधर्मविरहात् देहपशुहननमधर्मः प्राणिहननत्वात् ब्राह्मणहननवत् इत्याद्यनुमानम् उपजीव्य शास्त्रबाधादेव न प्रवर्तते दृष्टांतीकृतब्राह्मणहननस्याप्यधर्मत्वे शास्त्रमेवोपजीव्यं वेदाद्धर्मो हि निर्बभौ यस्माद्वेदमूलप्रमाणकोऽयं धर्मो वेदाद्वैदिकविनिःशेषेण प्रकाशतां गतः ४४॥

योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया स जीवंश्च मृतश्चैव न क्वचित्सुखमेधते ४५ ॥

योऽहिंसकानीति योऽनुपघातकान् प्राणिनः हरिणादीनात्मसुखेच्छया मारयति स इह लोके परलोके च न सुखेन वर्द्धते ४५ ॥

यो बन्धनवधक्लेशान्प्राणिनां न चिकीर्षति स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते ४६ ॥

यो बन्धनेति यो बन्धनमारणक्लेशादीन्प्राणिनां कर्तुं नेच्छति स सर्वहितकामी प्रकृष्टमनन्तं सुखं प्राप्नोति ४६ ॥

यद्ध्यायति यत्कुरुते धृतिं बध्नाति यत्र च तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचन ४७ ॥

प्राणिनां च यद्ध्यायतीति यच्चिन्तयति यत्र धर्मादिकमिदं मे स्यादिति यच्च श्रेयःसाधनं कर्म करोति यत्र च परमार्थध्यानादौ धृतिं बध्नाति तत्सर्वमक्लेशेन लभते यदुपघातनिमित्तं दंशमशकाद्यपि न व्यापादयति ४७ ॥

नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ४८

मांसभक्षणप्रसङ्गेन हिंसागुणदोषावभिधाय पुनः प्रकृतं मांसभक्षणमाह नाकृत्वेति प्राणिहिंसाव्यतिरेकेण न क्वचिन्मांसमुत्पद्यते प्राणिवधश्च न स्वर्गनिमित्तं नरकहेतुरेव यस्मात् तस्माद्विधिं विना मांसं न भक्षयेदिति ४८ ॥

समुत्पत्तिं च मांसस्य वधबन्धौ च देहिनाम् प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् ४९ ॥

समुत्पत्तिं चेति शुक्रशोणितपरिणामात्मिकां समुत्पत्तिं घृणाकरीं विभाव्य प्राणिनां वधबन्धौ च क्रूरकर्मरूपौ निरूप्य विहितमांसभक्षणादपि निवर्तेत किमुताविहितमांसभक्षणादपि निवर्तेतेति अविहितमांसभक्षणनिन्दानुवादः ४९ ॥

न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ५० ॥

न भक्षयतीति उक्तविधिव्यतिरेकेण यो न मांसं भक्षयति पिशाचवदिति यथा पिशाचो भक्षयति तथा नेति व्यतिरेके दृष्टान्तः स लोकस्य प्रियो भवति रोगैश्च न बाध्यते तस्मादेवं मांसभक्षणवर्जनाद्दृष्टार्थोऽपि भवतीति दर्शितम् ५० ॥

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ५१ ॥

अनुमन्तेति यदनुमतिव्यतिरेकेण हननं कर्तुं न शक्यते सोऽनुमन्ता विशसिता अङ्गानि यः कर्तयत्यादिना पृथक्पृथक् करोति क्रयविक्रयी मांसस्य क्रेता विक्रेता च गोविन्दराजस्तु यः क्रीणाति विक्रीणाति स क्रयविक्रयीत्येकमेवाह तदयुक्तं हननेन तथा हन्ता यश्च न क्रायकस्तथादि

क्रयी नयनाद्घातानस्कन् प्रवर्तनादिनियमवचनेन पृथङ्निर्देशात् संस्कर्ता पाचकः उपहर्ता परिवेशकः खादको भक्षयिता घात
कश्चेत्येवं सर्वे शास्त्रीयपशुवधेः नमस्मादयोपि घातकेनैवाद्यमेवपरंविधिनिषेधपरमांसं समखादकादीनां पृथक्प्रायश्चित्तदर्शना
त् ५१॥ स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति अनभ्यर्च्य पितॄन्देवांस्ततोऽन्यो नास्त्यपुण्यकृत् ५२॥

स्वमांसमिति स्वशरीरमांसं परशरीरमांसेन देवपित्रर्चनं विना यो वृद्धिं नेतुमिच्छति तस्मादपरो नापुण्यकर्तास्तीत्यविधिमांसभक्ष
णनिन्दानुवादः ५२॥ वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ५३

इदानीमनियमितप्रतिषिद्धमांसभक्षणस्य निवृत्तिर्द्धर्मोऽयमित्येतद्दर्शयितुमाह वर्षे वर्ष इति यो वर्षशतं यावत्प्रतिवर्षमश्वमेधेन
यजेत यश्च यावज्जीवं मांसं न खादेत्तयोः पुण्यफलं स्वर्गादि तुल्यम् ५३॥

फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ५४॥

फलमूलाशनैरिति पवित्रफलमूलभक्षणैर्वानप्रस्थभोज्यानां च नीवारादीनां भोजनैर्न तत्फलमाप्नोति यच्छास्त्रनियमित
प्रतिषिद्धमांसवर्जनाल्लभते ५४ मां स भक्षयितामुत्र यस्य मांसमिहाद्म्यहम् एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ५५

मां स भक्षयितेति इहलोके यस्य मांसमहमद्मि मामपि परलोके मांसं भक्षयिष्यतीति एतन्मांसशब्दस्य निरुक्तं पण्डिताः प्रवदन्ति इति मां
सशब्दनिर्वचनमेवं मांसभक्षणपापफलकथनार्थम् ५५॥

न मांसभक्षणे दोषो न मद्ये न च मैथुने प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ५६॥

न मांसभक्षण इति ब्राह्मणादीनां वर्णानां यथाविकारमविहितप्रतिषिद्धभक्षणादेर्न कश्चिद्दोषो यस्मात्प्राणिनां भक्षणपानमैथुना
दौ प्रवृत्तिः स्वाभाविकी अयमेव महाफलो विहितप्रतिषिद्धमद्यमैथुननिवृत्तेर्महाफलकथनार्थाय उक्तमेव मांसवर्जनमफलकथन
स्यानुवादः ५६॥ प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च चतुर्णामपि वर्णानां यथावदनुपूर्वशः ५७॥

प्रेतशुद्धिमिति ब्राह्मणादीनां चतुर्णामपि वर्णानां प्रेते सपिण्डादिषु जातेषु शुद्धिं ब्राह्मणादिक्रमेण यथावत् यास्यामि द्रव्यादीनां शुद्धिमभिधास्यामि

81A

दंतजातेऽनुजाते च कृतचूडे च संस्थिते अशुद्धा बांधवाः सर्वे सूतके च तथोच्यते ५८ ॥

तत्र शुद्धेरस्पष्टत्वात् त्रिरूपार्थमाह दंतजात इति दंतजाते जातदंते जाते मृते दंतजातं इत्यर्थः वाहिताग्न्यादित्वात् निष्ठांतस्य परनिपातः अनुजाते जातदंतात् पूर्वं कृतचूडाकर्मणि च कारणात् कृतोपनयने च संस्थिते मृते सति बांधवाः सपिंडाः समानोदकाश्चाशुद्धा भवंति प्रसवे च तथैवाशुद्धा भवंतीत्युच्यते वक्ष्यमाणोद्देशमात्रमिदं वक्ष्यमाणाशौचकालभेदादिज्ञापनार्थम् ५८ ॥

दशाहं शावमाशौचं सपिंडेषु विधीयते अर्वाक्संचयनादस्थ्नां त्र्यहमेकाहमेव च ५९ ॥

दशाहमिति मरणप्रभृत्यपर्यंतं सपिंडानां वक्ष्यति सपिंडेषु शावनिमित्तमाशौचं दशाहोरात्रं ब्राह्मणस्योपदिश्यते शुद्धिविशेषदशाहेनैव शनिवक्ष्यमाणत्वात् अर्वाक् संचयनादस्थ्नामिति वचनं होपलक्षणार्थं चतुर्थे दिवसे अस्थिसंचयनं कुर्यादिति विष्णुवचनात् त्र्यहमेकाहं वाशौचं शावाशौचं पक्षत्रयं एतद्वाग्निवेदादिगुणापेक्षो व्यवस्थितविकल्पः यथाह दक्षः एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा अग्निहीनोऽग्निमान् ब्राह्मणात्मकस्त्वशौचाध्यायिनः एकाहाशौचे उक्तयोः श्रौताग्निवेदाध्ययनगुणयोरेकगुणरहितो हीनः तस्य त्र्यहः उभयगुणरहितस्य हीनतरः केवलस्मार्ताग्निमानतस्य चतुरहः सकलगुणरहितस्य दशाहः तदाह पराशरः निर्गुणो दशभिर्दिनैरिति ५९ ॥ सपिंडता तु पुरुषे सप्तमे विनिवर्तते समानोदकभावस्तु जन्मनाम्नोरवेदने ६० ॥

सपिंडतामिति सपिंडलक्षणमाह यः शुकः पुरुषकृतिर्यो गोत्राणां निरूप्यते तस्य पितृपितामहप्रभृतीन् षट्पुरुषानतिक्रम्य सप्तमे पुरुषे सपिंडता निवर्तते एवं पुत्रपौत्रादिष्वप्यवगंतव्या पिंडसंबंधनिबंधनात्वेयं सपिंडता यथाहि पितृपितामहप्रपितामहेभ्यस्त्रिभ्यः पिंडदानं प्रपितामहस्य पित्रादयस्त्रयः पिंडलेपभुजः तस्येदं ममप्रपितामहस्य पिंडसंबंधो नास्तीति सपिंडता षट्पुरुषाः सपिंडाः सोपितेषां सपिंडः पिंडदातृत्वेन तल्लिप्तसंबंधनात् अतः सप्तमपुरुषीयस्य पिंडतानाद्वक्तमत्स्यपुत्राणां लेपभोजनवृत्त्याभ्यां पित्राद्याः पिंडभागिनः पिंडदः सप्तमः स्तेषां सापिंड्यमाप्तपुरुषसगोत्रत्वेन च सपिंडता प्रत्यवशेषावलिविना सपिंडानां तत्संबंधो गोत्रतः साप्तपौरुषी तेनैव समानोदकस्य पिंडसंबंधेन सपिंडतासमानोदकत्वे पुनरस्मत्कुले प्रमुकनामा भूदिति जन्मनाम्नोर्यावत्परिज्ञानं निवर्तते. ६० ॥

यथेदं शावमाशौचं सपिंडेषु विधीयते जननेऽप्येवमेव स्यान्निपुणां शुद्धिमिच्छताम् ६१ यथेदमिति यथेदं दशाहादिकं शावनिमित्तमाशौचं कर्मानर्हत्वलक्षणं सपिंडेषु दशाहं शावमाशौचमित्यनेन विधीयते प्रसवेऽपि सम्यक्शुद्धिमिच्छतां सपिंडानां तादृशमेवाशौचं भवे

शु.त.
स.
८२ 82

सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकं सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥ ८२ ॥

अतिदेशानन्तरं सूतकाशौचे विशेषमाह सर्वेषामिति मरणनिमित्तमस्पृश्यत्वलक्षणमशौचं सर्वेषामेव सपिण्डानां समानम् जन्म
निमित्तं तु अस्पृश्यत्वं मातुरेव दशरात्रं पितुर्न स्नानात्स्पर्शो भवति अथवा पितुरप्येव सर्वथा सर्वत्र अत्र कृतः जातपुत्रे पितुः स्ना
नं सचैलं न तु विधीयते मातापित्रोः सूतकं स्नानात्स्पर्शनं पितुः ८२ ॥

निरस्य तु पुमाञ्छुक्रमुपस्पृश्यैव शुध्यति बैजिकादभिसंबन्धादनुरुन्ध्यादघं त्र्यहं ॥ ८३ ॥

निरस्येति स्नानं मैथुनेन शुक्रमिति मैथुने स्नानं विधास्यते तेन मैथुनं विनापि कामतो रतः स्खलने स्नानात् मानसशुद्धो भवति
अकामतस्तु स्वप्नादौ रेतःपाते स्नात्वा देवानभ्यर्च्य पठेत् स्नानं विनापि गृहस्थस्य शुद्धिर्ब्रह्मचारिणस्तु कामतोपि स्वप्ने
शिष्टाचारत्वेन स्नानादिना शुद्धिः बैजिकेन संबन्धेन परपूर्वभार्यायामपत्यादस्मिन्नशौचं भवति तत्र चाविशेषः परपूर्व
भार्यायां विशेषः येनापादितं तस्याशौचमसंकृतमपि तत्प्रकारेणोत्पन्नस्य तद्गुणानुकूलं यथोक्तः पतनमात्रेण स्नानेन चाप्यस्य पत्नी
त्रिरात्रमुचितं ८३ ॥

अह्ना चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः शवस्पृशो विशुध्यन्ति त्र्यहादुदकदायिनः ॥ ८४ ॥

अह्ना चैकेनेति एकेनाह्ना एकया च रात्र्या अहोरात्रेण त्रिरात्रैस्त्रिभिरिति नवाहोरात्रैर्मिलित्वा दशाहेनेति वेदाध्ययनोक्तं न तु
दशाहेनेति वक्तव्ये किमर्थोयं वाग्विस्तारः उच्यते वेदीयसी लघिष्ठा वा गीर्निर्मातव्या गम्यः न चाय मयूत मतेषाल सूकं वनिय
पराहेनेति न व्यापगुणयोगेन ये सपिण्डाः एकाहादि स्वल्पाशौच यावत्त्य शवे दाहादिना स्वस्पृशो भवन्ति ते दशाहेन शुद्ध्य
न्ते इति कथ उदकदायिनः पुनः समानोदकास्त्र्यहेण गोविदाजयन ग्रहण समस्तैरेकत्र निर्हारकाले दीयत्राः प्रमाणविषयमिदं दशाहा
शौचमाह ८४-१

गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् प्रेतहारैः समं तत्र दशरात्रेण शुध्यति ८५ ॥

गुरोरिति गुरोराचार्यादेरसपिण्डस्य मृतस्य शिष्यो नत्वहिकृत्वा प्रेतनिर्हारकैर्गुरुसपिण्डैस्तुल्यो दशरात्रेणाशुद्धो भवति ८५ ॥

रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ८६ ॥

रात्रिभिरिति अत्र रात्रिभिरिति विधेयगामिनो बहुत्वस्याविवक्षितत्वात् तृतीयमासात् प्रभृति गर्भस्रावे गर्भमासतुल्याहोरात्रैः।
विशेषाभिधानाच्चातुर्वर्ण्यस्य स्त्रीविशुद्धिः एतच्च षण्मासपर्यन्तं यथोक्तं मादिपुराणे षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदि।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते अत ऊर्ध्वं स्वजात्युक्तमाशौचं तासु विद्यते मेधातिथिगोविन्दराजादयस्तु विष्णुपुरा
णवचनादर्शनात् नवममासादर्वाग्गर्भस्रावे मासतुल्याहोरात्रैः स्त्रीणां विशुद्धिरित्यभिदधति प्रथमद्वितीयमासीयगर्भस्रा
वे तु स्त्रीणां त्रिरात्रं यथाह हारीतः गर्भस्रावे स्त्रीणां त्रिरात्रं त्रिपत्रमसापीयोर्ज्ञो विशेषत्वात् पित्रादिसपिण्डानां तत्र सद्यःशौ
चं यथाह स मनुः गर्भमासतुल्या दिवसा गर्भसंस्रवणे सद्यःशौचं वा भवति गर्भमासतुल्याहानि स्त्रीविषये सद्यःशौचं वेति
पित्रादिसपिण्डविषयमिति व्यवस्थितविकल्पः रजस्वलायाश्च स्त्रीरजसि निवृत्ते सति पञ्चमे दिने स्नानेनादृष्टार्थकर्मयोग्यता भवति
स्पर्शयोग्यता त्रिरात्रव्यपगमे भवत्येवं ह निकृत स्नानेनैव शुद्धा भवति १८॥

नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता निवृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते १७ ॥

नृणामिति अकृतचूडानां बालानां सर्वेषामपि ज्ञातीनां मरणे आ उपनयनकालात्त्रिरात्रेण शुद्धिः १७ ॥

ऊनद्विवार्षिकं प्रेतं निखनेयुर्बान्धवा बहिः अलंकृत्य शुचौ भूमावस्थिसंचयनादृते १८ ॥

ऊनद्विवार्षिकमिति असंपूर्णद्विवर्षं बालं मृतं अकृतचूडं मालादिभिरलंकृत्य ग्रामाद्बहिः कृत्वा विशुद्धायां भूमौ कालान्तरे।
शीर्णदेहतया शवाकारास्थिसंचयनवर्जं बान्धवाः श्रुतिपदः विश्वरूपस्तु यस्यां भूमावन्यस्यास्थिसंचयनेन कृतं तस्यां निखनेयुरिति
व्याचष्टे १८ ॥ नास्य कार्योऽग्निसंस्कारो न च कार्योदकक्रिया अरण्ये काष्ठवत्त्यक्त्वा क्षपेत त्र्यहमेव च १५

नास्येति अस्योनद्विवार्षिकस्याग्निसंस्कारो न कर्तव्यः नाप्युदकक्रिया कर्तव्या उदकनिषेधोऽयं चूडादिसकलप्रेते कृत्यनिवृ
त्यर्थः किंतु अरण्ये काष्ठवत्त्यक्त्वा दिनत्रयं काष्ठवदिति शोकाभावो विहितः यथा अरण्ये काष्ठं परित्यज्य शोको न क्रियते एवं सका
शवे देहे त्यक्तः अहाशौचं कुर्युः अयं चाकृतचूडस्याहाशौचविधिः पूर्वोक्तैकाहाशौचविकल्पः सर्वत्र व्यवस्थितो वृत्तस्वाध्याया
दिगुणापेक्षः इत्यहः यद्यपि मनुना परित्यागमात्रं विहितं तथापि ऊनद्विवार्षिकं त्रिवर्षे इति याज्ञवल्क्यवचनादि

म.नु. मे. ८३ 83

मौनिवापैवस्तक्रयः ६९॥ नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सति ७०

नात्रिवर्षस्येति अप्राप्ततृतीयवर्षस्य पुत्रादेः पित्रादिसपिंडैरुदकक्रिया न कर्तव्या निषेधेन निषिद्धा पुनरार्थं मनूद्यते जातदं
तस्य वा उदकदानं कर्तव्यं नामकरणे वा कृते उदकक्रियासाहचर्यादग्निसंस्कारोप्यनुज्ञायते न तु पिंडश्राद्धादिकं च यद्यपि क
रणमेवं करणे क्लेशावहत्वात् पाक्षिकरणाकरणयोः ज्ञातदंतकृतनाम्नोः करणे चेत् उपकारो भवत्यकरणे प्रत्यवायाभा
वश्च स्वमायते ७०॥ सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम् जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते ७१।

सब्रह्मचारिणीति सहाध्यायिनि मृते एकरात्रमशौचं कर्तव्यं समानोदकानां पुनः पुत्रजनने सति त्रिरात्रेणाशुद्धिर्भवति अह
तुदकदायिनि इति मरणविषयमुक्तं ७१॥ स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यंति बांधवा यथोक्तेनैव कल्पेन शुध्यंति तु स
नाभयः ७२ स्त्रीणामिति स्त्रीणामकृतविवाहानां वाग्दत्तानां मरणे बांधवा भर्त्रादयस्त्र्यहेन शुद्ध्यंति वाग्दानेन विना मरणे यदेत
द्वेधाभावात् असंस्कृतमपि वाग्दत्तानां तत्पर्यवोढव्यस्तनाभयः पितृपक्षाः वाग्दत्तानां विवाहाद्वाक् मरणे यथोक्तेनैव कल्पे
नेत्येतत् श्लोकपूर्वार्द्धोक्तेन त्रिरात्रेणैव शुध्यंतीत्यर्थः तदुक्तमादिपुराणे आजन्मनस्तु चूडांतं यत्र कन्याविपद्यते सद्यः शौचम
वे ... सर्ववर्णेषु निमेषः ततो वाग्दानपर्यंतं यावदेकाहमेव हि अतः परं प्रवृद्धानां त्रिरात्रमिति निश्चयः वाग्दाने तु कृते तत्र ज्ञे
यं चोभयतस्त्र्यहं पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि स्वजात्युक्तमशौचं स्यात् सूतके मृतके पि च अत्र यानि निर्मा विदग्नानां यथो
क्तेनैव कल्पेनेति नृणामकृतचूडानां मिसेन तदुक्तेनैव कल्पेनेति नृणामकृतचूडानां मिसेन तदुक्तेनैव कल्पेनेति नृणामकृत
चूडानां मिसेन तदुक्तेन विधिना शुध्यंतीति व्याचष्टे तत्र अत्र व्याख्याने पूर्वव्याख्यायापि चूडायाः करणात् हहे मरणे व्यहाशौ
चस्यातं नद्धादि पुराणाद्येनेकवचनविरुद्धं ७२॥

अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम् मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ
७३

अक्षारेति क्षारलवणं कृत्रिमलवणं तद्रहितमन्नमश्नीयुः त्रिरात्रं च यावदेव स्नानमभ्यासेषुः मांसं च वर्जयेत् काकिना शयनं कुर्युः ७३

म॰तु॰ न्मसयोविशुद्धो भवति ७८॥ अन्तर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशं
से॰ अन्तर्दशाह इति दशाहाभ्यन्तरे यदि पुनर्मरणमरणं जननेजननं स्यात्तदा तावत्तदशुचिरेव भवेत् यावत्तदनिर्दशं ७५
८४ प्राथमिकदशाहः स्नानयावन्न पूर्वजातदशाहाशौचेनापगतं स्यात्तावत्सर्वाशौचव्यपगमेनैव द्वितीयेपि मृतके सूतके च शुद्धिरित्यर्थः
त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः ८०॥ ७५
त्रिरात्रमिति आचार्ये मृते सति शिष्यस्य त्रिरात्रमाशौचं वदन्ति तत्पुत्रपत्न्योश्च मृतयोरहोरात्रमित्येषा शास्त्रमर्यादा ॥
श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत् मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च ८१॥
श्रोत्रिय इति वेदशाखाध्यायिनि उपसंपन्ने मैत्र्यादिना तत्समीपवर्तिनि तद्गृहवासिनीत्यर्थः तस्मिन्मृते त्रिरात्रेणाशुद्धो भव
ति मातुलश्चैनक शिष्यादिषु पक्षिणीं रात्रिं आशौचं हेयः पूर्वोत्तरे पक्षाविव यस्याः सा रात्रिः पक्षिणी ८१॥
प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितिः अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ ८२
प्रेते राजनीति यस्य देशे वासस्थानादिः स्थितः तस्मिन्राजनि कृताभिषेके क्षत्रिये मृते सज्योतिराशौचं स्यात् सहज्योतिषा वर्तते
इति सज्योतिः यदि दिवा तदा यावत्सूर्यज्योतिस्तावदाशौचं यदि रात्रौ मृतस्तदा यावन्नक्षत्रज्योतिस्तावदाशौचं अश्रोत्रिये त्रिरात्र
मुक्तं अश्रोत्रिये पुनस्तद्गृहे मृते कृत्स्नं दिनमात्रमाशौचं तथा रात्रावपि रात्रौ मृते गवेषु व्यपगतं सांगवेदाध्यायिनि सत्त्वा
वहुवार्यस्मिन् त्रिरिदिष्टं गुरावप्यहर्मात्रमेव ८२॥
शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः वैश्यः पंचदशाहेन शूद्रो मासेन शुद्ध्यति
शुद्ध्येदिति उपनीतमपि गुमरणे संपूर्णकालीनजनने च वृत्तस्वाध्यायादिरहितब्राह्मणो दशाहेन शुद्धो भवति क्षत्रियो ८३
द्वादशाहेन वैश्यः पंचदशाहेन शूद्रो मासेन तत्सर्वोपयनस्यैव विवाहः ८३॥

83A

सन्निधावेष वै कल्पः शावाशौचस्य कीर्तितः । असन्निधावयं ज्ञेयो विधिः संबंधिबांधवैः १४ ॥

संनिधाविति मृतस्य सन्निधावेकस्थानावस्थानादहः परिमितं शावाशौचस्य विधिरयमुक्तः देशांतरावस्थानादसंनिधौ तस्य वक्ष्यमाणो विधिः संबंधिबांधवैर्ज्ञेयः संबंधिनः सपिंडाः समानोदका बांधवाः १४ ॥

विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् १५ ॥

विगतमिति विगतं मृतं विदेशस्थं विप्रकृष्टदेशस्थं अनिर्दशमनिर्गतदशाहाद्यशौचकालं यो शौचकालेषु शृणोति स यद्दशमि। हृदशरात्राद्यशौचस्य तावत्कालमशुद्धो भवति विगतमित्युपलक्षणं जननेप्येतद्द्रष्टव्यं तथा च बृहस्पतिः अन्यदेशमृतं ज्ञातिं श्रुत्वा पुत्रस्य जन्म च अनिर्गते दशाहे तु शेषाहोभिर्विशुध्यति १५ ॥

अतिक्रांते दशाहे च त्रिरात्रमशुचिर्भवेत् । संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति १६ ॥

अतिक्रांत इति नाशौचं प्रसवस्यास्ति व्यतीतेषु दिनेष्वपि इति देवलवचनात् मरणविषयं वचनमिदं सपिंडमरणे दशाहाशौचे ऽतिक्रांते त्रिरात्रमशुद्धो भवति संवत्सरे पुनरतीते स्नानेन विशुध्यति एतच्चाविशेषेणाभिधानाच्चातुर्वर्ण्यविषयम् १६ ॥

निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च । सवासा जलमाप्लुत्य शुद्धो भवति मानवः १७ ॥

निर्दशमिति दशाहाशौचव्यपगमे कर्मानर्हमलक्षणाशौचाद्यशौचसांकर्यात् एतदंगास्पर्शविषयं निर्गतदशाहं सपिंडमरणं श्रुत्वा पुत्रस्य जन्म च सचेलस्नानात्स्पृश्यो भवति १७ ॥

बाले देशांतरस्थे च पृथक्पिंडे च संस्थिते । सवासा जलमाप्लुत्य सद्य एव विशुध्यति १८

बाल इति बाले अजातदंते मृते जातदंते त्वकृतचूडे नाम्नि एकाहोरात्राभिधानात् देशांतरस्थे च सपिंडे मृते दशमे ऽहनि पृथक्पिंडे समानोदके त्रिरात्रमुक्तं तत्त्रिरात्रव्यपगमे सद्यः सचेलस्नानात् ... काहाशौचविषयं पूर्वश्लोके दशाहादिविधानात् पृथक्पिंडे समानोदके

84A

नचतत्कर्मकुर्वाणःसनाभ्योप्यशुचिर्भवेत ८४ ॥

नवर्द्धयेदघाहानिप्रत्यूहेन्नाग्निषुक्रियाः शौचंकेकीदृगुक्तःमतिक्रमेत्सत्वमाप्ति श्वेद।
नवर्द्धयेदिति यस्मात्पूर्वस्वाध्यायादेस्त्यागःपूर्वश्लोकेमेवचनादस्मान्नित्यायाशौचेदिनेष्वपि अग्निष्विति बहुवचनातश्रौतानामग्निहोत्रहोमानाम
गृह्यानामाशौचदिनानिदशाहादिरूपतयावर्द्धयेत्तत्कर्मकुर्विताशौचादिनेष्वपि पुत्रादिः सपिंडोनाशुचिर्भवति तदाहपारस्करः नित्यानिवि।
विलोपयेत एतदेवहेतुमाह यस्मात्तत्कर्माग्निहोत्रहोमं कुर्वाणाः पुत्रादिः यदिकुंडेषुविच्छिन्नंक्रियतइति तथाचशंखलिखि।
तौवर्त्तनैवेतानवर्ज वैतानेश्रौतहोमःगार्हपत्यकुंडस्थानग्नीनाहवनीयादिकुंडेषु स्मार्त्तकर्मलोपान्नविद्यतेशालाग्नौकेवलोहोम
तोगृह्याग्निहोत्रार्थस्नानोपस्पर्शनात् पितृसुतैः जाबालोप्याह जन्महानौ वितानस्थकर्मलोपान्नविद्यतेहोमःश्रौतेतु कार्यःशुष्कान्नेनापिवा।
कार्यपवान्यगोत्रैः छदोगपरिशिष्टेपिसूतकेकर्मणांत्यागः संध्यादीनां विधियतेहोमःश्रौतेहोमस्य एकाहस्यहायपरमेत संध्यापंचमहा।
फलेःतस्मात्एकाहस्यहायाशौचमेकोवेसंध्यादीनामेवपरित्यागोनतुश्रौतहोमस्य एकाहस्य हायशौचमेकोवाःयेहोमस्वाध्यायमा
यज्ञादिसर्वमेवतुष्टयं श्रौतायेमयानिवेशोविद्यानाभ्यासमयाद्यभिधायिपकाहस्यहायशौचेतमेतुगतत्ताचकर्मविधानात आस्त्रणा।
त्रविषयःसंध्योपासनादिकेतस्मेनापिदशाहमेवनकर्त्तव्यमितितत्रिष्णुमाणोकेयतगोतमेतुगतंत्ताचकर्मविवंशामेवदशाहायशौचेनामपि
स्यस्वाध्यायालिङ्गमर्थं याज्ञवल्क्येनवश्रुतिजातनदीहितानोवेमायतासयःशौचमुक्तंनत्सर्वषामेवदशाहायशौचिनिवचनानितानिदशाहा।
ननतस्मिविषयेयानितदुभयत्रदशाहानिकुलस्यात्रनभुक्तौतदस्मादीनिदशाहेनतत्कर्मनिषेधकानिवचनानितानिदशाहा
शौचविषयाणीतिनकश्चिद्विरोधः तस्मात्होमस्वाध्यायमात्रार्थमयुगमःशौचवलाचवेवतस्यप्रोणामस्तायर्थमितीदंनिष्णुमाणोके ८४
दिवाकीर्तिमुदक्यांचपतितंसूतिकांतथा शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुध्यति ८५ ॥
दिवीति चांडालेरजस्वलाब्रह्महादिकेशूत्रसूतानदशाहाभ्यंतरे शवंस्पृष्टिनंस्पृष्ट्वास्नानेनशुद्धोभवतिकेचिततत्स्पृष्टिनामि
तिवांडालोदक्यादिभिःस्पृष्टैःस्वंयशनिगोविदराजस्तुयाज्ञवल्क्यवचनात शवस्पृष्टिनमेवततत्स्पृष्टिनमाह नोदक्यादिस्प
र्शिनत्राचमनविधानात तदाहयाज्ञवल्क्यःउदक्याशुचिभिःस्नायात्संस्पृष्टस्तैरुपस्पृशेत अब्लिंगानिजपेच्चैवगायत्रीं
मनसासकृदिति उदक्याद्यशुचिभिःस्पृष्टैःस्पृष्टस्तु तत्स्पृष्टस्पर्शेदाचारमेत ८५ ॥
स्पृष्टैस्तत्स्पर्शेन उदक्याशुचिभिःस्पृष्टैःस्नानंकुर्यात

म.तु.
मे. 85
८५

आचम्यप्रयतोनित्यंजपेदशुचिदर्शने सौरान्मंत्रान्यथोत्साहंपावमानीश्चशक्तितः ८६ ॥

आचम्येति श्राद्धदेवपूजादिसंचिकीर्षुः श्चंडालादीनाचमनादिनाप्रयतःसन्सर्वकालंचांडालाद्यशुचिदर्शने सवितृदैवत्यानवेदसमि-
त्यादिसूक्तदैवतमंत्रान् यथाशक्तिपावमानीश्चशक्त्याजपेत् ८६ ॥

नारंस्पृष्ट्वास्थिसस्नेहंस्नात्वाविप्रोविशुध्यति आचम्यैवतुनिःस्नेहंगामालभ्यार्कमी-
क्ष्यवा ८७॥ नारमिति मानुषास्थिस्नेहसंयुक्तंस्पृष्ट्वाब्राह्मणादिःस्नानेनविशुध्यतिस्नेहशून्यंपुनःस्पृष्ट्वाआचम्यगोस्पर्शा-
र्कावेक्षणायोरन्यतरंकृत्वाविशुद्धोभवति ८७ ॥

आदिष्टीनोदकंकुर्यादाव्रतस्यसमापनात् समाप्तेतूदकंकृत्वात्रिरात्रेणैवशुध्यति ८८ ॥

आदिष्टीति व्रतादेशनमादिष्टंतदस्यास्तीतिब्रह्मचारीसप्रेतोदकमाव्रतसमाप्तेर्नकुर्यात् उदकमितिप्रेतकपिंडश्राद्धश्रा-
द्धादिसकलप्रेतकृत्यापलक्षणंसमाप्तेपुनर्ब्रह्मचर्येप्रेतोदकंकृत्वात्रिरात्रमशौचंकृत्वाविशुद्धोभवतियत्तुमातापितराचार्य-
व्यतिरिक्तविषयंतदाहवसिष्ठःब्रह्मचारिणःशवकर्मणाव्रतान्निवृत्तिरन्यत्रमातापित्रोर्गुरोर्वा शवकर्मणीति शवनि-
मित्तकेन निर्हरणादहनोदकदानप्रेतकपिंडश्राद्धादिकर्मणाव्रतनिवृत्तिराचार्यस्तुपाध्यायमिति ८८ ॥

वृथासंकरजातानांप्रव्रज्यासुचतिष्ठतां आत्मनस्त्यागिनांचैवनिवर्त्ततोदकक्रिया ८९

वृथेति जातिशब्दःप्रत्येकमभिसंबध्यते वृथाजातानांहीनवर्णानांतत्कृष्टस्त्रीषुसंजातानांवेदबाह्यक्षपणादिनाकामतश्चकृत-
जीवितत्यागिनामुदकादिक्रियानकर्तव्या ८९ ॥

पाषंडमाश्रितानांचचरंतीनांचकामतः गर्भभर्तृद्रुहांचैवसुरापीनांचयोषितां ९० ॥

85A

पावेदमिति. वेदवादाश्चपदमौंग्यादिव्रतचर्यायांचैतदनुतिष्ठन्तीनां मस्तंछेदमेकं ऽनेकपुरुषगामिनीनां गर्भघातिनभर्तृवध॥कारिणीनां. हिजातिस्त्रीणांसुरापीनां उदकक्रियाशौचादिहिकंनिवर्तेतदनिपूर्वैःसंबंधः ९० ॥

आचार्यंस्वमुपाध्यायंपितरंमातरंगुरुम् निर्हृत्यतुव्रतीप्रेतान्नव्रतेनविमुज्यते ९१ ॥

आचार्यमिति आचार्यमुपनयनपूर्वकं वेदशाखाध्यापयिता उपाध्यायोवेदैकदेशस्यांगस्यवाअध्यापकः वेदस्यवेदांगानांचएक॥देशस्यापिव्याख्यातागुरुः निर्हरणपूर्वंतात्स्वेतकृत्यस्यनिर्हृत्यइतिदाहदशाहपिंडषोडशश्राद्धादिसकलप्रेतकृत्यस्यप्रदर्शनार्थं आचार्यादीन् एवंभूतानिर्हृत्यब्रह्मचारीतल्लभवतोभवतिएवंचास्यान्निर्हृत्यव्रतलोपोभवतीति गम्यतेआचार्यस्वमिमस्त्रिया॥नानुरोदीरुरोस्वनिर्हितगुरुवहूतिमाचरेदिति मायान्नाचार्यावार्यमपि समितिसर्वत्रसमस्यतेतेनोपाध्यायोपाध्यायमपिनिर्हृत्यव्रतलोपएव ९१॥

दक्षिणेनमृतंशूद्रंपुरद्वारेणनिर्हरेत् पश्चिमोत्तरपूर्वैस्तुयथायोगंद्विजन्मनः ९२ ॥

दक्षिणेनेति अमांगलिकत्वादस्यंतापकृष्णशूद्रस्यप्राभिधानेशूद्रं मृतंदक्षिणपुरद्वारेण निर्हरेत् द्विजातीनपुनर्यथायोगं युक्त्याअपकृष्टवैश्यक्षत्रियक्रमेणावपश्चिमोत्तरपूर्वद्वारेणनिर्हरेत् ९२॥

नराज्ञामघदोषोस्तिव्रतिनांनचसत्रिणाम् ऐंद्रस्थानमुपासीनाब्रह्मभूताहितेसदा ९३

नराज्ञामिति राज्ञामभिषिक्तक्षत्रियाणां सपिंडमरणादौअशौचदोषोनास्तियतोराजानऐंद्रस्थानेराज्याभिषेकाख्यंआदिपत्य कारणाश्रमाः व्रतिनोब्रह्मचारिणश्चांद्रायणाद्व्रतकारिणश्च सत्रिणांगवामयनादिवागप्रवृत्ताः यतोब्रह्मभूतास्तेब्रह्मवनिष्पापा अशौचाभावश्चायंकर्मविशेषेतदाहविस्लः अशौचंनराज्ञोराजकर्मणिनव्रतिनांव्रतेनसत्रिणांसत्रेराजकर्मचव्यवहारदर्शनशा॥तिहोमादिकर्मणि ९३ ॥

राज्ञोमाहात्मिकेस्थानेसद्यःशौचंविधीयते प्रजानांपरिरक्षार्थमासनंचात्रकारणम् ९४

राज्ञइति महात्मनइदंस्थानंमाहात्मिकंराज्यपदाख्यंसर्वोपिपरस्पलक्षणंमहात्मैवशाचीनपुराणराज्यमासादयतितस्मिन्वर्तमा नस्यसद्यःशौचमुपदिश्यतेननुराज्यप्रच्युतस्यक्षत्रियमात्रस्यापिस्यान्नामित्यविवक्षितात्रयतेतस्मिकेनदर्शनंयतोन्यायनित्र

म॰ तु॰ मे॰ 86

पतेन डम्बिहः क्षत्रधर्मेणोपसर्गेषु शान्तिहोमादिना प्रजारक्षार्थं तामनेष्ववस्थानमशौचाभावे कारणं तत्राक्षत्रियाणामपि तत्
कार्यकारिणां विप्रवैश्यशूद्राणामविशिष्टं तथैव सोमकार्यकारिणिफलत्वमसे सोमयष्टी अत्र तथैव होहि यष्टी नितनयाक्र
तमप्यवचानादिन कार्यकारितमविवहितं तामत्कृतोयवेविकृतो चनोवादो मवपनइतिकर्ममीमांसायां तत्तदधिकरणेषु
निरूपणाय ९४॥ डिम्बाहवहतानां च विद्युता पार्थिवेन च गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ९५
डिम्बाहवेति डिम्बाहवो नृपरहितयुद्धं तत्र हतानां विद्युता वज्रेण पार्थिवेन वधार्हैः प्रयाते हते गोब्राह्मणरक्षणार्थं विनापि युद्धे
जलाग्निव्याघ्रादिभिर्हतानां यस्य स्वकार्यार्थं विद्यानार्थं नृपतिरशौचाभावमिच्छति तस्यापि सद्यः शौचम् ९५॥
सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च अष्टानां लोकपालानां वपुर्धारयते नृपः ९६
सोमेति चन्द्राग्निसूर्यवायुशक्रयमानां वित्तपापांपत्योः कुबेरवरुणयोरेवमष्टानां मेव पिदहं राजा धारयति ९६ ॥
लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययं ९७
ततः किमत आह लोकेशेति यतो लोकेशांशाक्रान्तो नृपतिरतो नास्याशौचमुपदिश्यते यस्मान्मनुष्याणां शौचमशौ
चं वा तल्लोकेशेभ्यः प्रभवति विनश्यति च प्रभवो यो विनाशः एतेन तन्मदीयशौचाशौचोत्पादनविनाशशक्तस्य लोके
श्वररूपस्य नृपस्य कुतः स्वकीयाशौचमिति दृष्टोक्ताशौचाभावस्तुतिः ९७ ॥
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः ९८
उद्यतैरिति उद्यतैः शस्त्रैः खड्गादिभिर्नतु लगुडपाषाणादिभिरपराङ्मुखेन आहवे क्षत्रियधर्मेण युक्तस्य संग्रामे हतस्य तत्क्षणादेव
ज्योतिष्टोमादियज्ञः संतिष्ठते समाप्तिमेति तद्वदशौचमपीत्यर्थः ९८ ॥
विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधं वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः ९९॥

86A

विप्र इति अशौचं तेन कृतं आहादिकं सोऽत्रायामाः अप स्पृष्ट्वेति जलस्पर्शमात्रं दक्षिणहस्तेन कृत्वा शुद्धो भवति न तु संवत्सरेऽतीते तत् स्पृष्ट्वैवापो विगाह्य
नीवनस्नात्वा वा हन्तादिस्पर्शे आह चर्यात्स्वेतत्सर्वमडस्वरितस्यार्थमेदस्यामायनात् हस्तस्पृष्ट्वास्यादिवाहने विगाह्य स्नात्वैव शुध्यो बलेव दादिव

एतद्वोऽभिहितं शौचं सपिण्डेषु द्विजोत्तमाः। असपिण्डेषु सर्वेषु प्रेतशुद्धिं निबोधत ॥ तोदेलो ह्यप्रेताशौचं वाम्बायुषिवेषा यादस्कित्वात्

एतदिति भो द्विजश्रेष्ठा एतच्छौचं सपिण्डेषु प्रेतेषु युष्माकं उक्तम् इदानीमसपिण्डेषु प्रेतशुद्धिं शृणुत १०० ॥

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्। विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् १०१ ॥ असपिण्डमिति असपि
ण्डं ब्राह्मणं मृतं ब्राह्मणो बन्धुवत्स्नेहानुबन्धेन न तु दक्षिणालोभेन निर्हृत्य मातुराप्तान्संनिकृष्टान्सहोदरभ्रातृभगिन्यादीन्बान्धवान्निर्हृत्य त्रिरात्रेण शुद्धो भवति १०१

यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति। अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत् १०२ ॥
यद्यन्नमिति निर्हारकाः यदि तेषां स्वजनसपिण्डानामशौचिनामन्नमश्नाति तदा तद्दशाहेनैव शुध्यति तु त्रिरात्रेण अथ तेषामन्नं नाश्नाति गृहे चैतेषां
न वसति निर्हृत्य तदा अह्नैव शुध्यति एवं च न तु गृहवासे सति तदन्नभोजने च निर्हारकस्य पूर्वोक्तं त्रिरात्रम् १०२ ॥

अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति १०३
अनुगम्येति ज्ञातिमज्ञातिं वा मृतमिच्छातोऽनुगम्य सचैलस्नानं कृत्वा ततोऽग्निं स्पृष्ट्वा पश्चाद्घृतं प्राश्यैतेन कृता अनुगमननिमित्ताशौचाद्विशुध्यति १०३

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत्। अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता १०४
न विप्रमिति ब्राह्मणादिमृतं समानजातीयेषु स्थितेषु न शूद्रेण ग्रामादिर्निर्हारयेत् यस्मात्सा शरीराहुतिः शूद्रस्पर्शदूषिता सती मृतस्य स्वर्गाहिता।
न भवति मृतस्वर्गं न प्रापयतीत्यर्थः स्वेषु तिष्ठत्स्विति अभिधानात् ब्राह्मणाभावे तु क्षत्रियेण तदभावे वैश्येन तदभावे शूद्रेणापि निर्हारयेदित्युक्तं यथा
पूर्वे शूद्रस्य तु दक्षिणां द्विजश्च ब्राह्मणादिस्त्वा वेश्य इत्यादि निहारणमिति वृद्धाः गोविन्दराजस्तु दोषानिदर्शनात् स्वेषु तिष्ठत्स्विति विवक्षितमित्याह तदयु
क्तमभवद्दूयपदहेयावाचकेऽप्युप्रभागात् उपक्रमावगतस्य वेदादिस्मृत्युपायेनानुवाद्यत्वात् स्मृत्यन्तरेण न्यायेनाप्यनुयायित्वे यानभूताया ब्राह्मणस्य पदा।
योगमालापनपाठस्वमस्यापि मायायाथाययातस्मात्स्वेषु तिष्ठत्स्विति पदं हितयेन विवक्षितं इमां गोविन्दनामस्य राजस्तां नादियामहे १०४ ॥

ज्ञानं तपोऽग्निराहारो मृन्मनो वार्युपाञ्जनम्। वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम् १०५ ॥ ज्ञानमिति ज्ञानादीनि शुद्धेः सा
धनानि भवन्ति तत्र ब्रह्मज्ञानेन बुद्धिरूपमनःकरणशुद्धेः सा यस्य योग्या वक्ष्यति बुद्धिर्ज्ञानेन शुध्यति तपसा यथा तप सा वेदविद्यमाः अग्निर्यथा पुनःपाकेन मृ
ति मनो बुद्धादेः उपाञ्जनेउपलेपनेयथा मार्जनेनाञ्जनेन च समकर्मयथा यज्ञेन वाऽश्वमेधेन ब्रह्महत्यादिकं कीकणगामालभ्याकर्मीरवा कालाय

म॰ प॰
तु॰ मे॰
७ 87

...क्षमपि यथावच्छुविशुध्यति मनुर्योऽभ्यमाहुस्तेतिनिविश्या
...लभ्यालभ्यार्कमीलवादर्शालोयाणां शुद्धिहेतवे ... तांस्कन्ध्यास्म १०५

सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः १०६ । तत्राच्छौचमनादिनिस्म
सर्वेषामेवेति सर्वेषां मृद्वारिनिमित्तदेहशौचमनःशुद्धिवादीनामर्थार्थशौचं परमायेत्वापरयन्यस्य हरणपरिहारेणार्थशौचं श्रेष्ठं ... मृद्वारिशुचिरर्थेषु शुद्धः सोऽशुचिरेव १०६ ॥

क्षान्त्या शुध्यन्ति विद्वांसो दानेनाकार्यकारिणः प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः १०७ क्षान्त्येति परेणापकारे कृते
तत्क्षमया शुध्यन्ति विद्वांसः यथावद्दानेन महायज्ञक्रियाः तथा नावायमाशुपापानीति अकार्यकारिणो दानेन यतेतस्मिन्सत्यपकारबुद्धिं ... शुध्यति यथावद्दाति जपेनाल्पपापस्य ... वेदवित्तमाः वेदार्थज्ञाः ... यावत्स्मृति सर्वेस्ववावेदविदे ... पापाजप्येन यथावद्दाति ...

मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः पुमेत्येकादशाध्याये वक्ष्यमाणो १०८
... शुध्यते शोध्यं ... नदी वेगेन शुध्यति स्त्री च परपुरुषमैथुनसंकल्पादिदूषितमाना ... शुध्यते ... संन्यासेन ... पापाच्छुध्यति १०८ ॥
मृत्तोयैरिति मलाद्युपहतं शोधनीयं मृज्जलैः ... तस्मात्पापाच्छुद्धो भवति ...

अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति १०९
... मूत्रादिलिप्तगात्राणि जलेन क्षालितानि शुध्यन्ति मनश्च निषिद्धचिन्तादिना दूषितं सत्याभिधानेन शुध्यति भूतात्मा ... विपर्ययज्ञानोपहताया यथार्थविषयज्ञानेन शुध्यति १०९
अद्भिरिति ... जीवात्मा ब्रह्मविद्यया पापक्षयेण ... शुद्धो भवति ...

एष शौचस्य वः प्रोक्तः शारीरस्य विनिर्णयः नानाविधानां द्रव्याणां शुद्धेः शृणुत निर्णयम् ११० ॥
एष इति शरीरसंबन्धिनः शौचस्य युष्माकं निश्चय उक्तः इदानीं नानाप्रकारद्रव्याणां शुद्धेः ... निर्णयं शृणुत ११० ॥

तैजसानां मणीनां च सर्वस्याश्ममयस्य च भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः १११
तैजसेति तैजसानां सुवर्णादीनां मरकतादिमणीनां पाषाणमयस्य च सर्वस्य भस्मना जलेन मृत्तिकया च मन्वादिभिः शुद्धिरुक्ता तिलेपस्य जलेनैवान्
... उपहतिविषये ... एकैकं कार्यं ... अपल्पभये ... ११२ ॥

निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति अब्जमश्ममयं चैव राजतं चानुपस्कृतम् ११२ ॥ निर्लेपमिति उच्छिष्टादिलेपरहितं
... अब्जं शङ्खशुक्त्यादि पाषाणमयं चैव राजतं च ... अनुपस्कृतं ... जलेनैव ... ११२

अपामग्नेश्च संयोगाद्धैमं रौप्यं च निर्बभौ तस्मात्तयोः स्वयोन्यैव निर्णेको गुणवत्तरः ११३
...

87A

अपाममेध्ये इति अग्निर्वै हिरण्यादीनकामयत स्मादिवेदे श्रूयते तथाग्नेः सुवर्णमिद्धियं ब्रह्मणादीनां रजतमित्यादि श्रुतिः ग्रन्थायाः संयोगात् श्री
वर्णरजतम् वाद्भ्यतयस्मादेतत्तयाः स्वकारणेनैव जलेनाग्निना च वा तेनाग्निना निर्णिक्तः शुद्धिहेतुः गुणवत्तरः प्रयाक्ततरः ११३ ॥
ताम्रायः कांस्यरैत्यानां त्रपुणः सीसकस्य च शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः ११४ ताम्रायइति अयोलोहं रीति
तिः पित्तलं तद्वेषां चैत्यत्रपुसीसकानाम् अम्लोदकैः शोधनं कर्तव्यं यथार्हं यस्य यद्दृहेति शुभ्रस्य भस्मना अयसः कांस्यं शुध्यति भस्मना ताम्रमम्लेन चोत्सर्ग
द्रवाणां चैव सर्वेषां शुद्धिरुत्प्लवनं स्मृतम् प्रोक्षणं संहतानां च दारवाणां च तक्षणम् ॥ नु पाकेन शुध्यति निहूहस्यादिवचनात्
विशोधनं वा दृष्टः ११४
द्रवाणां चेति द्रवाणां घृततैलादीनां काककीटाद्युपहतानां प्रादेशप्रमाणकुशपत्रद्वयाभ्यामुत्प्लवनेन शुद्धिः संहतानां शय्यादीनां अच्छिद्रं च तेषां
प्रोक्षणं दारवाणां च तक्षणेन ११५ लाणां दारवाणां तक्षणेनैव ११५
मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ११६ अच्छिन्नेन प्रक्षालनेन यज्ञे कर्तव्यं शुद्धिर्भवति ११६ ॥
मार्जनमिति चमसानां ग्रहाणां चामेध्ययज्ञपात्राणां सर्वपाणिना मार्जनं कार्यं पश्चात्प्रक्षालनेन यज्ञे कर्तव्या शुद्धिर्भवति
चरूणां स्रुक्स्रुवाणां च शुद्धिरुष्णेन वारिणा स्फ्यशूर्पशकटानां च मुसलोलूखलस्य च ११७
चरूणामिति स्नेहाक्तानां चरुस्रुगादीनां उष्णजलेन शुद्धिः स्नेहाद्युपहतानां जलमात्रेण च शुद्धिर्यज्ञार्थम् ११७ ॥
अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ११८ अद्भिस्त्विति बहूनां धान्यानां व
स्त्राणां च चण्डालाद्युपहतानां जलेन प्रोक्षणाच्छुद्धिः बहुत्वं च पुरुषभारहार्यादिकल्पमिति अल्पानां तु प्रक्षालनाच्छुद्धिर्वादिभिरुपदिश्यते ११८
चैलवच्चर्मणां शुद्धिर्वैदलानां तथैव च शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते ११९
चैलवदिति स्पृश्यपशुचर्मणां वंशादिदलनिर्मितानां च वस्त्रवच्छुद्धिर्भवति शाकमूलफलानां च धान्यवत् शुद्धिः ११९ ॥
कौशेयाविकयोरूषैः कुतपानामरिष्टकैः श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः १२० ॥
कौशेयेति कृमिकोशोद्भवतन्तुमयमेषादिलोमप्रभवयोः कम्बलादेः ऊषैः क्षारमृत्तिकाभिः कुतपानां नेपालकम्बलानामरिष्टकैः अरिष्टचूर्णैः श्री
अंशुपट्टानां पट्टशाटकानां बिल्वफलैः क्षौमाणां अतसीवल्कलानां वस्त्राणां तापिष्टश्वेतसर्षपप्रक्षालनाच्छुद्धिः १२०॥
क्षौमवच्छङ्खशृङ्गाणामस्थिदन्तमयस्य च शुद्धिर्विजानता कार्या गोमूत्रेणोदकेन वा १२१ क्षौमवदिति स्पृश्यपशु
शृङ्गाणां स्पृश्यपश्वस्थिमयस्य गजादिदन्तमयस्य च क्षौमवत् पिष्टश्वेतसर्षपकल्केन गोमूत्रजलयोरन्यतरयुक्तेन प्राज्ञेन शोधनं कर्तव्या १२१॥
प्रोक्षणात्तृणकाष्ठं च पलालं चैव शुध्यति मार्जनोपाञ्जनैर्वेश्म पुनः पाकेन मृण्मयम् १२२ ॥

म॰
टी॰ से॰
८८ 88

शोहनाणां तृणकाष्ठेति तृणकाष्ठपलालेषु वा तृणादिसमर्थं दूषितं प्रोक्षणेन शुध्यति तृणपलालमाहवर्णादिमिंथ मादिकाष्ठविषयं द्वारवा
णोक्तनृणामिति निर्मितदारुमयशूर्पपात्रविषयं शूकृत्पदकाति वासादिदूषिते मार्जनेन गोमयाद्युपलेपनेन मृण्मयं उच्छिष्टादिस्पृष्टं दू
णोक्तनृणामितिनिर्मितदारुमयशूर्पपात्रविषयं ... पुनः पाकेन शुध्यति १२२

मद्यैर्मूत्रैः पुरीषैर्वा ष्ठीवनैः पूयशोणितैः। संस्पृष्टं नैव शुध्येत पुनःपाकेन मृन्मयम् १२३
मद्यैरिति मद्यादिभिरत्यन्तसंस्पृष्टं मृन्मयं पात्रं पुनः पाकेनापि न शुध्यति ष्ठीवनं श्लेष्म पूयं शोणितविकारः १२३ ॥

संमार्जनोपाञ्जनेन सेकेनोल्लेखनेन च। गवां च परिवासेन भूमिः शुध्यति पञ्चभिः १२४ ॥
संमार्जनेति शुद्धकरशोधनेन गोमयाद्युपलेपनेन गोमूत्रोदकादिसेकेन वा ... पञ्चभिरेकैकशो भूमिः शुध्यति पञ्चभिर्वा ... विकल्पो वा वगन्तव्यः १२४ ॥

पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम्। दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति १२५ पक्षिजग्धं गवाघ्रातमिति भक्षितं पक्षि
पक्षिजग्धं ... गवाघ्रातं ... अवक्षुतं ... दूषितं ... मृत्प्रक्षेपेण शुध्यति १२५
मिते केशकीटादिभिः ...

यावन्नापैत्यमेध्याक्ताद्गन्धो लेपश्च तत्कृतः। तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु १२६ ॥
यावदिति विष्ठादिलिप्ताद्द्रव्याद्यावत्तत्कृतो गन्धो लेपो न तिष्ठति तावन्मृद्वारि ... शुद्धिरुक्ता ... तावन्मृद्वारि चादेयम् ...
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्। अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते १२७
त्रीणि देवाः इति ... तानि त्रीणि पवित्राणि देवाः ब्राह्मणानां कल्पितवन्तः १२७ ॥
...

आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत्। अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः १२८ आपः शुद्धा इति ...
आपः शुद्धा भूमिगता ... भूमिगता विशुद्धा ... भूमिगता इति ...
... १२८

नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम्। ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः १२९ ...
नित्यं शुद्ध इति ... तथा ... इति
... १२९ ॥

नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने। प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः १३०

88A

लं वत्सो दोहनसमये दीप्तस्तनो शुचिः स्यात् तदा मृगादी
नित्यमास्यमिति सर्वदा स्त्रीणां मुखं शुचि तथा काकादिपक्षिणां चंचुपातपतितफलं शुचि वत्सः ... द्रव्यमृगग्रहणे शुचिः स्यात् १३०
श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः ... श्येनादिभिर्व्याधैश्च ... दिभिश्च मृगवधजी
भिः १३१ श्वभिरिति ... मृगादेर्यन्मांसं तच्छुचि मनुरब्रवीत् तच्छुद्धा घातिभिर्माजेवाद्यैः ... विभिर्हतस्य १३१
ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः १३२
ऊर्ध्वं नाभेरिति नाभेरुपरि यानीन्द्रियच्छिद्राणि तानि सर्वाणि पवित्राणि भवन्ति अधस्तनानि स्पर्शे नेत्राशौचं यानि नाभेरधस्तान्यशुचीनि भवन्ति अथ च देहच्युत
मलाश्च अशुचयो भवन्ति १३२
मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् १३३ मक्षिकेति मक्षिकाश्चमेध्यस
वं ये यान्ति विप्रुषो ... गौरश्वो देहमलादीनि ... शुद्धानि भवन्ति १३३
... छायापतितादेः स्पर्शे स्पृश्यापि गवादीनि वायुर्यत्नाति चंडालादिस्पृष्टानि स्पर्शे शुचीनि जानीयात् १३३
विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत् दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि १३४ विण्मूत्रेति विण्मूत्र
... विप्रुषो ... मृद्वारि ... यथा योजनवत् तावद्गन्धलेपक्षयो भवति तथा ग्राह्यं तथा च वश
विण्मूत्रोत्सर्गः पायवादि लिप्तस्य शुद्ध्यर्थं मृद्वारि गृहीतव्यमर्थं मृद्वारि गृहीतव्यमर्थवत्प्रयोजनवत् यावता गन्धलेपक्षयो भवति तथा घटके जलमात्र ग्रहणं तदा हेयं यथा यतः
येन सा विण्मूत्रोत्सर्गः पाय्वादि ... गन्धलेपक्षयो ... तस्मान्न्यते वेषघटकेन जलग्रहणं नवं मृद्वारिग्रहणं वचनं च वक्ष्यमाणं मृद्वारिणोर्य
देहमलानां मध्ये शुद्धा द्वादशस्वपि गन्धलेपक्षयो ... अङ्गं केवलाभिर्विशुद्ध्यति ततश्च द्वादशस्वपीति ... देवपित्र्यादिदृष्टकर्मणोऽर्थं तेऽतोऽपि मृदमादमाद
... न मूत्रोत्सर्गपुरीषोत्सर्गे ... केवलाभिर्विकल्पः ... १३४
दानात् १३४
हानामतिनविहिता ... मनुरेवाह ... वचनं सर्वमलात्तत्र ... द्वादशैते नृणां मलाः १३५
वसा शुक्रमसृङ्मज्जा मूत्रविड्घ्राणकर्णविट् श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः १३५ ... स्वेदः श्रमादिना देहनिः सृतजलं वसादयो द्वादश नराणां दैहि
कामला भवन्ति १३५
वसेति वसा कायस्नेहः शुक्रं रेतः असृक् रक्तं मज्जा अस्थिमध्यस्थितस्नेहः दूषिका नेत्रमलः स्वेदः श्रमादिना देहनिःसृतजलं
एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता १३६ एकेति ... तथैकस्मिन्करे वामे
एका लिङ्गे इति मूत्रपुरीषोत्सर्गे सति शुद्धिमभीप्सता मृद्वारिणा देयमर्थवदिति ... जलसहिता मृदेका लिङ्गे दातव्या गुदे तिस्रो मृदः तथैकस्मिन्करे वामे
... वामहस्तेन ... मृदो दातव्याः तत
... देवल ... मृदः दातव्याः ... अर्थ ... आदिति वचनादधिकसंख्याश्रयणम् ... यथा
... उभयोः करयोः सप्त दातव्याः यदा तु ... गन्धलेपक्षयो भवति ... मृद्धिर्विशुद्ध्येत यथा द्वितीया च तृतीया च तदा ... इति
उभयोः करयोः सप्त ... लिङ्गेऽपि ... विकल्पः ... १३६
वसनीनामुपिकम् ... गन्धलेपक्षयो भवति तदा संख्यावाक्यारंभसामर्थ्यात्संख्या पूरयितव्या च १३६
यदा तु ... गन्धलेपक्षयो भवति ... एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् त्रिगुणं स्याद्वनस्थानां यतीनां तु चतुर्गुणम् १३७

म॰
टी॰ सं॰
८१ 89

वाशिणां द्विगुणं वानप्रस्थानां त्रिगुणं यतीनां तु चतुर्गुणम् १३७ ॥
एतच्छौचमिति एकालिंगइत्यादिच्छौचमुक्तं तद्गृहस्थानामेव ब्रह्मचा वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा १३८ ॥
कृत्वा मूत्रं पुरीषं वा खान्याचान्त उपस्पृशेत् वेदाध्ययनं चिकीर्षन्नन्नं च भुञ्जानः द्वितीयाध्याये
कृत्वेति मूत्रपुरीषं कृत्वा कृतशौचः खान्याचान्तः इंद्रियच्छिद्राणि शीर्षण्यानि च स्पृशेत् ... पुनरुक्तिः १३८ ॥
आचामेदिति ... शूद्रस्तु सकृत्सकृत् १३९ आचामेदिति ...
त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखं शारीरं शौचमिच्छन् हि स्त्री शूद्रस्तु सकृत्सकृत् ... मुखं ... ततो द्विः ... स्त्री शूद्रश्चैकवारमाचमनार्थमुदकं भक्षयेत् १३९ ॥
शूद्राणामिति शूद्राणां कार्यमिति ...
शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनां वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टं च भोजनं १४० शूद्राणामिति शूद्राणां कार्यमिति
... वैश्यवच्च मरणे ... द्विजोच्छिष्टं च भो
... जनं कार्यमिति १४०
नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गे पतन्ति याः न श्मश्रूणि गतान्यास्यं न दन्तान्तरधिष्ठितम् १४१ ॥
नोच्छिष्टमिति ... निष्ठीवनमेवेति ... नोच्छिष्टं जनयति द
... स्पृशन्ति बिन्दवः १४१ ॥
... १४२ ॥
स्पृशन्ति बिन्दवः पादौ य आचामयतः परान् भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् १४२ स्पृशन्तीति ... आचमनार्थं जलं
... आचमनार्थं ... बिन्दवः ... शुद्ध्यति १४२ ॥
... बिन्दवः पादौ ... १४३ उच्छिष्टेनेति ...
उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् १४३ उच्छिष्टेनेति ...
... द्रव्यहस्तस्याचमनात् ... १४३
वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत् आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतं १४४ ॥
... आचमनं ...
वान्त इति कृतवमनः ... स्नात्वा ... घृतप्राशनं कुर्यात् ... इति गोविंदराजः ... आचमनमेव कुर्यात् ... स्नानं ...
सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतानि च पीत्वापोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् ... १४५
सुप्त्वेति ... अध्ययनं चिकीर्षुः ... तथा अध्येष्यमाण ...
... इति द्वितीयाध्याये ... आचमनविधानं ... गृहस्थादीनामपीति १४५ ॥

89A

एषशौचविधिः कृत्स्नो द्रव्यशुद्धिस्तथैव च उक्तो वः सर्ववर्णानां स्त्रीणां धर्मान्निबोधत १४६ एषशौचविधिरिति एष जा
तो जननमरणादौ दशरात्रादिशौचविधिः सम्प्रोक्षणादि द्रव्याणां तैजसादीनां च जलादिना शुद्धिविधिर्युष्माकमुक्तः इदानीं स्त्रीणां मनुष्येष्वधर्मं शृणुत १४६॥

बालया वा युवत्या वा वृद्धया वापि योषिता न स्वातन्त्र्येण कर्तव्यं किंचित्कार्यं गृहेष्वपि १४७॥

बालयेति बाल्ये यौवने वार्द्धके च वर्तमानया स्त्रिया किंचित्स्वल्पमपि कार्यम् भर्त्राद्यननुमतं न स्वातन्त्र्येण कर्तव्यमिति १४७॥

बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतन्त्रताम् १४८॥ किंत्वबाल्ये पितुरिति बाल्ये पितुर्वशे तिष्ठे
त् यौवने भर्तुः भर्तरि मृते पुत्राणां तदभावे तत्सपिण्डे वा [illegible] प्रभुः स्त्रियाः पक्षद्वयावसाने तु राजा भर्ता स्त्रिया मत इति नारदवचनात्तज्ज्ञाती राजादीनामाय

पित्रा भर्त्रा सुतैर्वापि नेच्छेद्विरहमात्मनः एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले १४९॥ नास्याः कदाचित्स्वतन्त्रा भवेत् १४८

पित्रा भर्त्रेति पित्रा पत्या पुत्रैर्वा नात्मनो विरहं कुर्यात् यस्मादेषां वियोगेन स्त्री [illegible] पतिपितृकुले निन्दितेन करोति १४९॥

सदा प्रहृष्टया भाव्यं गृहकार्येषु दक्षया सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया १५०॥

सदा प्रहृष्टेति सर्वदा भर्तुरविद्विष्टे [illegible] गृहकर्मणि च तत्परया [illegible] व्यये चानुक्तद्वयादाना स्त्रिया भवितव्यम् १५०।

यस्मै दद्यात्पिता त्वेनां भ्राता वानुमते पितुः तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् १५१॥ यस्मै दद्यादिति यस्मै पिता पत्नीं दद्या
त् पितुरनुमत्या भ्राता वा तं जीवन्तं परिचरेत् मृतं च नातिक्रमेत [illegible] पारलौकिककृत्यादिनेन च १५१॥

मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम् १५२॥

मङ्गलार्थमिति यदासां स्वस्त्ययनं [illegible] यज्ञश्चासां प्रजापतियागः [illegible] विवाहेषु क्रियते तन्मङ्गलार्थम् [illegible] [illegible] शुश्रूषते [illegible] यत्तन्व
[illegible] विरोधः १५२॥

अनृतावृतुकाले च मन्त्रसंस्कारकृत्पतिः सुखस्य नित्यं दातेह परलोके च योषितः १५३ यतः अनृतावृतुकाल इति मन्त्रसंस्कारो विवा
हः [illegible] इहलोके सुखस्य दाता [illegible] परलोके

विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः १५४॥ [illegible] १५३

तस्मात् विशील इति सदाचाररहितः [illegible] गुणहीनो वा तथापि साध्व्या स्त्रिया देववत्पतिराराधनीयः १५४॥

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम् पतिं शुश्रूषते येन तेन स्वर्गे महीयते १५५

म॰
मु॰ मे॰
९०

यस्माच्च नास्ति स्त्रीणामिति यथा भर्तुः कुष्माण्डिमारणे योगादिना श्रद्धोपस्थिता वपि पत्नीत्वेनायज्ञादिष्वधिकृतिः तथा न स्त्रीणां भर्तृव्यतिरेकेण सिद्धिः नापि भर्तुरनुमतिं चेद्व
पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा पतिलोकमभीप्सन्ती नाचरेत्किंचिदप्रियं १५६ णाच्च तापत्नो मोक्षितेन भर्तृपरिचर्ययैव स्त्री स्व
र्गलोके पूज्यते ॥
पाणिग्राहस्येति पत्या सह धर्माचरणेन या जिता स्वर्गादिर्लोकः तमिच्छन्ती साध्वी स्त्री जीवतो वा मृतस्य वा भर्तुर्न किंचिदप्रियमाचरेत् मृतस्यापि श्राद्धाभिचाराणा विहि
कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु १५७ ॥ नश्राद्धवेडनेन वहूत्य समभवति १५६
काममिति पुष्पमूलफलैः पवित्रैश्च देहं क्षपयेत् अल्पाहारेण जीवनं कुर्यात् न तु भर्तरि मृते व्यभिचारयियापरपुरुषस्य नामाप्युच्चारयेत् १५७ ॥
आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् १५८ एवं च मृते आसीतेति क्लमायुक्ता नि
यमवती एकभर्तृकानां यो धर्मः प्रकृष्टतमः तमिच्छन्ती मधुमांसमैथुनवर्जनात्मकब्रह्मचर्यशालिनी मरणपर्यन्तं तिष्ठेत् अपुत्रापि पुत्रार्थं न परपुरुषम
वेत १५८
अनेकानि सहस्राणि कुमारब्रह्मचारिणां दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् १५९ ॥
यस्मात् अनेकानीति बाल्यात् एव ब्रह्मचारिणामकृतदाराणां सनकबालखिल्यादीनां ब्राह्मणानां बहूनि सहस्राणि कुलवृद्ध्यर्थं सन्ततिमनुत्पाद्यापि स्व
र्गं गतानि १५९
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः १६० ॥
मृते भर्तरीति साध्वाचारा स्त्री मृते भर्तरि ब्रह्मचर्यं कृत्वा पुत्ररहितापि स्वर्गं गच्छति यथा ते सनकबालखिल्यादयः अपुत्राः स्वर्गं गताः १६०
अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते सेह निन्दामवाप्नोति पतिलोकाच्च हीयते १६१ ॥ अपत्यलोभादिति पुत्रो मे जा
यतां तेन स्वर्गं प्राप्स्यामीति लोभेन या स्त्री भर्तारमतिक्रम्य वर्तते व्यभिचरतीत्यर्थः सेह लोके गर्हां प्राप्नोति परलोकं च स्वर्गं तेन पुत्रेण न लभते १६१ ॥
नान्योत्पन्ना प्रजास्तीह न चाप्यन्यपरिग्रहे न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते १६२ अन्येनेह समाहृता नास्येति यस्मा
दन्येनोत्पादिता प्रजा पाणिग्राहस्य प्रजा न भवति न वा स्वयत्नात्तु प्रादिना उत्पादकस्य प्रजा भवति पतिज्ञातियोगात्मादिविषयं वक्ष्यमाणे
अन्येनेति क्षेत्रपुरुषेण उत्पादिता सा प्रजा तस्य व्यापादितस्मृतिविहितमिति साध्वी कार्याऽर्हत्वेनेति लोके प्रसिद्धावपि साध्वाचाराणां न क्वचिद्वर्णा द्वितीयो भर्तोपदि
श्यते एवं च मृते पुनः ... १६२
पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते निन्द्यैव सा भवेल्लोके परपूर्वेति चोच्यते १६३
पतिमिति अपकृष्टजातियादिकं स्वकीयं पतिं त्यक्त्वा उत्कृष्टं ब्राह्मणादिकं या आश्रयति सा लोके गर्हणीयैव भवति परो भर्ता पूर्वो भर्ता अस्याः प्रभृतिति वलो
केरुच्यते १६३
व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यतां शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते १६४
व्यभिचारिफलमाह व्यभिचारेति परपुरुषोपभोगेन स्त्री इह लोके गर्हणीयतां लभते मृता च शृगाली भवति कुष्ठादिरोगैश्च पीड्यते १६४ ॥
पतिं या नाभिचरति मनोवाग्देहसंयता सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते १६५ ॥

90A

पतिं येति मनोवाग्देहसंयतेति विशेषणोपादानात् या मनोवाग्देहैरेव भर्तारं न व्यभिचरति सा भर्तृलोकमाप्नोति मनोवाग्देहव्यापारं … सहार्जितान्
लोकानाप्नोति इह चासौ साध्वीति … मनसा … पतिं न व्यभिचरतीति विधानार्थो देहकव्यभिचारनिषेधे … प्रयत्नवादः १६५ ॥
अनेन नारी वृत्तेन मनोवाग्देहसंयता । इहाग्र्यां कीर्तिमाप्नोति पतिलोकं परत्र च १६६ अनेनेति अनेन स्त्रीधर्मप्रकारेणोक्तेन वा
… पतिशुश्रूषाभर्त्रव्यभिचारादिना मनोवाक्कायसंयता सती इह लोके प्रकृष्टां कीर्तिं परत्र च इत्यादि सहार्जितं स्वर्गादिलोकं चाप्नोतीति प्रकरणार्थोपसंहारः १६६
एवंवृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम् । दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् १६७ ॥
एवंवृत्तामिति द्विजातिः समानवर्णां यथोक्ताचारयुक्तां पूर्वं मृतां भार्यां श्रौतस्मार्ताग्निभिर्यज्ञपात्रैश्च दाहयेत् धर्मज्ञो दाहयेत् १६७ ॥
भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि । पुनर्दारक्रियां कुर्यात्पुनराधानमेव च १६८ ॥
भार्यायै इति पूर्वं मृतायै … अन्त्यकर्मणि दाहनिमित्तमग्नीन्समर्प्य गृहस्थाश्रममिच्छन् … पुनर्विवाहं कुर्यात् श्रौतस्मार्ताग्नीन् … आधानं … १६८
अनेन विधिना नित्यं पञ्चयज्ञान्न हापयेत् । द्वितीयमायुषो भागं कृतदारो गृहे वसेत् १६९ इति मानवे धर्मशास्त्रे
भृगुप्रोक्तायां संहितायां स्त्रीधर्मविधिः पञ्चमोऽध्यायः ५ ॥
अनेनेति अनेन तृतीयाध्यायोक्तविधिना पञ्चमहायज्ञान्न त्यजेत् द्वितीयमायुषो भागं कृतदारपरिग्रहोऽनेनैव यथोक्तविधिना गृहस्थविहितानाचरन् …
न गृहस्थधर्मा … पञ्चयज्ञानां … पृथक् … दर्शितः १६९ इति कुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यां पञ्चमोऽध्यायः ५
एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः । वने वसेत्तु नियतो यथावद्विजितेन्द्रियः १ ॥
एवमिति आश्रमसमुच्चयपक्षाश्रितो द्विजातिः कृतसमावर्तनो उक्तप्रकारेण यथाशास्त्रं गृहाश्रममनुष्ठाय नियतः कृतनिश्चयो यथाविधानं वनवासमा…
… यथावद्विषयेभ्यो जितेन्द्रियः परिपक्वकषायः … वानप्रस्थाश्रममनुतिष्ठेत् १ ॥
गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् २ ॥ गृहस्थस्त्विति गृहस्थो यदात्मदेहे
… वलीपलितं … पश्येत् … विषयरागतया वानप्रस्थं … आश्रयेत् २ ॥
संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम् । पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ३ ॥
संत्यज्येत्यादि ग्राम्यव्रीहियवादिकं … सर्वं … परिच्छदं … भार्यां पुत्रेषु समर्प्य इच्छन्त्या सहैव वनं गच्छेत् ३ ॥
… पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ४ ॥
अग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदम् … ग्रामादरण्यं निःसृत्य संयतेन्द्रियः सन्निवसेत् ४ ॥
अग्निहोत्रमिति श्रौताग्नीन् … गृह्याग्निं … उपकरणं …
मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा । एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकम् ५
मुन्यन्नैरिति मुन्यन्नैर्नीवारादिभिर्नानाप्रकारैः पवित्रैः शाकमूलफलैर्वा … एतानेव … महायज्ञान् यथाशास्त्रमनुतिष्ठेत् ५ ॥

मा. टी. ९१

वसीत चर्म चीरं वा सायं स्नायात्प्रगे तथा जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ६ वसीतेति मृगादिचर्म वस्त्रखण्डं वा आ-
च्छादयेत् हारीतेन तु वल्कशाली चर्मचीरकुशमुञ्जफलकवासा इति दर्शिता वल्कलादिकमप्युक्तं सायंप्रातः स्नायात् जटाश्मश्रुलोमनखानि नित्यं धारयेत् ६
यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ७ यद्भक्ष्यमिति यद्भुञ्जीत ततो यथाश-
क्ति बलिं भिक्षां च दद्यात् बलिमिति वैश्वदेवान्तस्याहुत्युपलक्षणार्थं तेनैव महायज्ञानिति विहितत्वात् आश्रमागतान् जलफलमूलभिक्षादानेन पूज-
येत् ७
स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः दाता नित्यमनादाता सर्वभूतानुकम्पकः ८ ॥
स्वाध्याय इति वेदाभ्यासे नित्ययुक्तः स्यात् शीतातपादिद्वन्द्वसहिष्णुः सर्वोपकारकः संयतमनाः सततं दाता प्रतिग्रहनिवृत्तः सर्वभूतेषु कृपावान्भवेत् ८ ॥
वैतानिकं च जुहुयादग्निहोत्रं यथाविधि दर्शमस्कन्दयन्पर्व पौर्णमासं च योगतः ९ ॥
वैतानिकमिति गार्हपत्यकुण्डस्थानामग्नीनामाहवनीयदक्षिणाग्निकुण्डयोर्विहारो वितानं तत्र भवं वैतानिकमग्निहोत्रं यथाशास्त्रमनुतिष्ठेत् दर्शं च पौर्णमासं च य-
थाश्रुति श्रौतस्मार्ते दर्शपौर्णमासौ योगतः स्वकालेऽस्कन्दयन् अपरित्यजन् भार्याग्निः देयपक्षे च रजस्वलायामिव भार्यायामेतेषामनुष्ठानं भवति विशेषाश्रवणात् ९ ॥
ऋक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत् उत्तरायणं च क्रमशो दाक्षस्यायनमेव च १० ॥ ऋक्षेति ऋक्षेष्टिर्नक्षत्रेष्टिः आग्रयणं
नवसस्येष्टिः ऋक्षेष्ट्याग्रयणं चेति समाहारद्वन्द्वः तथा चातुर्मास्यान्युत्तरायणदाक्षायणानि श्रौतकर्माणि क्रमेणानुतिष्ठेत् अत्र केचित्सर्वमेतत् श्रौतं दर्शपौर्णमासादिकमेवा-
नवसस्येष्टिः ऋक्षेष्ट्याग्रयणं वेति समाहारद्वन्द्वः तथा चातुर्मास्यादेषां वा न च स्मृतिः श्रौतानां बाधते इत्याहुः तदसत् वासन्तशारदैरित्युत्तरश्लोके मेध्यैर्नीवा-
नवसस्यस्य तदर्थमुच्यते न तु स्मार्तत्वे शास्त्रीयत्वात् चपुरोडाशादिविधेर्वैयर्थ्यापत्तेः गोविन्दराजस्तु वसिष्ठादिभिरेव कर्तृत्वविधानात् नामेतानि वैतानिकानीत्याह १० ॥
रादिभिः वानप्रस्थविषयतया स्पष्टश्च पुरोडाशादि
वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक् ११ ॥
वासन्तेत्यादि वसन्तोद्भवैः मेध्यैर्यागयोग्यैर्मुन्यन्नैर्नीवारादिभिः स्वयमानीतैः पुरोडाशांश्चरूंश्च यथाशास्त्रं तत्तद्यागादिसिद्धये संपादयेत् ११ ॥
देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यतरं हविः शेषमात्मनि युञ्जीत लवणं च स्वयंकृतम् १२ ॥ देवताभ्य इत्यादि तत्तद्वनोद्भवनीवा-
रादिभिः साधितं मेध्यतरं यागार्हं हविर्देवताभ्यो हुत्वा शेषमात्मार्थमुपभुञ्जीत आत्मना च कृतं लवणमूषरलवणमुपभुञ्जीत १२ ॥
स्थलजौदकशाकानि पुष्पमूलफलानि च मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्च फलसंभवान् १३ ॥
स्थलजेति स्थलजलोद्भवशाकानि मेध्यवृक्षोद्भवानि पुष्पफलानि मूलानि इङ्गुद्यादिफलोद्भवांश्च स्नेहानद्यात् १३ ॥
वर्जयेन्मधु मांसं च भौमानि कवकानि च भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च १४ ॥ वर्जयेदित्यादि माक्षिकं मांसं भौमा-
नीति पृथिवीजातानि कवकानि छत्राकानि भूस्तृणं मालवदेशप्रसिद्धं शाकं शिग्रुकं वाह्लिकेषु प्रसिद्धं शाकं श्लेष्मातकफलानि वर्जयेत् गोविन्दराज-
स्तु भौमानीति दर्पनार्थं भौमादीनि कवकानि छत्राकानि वृक्षोद्भवविशेषणमिच्छन् भौमानां कवकानां निषेधः वाह्लीकानां तु भूस्तृणमाह तदयुक्तं मनोर्नेव पंचमेऽध्याये कवकमा-
स्तु भौमानि कवकानीति प्रसङ्गवच्छेदकविशेषणमिच्छन् भौमानां कवकानां निषेधं यमस्तु भूमिजं वृक्षजं वापि छत्राकं भक्षयन्ति ये ब्रह्मघ्नांस्तान्विजानीयात् ब्रह्मवादिषु गर्हितानिति
त्रनिषेधात् वनस्थगोचरत्वानियमात्

91A

विशेषेणाह तदन्नस्यापि निषेधमाह। मधु मांसं भौमानि भूमिजातानि कवकानि च देवदत्तगोजिह्विकानाम कश्चित्प्रसिद्धः श्लेष्मातकफलानि च तद्विषयनियममाह तदपि
वहुप्रसिद्धं श्लेष्मातकेत्यस्य शिग्रुकं प्रसिद्धं भूस्तृणं मालविककवकानां छत्राकानां विषये यथा च मिकेति निषेधमत्र पिष्टान्निषेधो भक्ष्याणां दीनां निषेधपि च समस्याद्यस्थितविधा नार्थः १४॥

त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितं। जीर्णानि चैव वासांसि शाकमूलफलानि च १५॥
त्यजेदिति संवत्सरनिचयपक्षे पूर्वसंचितं नीवाराद्यन्नं जीर्णानि च वासांसि शाकमूलफलानि च आश्विने मासि त्यजेत् १५॥

न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित्। न ग्रामजातान्यार्तोऽपि मूलानि च फलानि च १६॥
न फालेति फालोपिकाफालकृष्टक्षेत्रजातं स्वामिनोत्सृष्टमपि क्षुधा पीडितोऽपि नाद्यात् तथा ग्रामजातान्यपि फलकुसुमभागानि मूलफलानि क्षुत्पीडितोऽपि न भक्षयेत् १६

अग्निपक्वाशनो वा स्यात्कालपक्वभुगेव वा। अश्मकुट्टो भवेद्वापि दन्तोलूखल.... कोऽपि वा १७॥
अग्निपक्वेति अग्निपक्वमश्नन्कालपक्वं वा फलादि यद्वा नोलूखलमुसलाभ्यां किंत्वश्मना तेन कुट्टितं फलादि अश्नीयात् दन्तावेवोलूखलं यस्यासौ दन्तोलूखलिको वा भवेत् १७॥

सद्यः प्रक्षालको वा स्यान्माससंचयिकोऽपि वा। षण्मासनिचयो वा स्यात्समानिचय एव वा १८॥ सद्यः प्रक्षालकः एकाहवृत्तिरन्यदिनार्थमसंचयी मासोपयुक्तधान्यसंचयी वा षण्मासनिचयो वा संवत्सरनिचयो वा भवेत् ... यथाशक्ति ... ऽवेक्ष्य नियमस्तिष्ठेत् १८

नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः। चतुर्थकालिको वा स्यात्स्याद्वाप्यष्टमकालिकः।
नक्तमित्यादि यथाशक्ति दिवसे वा नक्तं वा भुञ्जीत चतुर्थकालिको वा स्यात् प्रातर्भोजनमप्यपास्य दिनान्तरे सायंकालं ... अष्टमकालिको वा भवेत् ... भुञ्जीत १९॥

चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्तयेत्। पक्षान्तयोर्वाप्यश्नीयाद्यवागूं क्वथितां सकृत् २०॥ चान्द्रायणेति शुक्लकृष्णयोः पक्षयोः ... वर्तयेत् इत्यादिना वक्ष्यमाणेन चान्द्रायणविधिना वर्तेत पक्षान्तयोः ... यवागूं क्वथितां सकृत्।

पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा। कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः २१॥ दिति सायं प्रातर्वा २०॥
पुष्पमूलेत्यादि पुष्पमूलफलैरेव वा कालपक्वैः नाग्निपक्वैः स्वयं पतितैर्जीवेत् वैखानसो वानप्रस्थः तद्धर्मप्रतिपादकशास्त्रादर्शे नेस्थितः तैर्नैव वर्तयेद्वापि वा।

भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनं। स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः २२॥ वानप्रस्थो नामधर्मपुस्तिका २२॥
भूमावित्यादि केवलायां भूमौ लुठन्गतागतानि कुर्यात् स्थानासनाभ्यां उपविशन् उत्तिष्ठन् एवं दिवसं अवश्यकं स्नानभोजनादिकालं विहाय वायुं निय
म्य वेदे तत्र ... प्रयादाद्यभ्यां वादिनं तिष्ठेत् कं विकालं स्थितः पुनः ... प्रपदैः ... सवनेषु प्रातर्मध्यंदिनसायं स्नायात् यत्र सायं शा
गतेष्वस्तं तेन महास्थानियमा तिष्ठायोपदोविक।

ग्रीष्मे पंचतपास्तु स्याद्वर्षास्वभ्रावकाशिकः। आर्द्रवासास्तु हेमंते क्रमशो वर्धयेत्तपः।
स्त्रवेत् २२
ग्रीष्मे इत्यादि ग्रीष्मे पञ्चतपा भवेत् यद्यपि चतसृषु दिक्ष्ववस्थितैरग्निभिः सूर्येण चादित्येन जन्मना आत्मानं तापयेत् वर्षास्वभ्रावकाशो भवेत् यत्र देवो
वर्षति तत्र अच्छन्ना आवरणरहितस्तिष्ठेदित्यर्थः हेमंते वाद्रवासा भवेत् क्रमेण च यथा बलं वर्धयेत् तपः इति वानप्रस्थधर्मनियमः २३॥

मनु
टी॰ से॰
९२

उपस्पृशंस्त्रिषवणं पितॄन्देवांश्च तर्पयेत् तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः ॥ २४ ॥ उपेति त्रिःस्नानमपि त्रिषवणं स्नानं देवर्षिपितृत
र्पणविधानार्थमनूद्यते प्रातर्मध्यंदिने सायं सवनेषु त्रिषु देवर्षिपितृतर्पणं कर्तव्यं अन्यदपि पक्षमासोपवासादिकं उग्रतरं तपोऽनुतिष्ठन्यथाक्रमं मनुष्ठानपवासि।
अग्नीनात्मनि वैतानान्समारोप्य यथाविधि अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः के चित्समारोपवासिन इति शरीरं शोषयेत् २४
गनः ॥ २५ ॥ अग्नीनित्यादि श्रौतानग्नीन्वैतानान्सम्यग्रविधानेन भस्मपानादिना आत्मनि समारोप्य लौकिकाग्निगृहशून्योयावज्जीवं स्यात् वृक्षमूलनिकेतन इति श्रुतिर्मौ
नव्रतवांश्च फलमूलाशनपक्व स्यात् लोवारपक्वितामश्रीयात् एतच्चोद्देशमासोभ्यासोपरि अनग्निरनिकेत इति वसिष्ठवचनात् ण्मासोपर्यनग्निश्च मनिकेतनत्वं च
२५
अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः शरणेष्वममश्चैव वृक्षमूलनिकेतनः ॥ २६ ॥
अप्रयत्न इति सुखहेतुषु जनेषु प्राइफलभक्षणाशीतातपपरीहारादिषु अप्रयत्नः स्त्रीसंभोगी भूमिशायी च निवासस्थानेषु ममत्वरहितो वृक्षमूलवासी स्यात्
२६
तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥ २७ ॥
फलमूलासंभवे चत्तपस्विति वानप्रस्थेभ्यो ब्राह्मणेभ्यः प्राणमात्रधारणाविवेभैक्षमाहरेत् तदभावे चान्येभ्यो वनवासिभ्यो गृहस्थेभ्यो द्विजेभ्यः ॥ २७ ॥
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसन् प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥ २८ ॥
तस्याप्यसंभवे ग्रामादिति ग्रामादानीय ग्रासमष्टौ ग्रासान् पर्णपुटे शरावादिखण्डेन पाणिनैव वा गृहीत्वा वानप्रस्थो भुंजीत ॥ २८ ॥
एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥ २९ ॥ एताश्चेति वानप्रस्थस्य एतादीक्षा एता
श्चान्याश्च वानप्रस्थशास्त्रोक्ता नियमान्सेवेत औपनिषदीश्च श्रुतीः उपनिषत्पठिताब्रह्मप्रतिपादकवाक्यानि विविधान्यात्मनो ब्रह्मत्वसिद्धये यथार्थं तत्त्वम
भ्यस्येत् २९
ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये ॥ ३० ॥
ऋषिभिरिति यस्मादेता ऋषिभिर्ब्रह्मदर्शिभिः परिव्राजकैर्गृहस्थैश्च वानप्रस्थैर्ब्रह्मज्ञानतपोवृद्ध्यर्थं उपनिषदुक्ततया सेविताः सेवितेति पूर्वस्यानुवा
दः ३०
अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः आनिपाताच्छरीरस्य युक्तो वार्यनिलाशनः ॥ ३१ ॥
अपरेति अविकित्सितव्याधिपुरुषो अपराजितामैशानीं दिशमाश्रित्य अकुटिलगतिर्युक्तो योगनिष्ठो जलानिलाशनः आशरीरनिपातात्गच्छेत् महाप्रस्था
नामिति गच्छेत्। एषः सकामो प्रयायादिति श्रुत्यापि न विरोधः यतः स्वःकामिप्राय्य प्रयोगात् अवैधमरणमनया निषिध्यतेऽतः शास्त्रीय ३१
नात्मघातेविहितेवेदम् गतेनतप्रायश्चित्तः स्वकामोऽप्यायादिति
आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुम् वीतशोकभयो विप्रो ब्रह्मलोके महीयते ३२ आसामित्यादि पूर्वोक्तानां महर्षीणां ऋतेमानां आश्रम
गतानुष्ठानचर्याणां ब्रह्मप्रस्थेन वानप्रस्थाश्रमसमनुष्ठानेन यामीं त्यक्त्वा अपगतदुःखभयो ब्रह्मलोके महीयते ३२
आसामित्यादि पूर्वोक्तानां ऋषीणां आश्रमानां वानप्रस्थस्य सकर्मात इति च विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीरिति नेतासाध्याऽत्मज्ञानसंभवात् ३२
ज्ञानभवतोऽमात्मज्ञानी नत्वयं केवलकर्मणा वानप्रस्थः

92A

वनेषु तु विहृत्यैवं तृतीयं भागमायुषः चतुर्थमायुषो भागं त्यक्त्वा संगान्परिव्रजेत् ३३॥

एवमनेन प्रकारेण मानस्याह्न वनेषु इत्यादि श्रुतिरनियतपरिमाणत्वात् आयुषस्तृतीयभागस्य दुर्विज्ञानात्तृतीयमायुषो भागमिति रागक्षयावधिर्वानप्रस्थानका।
लोपलक्षणार्थं तृतीयपदं भावलि विहितो वनवासे हेयान् तस्मादिति वयसः परिव्राज्यमित्यादि चतुर्थं वनेषु विहृत्यैवं विधिवदभ्युत्थानयोग्यानन्तरं कारेणाप्य
संगान्परित्यज्य परिव्राजकाश्रममनुतिष्ठेत् ३३॥
स्वाश्रमविषयरागोपशममनायके विकालमेव स्वायं चतुर्थमायुषो भागमिति विधायाः कालमवेक्ष्याविशेषसमानमस्मात्परिव्राजकाश्रममनुतिष्ठेत्

आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः भिक्षाबलिपरिश्रान्तः प्रव्रजन्प्रेत्य वर्धते ३४

आश्रमादिति पूर्वपूर्वाश्रमादुत्तरोत्तराश्रमं गत्वा तत्रस्थो यथाशक्ति हुतहोमो जितेन्द्रियो भिक्षाबलिदानविशेषेणाश्रान्तः परिव्रज्याश्रममनुतिष्ठन्
गत्वाश्रमवयाः शहमानतावानप्रस्थाश्रममनुष्ठायस्थः यथाशक्ति मताश्रमहुतहोमो जितेन्द्रियो भिक्षाबलिदानविशेषेणाश्रान्तः लोकमादलभाङ्ग्स भूयसा ज्ञानिषायश्राम्राति ३४

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः

ऋणानीत्यादि आश्रममनुष्ठायस्वमाधितोक्तानि ऋणानि त्रीण्यपाकृत्य अपनीय मोक्षाभिधेयानि त्रीणि ऋणानि भिक्षोः यमो देमोहनान्तरेणापि व्रजाश्रमे
व्रजत्यधः ३५॥ ऋणानीत्यादि आश्रममनुष्ठायस्व मनो नियोजयेत्तानि ऋणानि सप्राथमा

अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्

देवतयाश्रममनुतिष्ठन्नरके चेति ३५
तान्येव ऋणानि दर्शयति अधीत्येति जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते यज्ञेन देवेभ्यः स्वाध्यायेन ऋषिभ्य इति श्रूयते अत्रानेन यथा शास्त्र
तान्येव ऋणानि दर्शयति अधीत्य विधिवन्मध्यमगतिं ज्योतिष्टोमादि यज्ञैश्चानुष्ठाय मोक्षान्तरं चतुर्थाश्रमे मनो नियोजयेत् ३६
दानयोः सम्यगगमनवर्जनादियमेण ग्राम्याद्यथा सामर्थ्यम्

अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान् अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः ३७॥

अनधीत्येति वेदाध्ययनमकृत्वा पुत्रमनुत्पाद्य यज्ञाननुष्ठाय मोक्षमिच्छन्नरकं व्रजति ३७॥

प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ३८

प्राजापत्येति यजुर्वेदीया प्राजापत्याख्येष्टिं सर्वस्वदक्षिणां प्रजापतिदेवताकां कृत्वा इष्टिं कृत्वा तदनुविधिनैव आत्मन्यग्नीन्समारोप्य गृहोदिष्टमिथ्यानात् वानप्र
स्थाश्रममनुष्ठायैव चतुर्थाश्रममनुतिष्ठेत् एतेन मनुनापि आश्रमसमुच्चयाभिप्रायः प्रदर्शितः स्मृतिनिबद्धाश्रमक्रमविकल्पिताः
तथा बालस्मृतिः ब्रह्मचर्यं समाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् इतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा ३८॥

यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ३९

य इत्यादि यः सर्वभूतेभ्यो भयं
भ्यः स्थावरजंगमेभ्यो भयं दत्त्वा गृहाश्रमात्प्रव्रजति तस्य ब्रह्मप्रतिपादकोपनिषत्प्रियस्य सूर्यादयो लोकाः हिरण्यगर्भादिलोकाः तेजोमयाः प्रकाशा भवन्ति ३९॥

यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ४०॥

नानात्रेति स्थः ३९॥
यस्मादित्यादि गृहानिर्गतः पवित्रे यस्माद्द्विजात् स्वल्पमपि भयं भूतानां न भवति तस्य देहाद्विमुक्तस्य वर्तमानदेहत्यागे कस्मादपि भयं न भवति ४०

आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ४१

नमिसिंहपृ

म॰
धा॰ मे॰ 93
१५३

ग्रामादित्यादि गृहान्निर्गतः पवित्रैर्दण्डकमण्डल्वादिभिरुपेतो मौनी समुपोढेषु कामेषु केनचिन्निमन्त्र्यमाणोऽपि तेषु स्पृहामादित्य विगतस्पृहः परिव्रजेत्तमे

एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान्। सिद्धिमेकस्य संपश्यन्न जहाति न हीयते॥ ४२ प्रातिस्थित्वपुष्पविवर्जनपरयावापावनेः कु शेषकमावाह्य ४१॥

एक इत्यादि एकस्य सर्वसंगविरहितस्य मोक्षो वा सिद्धिर्भवतीति जानन् एक एव सर्वदा मोक्षार्थं चरेत् एक एवेत्यनेन तु सर्वपरित्यागः पुत्रादित्यागः उच्यते अत एव मसहायवानत

स न कस्यापि पुत्रकलत्रादि तिष्ठति किं विनश्यति किं न कस्यापि त्यागेन दुःखमनुभवति नापि स जहाति त्यागदुःखमनुभवतीति न तेनासौ सर्वं च निर्ममतः

अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत्। उपेक्षकोऽसंकुसुको मुनिर्भावसमाहितः॥ ४३ स चेत मुक्तिमाप्नोति॥

अनग्निरित्यादि अनग्निर्लौकिकाग्निसंयोगरहितः पेशलीयाग्निसमारोपणेति एवमुक्तत्वादनिकेतो गृहशून्यः ग्रामम् उपेक्षकः शरीरस्य व्याध्याद्युत्पादे तत्प्रतीकारर-

अनग्निरित्यादि असंचयक इत्यन्ये पठन्ति श्रुतिर्वा मननान्मौनस्य सर्वोक्तत्वाभावे चक्षुर्णोः समाहितः तदेकतानमनाः ब्रह्मण्येव दिवारात्रो

हितः असंकुसुकः अस्थिरमतिः असंचयक इति समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्॥ ४४ वसन्नमित्यादि ग्राममन्नार्थमाश्रयेत् ४३

कपालं वृक्षमूलानि कुचेलमसहायता

कपालमित्यादि मृण्मयकर्परादिभिक्षापात्रं वासार्थं वृक्षमूलानि स्थूलजीर्णवस्त्रं कौपीनकं पादिसर्वेषु चैवमुक्तत्वादिभावः एतन्मुक्तिमाश्रयन् नाभिनन्देत

नाभिनन्देत मरणं नाभिनन्देत जीवितम्। कालमेव प्रतीक्षेत निर्देशं भृतको यथा॥ ४५॥ सर्वलिंगं ४४

नाभिनन्देतेत्यादि मरणं जीवितं च बहुकालमपि न कामयेत् किंतु कर्माधीनं मरणकालमेव प्रतीक्षेत निर्दिश्यते इति निर्देशो भृतिः तत्परिशोधयन्ने कालमिव भृतकः ४५

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्। सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत्॥ ४६ दृष्टिपूतमित्यादि केशास्थ्यादिपरिहारार्थं

दृष्टिपूतं न्यसेत्पादं भूमौ क्षिपेत् जलेषु जन्त्वादिवारणार्थं वस्त्रपूतं जलं पिबेत् सत्यपवित्रां वाचं वदेत् तत्र मनसा परिशुद्धं सर्वविकल्पः प्रतिषिद्धं कर्तव्य

अतिवादांस्तितिक्षेत नावमन्येत कंचन। न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित्॥ ४७॥ स्वयमात्मना सर्वदा परिज्ञात्मा ४६

अतिवादानित्यादि अतिक्रमवादान् सहेत न कंचित् परिभवेत् नेमं देहमाश्रित्य व्याधिजनितं माश्रित्य न कुर्याद्वैरं केनचित् समः सर्वेषु कुर्यात् ४७

क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत्। सप्तद्वारावकीर्णां च न वाचमनृतां वदेत्॥ ४८॥

क्रुध्यन्तमित्यादि संक्रान्तक्रोधाय कस्मैचित् प्रतिक्रोधं न कुर्यात् तिरस्कृतः सन्नवाचं सर्वदा वदेत् नतु निन्देत् सप्तद्वारावकीर्णामिति बुद्ध्यादीनि यद्वा

कर्मेन्द्रियत्यादि संज्ञानकर्त्यायकस्मिन् इति नः कारणहृदयं वेदान्तदर्शने एतेर्गृहीतविषयेषु वाक्प्रवृत्तेः तानि सप्तद्वाराणि सप्तद्वारावकीर्णा विविक्तानि

हि बुद्धीन्द्रियाणि मनो बुद्धिश्चेति करणहृदयं वेदान्तदर्शने एतैः गृहीतविषया वाक् प्रवर्तते तस्मात् सप्तविषयावगुण्ठिता वागर्थस्य मनोव्यापारः तत्र कथं

गृहीतार्थविषयां वाचं न वदेत् किंतु ब्रह्मविषया वदेदिति अस्मिन् विषये न वदेदिति लभ्यते उच्यते अत एवानृतामिति विषयत्वविनाश्यवाचकत्वात्

गावकीर्णाविशेषेण ब्रह्मविषयां वदेदिति वक्तव्ये विषयावाचना चारयेत् ब्रह्मविनाशिन्याः विषयान्तरप्रसङ्गोऽपि नित्यवादिनो वेदान्ते गोविंदराजस्तु यथोक्तं

हि विषयरागपिन्नतो वृतेनेन विनाशिकार्यविषया वाचना चारयेत् एता निसप्तवाग्विषयतया वाक् प्रवृत्तेः द्वाराणि तेष्ववकीर्णां विविक्तां अनृतां स्त्रीविषयां

मायामाया व्यर्थकामाय मकामाय मायादिति एता निसप्तवाग्विषयतया वाक्प्रवृत्तेर्द्वाराणि तेष्ववकीर्णां विविक्तामिति

93A

सत्यम्तपावायं च न वदेत् अनेन समभ्युदयमेवाग्विषयत्वात्सम्महाराणिनेषां भेदाद्धिनाशित्वाच्च भ्रमनयान हि घयो वाचमसमांनवदेत् केवलं ब्रह्मविषयां वदेत् ४८

अध्यात्मरतिरासीनो निरपेक्षो निरामिषः आत्मनैव सहायेन सुखार्थी विचरेदिह ४९ ॥

अध्यात्मेति आत्मनं ब्रह्मादिकं तत्र रतिर्यस्य सोऽध्यात्मरतिः सर्वदा ब्रह्मध्यानपरः आसीनः इति स्वस्तिकादियोगासनस्थितः निरपेक्षो दंडकमंडल्वादिष्वपि विषयापेक्षाशून्यः निरामिषः आमिषविषयाः तदभिलाषरहितः आत्मनो देहेनैव सहायेन मोक्षसुखार्थी इह संसारे विचरेत् ४९ ॥

न चोत्पातनिमित्ताभ्यां न नक्षत्रांगविद्यया नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ५० ॥

नोत्पादिभूकंपाद्युत्पातनिमित्तस्यंदादिनिमित्तकफलेन अथवा अस्थिनीरसलोवादेरीदृशं फलमिति नक्षत्रांगविद्यया ईदृशानीति मार्गे दृश्यवर्तितव्यम् अनुशासनेन शास्त्रार्थकथनेन न कदाचिद्भिक्षां लब्धुमिच्छेत् ५० ॥

न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः आकीर्णं भिक्षुकैर्वान्यैरागारमुपसंव्रजेत् ५१ ॥

न तापसैरित्यादि वानप्रस्थैरन्यैर्वा ब्राह्मणैर्भिक्षार्थिभिः पक्षिभिः कुक्कुरैर्वा व्याप्तं गृहं भिक्षार्थं न प्रविशेत् ५१ ॥

कॢप्तकेशनखश्मश्रुः पात्री दंडी कुसुंभवान् विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ५२ ॥

कॢप्तेत्यादि कॢप्तकेशनखश्मश्रुर्भिक्षापात्री दंडी कुसुंभः कमंडलुस्तद्युक्तः सर्वप्राणिनोऽपीडयन् सर्वदा परिभ्रमेत् ५२ ॥

अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ५३ ॥

अतैजसमिति सौवर्णादिवर्जितानि निश्छिद्राणि भिक्षापात्राणि भवेयुः तथा च यमः सुवर्णरूप्यपात्रेषु ताम्रकांस्यायसेषु च दत्वा भिक्षां न धर्मोऽस्ति गृहीत्वा नरकं व्रजेत् तेषां च यतिपात्राणां जलेन शुद्धिः यज्ञे चमसानामिव ५३

अलाबुं दारुपात्रं च मृन्मयं वैदलं तथा एतानि यतिपात्राणि मनुः स्वायंभुवोऽब्रवीत् ५४ ॥

अलाबुमित्यादि अलाबुदारुमृत्तिकावंशादिविदलनिर्मितानि यतीनां भिक्षापात्राणि स्वायंभुवो मनुरवदत् वैदलं तत्फलक्रिमिंजमिति ५४

एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ५५ ॥

एककालमिति एकवारं भिक्षार्थं चरेत् न तत्रापि बहुभिक्षाप्रसंगं कुर्यात् यतो बहुतरभिक्षाभक्षणप्रसक्तो यतिः अन्नपानरस्यादिविषयेष्वपि प्रसज्जते ५५ ॥

विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ५६

विधूम इत्यादि विगतपाकधूमे निर्वृत्तावहनने मुसले निर्वाणपाकाग्नौ गृहस्थपर्यन्तभुक्तवज्जने सत्युच्छिष्टशरावस्य संपाते सर्वदा यतिर्भिक्षां चरेत् एतच्च दिनषष्ठभागे यथाह याज्ञवल्क्यः अप्रमत्तश्चरेद्भैक्षं सायाह्ने नाभिलक्षितः ५६

अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् प्राणयात्रिकमात्रः स्यान्मात्रासंगाद्विनिर्गतः ५७

अलाभ इत्यादि भिक्षादेरलाभे न विषादं कुर्यात् लाभे च हर्षं न कुर्यात् प्राणस्थितिमात्रोपयोगिभोजनपरः स्यात् दंडकमंडलुमात्रात्स्वपि इदं मदीयमिति संगोऽभिनिवेशस्तस्माद्विनिर्गतः ५७

अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ५८ ।

अभीत्यादि पूजापूर्वकभिक्षालाभं सर्वकालं निंदेत् न स्वीकुर्यादित्यर्थः यस्मात्पूजापूर्वकलाभस्वीकारादात्मगौरवेण हर्षमदादिभिः आसन्नमुक्तिरपि यतिर्जन्मबंधमा

मं. टी. ५९ ९४

न लभते ५८॥ अल्पान्नाभ्यवहारेण रहःस्थानासनेन च। ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ५९॥
अल्पेत्यादि आहारलाघवेन निर्जनदेशस्थानादिना च रूपादिविषयैराकृष्यमाणानीन्द्रियाणि निवर्तयेत् ५९॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च। अहिंसया च भूतानाममृतत्वाय कल्पते ६०॥
यस्मात् इन्द्रियाणामित्यादि इन्द्रियाणां निग्रहेण रागद्वेषाभावेन च प्राणिहिंसाविरतेन च मोक्षयोग्यो भवति ६०॥
अवेक्षेत गतीर्नृणां कर्मदोषसमुद्भवाः। निरये चैव पतनं यातनाश्च यमक्षये ६१॥
इदानीं इन्द्रियनियमोपायं विषयवैराग्याय संसारगतिचिन्तनमुपदिशति अवेक्षेतेत्यादि विहिताकरणनिषिद्धाचरणरूपकर्मदोषजन्या मनुष्याणां
पश्वादिदेहप्राप्तीर्नरके पतनं यमलोके नरकस्थस्य तीव्रताडनादिभिर्वा शरीरवेदनाः श्रुतिपुराणादिप्रसिद्धाश्चिन्तयेत् ६१॥
विप्रयोगं प्रियैश्चैव संयोगं च तथाप्रियैः। जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ६२
विप्रयोगमित्यादि इष्टपुत्रादिवियोगं अनिष्टहिंस्रकादियोगं जराभिभवनं व्याध्यादिभिश्चपीडनं कर्मदोषसमुद्भवमनुचिन्तयेत् ६२॥
देहादुत्क्रमणं चास्मात्पुनर्गर्भे च संभवम्। योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ६३ देहादित्यादि अस्माद्देहादस्य जीवात्मनः
पतितस्य श्लेष्मादिदोषनिरुद्धकण्ठस्य महतीं वेदनां गर्भे वासं तिर्यग्बहुलोपदुःखजालादि निकृष्टजातियोनिकोटिसहस्रगम
उत्क्रमणं तथा च संभवमिह महारोगैः दुःखयोगं शरीरिणाम् धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ६४॥ नानि सर्गकर्मवशादनुचिन्तयेत् ६३॥
अधर्मप्रभवं चैव दुःखयोगं अधर्महेतुकं दुःखसंबन्धं धर्महेतुकं चार्थोत्र समासादाकारलक्षणं भवमोक्षलक्षणमनन्तं ब्रह्मसुखसंयोगं चिन्तयेत् ६४॥
अधर्मेत्यादि शरीरवतां जीवात्मनां ... देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ६५ सूक्ष्मतामित्यादि योगेन विषयान्तरविनिवृत्तचित्तैकाग्र्ये
सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः सर्वान्तर्यामित्वेन सूक्ष्मतां निरवयवत्वात् त्यागडुत्कृष्टापकृष्टेषु देवपश्वादिशरीरेषु जीवानां शुभाशुभफलभोगार्थं
यत्परमात्मनः स्थूलशरीराद्यपेक्षया सर्वान्तर्यामि रतः समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ६६॥ नानि मोक्षार्थी ज्ञानमनुचिन्तयेत् ६५॥
दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे रतः आश्रमविरुद्धाचारदूषितोऽपि आश्रमलिङ्गरहितोऽपि सर्वभूतेषु ब्रह्मबुद्ध्या समदृष्टिः सन् धर्ममनुतिष्ठेन्नहि
दूषितहृति यस्मिन्कस्मिंश्चिदाश्रमे स्थितस्तदाश्रमविहितानुष्ठानपरश्च धर्मश्चात्मन्वाधनया केन न लिङ्गपरित्यागार्थम् ६६॥
दण्डलिङ्गधारणमात्रं धर्मकारणं किन्तु विहितानुष्ठानं न नामग्रहणादेव तस्य वारि प्रसीदति ६७॥ अत्र दृष्टान्तमाह फलमित्यादि यद्यपि कतक
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् तथापि तन्नामोच्चारणेन वारि न प्रसीदति किन्तु फलप्रक्षेपेण एवं न लिङ्गधारणमात्रं धर्मकारणं किन्तु विहितानु
वृक्षस्य फलं कतकं ... रात्रावहनि वा सदा शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ६८॥ ष्ठानं ६७
संरक्षणार्थं जन्तूनां

94A

संरक्षणार्थमित्यादि शरीरस्यापि पीडायां सत्यां पिपीलिकादिप्राणरक्षार्थं रात्रौ दिवसे वा सदा भूमिं निरीक्ष्य पर्यटेत् शरीरस्य पीडायामपि सदा भूमिं निरीक्ष्य पर्यटेदिति ॥ ६८ ॥

अह्ना रात्र्या च याञ्जन्तून् हिनस्त्यज्ञानतो यतिः तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् ६९

अत्र प्रायश्चित्तमाह अह्ना रात्र्या चेति यतिर्यान् अज्ञानतो दिवसे रात्रौ वा प्राणिनो हिनस्ति तद्धननजनितपापनाशार्थं स्नात्वा षट् प्राणायामान् कुर्यात् प्राणायामः सप्रणवाः सव्याहृतिकाः ... इति वसिष्ठोक्तस्य ... ६९ ॥

प्राणायामाः सप्रणवव्याहृतिसप्रणवा गायत्री शिरसा सह त्रिः पठेदायतप्राणः प्राणायामः स उच्यते इति वसिष्ठोक्त...

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ७० ॥

प्राणायामा इति ब्राह्मणस्येति निर्देशात् ब्राह्मणजातेर्यतेरेव त्रयोऽपि प्राणायामाः सप्तभिर्व्याहृतिभिर्दशभिः प्रणवैर्युक्ता विधिवदित्यनेन सम्यग् विधानेन कृताः ... पूरककुम्भकरेचकविधिना कृता ब्राह्मणस्य श्रेष्ठं तपो ज्ञातव्यं पूरकादिस्वरूपं ... याज्ञवल्क्यः ... पूरकः कुम्भको रेचक ... पूरकः ... कुम्भको निश्चलश्वासो मुच्यमानस्तु रेचकः ... उभयोः ... अधिकरणे ... पत्त्यः ७०

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ७१ ॥

दह्यन्त इति धातूनां स्वर्णरजतादीनां यथा मूषायामग्निना ध्मायमानानां मलद्रव्याणि दह्यन्ते एवं मनसो रागादयश्चक्षुरादेश्च विषयप्रवणत्वादयो दोषाः प्राणायामेन विषयात् ... यन्ते ७१ ॥

प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषं प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्

प्राणायामैरित्यादि एवं तेनोक्तप्रकारेण प्राणायामै रागादिदोषान् दहेत् ब्रह्मणि चित्तदेशबन्धो धारणा ... तया पापानि ... ७२ एवं प्रतिप्राणायामैरित्यादि ... इन्द्रियाणां विषयसम्पर्कं निवारयेत् ब्रह्मध्यानेन ... इन्द्रियाणां विषयेभ्यः ... निवारयेत् ७२ ॥

... न भवति ... निवारयेत् ७२ ॥

उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ध्यानयोगेन सम्पश्येद्गतिमस्यान्तरात्मनः ७३ ॥

उच्चावचेष्वित्यादि अस्य जीवस्य उत्कृष्टापकृष्टेषु देवपश्वादिषु जन्मप्राप्तिमकृतात्मभिः शास्त्रैरसंस्कृतान्तःकरणैर्दुर्ज्ञेयां ध्यानाभ्यासेन सम्यक् संस्कारेणाङ्कं जानीयात् ततश्चाविद्याकाम्यनिषिद्धकर्मनिर्मितयन्त्रविधिः ... ब्रह्मज्ञाननिष्ठो भवेदिति तात्पर्यार्थः ७३ ॥

सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ७४ तत्र च सम्यग्दर्शनेति ... ब्रह्मसाक्षात्कारवान् कर्मभिर्न निबध्यते कर्माणि तस्य पुनर्जन्म तेन प्रभवन्ति पूर्वार्जितपापपुण्यब्रह्मज्ञानेन नाशात् ... तथा च श्रुतिः पुष्करपलाशमापो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत इति ... ब्रह्मसाक्षात्कारस्तु जन्ममरणप्रवाहं लभते ७४

अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ७५

अहिंसयेति निषिद्धहिंसावर्जनेन इन्द्रियाणां च विषयप्रसङ्गपरिहारेण वैदिकैर्नित्यैः कर्मभिः काम्यकर्माणां बन्धहेतुत्वात् ... तपसश्चर्ययो ...

मे भवस्य पवासमकृच्छ्रं चाद्ग्राणादेवदेहाने इह लोके तत्स्वं ब्रह्मरूपतां स्त्रिकल्पयललक्षणां शाश्वतीं प्राप्नोति पूर्वश्लोकेन ब्रह्मदर्शनस्य मोक्षहेतुत्वमुक्तं अनेन तु तत्सहकारितया
कर्मणां [illegible] ॥ ७५ ॥

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनं चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥ ७६ ॥

इदानीं मोक्षोपयोगितया संसारवैराग्याय देहस्वरूपमाह श्लोकद्वयेन अस्थीन्येव स्थूणा इव धारकत्वात् यस्य [illegible] स्नायुयुतं मांसशोणितलिप्तं
चर्मावच्छादितं मूत्रपुरीषाभ्यां पूर्णमतएव दुर्गन्धि ॥ ७६ ॥

जराशोकसमाविष्टं रोगायतनमातुरं रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥ ७७ ॥

जरेत्यादि च जरोपतापाभ्यामाक्रान्तं विविधव्याधीनामाश्रयम् [illegible] शोकेन विनश्वरस्वभावं च भूतावासमिमं पृथिव्यादिभूत
निर्मितमावासं देहमेव जीवस्य गृहत्वेन निरूपितं [illegible] यथा गृहं त्यजति तथा देहमेव त्यजेत् [illegible]
॥ ७७ ॥

नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥ ७८ ॥

नदीकूलमिति नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ब्रह्मोपासकस्य देहत्यागसमये मोक्षः आरब्धदेहस्य कर्मणां भोगेनैव नाशात् [illegible]
नदीकूलमिति नदीकूलं यथा वृक्षस्त्यजति [illegible] नदीवेगात् पातयेत् तथा देहं त्यजेत् यथा [illegible] शकुनिः [illegible] जललोभाद्
[illegible] तथा देहमिमं त्यजेत् संसारकष्टग्राहादिव जलचरप्राणिभेदाद्विमुच्यते ॥ ७८ ॥
[illegible]

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतं विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनं ॥ ७९ ॥

प्रियेषु स्वेषु सुकृतमप्रियेषु हितकारिषु दुष्कृतं निःक्षिप्य ध्यानयोगेन नित्यं ब्रह्माभ्येति ब्रह्मणि लीयते तथा च श्रुतिः
प्रियेषित्यादि [illegible] प्रियेषु हितकारिषु सुकृतमप्रियेषु दुष्कृतं [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ब्रह्माभ्येति ब्रह्मस्वभावमुपगच्छतीति [illegible]
[illegible]
[illegible]

यदा भावेन भवति सर्वभावेषु निःस्पृहः तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतं ॥ ८० ॥

यदेति यदा परमार्थेन विषयदोषभावनया सर्वविषयेषु निरभिलाषो भवति तदा इह लोके संतोषजं सुखं परलोके च मोक्षसुखमविनाशि प्राप्नोति ॥ ८० ॥

अनेन विधिना सर्वांस्त्यक्त्वा सङ्गान् शनैः शनैः सर्वद्वन्द्वविनिर्मुक्तो ब्रह्मण्येवावतिष्ठते ॥ ८१ ॥

अनेनेति [illegible] मानापमानादिभिर्विमुक्तः [illegible] ब्रह्मण्येवावतिष्ठते [illegible]

95A ध्यानिकं सर्वमेवैतद्यदेतदभिशब्दितं नह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ८२॥ ध्यानिकमिति यदेतदभिहितमम
त्रियानामर्थवेज्ञाकोदिजपरामस्वपतेतदेतदुक्तंश्रवादिममतत्यागोमानापमानादिहानिर्ब्रह्माप्यवावस्थानंसर्वमेवैतत् ध्यानिकेआत्मा परमात्मेतिज्ञानानि तदा
संभमन्तानविषिध्यते न तस्य नक्वचिन्मतन्हमानापमानादिकंवा भवति तथा वियत्तानात् ब्रह्मात्मनेच जायते ध्यानिकविशेषात्तध्येयविशेषलाभपरमार्थध्या
नार्थमाहनह्यनध्यात्मविदिति यस्मादात्मानं जीवमध्यकृत्य उक्तं तत्परमात्मतत्त्वं न जानाति नतस्य श्रुतिमश्रुकृतस्यानकियाफलमममतत्यागमानादिहानिमो

अधियज्ञंब्रह्मजपेदधिदैविकमेवच आध्यात्मिकंचसततंवेदान्ताभिहितंचयत् ८३॥ दवत्वप्राप्नोति ८२॥

अधियज्ञमिति पूर्वंब्रह्मस्थानस्वरूपंउपासनंउक्तं इदानींतत्रगत्यावेदजपविधये तथाचश्रुतिः तमेतंवेदानुवचनेनब्राह्मणाविविदिषन्तीति वियोगतयावेदजपं
उपदिशति अधियज्ञमिति यज्ञमधिकृत्यप्रवृत्तंब्रह्मवेदं तथादेवतामधिकृत्यप्रवृत्तं तथाजीवमधिकृत्यतथावेदान्ते सत्यंज्ञानमनन्तंब्रह्मेत्यादिकंसततंवेदंजपे
त् ८३

इदंशरणमज्ञानामिदमेवविजानतां इदमन्विच्छतांस्वर्गमिदमानंत्यमिच्छतां ८४ इदमिति इदंवेदाख्यंब्रह्म तदर्थानभिज्ञानामपि
शरणंगतिः पाठमात्रेणापि पापक्षयहेतुत्वात् तदर्थज्ञानांतदर्थाभिज्ञानांस्वर्गमपवर्गंवइच्छतामिदमेवशरणंतदुपायोपदेशकत्वेनतत्प्राप्तिहेतुत्वात् ८४

अनेनक्रमयोगेनपरिव्रजतियोद्विजः सविधूयेहपाप्मानंपरंब्रह्माधिगच्छति ८५॥

अनेनेति अनेनयथाक्रमोक्तानुष्ठानेनयः प्रव्रज्याश्रममाश्रयति सइहलोकेपापंविसृज्यपरंब्रह्मप्राप्नोतिब्रह्मसम कालेनोपाधिकलिंगशरीरनाशाद्ब्रह्मैक्यं गच्छति ८५

एषधर्मोनुशिष्टोवोयतीनांनियतात्मनां वेदसंन्यासिकानांतुकर्मयोगंनिबोधत ८६॥

एषधर्मइति एषयतीनांनियतात्मनांचतुर्णामेवकुटीचरबहूदकहंसपरमहंसानांसाधारणोधर्मयुष्माकंउक्तं इदानींयतिविशेषाणांकुटीचराख्यानांवेदविहित
अग्निहोत्रादिकर्मत्यागिनामसाधारणंवक्ष्यमाणंपुत्रैश्वर्येस्वेवसदितिकर्मसमेवेयं श्रूयतेतत्भारतेचतुर्धाभिक्षवःक्षवः चतुर्धाभिक्षवस्तस्युः कुटीचराबहूदकाहंस
सकाःपरमहंसश्चयोयःपश्चात्सउत्तमइति कुटीचरस्यायंपुत्रभिक्षाचरणस्यासाधारणाकर्मोपदेशः गोविंदराजस्तुगृहविशेषमेववेदोदिताग्निहोत्रादिकर्मत्या
गितत्वानमात्रसंन्यासादिकृतवैदिककर्माणांवेदसंन्यासिकमाहतन्नयतोगृहस्थस्यास्याहितानिभेस्पृष्टोविनियोगः चतुर्थाश्रमाश्रयणाचात्मनिसमारोपःप्राणाग्नि
चातेतत्क्रमयाभावसंन्यस्वेमवाग्नीनांत्यागःस्यात् गोविंदराजोगृहस्थवेदसंन्यासीकुर्वन् एवमवाहिताग्नीनांत्यागमथोउपेतवानवेदसंन्यासिकेमथाति
थिःप्राहानिराश्रमजन्मतवातराश्रम्यनियमाकिंःकथमतोः ८६॥

ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा एतेगृहस्थप्रभवाश्चत्वारःपृथगाश्रमाः ८७ इदानींवेदसंन्यासिकस्यप्रशंसितत्वात्कर्मयोगे
अनेनस्वकर्मपवितेपिवेदसंन्यासिकःपंचमाश्रमीतिराश्रमीवाचतुरपवाश्रमानियताइतिदर्शयितुमुक्तानाश्रमानुवदतिब्रह्मचारीतिब्रह्मचार्याख्यायपतेपृथगा

सर्वेपिक्रमशस्त्वेतेयथाशास्त्रंनिषेविताः यथोक्तकारिणंविप्रंनयंतिपरमांगतिं ८८ श्रमाउक्तापतिचत्वारएवगृहस्थजन्माभवति ८७
सर्वेयोत्स्यादिप्रतेसर्वेचत्वारोप्याश्रमाःपास्ताननतिक्रमेणानुष्ठिताःअपिग्राहात्रयोद्वावेकोपियथोक्तानुष्ठानंविप्रंमोक्षलक्षणांगतिंनयंति ८८॥

सर्वेषामपि चैतेषां वेदस्मृतिविधानतः गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि ८९ प्रकृतं वेदसंन्यासिकस्य गृहे पुत्रैश्वर्ये
सुखवासं वक्तुमितिनीर्थे गृहस्थाश्रमं कथं माहात्म्यं सर्वेषामिति सर्वेषामेतेषां ब्रह्मचर्यादीनां मध्ये गृहस्थः श्रुतिस्मृतिप्रमाणेन श्रेष्ठः यतोऽग्निहोत्रादिविधानात् गृहस्थाश्रमवानादिभिः
गृहस्थ उच्यते तथा यस्माद्ब्रह्मचारिवानप्रस्थयतीनेतान्भिक्षादानेन पोषयति तेन तापसो श्रेष्ठः यथा कथं ब्रह्मचर्याद्याश्रमिणो ज्ञानेन तान्नेन चान्वहमिति ८९ ॥
संन्यस्य सर्वकर्माणि कर्मदोषानपानुदे नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखंवसेत ९५
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिं तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थिति ९० ॥
यथेत्यादि यथा सर्वे नदीनदी गङ्गाशोणाद्याः समुद्रे अवस्थितिं लभन्ते एवं गृहस्थादपरे सर्वे आश्रमिणः तदधीनजीवनत्वात् गृहस्थसमीपे अवस्थितिं लभन्ते
चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ९१ ॥
चतुर्भिरित्यादि एतैर्ब्रह्मचार्यादिभिराश्रमिभिश्चतुर्भिरपि द्विजातिभिः वक्ष्यमाणो दशविधस्वरूपो धर्मः प्रयत्नतः सततमनुष्ठेयः ९१ ॥
धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ९२ तमेवं स्वरूपतः संख्यादिभिः
धृतिरित्यादि संतोषो धृतिः परेणापकृते तेन प्रत्यपकाररहितत्वं क्षमा विषयसन्निधाने मनसो विकारराहित्यं दमः मनसो दमनं दमः इति मनुवचनात्
[illegible] अन्यायेन परधनादिग्रहणं स्तेयं तद्भिन्नमस्तेयं यथाशास्त्रं मृज्जलाभ्यां देहशोधनं शौचं विषयेभ्य
इन्द्रियनिग्रहः शास्त्रादितत्त्वज्ञानं धीः आत्मज्ञानं विद्या यथार्थाभिधानं सत्यं क्रोधहेतौ सत्यपि क्रोधानुत्पत्तिरक्रोधः एतद्दशविधं धर्मस्वरूपं
दशलक्षणानि धर्मस्य ये विप्राः समधीयते अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ९३ ॥
दशलक्षणानीति ये विप्राः एतद्दशविधं धर्मस्वरूपाणि पठन्ति पठित्वा चात्मज्ञानं सम्यगनुतिष्ठन्ति ते ब्रह्मज्ञानं सम्यक् प्राप्य परमां गतिं मोक्षलक्षणां प्राप्नुवन्ति ९३
दशलक्षणकं धर्ममनुतिष्ठन्समाहितः वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ९४ दशलक्षणमिति उक्तं दशलक्षणकं
धर्मं संयतमनाः समनुतिष्ठन् उपनिषदाद्यर्थं गृहस्थावस्थायामेव यथोक्तमध्ययनार्थं मीनत्रयं ऋणत्रयमपाकृत्य ततो देवादि ऋणत्रयः संन्यासमनुतिष्ठेत ९४
संन्यस्य सर्वकर्माणि कर्मदोषानपानुदे नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखंवसेत ९५ संन्यस्येति सर्वाणि गृहस्थाश्रमोक्तानि
अग्निहोत्रादिकर्माणि परित्यज्य अज्ञानकृतानि जीववधादिकर्मजनितानि पापानि च प्राणायामादिना नाशयति इन्द्रियसंयतः उपनिषदादि ग्रन्थं अभ्यस्य पुत्रैश्वर्ये उपजीव्य इति पुत्र
गृहे पुत्रोपकल्पितभोजनाच्छादनेन वृत्तिचिन्तारहितः सुखं वसेत् अयमेव आश्रमधर्मः कुटीचरकस्योक्तः इदमेव वेदसंन्यासिनामिति विशेषो
मुक्ते ९५
एवं संन्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ९६ ॥
एवमिति एवमुक्तप्रकारेण संन्यस्तमानोऽग्निहोत्रादिगृहस्थकर्माणि परित्यज्यात्मज्ञानात्मकस्वरूपमेव कार्यं प्रधानं स्वर्गादावपि निःस्पृहो नतया निस्पृहः

96A क्रमयोगापापानि विनाश्य ब्रह्मसाक्षात्कारेण परमां गतिं मोक्षलक्षणां प्राप्नोति ९६ ॥

एषवोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः पुण्योऽक्षयफलः प्रेत्य राज्ञां धर्मं निबोधत ९७ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां षष्ठोऽध्यायः ६ ॥ एष इति अयं वो युष्माकं उक्तः एष युष्माकं ब्रा
ह्मणस्य संबन्धी क्रियाकलापो धर्मस्तस्य च ब्रह्मचारिगृहस्थवानप्रस्थादिभेदेन चतुर्विधः परत्राक्षयफल उक्तः इदानीं राजधर्मं कथयिष्यमाणं शृणुत अत्र च ब्रा
ह्मणस्य चत्वार आश्रमा यदाब्राह्मणः प्रव्रजेदिति पूर्वमभिधानात् ब्राह्मणस्यैव प्रव्रज्याधिकारः ९७ इति श्रीकुल्लूकभट्टविरचितायां मन्वर्थमुक्ताव
ल्यां षष्ठोऽध्यायः ६ ॥

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः संभवश्च यथा तस्य सिद्धिश्च परमा यथा १ ॥

राजधर्मानिति धर्मशब्दोऽत्र दृष्टादृष्टार्थानुष्ठानपरो गुणोपदेशोपि वक्ष्यमाणत्वात् राजशब्दोपि नात्र क्षत्रियजातिवचनः किं तर्ह्यभिषिक्तजनपदपुरपालयितृपुरु
षवचनः अत एवाह यथावृत्तो भवेन्नृप इति यथाचारो भवति नृपतिर्भवेत् यथा तस्योत्पत्तिं कथयिष्यामि यथा येन प्रकारेण वा राजानमसृजत्प्रभुरित्या
दिना तस्योत्पत्तिः यथा च दृष्टादृष्टफलसंपत्ति स्तदपि वक्ष्यामि १

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम् २

ब्राह्ममित्यादि ब्रह्म वेदस्तत्प्राप्त्यर्थं तत्पाठोपनयनसंस्कारं यथाशास्त्रं प्राप्तवता क्षत्रियेणास्य सर्वस्य स्वविषयावस्थितस्य शास्त्रानुसारेण नियमेन रक्ष
णं कर्तव्यं एतेन क्षत्रियस्यैव मुख्यो राज्याधिकार इति दर्शितं अत एव शास्त्रार्थं तत्र क्षत्रियस्य जीवनार्थं तथा क्षि .. स्य च रक्षणं स्वकर्म श्रेष्ठं च वक्ष्यति ब्राह्मणस्याप
दि जीवनं क्षत्रियधर्मेणाप्यभिधास्यति वैश्यस्यापि क्षत्रियधर्मं शूद्रस्य च क्षत्रियवैश्यकर्मणा जीवनार्थमापदि जगाद नारदः न कथंचन कुर्वीत ब्राह्मणः
कर्म वृषलं वृषलः कर्म च ब्राह्मं पतनीयं तयोः उत्कृष्टं वापकृष्टं च तयोः कर्म न विद्यते मध्यमे कर्मणी हित्वा सर्वसाधारणी हि ते रक्षणं वैश्यधर्मार्थं तपः क्षत्रस्य
रक्षणमिति सर्वेषां धर्मेण भागो राज्ञो भवति रक्षत इति च वक्ष्यमाणत्वात् षष्ठं बलि षड्भागग्रहणात् दृष्टार्थमपि अरक्षन् बलिमादत्त इति नरकपातं वक्ष्यति २

अराजके हि लोकेऽस्मिन्सर्वतो विद्रुते भयात् रक्षार्थ ... सर्वस्य राजानमसृजत्प्रभुः ३ ॥

अराजक इति यस्मादराजके जगति बलवद्भयात्सर्वतः प्रचलिते सर्वस्यास्य चराचरस्य रक्षार्थं राजानं सृष्टवान् तस्मात्तेन रक्षणं कार्यम् ३ ॥

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ४ ॥

कथं सृष्टवानित्याह इन्द्रानिलयमार्काणामित्यादि इन्द्रवातयमसूर्याग्निवरुणचन्द्रकुबेराणां मात्रांशं सारभूतान् आकृष्य राजानमसृजत् ४ ॥

यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः तस्मादभिभवत्येष सर्वभूतानि तेजसा ५ ॥

यस्मादिति यस्मादिन्द्रादीनां देवश्रेष्ठानामंशेभ्यो नृपतिः सृष्टस्तस्मादेष सर्वप्राणिनो वीर्येणातिशेते ५ ॥

तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च नचैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ६ ॥

तपतीत्यादि अयं राजा स्वतेजसा सूर्य इव पश्यतां चक्षूंषि मनांसि च संतापयति न चैनं पृथिव्यां कश्चिदप्यभिमुखेन द्रष्टुं क्षमते ६ ॥

म॰ टी॰ से॰ 97

सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्मराट स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ७॥

स इत्यादि एवं वा यमादीनां पूर्वोक्तानां संबन्धवशात्तत्कर्मकारित्वाच्च प्रतापयुक्तत्वात्तेजस्वीत्यादिना नवमाध्याये वक्ष्यमाणत्वात्स राजा यमादि प्रकृति प्राप्यते नाम्र दिरूपो भवति ७

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः महती देवता ह्येषा नररूपेण तिष्ठति ८॥

तत्तश्च बाल इत्यादि मनुष्य इति बुद्ध्या बालोऽपि राजा नावमन्तव्यः यस्मान्महती येयं काचिद्देवता मानुषरूपेणावतिष्ठते एतेन देवतावज्ञायां श्रुयमाणदया दृष्टदोषदर्शनाः ८

मशति दृष्टदोषमाह एकमित्यादि यो ऽग्निः तीक्ष्णं पुरुषं वह्निः सउपसर्पति स दुरूपसर्पी तमेवमेवाग्निर्दहति नतत्पुत्रादिकं क्रुद्धो राजाग्निः पुत्रदा रभ्रात्रादिरूपं कुलमेव गवाश्वादिपशुसुवर्णादिधनसंचयसहितं सापरायस्य विदहति ९॥

कार्यं सोवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः १०

कार्यमित्यादि स राजा प्रयोजनापेक्षया स्वशक्तिं देशकालौ चावेक्ष्य कार्यसिद्ध्यर्थं तत्त्वतो विश्वरूपं बहूनि रूपाणि करोति विवक्षया बहुषु कवचनोपपत्तिः प्रत्यायाज्ञसमेतः शक्तिप्रमाणमूलयति एवमेकस्मिन्नपि देशकाले च प्रयोजनानुरोधेन शत्रुर्मित्रं वा उदासीनो वा भवति अतो राजवल्लभो हमिति बुद्ध्या नाव ज्ञेयः ११

यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ११॥

यस्येत्यादि पद्मा पद्महस्ता श्रीः पर्यायोऽपि महतो विवक्षया नश्यन्ति यस्य प्रसादे सति महती श्रीर्भवति शत्रुतः श्रीकामेन सेव्यः यस्य पराक्रमे सति तान पि संतोषितो हंतितेन वशत्रुवधकामेनापाराधनीयः यः स्मक्रुध्यति तस्य मृत्युः स करोति तस्मात्जीवनार्थिना न क्रोधनीयः यस्मात्सर्वेषामस्त्यग्निसोमादीनां तेजोभिर्भाति १२॥

तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयं तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः १२॥

तमित्यादि तं राजानमज्ञानतया यो द्वेष्टि स शीघ्रमुत्पादयति स निश्चितं राजक्रोधान्नश्यति यस्मात्तस्य विनाशाय शीघ्रं राजा मनो नियुङ्क्ते १२॥

तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत १३॥

तस्मादित्यादि यतः सर्वतेजोमयो नृपतिस्तस्माद्यो पद्दितेषु यमिष्टं प्राप्तानुष्टेयं शास्त्रानिरुद्धं निश्चितं व्यवस्थापयति शत्रुनपद्दितेषु वानिष्टं नियमेनातिक्रामे त १३॥

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजं ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः १४॥

तस्यार्थे सर्वेति तस्य राज्ञः प्रयोजनसिद्धये सर्वप्राणिनां रक्षितारं धर्मस्वरूपं पुत्रं ब्रह्मणो यक्केवलं तेजस्तेन निर्मितं तत्पाञ्चभौतिकं देहं ब्रह्मा सृष्टवान् १४

तस्य सर्वाणि भूतानि स्थावराणि चराणि च भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च १५॥

तस्येत्यादि तस्य दंडस्य भयेन स्थावरचराः सर्वप्राणिभोगकर्तेसमर्था भवन्ति प्रस्यथाबलवता दुर्बलस्य धनदारादिग्रहणेन स्थापितदयेद्यवलितेति कस्यापि

97A

भोगेन सिध्येत् वृद्धादीनामपि स्वावृत्तानां दंडेन भोगसिद्धिः तथा सतामपि नित्यनैमित्तिकस्वधर्मानुष्ठाने स्वकर्मभयात् प्रवृत्ततामयादेव १५ ॥

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः । यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु १६ ॥

तमित्यादि तं दंडं देशकालौ दंडस्य च शक्तिं विद्यादिकं च यस्मिन्नपराधे यो दंडः स्मृतिशास्त्रादिकं सम्यगनुसारेण तत्त्वतो निरूप्यापराधिषु प्रवर्तयेत् १६ ॥

स राजा पुरुषो दंडः स नेता शासिता च सः । चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः १७ स इत्यादि स एव दंडो वस्तुतो राजा तस्मिन्सति राजशक्तियोगात् स एव पुरुषस्ततोऽन्ये स्त्रिय इव तद्वशत्वात् स एव नेता तेन कार्याणि नीयन्ते प्राप्यन्ते स एव शासिता शासनमात्रात् तद्धेतुत्वात् स एव चतुर्णामाश्रमाणां धर्मस्य संपादने प्रतिभूरिव प्रतिभूरिव प्रतिभूर्मुनिभिः स्मृतः १७ ॥

दंडः शास्ति प्रजाः सर्वा दंड एवाभिरक्षति । दंडः सुप्तेषु जागर्ति दंडं धर्मं विदुर्बुधाः १८ ॥

दंडः शास्तीति यस्माद्दंडः सर्वाः प्रजाः शासनं करोति तस्मात्स्वामी शासितेति ज्ञेयं यस्मात् स एव प्रजा रक्षतीति तेनायं रक्षकः रक्षितेति निद्राणेष्वपि रक्षितृषु दंड एव जागर्ति तत्क्षयेन चौरादीनामप्रवर्तनात् एवं दंडं धर्महेतुत्वाद्धर्मं जानन्तीति कारणे कार्योपचारः ऐहिकपारत्रिकदंडभयादेव धर्मानुष्ठानात् १८

समीक्ष्य स धृतः सम्यक्सर्वा रंजयति प्रजाः । असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः १९ समीक्ष्येत्यादि स दंडः शास्त्रानुसम्य-
ग्विरूप्यापराधानुरूपेण देहधनादिषु धृतः सर्वाः प्रजाः सानुरागाः करोति अविचार्य तु लाभादिना प्रयुक्तः सर्वाणि राष्ट्रार्थपुत्रादीनि नाशयति सर्वतः इति द्वितीयार्थे तसिः १९

यदि न प्रणयेद्राजा दंडं दंड्येष्वतंद्रितः । शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः २० ॥

यदीत्यादि यदि राजा अनलसो भूत्वा दंडप्रणयनं न कुर्यात् तदा शूले लोहकंटके मत्स्यानिव बलवत्तरा दुर्बलानपक्ष्यन् तस्य पचिधातोः रूपमिदं बलिनोऽस्वबलान् नाहि सामर्थ्यात् अपक्ष्यन् शूले मत्स्यानिवापक्ष्यन् इत्येष मेधातिथिगोविंदराजलिखितः पाठः जले मत्स्यानिवाहिंस्युरिति च पाठान्तरं प्रबलवत्तरा दुर्बलान् हिंस्युरिति मत्स्यन्यायवत्स्यादित्युक्तं २०

अद्यात्काकः पुरोडाशं श्वावलिह्या‾द्धविस्तथा स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरं तु हिंस्युरिति मत्स्यन्यायवत्स्यादित्युक्तं २०

अद्यादित्यादि यदि राजा दंडं नाचरिष्यत्तदा श्रुतेषु सर्वयागहविर्द्रव्यं काकः पुरोडाशमादिष्यत् तथा कुक्कुरः पायसादि हविरवालेक्ष्यत् कस्यचित् स्वामित्वं न भविष्यत् ततो बलिना न गृह्णाति ब्राह्मणादिवर्णाश्च अधमैः शूद्रादिभिरधरोत्तरं प्रावर्तिष्यत २१ ॥

सर्वो दंडजितो लोको दुर्लभो हि शुचिर्नरः । दंडस्य हि भयात्सर्वं जगद्भोगाय कल्पते २२ सर्वइति सर्वोऽयं लोकः दंडेनैव नियमितः सन्मार्गे वर्तते शुचिः स्वभावविशुद्धो हि मानुषः कष्टेन लभ्यते तथा सर्वमिदं जगद्दंडस्यैव भयादावश्यकभोजनादिरूपेऽपि भोगे समर्थो भवति २२ ॥

देवदानवगंधर्वा रक्षांसि पतगोरगाः । तेऽपि भोगाय कल्पन्ते दंडेनैव निपीडिताः २३ ॥

देवेति उक्तमपि दंडस्य भोगसंपादकत्वं इदानीं स्थैर्यार्थमुच्यते इंद्राग्निसूर्यवायुसादयो देवाः तथा दानवगंधर्वराक्षसपक्षिसर्पादयोऽपि जगदीश्वरपरमात्मभयपीडिताः एव वर्षणादिषु स्वकार्येषु प्रवर्तन्ते तथा च श्रुतिः भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति पंचमः इति २३ ॥

म॰
तु॰ से॰ 98

दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः सर्वलोकप्रकोपश्च भवेद्दंडस्य विभ्रमात् २४ दुष्येयुरिति चंडस्यानाचरणात् सुरा
वितेनवाप्रवर्तनात्सर्वे ब्राह्मणादिवर्णा इतरेतरस्त्रीगमनेन संकीर्येरन् सर्वे शास्त्रीनियमाश्चतुर्वर्गफलाउत्सीदेयुः चौर्यसाहसादिनाचपरस्परापकारात्सर्वलो
कस्य दोषः भवत्युत्पद्येत २४
यत्र श्यामो लोहिताक्षो दंडश्चरति पापहा प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति २५ ॥
यत्रेति यत्र देशे श्यामस्वरूपः प्राणावगतः श्यामवर्णः लोहितनयनो धिष्ठातृदेवताको दंडो विचरति तत्र प्रजाव्याकुलानभवंति दंडप्रणेता यदि विषयात्स्वरूपं दं
डं सम्यक् जानाति २५ ॥
तस्याहुः संप्रणेतारं राजानं सत्यवादिनं समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदं २६
तस्यादिति स्यदंडस्य प्रवर्तयितारं अभिषेकादिगुणयुक्तं नृपतिं सत्यवादिनं समीक्ष्यकारिणं तत्त्वातत्त्वविचारविवेकप्रज्ञाशालिनं धर्मार्थकामानां ज्ञातारं
मन्वादय आहुः २६
तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्द्धते कामात्मा विषमः क्षुद्रो दंडेनैव निहन्यते २७
तमिति दंडं राजा सम्यक् प्रवर्तयन् धर्मार्थकामैर्वृद्धिं गच्छति यः पुनर्विषयाभिलाषी विषमः कोपनः क्षुद्रः छलान्वेषी नृपः स सम्यक् कृतेनैव दंडेनामात्यादिकोपा
दयं स्वात्मविनाश्यते २७
दंडो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः धर्माद्विचलितं हन्ति नृपमेव सबान्धवं २८ ॥.
दंड इति यतो दंडः प्रकृष्टतेजः स्वरूपः स्वशास्त्रेऽसंस्कृतात्मभिः दुःखेन ध्रियते अतो राजधर्मरहितं नृपमेव पुत्रबंधुसहितं नाशयति २८ ॥
ततो दुर्गं च राष्ट्रं च लोकं च सचराचरं अंतरिक्षगतांश्चैव मुनीन्देवांश्च पीडयेत् २९ तत इति दोषायतनुपेक्षया यो दंडः क्रियते
स च दुर्गं राष्ट्रं देशं पृथिवीलोकं जंगमस्थावरसहितं हविःप्रदानजीवनादेवा इति कृत्वा हविःप्रदानाभावेऽन्तरीक्षगतान् ऋषी
न् देवांश्च पीडयेदिति २९ ॥
सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ३० ॥
सेऽसहायेन मूढेनेत्यादि स दंडो मंत्रिसेनापतिपुरोहितादिसहायरहितेन पूर्वेणालोभवता शास्त्रसंस्कृतबुद्धिपरेण नृपतिना शास्त्रेता न प्रणयनं शक्यते ३० ॥
शुचिनेत्यादि स दंडो न शक्यते शुचिना सत्यसंधेन यथाशास्त्रानुसारिणा प्रणेतुं शक्यते दंडः सुसहायेन धीमता ३१ ॥
शुचिना सत्यसंधेन यथाशास्त्रप्रतिज्ञेन यथाशास्त्रव्यवहारिणा शोभनसहायेन न तत्त्वज्ञेन दंडः कर्तुं शक्यते इति पूर्वोक्तदोषप्रतिपक्षगुणाश्रने
शुचिनेति अर्थादिषु चयुक्तेन सत्यप्रतिज्ञेन सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ३२ ॥ न्यायेन कर्तव्यं ३२
स्वराष्ट्रे न्यायवृत्तः स्याद् भृशदंडश्च शत्रुषु शत्रुविषयेषु तीक्ष्णदंडो भवेन्मित्रेषु सुहृद्विषयेषु क्षिप्रकुटिलः स्यात्कार्ये मित्रेषु ब्राह्मणेषु च कृतात्मा
स्वराष्ट्र इति स्वात्मदेशे यथाशास्त्रव्यवहारी स्यात् एवंवृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः विस्तीर्यते यशो लोके तैलबिंदुरिवांभसि ३४ पर्यायेणक्षमावान् भवेत् ३२
एवं कृतस्य नृपतेः शिलोञ्छेनापि जीवतः क्षीणकोशस्यापि नृपतेः एकाचारवतः जले तैलबिंदुरिव कीर्तिर्लोके विस्तारमेति ३४ ॥
एवमित्यादि शिलोञ्छेनेति क्षीणकोशस्यैव विवर्द्धितं क्षीणकोशस्यापि

98A स्वे स्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ३५ स्वे स्व इत्यादि स्वे स्वे धर्मानुष्ठातॄणां ब्रा
ह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च विधिसृष्टो राजा रक्षिता सृष्टः तस्मात्तेषां रक्षणं कुर्वतो राज्ञः प्रत्यवायः स्वधर्मविरहितानां रक्ष
तेन यद्यत्सभृत्येन कर्तव्यं रक्षता प्रजाः तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्वशः ३६ ॥ णेऽपि न प्रत्यवाय इत्यस्यता
तेनेत्यादि वक्ष्यमाणावतारार्थोऽयं श्लोकः तेन राज्ञा प्रजारक्षां कुर्वता सामात्येन यद्यत्कर्तव्यं तत्तत्सम्यक्क्रमं युष्माकमभिधास्यामि ३६ ॥ त्पर्यार्थः ३५॥
ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पार्थिवः त्रैविद्यवृद्धान्विदुषस्तिष्ठेत्तेषां च शासने ३७ ॥
ब्राह्मणानिति प्रत्यहं प्रातरुत्थाय ब्राह्मणान्सेवेत ऋग्यजुःसामाख्यविद्यात्रयं ग्रन्थार्थाभिज्ञान् विदुषः शास्त्रनीतिशास्त्राभिज्ञांस्तान्सेवेत तदाज्ञां कुर्यात ३७ ॥
वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन् वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ३८ वृद्धानित्यादि तांश्च ब्राह्मणान्वयस्तपआदिवृ-
द्धान् अर्थतो ग्रन्थतश्च वेदज्ञान्बाह्येनान्तरेण च शौचेन शुचीन्नित्यं सेवेत यस्माद्वृद्धसेवी सततं हिंस्रै राक्षसैरपि तस्य हितं क्रियते किमुतान्यैर्मनुष्यैः ३८ ॥
तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित् ३९ ॥
तेभ्य इत्यादि सहजप्रज्ञया शास्त्रादिना न च विनीतोऽपि नित्यशः यथार्थं तेभ्यो विनयं शिक्षेत यस्माद्विनीतात्मा राजा न कदाचिन्नश्यति ३९ ॥
बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे ४० ॥
बहव इत्यादि कामक्रोधादिपरिच्छदयुक्ता अपि राजानः विनयरहिताः नष्टाः बहवश्च वनस्था निष्परिच्छदा अपि विनयेन राज्यं प्राप्तवन्त ४० ॥
वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः सुदासो यवनश्चैव सुमुखो निमिरेव च ४१ ॥
उभयत्रैव श्लोकद्वयेन दृष्टान्तमाह वेन इत्यादि वेनो नहुषश्च राजा पिजवनस्य च पुत्रः सुदासो नाम सुमुखो निमिश्चाविनयादनश्यन् ४१ ॥
पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः ४२ ॥
पृथुरिति पृथुर्मनुश्च विनयाद्राज्यं प्राप्तवन्तः कुबेरश्च विनयाद्धिपत्यं लेभे गाधिपुत्रो विश्वामित्रश्च क्षत्रियः सन् तेनैव देहेन ब्राह्मण्यं प्राप्तवान् राज्यलाभाव-
सरे ब्राह्मण्यप्राप्तिप्रस्तावोऽपि विनयोत्कर्षाय प्रकाशितः इह प्रयोजनशास्त्रान्तरनिषिद्धवर्जनरूपो विनयः तदनेन क्षत्रियोऽपि देहे ब्राह्मण्यं लेभे ४२ ॥
त्रैविद्येभ्यस्त्रयीं विद्यां वार्तारम्भांश्च लोकतः आन्वीक्षिकीं चात्मविद्यां दण्डनीतिं च शाश्वतीम् ४३ ॥
त्रैविद्येभ्य इति त्रिवेदीरूपविद्याविद्भ्यः त्रिवेदीमर्थतो ग्रन्थतश्चाभ्यसेत् ब्रह्मवर्चस्वं दण्डनीत्यां च वेदग्रहणात्समाहृतस्य च राज्यादिकारात् अभ्यासार्थोऽयमुप
देशः दण्डनीतिं वार्तार्थशास्त्रं पाश्चात्यं योगक्षेमोपदेशिनो पारम्पर्यागततत्तत्त्वविद्भ्यस्तद्विद्भ्योऽधिगच्छेत्तथा आन्वीक्षिकीं तर्कविद्यां आत्मज्ञानार्थं च प्रस्तुतशापयोगि
नीं अस्य वेदानां च अभ्युदयव्यसनयोः हर्षविषादप्रशमनहेतुं ब्रह्मविद्यां कृषिवाणिज्यपशुपालनादिवार्तारम्भान्तरोपयाचितोऽपि यथार्थं तद्विदभिज्ञेभ्यः कृषिकादिभ्यः शिक्षेत ४३॥

म॰ ९९
नु॰ से॰

इंद्रियाणां जये योगं समातिष्ठेद्दिवानिशं । जितेंद्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ४४

इंद्रियाणामित्यादि । वक्ष्यमाणेनोंद्रियाणां विषयासक्तिवारणे सर्वकालं यत्नं कुर्यात् यस्माज्जितेंद्रियः प्रजा नियंतुं शक्नोति ननु विषयोपभोगव्यग्रः ब्रह्मचारि यमेष्वसर्वपुरुषोपादेयतथा अभिहितोपीन्द्रियजयो राज्ञः यमेषु सर्वपुरुषोपादेयत यात्र वक्ष्यमाणव्यसननिवृत्तिहेतुतया पुनरुक्तः ४४

दश कामसमुत्थानि तथाष्टौ क्रोधजानि च । व्यसनानि दुरंतानि प्रयत्नेन विवर्जयेत् ४५ दशेत्यादि दश कामसंभवानि अष्टौ क्रोधजानि वक्ष्यमाणव्यसनानि प्रयत्नेन त्यजेत् दुरंतानि दुःखावसानि आदौ सुखयंति शेषे दुःखानि कुर्वंतीति यद्वा दुर्लभो न्तो येषां तानि दुरंतानि न हि व्यसनिनस्तानि वर्जयितुं ४५

कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः । वियुज्यतेर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ४६ ॥

वर्जनप्रयोजनमाह कामजेष्विति यस्मात्कामजनितेषु प्रसक्तो राजा धर्मार्थाभ्यां हीयते क्रोधजेषु प्रसक्तः प्रकृतिकोपाद्देहनाशं प्राप्नोति ४६ ॥

मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ४७ तानि व्यसनानि नामतो दर्शयति मृगयेत्यादि आखेटकं अक्षा मृगवधः मृगया अक्षो द्यूतं क्रीडा सकलकार्याविघातिनी दिवानिद्रा परदोषकथनं स्त्रीसंभोगो मद्यपानजनितो मदः तौर्यत्रिकं नृत्यगीतवादित्राणि वृथाट्या अप्रयोजनं परिभ्रमणं दशकः कामविरुद्धाः प्रभावो गणः ४७

पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं । वाग्दंडजं च पारुष्यं क्रोधजोपि गणोष्टकः ४८ पैशुन्यमिति पैशुन्यमविज्ञातदोषाविष्करणं साधोर्वधनादिना निग्रहः द्रोहः छद्मवधः ईर्ष्या मत्सरः परगुणेषु दोषाविष्करणमसूया अर्थदूषणं अर्थानामपहरणं देयानामदानं च वाक्पारुष्यमाक्रोशादि दंडपारुष्यं ताडनादि एषोष्टपरिमाणो व्यसनगणः क्रोधाद्भवति ४८ ॥

द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः । तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ४९ ॥

द्वयोरिति एतयोर्द्वयोरपि कामक्रोधजव्यसनसंघयोः कारणं यं सर्वे ज्ञातारो जानंति तं व्यसनहेतुकं यत्नेन लोभं त्यजेत् यस्मादेतल्लोभतः प्रवृत्तेः ४९ ॥

पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमं । एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ५० ॥

पानमिति मद्यपानमक्षैः क्रीडा स्त्रीसंभोगो मृगया चेति क्रमपठितमेतच्चतुष्कं कामजव्यसनमध्ये बहुदोषत्वादतिशयेन दुःखहेतुं जानीयात् ५० ॥

दंडस्य पातनं चैव वाक्पारुष्यार्थदूषणे । क्रोधजेपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ५१ ॥

दंडेत्यादि दंडपातनं वाक्पारुष्यं अर्थदूषणं चेति क्रोधजेपि व्यसनगणे दोषबहुलत्वादतिशयितदुःखसाधनमेतत्त्रिकं जानीयात् ५१ ॥

सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषंगिणः । पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ५२ ॥

सप्तकेति अस्य यथानिर्दिष्टकामक्रोधसंभवस्य सप्तपरिमाणस्य व्यसनवर्गस्य सर्वस्मिन्नेव राजमंडले प्रायेणावस्थितस्य पूर्वं पूर्वं व्यसनं गुरुतरोत्पादकत्वं कष्टतरं विद्यात् तत्र यथेष्टचेष्टत्वं मद्यपानेन मत्तस्य सत्वानां प्राणनाशात् मद्यपानेन मत्तस्य सत्वायादेरूयनादिविरोधहत्या शास्त्रात्मा राजा जानीयात्

९९A
दर्पो दोषाः सुतं कष्टं तेन पादिद्वेषो गङ्गवाद्वयोर्नीतिशास्त्रोक्ता दोषाः मत्रपुरीषवेगधारणाद्व्याध्युत्पत्तिः स्त्रीसेनेषुनः श्रमो त्पत्स्यादिदृष्टायोगो व्यक्ति
मृगया स्त्रीव्यसनयोः स्त्रीव्यसने दृष्टत्वाद्दर्शकार्याणां कालातिपातेन धर्मलोपादयो दोषाः मृगयायां तु व्यायामेनारोग्यादिगुणयोगो व्यस्त्रीव्यसने वक्तामज
तत्कस्य सूर्वैष्टं वृत्तदोषकोपजं व्यपि विधवाक् पारुष्यादपारुष्यं दण्डपारुष्यं गरीयः पादेदोषाः कष्टं मात्थानतावान् वाक्यपारुष्येन कोपानलोद्दानमानयानीयमेकः सुता
क्रः श्वायचित्तं स्वकेरणं गाहाक्यारुष्यदोषवन्नमर्मपीडाकरवाक्यपारुष्यं दण्डस्त्विकिस्य नानडकनमतीरहत्वाकरुणतमर्थदूषणान प्रवृत्ते रात्री दानात् कृष्यसमादानप
व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः ५३ ॥ वक्रोपजत्विकस्यापि पूर्वपूर्वं दण्डः कष्टं यत्नेन समजूप
व्यसनेति अव्यपि मरणव्यसने दुःखप्रोह लोके मन्त्रा शास्त्रादिदुःखं हेततयाशास्त्रानुष्ठानविरोधितया वह्वल्पत्वात् पापिव्यसनं कष्टतरं परत्रापि नरकहेतुत्वात् तदाह व्य
मन्यधोऽधो व्रजति बहून्नरकान्नाप्नोतीत्यर्थः अव्यसनी तु मृतः शास्त्रानुष्ठानप्रतिपक्षव्यसनाभावात् स्वर्गं गच्छति एते नातिप्रसक्तिर्व्यसनेषु निषिध्यते न च तस्य मेव
मौलाञ्छास्त्रविदः शूराँल्लब्धलक्षान्कुलोद्गतान् सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान् ५४ ॥ तमपि ५३
मौलानिति मौलान् पितृपितामहक्रमागतसेवकान् तेषामपि लोभादिना व्यभिचारात् तद्वारणार्थम् दृष्टादृष्टार्थं शास्त्रज्ञान् विक्रान्तान् लब्धलक्षान् लब्धा
दप्रच्युतशरान् शूलादीन् आयुधविदः सद्भिः विशुद्धकुलभवान् देवतासमप्तादिनियतान् अमात्यान् सप्ताष्टौ वा मर्यादा कुर्वीत ५४ ॥
अपि यत्सुकरं कर्म तदप्येकेन दुष्करं विशेषतोऽसहायेन किं तु राज्यं महोदयं ५५ ॥
यस्मात् अल्पीयांसादि सुखेनापि यत् क्रियते कर्म तदप्येकेन दुष्करं भवति विशेषतो राज्यम् यन्महाफलं तत्कथमसहायेन क्रियते ५५ ॥
तैः सार्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहं स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ५६ ॥
तैरित्यादि तैः सचिवैः सह सामान्यं सर्वसाधारणं मन्त्रं गोपनीयं सन्धिविग्रहादि तन्निरूपयेत् तथा तिष्ठत्यनेनेति स्थानं दण्डकोषपुरराष्ट्रात्मकं चतुर्विधं चिन्तयेत् दण्ड्यतेऽनेनेति दं
डो हस्त्यश्वरथपदातयः तेषां च पोषणादिविषयं चिन्तयेत् कोषोऽर्थनिचयः तस्यायव्ययादि पुरं तदादिव्राष्ट्रदेशः तद्धाममनुष्यपश्वादि धान्यादीनाम् वृद्धिश्चि
न्तयेत् तथा समुदयं उत्पद्यते अस्मादर्था इति समुदयो धान्यहिरण्यादि उत्पत्तिस्थानं तन्निरूपयेत् तथा गुप्तिं रक्षामात्मगतां राष्ट्रगतां च स्वपरीक्षितमन्त्राद्यमथात्मरक्षा
तां स्थिरयेद्व्यमित्यादिना राष्ट्ररक्षणं च पुष्पमयदृष्टिनियमिस्यादिना राष्ट्ररक्षणं चेति लब्धस्य प्रशमनानि सत्पात्रप्रतिपादनादीनि चिन्तयेत् यथा च वृहस्पतिः जितान्मस्पृजा । यद्देवानित्यादि ५६
तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक्पृथक् समस्तानां च कार्येषु विदध्याद्धितमात्मनः ५७ ॥
तेषामिति तेषां सचिवानां रहसि निश्चितिपन्ने तया हृदयगतभावज्ञानं सम्भवात् समेकमेकमभिप्रायं समस्तानामपि युगपदभिप्रायं बुद्ध्वा कार्येषु यदात्मनो हितं तत्कुर्या
त् ५७
सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता मन्त्रयेत्परमं मन्त्रं राजा षाड्गुण्यसंयुतं ५८ ॥
सर्वेषामिति एषामेव सर्वेषां सचिवानाम् मध्यादन्यतमेन सह सन्धिविग्रहादिवक्ष्यमाणगुणषट्कोपेतं प्रकृष्टमन्त्रं निरूपयेत् ५८ ॥
नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निःक्षिपेत् तेन सार्धं विनिश्चित्य ततः कर्म समारभेत् ५९ ॥
नित्यमिति सर्वदा तस्मिन् ब्राह्मणे सञ्जातविश्वासोऽभूत्वा यानि कार्याणि तानि सर्वकार्याणि समर्पयेत् तेन सह निश्चित्य सर्वकर्मारभेत् ५९ ॥
अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान् सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान् ६० ॥

म। 100

नी. म.

अमात्यमित्यादि अमात्यंप्रियं प्रदानादिना प्रुवीत प्रजापालितः समग्धनार्जनशीलान्यर्मादिना परीक्षितान कर्मसु विधान कुर्यात ९० ॥

निर्वृत्ते तस्य यात्रादौ रीतिकर्तव्यतान्तुभिः तावत्तो नैदिनान्दत्वा सकुर्वीत विचक्षणः ९१ ॥

निर्वृत्तेति अमत्यं राज्ञो यत्स्य लोके मेवच्चेष्टाः कर्मजाते संपद्यते तत्सं वकोमनुष्यानालस्य सृत्यो क्रियासमोत्साहान तत्र कुर्यात ९१ ॥

तेषामर्थेषु नियुञ्जीत शूरान्दक्षकुलोद्गतान शुचीकारककर्मान्तभोदृढं तत्र निवेशने ९२ तेषामिति तेषां सचिवानां मध्ये विक्रान्ता सुवंशान कुलोद्भवान नियमितान शुचीन अर्थलिप्सार्हान यतोपतिस्थाने नियुञ्जीत अर्थे वा दानेष्वाकरकर्मान्तेष्विति आकरे सुवर्णायुतास्थाने शुकर्मान्ते शुचयो दत्तयाम्यादि संग्रहस्थाने शुचतानि वेशने भोजनगृहान्तःपुरादौ दृढं नियुञ्जीत सृष्टि हि तत्र राजानं प्रायेण काकिनः सौहृते वा कदाचित् प्रमादतः परघिनादेरपि ९२ ॥

इत्थं चैव प्रकुर्वीत सर्वेषां सुविशारदं इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गते ९३ ॥

इत्थमिति इत्थं वक्ष्यमाणं सर्वार्थेषु मन्त्रे इङ्गितमभिप्रायसूचिकं वचनमत्सरादि आकारो देहधर्मादि स्वावश्यमादावेवर्ण्यादिरूपः प्रीतिप्रत्ययचकः चेष्टाकारास्फालनादि क्रियाकोपनादिसूचिका नदीयतत्वं अर्थदानसौम्यमनाघभावात्मकंपाचशुकं चतुरं कुलीनं कुर्यात ९३ ॥

अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित वपुष्मान्वीतभीर्वाग्मी दूतोराज्ञः प्रशस्यते ९४ यस्यान्तरकं इतिजनेष्वनुरागवान तेनप्रतिराजादेरपि अहितविषयः अर्थोत्सौ प्राणवशुक्तः तेन वयन्तसौदानादिना अभयः दक्षःचतुरः तेनकार्यकालनातिक्रमति स्मृतिमानेतेनसंदेशं नविस्मरति देशकालोचितं तेन देशकालौ ज्ञात्वा अदपि संदिष्टं देशकालोचितमसथा कथयति सरूपः तेनादेयवचनः विगतभयः तेनाप्रियमदेशस्यापि वा कुवाग्मीतेनसहाताधुक्तिः वमःपवविधोदूतोराज्ञः प्रशस्योभवति ९४ ॥

अमात्ये दण्डआयत्तो दण्डे वैनयिकी क्रिया नृपतौ कोशराष्ट्रे च दूते सन्धिविपर्ययौ ९५ ॥

अमात्यइति अमात्ये सेनापतौ हस्त्यश्वरथपादातात्मको दण्डआयत्तः तदधीनःप्रायः तस्य कार्येषु प्रवृत्ते विनयवाक्यात्वैनयिकी यो विनयः स दण्डआयत्तः तन्मध्यावधेसकवस्यान्देशावायत्ता राज्ञा पुरायीनानकर्तव्या स्वयमेव चिन्तनीयं यत्नेनासृष्ट दूते सन्धिविग्रहावायत्तौ तदिज्ञया तत्र हृतेः ९५ ॥

दूत एव हि संधत्ते भिनत्त्येव च संहतान दूतस्तत्कुरुते कर्म भिद्यन्ते येन वान वा ९६ ॥ दूत एवेति यस्माद्दूत एव भिन्नानां संधिसंस्थापनेन समःसंहतानां च भेदनेन यथापदेशो दूतः तत्कर्म करोति येन संहिता भिद्यन्ते तस्माद्दूते संधिविग्रहौ विपर्यायाया वायत्तौ विति य ङकृते तस्यावाय ग्राववत्

सविद्यादस्य कृत्येषु निगूढैर्मितचेष्टितैः आकारमिङ्गितं चेष्टां भृत्यश्च चिकीर्षितं ९७ ॥

इतस्य कार्यान्तरमाह सविद्यादिति सदूतो ऽस्य प्रतिराजस्य कर्तव्ये आकारमिङ्गितं चेष्टां जानीयात् निगूढान्प्रचराः प्रतिपत्तव्याः शिवपरिजनाः तान्निसृष्टाः तत्र संनियापितैर्मितचेष्टितैः भृतैश्च दत्त्वा धनं यायमानितैश्च प्रतिराजस्य कर्तव्यमोप्सितं जानीयात ९७ ॥

बुद्ध्वा च सर्वं तत्त्वेन परराजचिकीर्षितं तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीडयेत ९८ ॥

100A वृद्धा वेति उक्तलक्षणाहृतद्वारेण प्रविपन्नराज्यस्य कर्षमिश्रं सर्वं तत्त्वतो ज्ञात्वा तथा प्रयत्नं कुर्यात् यथात्मनः पीडा न भवति ६८ ॥

जांगलं शस्यसंपन्नमार्यप्रायमनाविलं रम्यमानतसामंतं स्वाजीव्यं देशमावसेत् ६९ ॥

जांगलमिति अल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः स ज्ञेयो जांगलो देशो बहुधान्यादिसंयुतः प्रचुरधार्मिकजनं रोगोपसर्गाधिनाकुलं फलपुष्पतरुलतादिमनो
रहस्प्रणतसमीपवासलग्नविक्रमादिजनसुलभं कृषिवाणिज्याद्याजीवनं माश्रित्यावासं कुर्यात् ६९ ॥

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरं ७० धन्वदुर्गमिति धन्वदुर्गं मरुवेष्टितं चतुर्दिशं पंचयो-
जनमनुदकं महीदुर्गं पाषाणेनेष्टकेन वा विस्ताराद्धेतुगुणोच्छ्रायेण द्वादशहस्तप्रच्छितेन युद्धार्थं सुपरिभ्रमणयोग्येन सावरणगवाक्षादियुक्तेन प्राकारेण वेष्टि-
तं जलदुर्गं बहिः सर्वतो व्याप्तजलेन मार्गं व्याप्नोति हस्तिमहावृक्षकंटकितगुल्मलताव्याप्तितो दुर्गं वनदिग्व्याप्तिः सर्वतश्चतुरंगबलपादातरक्षितं गिरिदुर्गं पर्व-
तपृष्ठमतिदुरारोहं संकटेकमार्गोपेतमंतर्नदीप्रस्रवणाद्युदकयुक्तं बहुशस्योत्पत्तिक्षेत्रवृक्षान्वितं पुरं दुर्गमध्ये नगरं दुर्गमाश्रित्य पर्वतपृष्ठे वसेत्

सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ७१ सर्वेणेति यस्मादेषां दुर्गाणां मध्याद्गिरिदुर्गं गु-
णबाहुल्येन गिरिदुर्गमतिरिच्यते तस्मात्सर्वप्रयत्नेन तदाश्रयेत् गिरिदुर्गे तदारोहणदुरारोहत्वं महत्तु प्रदेशादल्पप्रयत्नप्रेरितशिलादिना बहुविपक्षसंघबाधा

त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्ताश्रयाप्चराः त्रीण्युत्तराणि क्रमशः प्लवंगमनरामराः दनमित्यादयो बहवो गुणाः ७१ ॥
त्रीणीति एषां दुर्गाणां मध्यात् दुर्गगुणबाहुल्येन गिरिदुर्गमतिरिच्यते तस्मात्सर्वप्रयत्नेन तदाश्रयेत् गिरिदुर्गे तदारोहणदुरारोहत्वं महत्तु प्रदेशादल्पप्रयत्नप्रेरितेन
शिलादिना बहुविपक्षसंघबाधा दनमित्यादयो बहवो गुणाः ७२

यथा दुर्गाश्रितानेतान्नोपहिंसंति शत्रवः तथारयो न हिंसंति नृपं दुर्गसमाश्रितं ७३ ॥
यथेत्यादि यथैतान्दुर्गवासिनो मृगादीन् व्याधादयः शत्रवो न हिंसंति एवं दुर्गाश्रितं राजानमपि न शत्रवः ७३ ॥

एकः शतं योधयति प्राकारस्थो धनुर्धरः शतं दशसहस्राणि तस्माद्दुर्गं विधीयते ७४
एकइति यस्मादेको धानुष्कः प्राकारस्थः सन् शतं शत्रूणां योधयति प्राकारस्थाश्च धानुष्कशतं च शत्रूणां दशसहस्राणि तस्माद्दुर्गमुपदिश्यते ७४ ॥

तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः ब्राह्मणैः शिल्पिभिर्यंत्रैर्यवसेनोदकेन च ७५ ॥
तदित्यादि तद्दुर्गं खड्गाद्यायुधसुवर्णादिधनधान्यकरितुरगादिवाहनब्राह्मणाभ्यादिशिल्पियन्त्रघासोदकसमृद्धं कुर्यात् ७५ ॥

तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितं ७६ तस्येत्यादि तस्य दुर्गस्य मध्ये सुपर्याप्तं
पृथक्पृथक्स्त्रीगृहदेवागारायुधशालादियुक्तं परिखाप्राकारादिगुप्तं सर्वर्तुफलपुष्पादियोगेन सर्वर्तुकं सुधया धवलितं वाप्यादिजलयुक्तं

तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्वितां कुले महति संभूतां हृद्यां रूपगुणान्वितां ७७ द्यान्वितमात्मनो गृहं कारयेत् ७६

101

तदित्यादि तद्गृहमाश्रित्य समानवर्णां शुभलक्षणकलत्राणोपेतां महाकुलप्रसूतां मनोहारिणीं रूपगुणवतीं भार्यामुद्वहेत् ७७ ॥

पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजं तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ७८ ॥

पुरोहितमिति पुरोहितं चाथर्वणविधिना कुर्वीत ऋत्विजं च कर्माणि कर्तुं वृणुयात् ते चास्य राज्ञो गृह्याण्यग्निसाध्यानि कर्माणि कुर्युः ७८ ॥

यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च ७९ ॥

यजेतेति राजा नानाप्रकारान्बहुलदक्षिणानश्वमेधादियज्ञान्कुर्यात् ब्राह्मणेभ्यश्च स्त्रीगृहशयनादीन्भोगान्सुवर्णवस्त्रादीनि च दद्यात् ७९ ॥

सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिं स्याच्चाम्नायपरो लोके वर्तेत पितृवन्नृषु ८० ॥

सांवत्सरिकमिति राजा प्रत्यक्षैराप्तैर्वर्षग्राह्यं धान्यादिभागमानाययेत् लोके च करादिग्रहणे शास्त्रनिष्ठः स्यात् स्वदेशवासिषु नरेषु पितृवत्स्नेहादिना वर्तेत ८० ॥

अध्यक्षान्विविधान्कुर्यात्तत्र तत्र विपश्चितः तेऽस्य सर्वाण्यवेक्षेरन्नृणां कार्याणि कुर्वतां ८१ ॥

अध्यक्षानिति तत्र तत्र हस्त्यश्वरथपदात्यर्थादिस्थानेषु अध्यक्षान्विविधान्पृथक्पृथक् विपश्चितः कर्मकुशलान्कुर्यात् ते चास्य राज्ञः तेषु हस्त्यश्वादिस्थानेषु मनुष्याणां कुर्वतां सर्वाणि कार्याणि सम्यक्करणार्थमवेक्षेरन् ८१ ॥

आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत् नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते ८२ आवृत्तानामिति गुरुकुलान्निवृत्तानामधीतवेदानां ब्राह्मणानां गार्हस्थ्यार्थिनां नियमेन धनधान्यैः पूजां कुर्यात् यस्मादेषोऽयं ब्राह्मो ब्राह्मणेषु स्थापितधनधान्यादिनिधिरविनाशी च नृपाणां धर्मादिफलदानाद्विनाशिसुवर्णादिनिधिविलक्षणः ८२ ॥

न तं स्तेना न चामित्रा हरन्ति न च नश्यति तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ८३

न तमिति तं ब्राह्मणेषु स्थापितनिधिं न चौरा नापि शत्रवो हरन्ति भूम्यादिस्थापितः कालवशात्न नश्यति स्थापितत्वाद्दर्शनं दुर्लभं स्यात् तस्माद्ब्राह्मणेष्वक्षयो नित्यफलानि निधिरविनाशी धनादिः स राज्ञा ब्राह्मणेषु निधातव्यः तस्मादक्षय इत्यर्थः ८३ ॥

न स्कन्दते न व्यथते न विनश्यति कर्हिचित् वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतं ८४

नेत्यादि यत्प्रोक्तं हविर्हूयते तत् कदाचित् स्कन्दते स्खलत्यधः पतति कदाचित् व्यथते शुष्यति कदाचिद्दाहादिना नश्यति ब्राह्मणस्य मुखे दीयमानं तु नैतान् दोषान् हि विन्दति ब्राह्मणहस्तदत्तमित्यर्थः तस्यैतत्पातादयो दोषाः तस्मादग्निहोत्रादिभ्यः श्रेष्ठं ब्राह्मणाय दानमित्यर्थः ८४ ॥

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे प्राधीते शतसाहस्रमनन्तं वेदपारगे ८५ ॥

सममित्यादि अब्राह्मणे क्षत्रियादिविषये यद्दानं तत् फले समं देयद्रव्यस्य यत्फलं तेनाधिकं न च न्यूनं भवति यो ब्राह्मणः क्रियारहितः आत्मानं

101 A

आचार्यं ब्रवीति महाब्राह्मणाद्ध्रुवः तद्विषयदानं पूर्वापेक्षया द्विगुणं फलं समम् स्वशाखाध्यायिमं ततः फलं सहस्रगुणमाचार्ये इति वाचनीयमदक्षिणा ८।८५

पात्रस्य हि विशेषेण श्रद्दधानतयैव च। अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलम्॥ ८६॥

पात्रस्येति। विद्यातपोवृत्तिशुक्लतया पात्रस्य तारतम्यमपेक्ष्य यथाशास्त्रं तथेति प्रत्ययरूपायाः श्रद्धायास्तारतम्येन यावन्मात्रं यद्दानं तस्याल्पं महद्वा फलं परलोके लभ्यते ८६॥

समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः। न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन्॥ ८७

समोत्तमेति समबले नाधिकबले न हीनबले न च राज्ञा युद्धार्थमाहूतो राजा प्रजारक्षणं कुर्वन्युद्धान्न निवर्तेत तत्र क्षत्रियेण युद्धार्थमाहूतेनावश्यं योद्धव्यमिति क्षात्रं धर्ममनुस्मरन् ८७॥

संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्। शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्॥ ८८॥

यस्मात्संग्रामेष्विति युद्धेष्वपराङ्मुखत्वं प्रजानां च रक्षणं ब्राह्मणपरिचर्या एतद्राज्ञामतिशयितं स्वर्गादिश्रेयःसाधनम् ८८॥

आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः। युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः॥ ८९

आहवेष्विति राजानो मिथः स्पर्धमानाः युद्धेषु परस्परं हन्तुमिच्छन्तः प्रकृष्टया शक्त्या संग्रामे अपराङ्मुखा युध्यमानाः स्वर्गं गच्छन्ति यद्यपि युद्धस्य
मात्रजेयधनलाभादिरूपं दृष्टमेव न फलं स्वर्गः तथापि युद्धाश्रितापराङ्मुखत्वनियमस्य स्वर्गः फलमिति न दोषः ८९॥

न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून्। न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः॥ ९०

नेत्यादि कूटान्यायुधानि बहिः काष्ठादिमयान्यन्तर्गुप्तनिशितशस्त्राणि तैः समरे युध्यमानः शत्रून्न हन्यात् नापि कर्णाकारफलकैः बाणैर्नापि विषाक्तैः नाप्यग्निदीप्तफलकैः ९०

न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम्। न मुक्तकेशं नासीनं न तवास्मीति वादिनम्॥ ९१॥

नचेति स्वयं रथस्थो रथात्पतितं स्थलारूढं न हन्यात् नपुंसकं बद्धाञ्जलिं मुक्तकेशमुपविष्टं त्वदीयोऽहमित्येवं वादिनं न हन्यात् ९१॥

न सुप्तं न विसंनाहं न नग्नं न निरायुधम्। नायुध्यमानं पश्यन्तं न परेण समागतम्॥ ९२॥

न सुप्तमिति सुप्तं मुक्तसंनाहं विवस्त्रं निरायुधमयुध्यमानं प्रेक्षकमन्येन सह युध्यमानं च न हन्यात् ९२॥

नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतम्। न भीतं न परावृत्तं सतां धर्ममनुस्मरन्॥ ९३॥

नेत्यादि भग्नायुधं पुत्रशोकादिनार्तं बहुप्रहाराकुलं भीतं युद्धपराङ्मुखं च शिष्टक्षत्रियाणां धर्ममनुस्मरन् न हन्यात् ९३॥

यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः। भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते॥ ९४॥

म।
नु। से।

102

यस्त्विति यस्तु योधो भीतः पराङ्मुखः सन् युद्धे शत्रुभिर्हन्यते स पोषणकर्तुः प्रभोर्यद्दुष्कृतं तत्सर्वं प्राप्नोति प्राणसंशयमापन्ने यस्तत्कृतं दुष्कृतं तेन युद्धाय सं
मयोग्यं पत्र सिद्ध्यतः श्रमप्रवासो यजीव्यपूणा स्वेनाथवा तत्र प्रतिपत्ता तु मानेदयोपि पतत्त्वयं ... सुकृतमित्यत्राविस्तरतमस्माभिः पराङ्मुखहतस्या
त्याप मेततः खिवल्लितं तत्र प्रभुणा पापस्यादितिगोविन्दराजकः मेधातिथिस्त्वर्थवादमात्रमेतत्... अनेनेतत् ... मन्वर्थवर्जनात् अन्या
दीयं पापं प्राप्नोति ... इति यथोक्तमेवव्याख्यातम् ९४ ॥

यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं। भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ९५ ॥

यच्चेत्यादि पराङ्मुखहतस्य यत्किंचित् सुकृतं परलोकार्थमनेनार्जितमस्ति तत्सर्वं प्रभुर्लभेत ९५ ॥

रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून्स्त्रियः। सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत् ९६ रथाश्वमित्यादि राज्ञः
स्वामिनः सर्वधनग्रहणोपप्राप्ते तदपवादार्थमाह रथाश्वहस्तिछत्रवस्त्रादिधनधान्यगवादिदास्यादिस्त्रियः सर्वाणि द्रव्याणि गुडलवणादीनि कुप्य
वस्त्रवर्णरजतव्यतिरिक्तताम्रादिधनं यः पृथग्जित्वा गृह्णाति तस्यैव तद्भवति कुप्यं सुवर्णरजतव्यतिरिक्तं ... यवसमर्पणीयमपजन्द यएवात्रपरिगणनीयं ९६ ॥

राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः। राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितं ९७

अत एवाह राज्ञश्चेत्यादि उद्धारं योद्धारो राज्ञे दद्युः उद्धियत इत्युद्धारः जितधनादुत्कृष्टं यत्तेसुवर्णरजतभूम्यादि राज्ञे समर्पणीयं कपिलस्यादिवाहनम
पि राज्ञे देयं राजश्च वाहनस्य राजैवोद्धारं दत्त्वा ... इन्द्रो वै वृत्रं हत्वेत्युपक्रम्य समहानभूत् देवता अब्रुवन्नुद्धारमुद्धरतेति यथा
चापृथग्जितं सहजितं सर्वयोधेभ्यो यथायोग्यं राज्ञा विभजनीयं ९७ ॥

एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः। अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन्रणे रिपून ९८ एष इत्यादि अविगर्हित
एषोऽनादिसंगप्रवाहरूपेण भवतया नित्यो योधधर्म उक्तः युद्धे शत्रून्हिंसन्क्षत्रियः एतं धर्मं न त्यजेत् युद्धाधिकारिणात्क्षत्रियग्रहणं ब्राह्मणस्याप्यनित्यतेति मा
न त्यजेत् ९८

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः। रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निःक्षिपेत ९९ ॥

अलब्धमिति अजितं भूमिहिरण्यादि जितुमिच्छेत जितं प्रयत्नतो रक्षेत् वाणिज्यादिना वर्धयेत वृद्धं च पात्रेभ्यो दद्यात ९९ ॥

एतच्चतुर्विधं विद्यात्पुरुषार्थप्रयोजनं। अस्य नित्यमनुष्ठानं सम्यक्कुर्यादतन्द्रितः १००

एतदिति एतच्चतुःप्रकारं पुरुषार्थो यः स्वर्गादिस्तत्प्रयोजनं यस्मादेवंरूपं जानीयात् अतोऽनलसः सन् सर्वदास्यानुष्ठानं कुर्यात् १००

अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया। रक्षितं वर्धयेद्वृद्ध्या वृद्धं दानेन निःक्षिपेत १०१ अलब्धमिति यदलब्धं तद्दण्डस्य परया

102A दात्मकेन दंडेन जेतुमिच्छेत् जितं च प्रत्यवेक्षणेन रक्षेत् रक्षितं च वृद्ध्युपायेन सबलजलपथवाणिज्यादिना वर्द्धयेत् वृद्धं शास्त्रीयविभागेन पात्रेभ्यो दद्यात् १०१

नित्यमुद्यतदंडः स्यान्नित्यं विवृतपौरुषः नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्यरेः १०२॥

नित्यमिति नित्यं हस्त्यश्वादिशिक्षादिप्रयोगाभ्यासो दंडो यस्य स तथा स्यात् नित्यं च प्रकाशीकृतमस्त्रविद्यादिना पौरुषं यस्य स तथा स्यात् नित्यं संवृतमेव वरणीयं मंत्राचारचेष्टादिकं यस्य स तथा स्यात् नित्यं च शत्रोरवमतादिरूपछिद्रानुसंधानतत्परः स्यात् १०२॥

नित्यमुद्यतदंडस्य कृत्स्नमुद्विजते जगत् तस्मात्सर्वाणि भूतानि दंडेनैव प्रसादयेत् १०३॥

नित्यमिति यस्मान्नित्योद्यतदंडस्य सर्वं जगदुद्विजते इति तस्मात्सर्वप्राणिनो दंडेनैवात्मसात् कुर्यात् १०३॥

अमाययैव वर्तेत न कथंचन मायया बुध्येतारिप्रयुक्तां च मायां नित्यं स्वसंवृतः १०४॥ अमाययेति मायया छद्मतया अमात्यादिषु न वर्तेत तथा सति सर्वेषामविश्वसनीयः स्यात् धर्मरक्षार्थं यथा तले नैव व्यवहरेत् यत्नकृतात्मपक्षरक्षः शत्रुकृतां प्रकृतिभेदरूपां मायां चारद्वारेण जानीयात् १०४

नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु गूहेत्कूर्म इवांगानि रक्षेद्विवरमात्मनः १०५॥

नेत्यादि तथा यत्नं कुर्याद्यथास्य प्रकृतिभेदादिच्छिद्रं शत्रुर्न जानाति शत्रोस्तु प्रकृतिभेदादिकं चारैर्जानीयात् कूर्मो यथा स्वांगानि स्वदेहे गोपयत्येवं राज्यांगान्यमात्यादीनि दानसम्मानादिना आत्मसात्कुर्यात् दैवाच्च प्रकृतिभेदादिरूपच्छिद्रं जातं यत्नतः प्रतीकारं कुर्यात् १०५

बकवच्चिंतयेदर्थान्सिंहवच्च पराक्रमेत् वृकवच्चावलुंपेत शशवच्च विनिष्पतेत् १०६

बकवदिति यथा बको जले मीनमतिचपलस्वभावमपि ग्रहणार्थं एकतानतः करणाच्चिंतयेदिति एवं हस्त्यश्वविहितरक्षस्यापि विपक्षस्य देशादि हरणादौ चिंतयेत् यथा च सिंहः प्रबलमतिस्थूलमपि द्विपं बलाद्धंतुमाक्रमते एवं शत्रुसबलाबलवत्ताक्रान्तः सन्नुपायेन तमभिभवेत् यथा हंतुमाक्रमेत् यथा च वृकः पालकृतरक्षणमपि पशुं दैवात्पालानवधानमासाद्य व्यापादयत्येवं दुर्गादिव्यवस्थितमपि रिपुं कथंचित्प्रमादमासाद्य व्यापादयेत् यथा शशः यद्वत् विविधव्याधमपि गतोऽपि कुटिलगतिः सन् पलायते एवं स्वयमबलो बलवदरिपरिवृतोऽपि कथंचिदपि व्यामोह्य पलाय गुणवत्पार्थिवांतरं संश्रयेत् प्रसर्पेत्

एवं विजयमानस्य येऽस्य स्युः परिपंथिनः तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः १०

एवमित्यादि एवमुक्तप्रकारेण विजयप्रवृत्तस्य नृपतेः ये विजयविरोधिनो भवेयुः तान्सामदानभेददंडैरुपायैर्वशमानयेत् १०७॥

यदि ते न तु तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः दंडेनैव प्रसह्यैताञ्छनकैर्वशमानयेत् १०८॥

यदीत्यादि ते च विजयविरोधिनो यदा यैस्त्रिभिरुपायैर्न निवर्तंते तदा बलाद्देशोपमर्दादिना युद्धेन शनकैर्लघुगुरुदंडक्रमेण दंडेनैव वशीकुर्यात् १०८

म॰
नु॰ स॰
१०३

103

सामादीनामुपायानां चतुर्णामपि पंडिताः सामदंडौ प्रशंसंति नित्यं राष्ट्राभिवृद्धये १०९ सामादीति चतुर्णामपि सा
मादीनामुपायानां मध्यात्सामदंडावेव राष्ट्रवृद्ध्यर्थं पंडिताः प्रशंसंति साम्नि प्रयासधनव्ययसैन्यक्षयादिदोषाभावात् दंडे तु तत्साध्यं वापि कार्यमिति प्रशस्यात् १०९
यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपंथिनः ११० यथेत्यादि यथा क्षेत्रधान्यतृणादि
कयोः सहोत्पन्नयोरपि यथा धान्यानि लवनकर्ता रक्षति तृणादिकं चोद्धरति एवं नृपतिः राष्ट्रं दुष्टांश्च हन्यात् दुष्टनाशेन नवसीयते शिष्टं सहितं च राष्ट्रं रक्षेत् ११०
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबांधवः १११ मोहादित्यादि यो राजा अनवेक्षयाद
ष्टविधानेन सर्वानेव स्वराष्ट्रीयजनान् प्राणान्ययधनग्रहणमारणादिक्लेशेन पीडयति स शीघ्रमेव जनपदवैरात् प्रकृतिकोपात् राज्याज्जीवि
शरीरकर्षणात्प्राणाः क्षीयंते प्राणिनां यथा तथा राज्ञामपि प्राणाः क्षीयंते राष्ट्रकर्षणात् ११२ ताच्च पुत्रादिसहितो भ्रश्यते १११
शरीरकर्षणेति यथा प्राणभृतामाहारनिरोधादिना शरीरशोषणात्प्राणाः क्षीयंते एवं राज्ञामपि राष्ट्रपीडनात् प्रकृतिकोपादिना प्राणा विनश्यंतीति तस्मात् स्वशरीरवद्राष्ट्रं रक्षणीयमिति ११२
राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत् सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते ११३ ॥
राष्ट्रस्येति राष्ट्रस्य रक्षणे वक्ष्यमाणमिममुपायमनुतिष्ठेत् यस्मात् संरक्षितराष्ट्रो राजा सुखतया समेत्य वर्द्धते ११३ ॥
द्वयोस्त्रयाणां पंचानां मध्ये गुल्ममधिष्ठितं तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहं ११४ ॥ द्वयोरिति द्वयोस्त्रयाणां मध्ये त्रयाणां
वा ग्रामाणां पंचानां गुल्मं रक्षकपुरुषसमूहं सत्यप्रधानपुरुषाधिष्ठितं राष्ट्रस्य संग्रहे रक्षार्थं कुर्यात् ग्रामाल्पत्वापेक्षया विकल्पः ११४ ॥
ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा विंशतीशं शतेशं च सहस्रपतिमेव च ११५
ग्रामस्येति एकग्रामस्य दशग्रामाणामधिपतीन् कुर्यात् ११५ ग्रामदोषान्समुत्पन्नान्ग्रामिकः शनकैः स्वयं शंसेद्ग्रामदशेशाय दशेशो
विंशतीशिने ११६ विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयं ११७ ॥
ग्राम इति विंशतीश इति ग्रामादिषु उत्पन्नांश्चौरादिदोषान् ग्रामे संजातान् ग्रामनाशानि कर्तुमसमर्थः स्वयं दशग्रामाधिपतये कथयेत् एवं दशग्रामा
धिपत्यादयो विंशतिग्रामस्वाम्यादिभ्यः कथयेयुः तथा च सति सम्यक् चौरादिकंटकोद्धारो भवति ११६ ११७ ॥
यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः अन्नपानेंधनादीनि ग्रामिकस्तान्यवाप्नुयात् ११८ यानीति एकग्रामा
धिकृतस्य वृत्तिमाह यानि अन्नपानेंधनादीनि ग्रामवासिभ्यः प्रत्यहं राज्ञे देयानि न तु करं धान्यानामष्टमो भाग इत्यादिकं तानि ग्रामाधिपतिर्वृत्त्यर्थं गृह्णीयात् ११८

303A

दशी कुलं तु भुञ्जीत विंशी पञ्च कुलानि च ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरं ११९

दशी कुलमिति अष्टागवं धर्म्यहलं षड्गवं जीवितार्थिनां चतुर्गवं गृहस्थानां त्रिगवं ब्रह्मघातिनामिति हारीतस्मरणात् षड्गवं मध्यमं हलमिति तथाविधहलद्वयेन यावती भूमिर्वाह्यते तत्कुलमिति वदन्ति तद्दशग्रामाधिपतिर्वृत्त्यर्थं भुञ्जीत एवं विंशत्यधिपतिः पञ्चकुलानि शताधिपतिर्मध्यमं ग्रामं सहस्राधिपतिर्मध्यमं पुरम् ११९॥

तेषां ग्राम्याणि कार्याणि पृथक्कार्याणि चैव हि राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः। १२०

तेषामिति दि तेषां ग्रामनिवासिप्रभृतीनां परस्परविप्रतिपत्तौ यानि ग्रामभवानि कार्याणि कृताकृतानि च पृथक्कार्याणि तान्यन्यो राज्ञो हितकृत् मित्रयुक्तोऽनलसः कुर्वीत १२०

नगरे नगरे चैकं कुर्यात्सर्वार्थचिन्तकं उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहं १२१

नगर इति प्रतिनगरमेकैकमुच्चैःस्थानं कुलादिना महान्तं श्रेष्ठानभूतं घोररूपं हस्त्यश्वादिसामग्र्या भयजनकं नक्षत्रमध्ये भार्गवादिग्रहमिव तेजस्विनं। कार्यद्रष्टारं नगराधिपतिं कुर्यात् १२१

स ताननुपरिक्रामेत्सर्वानेव सदा स्वयं तेषां वृत्तं परिणयेत्सम्यग्राष्ट्रेषु तच्चरैः १२२

स इत्यादि स नगराधिकृतस्तान्सर्वान्ग्रामाधिपत्यादीनप्रमत्तप्रयोजनेन सर्वदा स्वयं सबलेनानुगच्छेत् तेषां च नगराधिकृतपर्यन्तानां सर्वेषामेव राष्ट्रेषु च वृत्तं तत्तद्विषयनियुक्तैश्चरैः सम्यक् राजा परिणयेदवगच्छेत्

राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः

राज्ञो हीत्यादि यस्माद्राज्ञो रक्षाधिकृता बाहुल्येन परस्वग्रहणशीला वञ्चकाश्च भवन्ति तस्मात्तेभ्यः स्वात्मीयाः प्रजा राजा रक्षेत् १२३॥

ये कार्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनं १२४॥

य इत्यादि ये रक्षाधिकृताः कार्यार्थिभ्यो व्यवहारकुलादिकमुत्कोचलोभाद्ग्राहीयथनग्रहणपापबुद्धयः कुर्वन्ति तेषां सर्वस्वं राजा गृहीत्वा देशान्निःसारणं कुर्यात् १२४॥

राजकर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्मानुरूपतः १२५

राजकर्मेत्यादि राज्ञोपयुक्तकर्मनियुक्तकर्मनियुक्तानां स्त्रीणां दास्यादीनां कर्मकरजनस्य च उत्कृष्टमध्यमापकृष्टस्थानयोग्यानुरूपेण प्रत्यहं वृत्तिं कुर्यात् १२५॥

पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनं षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः। १२६

ताम्रवर्षणीयतिपणः इति अवकृष्टस्य गृहमार्जकोदकवाहादेः कर्मकरस्य वस्त्रमाल्यलवणः पणो भृतिरूपं प्रत्यहं दातव्यः षाण्मासिकश्चाच्छादो वस्त्रयुगं दातव्यम् अष्टमुष्टिर्भवेत्कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलं पुष्कलानि च चत्वारि आढकः परिकीर्तितः चतुराढको भवेद्द्रोण इति गणनया धान्यद्रोणश्च प्रतिमासं देयः उत्कृष्टस्य तु भृतिरूपं षट्पणाः प्रत्यहं देयाः एतदेव कल्पनया षाण्मासिकं निषट्युगानि प्रतिमासं च षड्धान्यद्रोणा देयाः अनयैव दिशा मध्यमस्य प्रत्यहं पणत्रयं भृतिरूपं दातव्यं षाण्मासिकं च वस्त्रयुगत्रयं मासिकं च धान्यद्रोणत्रयं देयं १२६॥

क्रयविक्रयमध्वानं भक्तं च सपरिव्ययं योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान् १२७

म॰ ७॰ मे॰ १०४

104

क्रयविक्रयमध्वानमित्यादि कियता मूल्येन क्रीतमिदं वस्तु लवणादि द्रव्यं विक्रीयमाणं चात्र कियल्लभ्यते कियं दूरादानीतं किमस्य वणिजो भक्तव्ययेन पोषणकस्या
दिना परिचयेन लग्नं किमस्याशयादौ चौरादिभ्यो रक्षणार्थं व्ययेन लग्नं एवं सर्वमवेक्ष्य राजा वणिजः करान्दापयेत् १२७ ॥

यथा फलेन युज्येत राजा कर्ता च कर्मणां तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् १२८ यथेत्यादि यथा राजा वे
तनादिकर्मणः फलेन यथा च कार्षिकवणिगादयः कृषिवाणिज्यादिकर्मणां फलेन संबध्यन्ते तथा निरूप्य राजा सर्वदा राष्ट्रे करान्गृह्णीयात् १२८ ॥

यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः १२९

यथाल्पाल्पमित्यादि यथा जलौको वत्स भ्रमराः स्तोकं स्तोकं निजं रक्तं क्षीरं मधूनि गृह्णन्त्येवं राज्ञा मूलधनमच्छिंदता स्तोकः स्तोको राष्ट्राद्वार्षिकः करो ग्राह्यः १२९ ॥

पंचाशद्भाग आदेयो राज्ञः पशुहिरण्ययोः धान्यानामष्टमो भागः षष्ठो द्वादश एव वा १३० तस्मात्पंचाशद्भाग इत्यादि मूलादधि
कयोः पशुहिरण्ययोः पंचाशद्भागो राज्ञा गृहीतव्यः एवं धान्यानां षष्ठोऽष्टमो द्वादशो वा भागो राज्ञा ग्राह्यः भूमेरुत्कर्षापकर्षापेक्षया कर्षणादिक्लेशलाघवगौरवापेक्षया
चैव बहुल्पग्रहणविकल्पः १३० ॥

आददीताथ षड्भागं द्रुमांसमधुसर्पिषां गंधौषधिरसानां च पुष्पमूलफलस्य च १३१ ॥

पत्रशाकतृणानां च वैदलस्य च चर्मणां मृण्मयानां च भांडानां सर्वस्याश्ममयस्य च १३२ ॥

आददीतेत्यादि पत्रशाकतृणानामित्यादि द्रुमशब्दो वृक्षवाचकः वृक्षादीनां समदर्शनानां मृण्मयानां षष्ठो भागो लाभात् गृहीतव्यः १३२ ॥

म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करं न च क्षुधास्य संसीदेच्छ्रोत्रियो विषये वसन् १३३ ॥

म्रियमाण इति क्षीणधनोऽपि राजा श्रोत्रियाद्ब्राह्मणात्करं न गृह्णीयात् न च तदीयदेशे वसन् श्रोत्रियः बुभुक्षया अवसादं गच्छेत् १३३ ॥

यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति १३४ ॥

तस्मात् यस्येत्यादि यस्य राज्ञो देशे श्रोत्रियः क्षुधा अवसन्नो भवति तस्य राष्ट्रमपि दुर्भिक्षादिभिः शीघ्रमवसादं गच्छति १३४ ॥

श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत् संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवौरसम् १३५ ॥

यत एवमतः श्रुतेति शास्त्रज्ञानानुष्ठाने ज्ञात्वास्य तदनुरूपां धर्मादनपेतां जीविकां प्रकल्पयेत् चौरादिभ्यश्चैनं रक्षेदौरसपुत्रमिव पिता रक्षेत् १३५ ॥

संरक्ष्यमाणो राज्ञा यं कुरुते धर्ममन्वहं तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च १३६

संरक्ष्यमाणो राज्ञा यं कुरुते धर्ममन्वहं तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च १३६ ॥

यस्मात्संरक्ष्यमाण इत्यादि स च श्रोत्रियो राज्ञा सम्यग्रक्ष्यमाणो यं धर्मं प्रत्यहं करोति तेन राज्ञ आयुर्धनराष्ट्राणि वर्धन्ते १३६ ॥

यत्किंचिदपि वर्षस्य दापयेत्करसंज्ञितं व्यवहारेण जीवंतं राजा राष्ट्रे पृथग्जनम् १३७ ॥

यदिति राजा स्वदेशे शाकपर्णादिस्वल्पमूल्यक्रियावस्त्रादिना जीवंतं निकृष्टजनं स्वल्पमपि करत्वेन वर्षेण दापयेत् १३७ ॥

104A

कारुकाञ्छिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः एकैकं कारयेत्कर्म मासि मासि महीपतिः १३८

कारुकानिति कारुकान्सूपकारादीन् शिल्पिनश्च रथतक्षाद्यान् शिल्पिनश्च लोहकारादीन् शूद्रांश्च देहक्लेशोपजीविनो भारिकादीन् मासि मास्येकं दिनं कर्म का

नोच्छिन्द्यादात्मनो मूलं परेषां चातितृष्णया उच्छिन्दन्ह्यात्मनो मूलमात्मानं तांश्च पीडयेत् १३९ रयेत् १३८

नोच्छिन्द्यादिति प्रजास्नेहात्करशुल्कादेरग्रहणमात्मनो मूलोच्छेदः अतिलोभेन प्रचुरकरादिग्रहणं परेषां मूलोच्छेदः एतदुभयं न कुर्यात् यस्मादात्म

नो मूलमुच्छिन्दन् कोशक्षयादात्मानं पीडयेत् पूर्वोहीनः परेषां चेत्यपि संबध्यते परेषां मूलमुच्छिन्दंस्तांश्च पीडयेत् १३९ ॥

तीक्ष्णश्चैव मृदुश्च स्यात्कार्यं वीक्ष्य महीपतिः तीक्ष्णश्चैव मृदुश्चैव राजा भवति संमतः १४० ॥

तीक्ष्ण इति कार्यविशेषमवगम्य क्वचित् कार्ये तीक्ष्णः क्वचिन्मृदुश्च भवेत् यस्मादेवंरूपो राजा सर्वेषामभिमतो भवति १४० ॥

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम् स्थापयेदासने तस्मिन् खिन्नः कार्येक्षणे नृणाम् १४१ ॥

अमात्येति स्वयं कार्यदर्शनेन खिन्नः श्रेष्ठामात्यं धर्मविदं प्राज्ञं जितेन्द्रियं कुलीनं तस्मिन् कार्यदर्शनस्थाने नियुञ्जीत १४१ ॥

एवं सर्वं विधायेदमितिकर्तव्यमात्मनः युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः १४२ ॥

एवमित्यादि एवमुक्तप्रकारेण सर्वमात्मनः कार्यजातं संपाद्य युक्तः प्रमादरहितः आत्मीयाः प्रजा रक्षेत् १४२ ॥

विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः संपश्यतः सभृत्यस्य मृतः स न तु जीवति १४३ विक्रोशन्तीति यस्य राज्ञोऽमा

त्यादिसहितस्य पश्यत एव राष्ट्रादाक्रोशन्त्यः प्रजास्तस्करादिभिरपह्रियन्ते स मृत एव न तु जीवति जीवनकार्याभावात् जीवनमपि तस्य मरणमेवेत्यर्थः तस्मा

क्षत्रियस्य परो धर्मः प्रजानामेव पालनम् निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते १४४ दस्युभ्यः प्रजा रक्षितव्या इति वाक्यशेषः १४३

क्षत्रियस्येति धर्मान्तरेभ्यः श्रेष्ठः क्षत्रियस्य प्रजारक्षणमेव प्रकृष्टो धर्मः यस्माद्यथोक्तशुल्कफलकरादिभोक्ता राजा धर्मेण संबध्यते १४४ ॥

उत्थाय पश्चिमे यामे कृतशौचः समाहितः हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभाम् १४५ उत्थायेति रात्रेः पश्चिमे

यामे उत्थाय कृतमूत्रपुरीषोत्सर्गादिशौचः अनन्यमनाः कृताग्निहोत्रः ब्राह्मणांश्च पूजयित्वा प्रशस्तलक्षणां शुभां सभामास्थानगृहं प्रविशेत्

तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत् विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः १४६

तत्रेति तस्यां सभायां स्थितो दर्शनार्थमागताः प्रजाः सर्वाः संभाषणादर्शनादिभिः प्रतिनन्द्य प्रस्थापयेत् ताश्च प्रस्थाप्य मन्त्रिभिः सह संधिविग्रहादि चिन्तयेत् १४६

गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः अरण्ये निःशलाके वा मन्त्रयेदविभावितः १४७ गिरिपृष्ठमिति पर्वतपृष्ठमारुह्य निर्जनगृ

हस्थितो वा अरण्ये वा निर्विशेषे देशे मन्त्रयेत् कार्यमिदं परिरनुपलक्षितः कर्मणामारम्भोपायः पुरुषद्रव्यसंपद् देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चा

ङ्गमन्त्रचिन्तनम् १४७

गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः अरण्ये निःशलाके वा मंत्रयेदविभावितः १४७ गिरिपृष्ठमिति पर्वतपृष्ठमारुह्य

यस्य मंत्रं न जानंति समागम्य पृथग्जनाः स कृत्स्नां पृथिवीं भुंक्ते कोषहीनोपि पार्थिवः १४८

यस्येति यस्य राज्ञो मंत्रिभ्यः पृथगन्ये जना मिलित्वापि मंत्रं न जानंति स विहीनकोषोपि सर्वां पृथिवीं भुनक्ति १४८ ॥

जडमूकांधबधिरांस्तैर्यग्योनान्वयोगतान् स्त्रीम्लेच्छव्याधितव्यंगान्मंत्रकालेऽपसारयेत् १४९

जडांधेति बुद्धिहीनवाक्चक्षुःश्रोत्रविकलान् तिर्यग्योनिभवांश्च शुकसारिकादीनतिवृद्धस्त्रीम्लेच्छरोगव्यंगहीनांश्च मंत्रसमयेऽपसारयेत् १४९ ॥

भिंदंत्यवमता मंत्रं तैर्यग्योनास्तथैव च स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो भवेत् १५० यस्माद्भिंदंतीत्यादि एते जडादयोपि
प्राचीनदुष्कृतवशेन प्राप्तजडादिभावा अधार्मिकतयैवावमानिता मंत्रभेदं कुर्वंति तथा शुकादयो तिर्यंचः स्त्रियश्च विशेषेणास्थिरबुद्धितया मंत्रं भिंदंति तस्मात्
अपसारणे यत्नवान्स्यात् १५०

मध्यंदिनेऽर्द्धरात्रे वा विश्रांतो विगतक्लमः चिंतयेद्धर्मकामार्थान्सार्द्धं तैरेक एव वा १५१

मध्यंदिन इति दिनमध्ये रात्रिमध्ये वा विगतचित्तखेदः शारीरक्लेशरहितश्च मंत्रिभिः सह एकाकी वा धर्मार्थकामाननुष्ठातुं चिंतयेत् १५१

परस्परविरुद्धानां तेषां च समुपार्जनं कन्यानां संप्रदानं च कुमाराणां च रक्षणं १५२ परस्परेति तेषां धर्मार्थकामानां प्रायिकविरो
धवतां विरोधपरिहारेणार्जनोपायं चिंतयेत् तथा प्रारब्धकार्यशेषं दुहितॄणां च दानं स्वकार्यसिद्ध्यर्थं निरूपयेत् कुमाराणां च रक्षणं विनयाधानं नीतिशि
क्षार्थं रक्षणं चिंतयेत् १५२ ॥

दूतसंप्रेषणं चैव कार्यशेषं तथैव च अंतःपुरप्रचारं च प्रणिधीनां च चेष्टितं १५३ ॥

दूतेति दूतानां संप्रेषणार्थं लेखहारिकादिना परराष्ट्रप्रस्थापने चिंतयेत् तथा प्रारब्धकार्यशेषं समापयितुं चिंतयेत् स्त्रीणां चातिविषमचेष्टितत्वात् तथा
हि प्रोक्तं भ्रातृव्यो विनिगूहितेन विहरंथे वेश्महे बीजत्यान विषप्रदिग्धेन नूपुरेण देवी विरक्ता किल काशिराजमित्यादिष्वगम्यात्मरक्षार्थं चांतःपुर
स्त्रीणां चेष्टितं सर्वदा दास्यादिना निरूपयेत् चराणां च प्रतिराजादिषु प्रयुक्तानां तेषां चेष्टितमवधारयेत् १५३ ॥

कृत्स्नं चाष्टविधं कर्म पंचवर्गं च तत्त्वतः अनुरागापरागौ च प्रचारं मंडलस्य च १५४ ॥

कृत्स्नमिति अष्टविधं कर्म समग्रं चिंतयेत् तत्र चोशनसोक्तं आदाने च विसर्गे च तथा प्रैषनिषेधयोः पंचमे चार्थवचने व्यवहारस्य चेक्षणे दंडशुद्ध्योः सदायु
क्तस्तेनाष्टगतिको नृपः अष्टकर्मादि यथाति राज्ञा शास्त्राभिपूजितः तत्रादानं करादीनां विसर्गो भृत्यादिभ्यो धनदानं प्रैषो मात्यादीनां दृष्टानुष्ठाने प्रतिषेधो
दृष्टादृष्टविरुद्धक्रियायाः अर्थवचनं कार्यसंदेहे राज्ञा यत्तदेव तत्र नियमात् व्यवहारेक्षणं प्रजानां ऋणादिविप्रतिपत्तिशोधो दंडः पराजितानां यथाशास्त्रोक्त
धनग्रहणं शुद्धिः पापे कर्मणि जाते तत्र प्रायश्चित्तसंपादनं मेधातिथिस्त्वकृतारंभः कृतानुष्ठानमनुष्ठितविशेषणं कर्मफलसंग्रहः तथा सामदान
भेददंडाः पि तदष्टविधं कर्म अथवा वाणिक्पथ उदकसेतुबंधनदुर्गकरणं कृतस्य संस्कारनिर्णयः हस्तिबंधनदुर्गकरणं कृतस्य संस्कारो भेमानिवेश
नेदाहरणावनच्छेदनं चेत्याह तथा कापटिकोदास्थितगृहपतिवैदेहिकतापसव्यंजनाख्यः पंचविधं चारवर्गं यथावत्तत्त्वतश्चिंतयेत् तत्रापरम
मर्मज्ञः प्रगल्भश्छात्रः कपटव्यवहारित्वात् कापटिकस्तं हेतुना समर्थमानाभ्यामुपगृह्य रहसि राजा ब्रूयात् यस्य दुष्टं पश्यसि तत्तदानीमेवमपि व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

105A

कश्यमिति प्रव्रज्यावृत्तापसनउदास्थितः तं लोके सुविदितदोषं प्रज्ञावोपेतं शुक्लं कृत्वार्थिनं तावान्नारहसि राजापवर्णं ब्रूयात् गृहपतिकं मे देश
त्यतिकं भूयं तं स्वबहुस्वस्थपकल्पयेत् सर्वान्सर्वानपि प्रव्रज्याजितानावाराजकर्मकारिणांग्रासाच्छादनादिकं दद्यात् कर्षकः क्षीणवृत्तिः प्रज्ञाशौचयुक्तो
गृहपतिव्यंजनस्तस्मिपि एवं वड्ढ्कास्वभूमाकृषिकर्मकारयेत् वाणिजकः क्षीणवृत्तिर्वैदेहिकव्यंजनस्तस्यैव वड्ढ्कायनमानाभ्यासार्थसी कृतिवाणिज्य
कारयेत् मुण्डो जटिलो वा कामस्तापसव्यंजनः सोपि कृषिवाग्रामे वसन् बहुमुण्डजटिलान्तरकपटिपिण्डगन्धाहुतागृह राजोपकल्पितवृत्तिः तापसव्यंजकाया
ज्वमासद्विमासोत्तरितप्रकाशं वदेद्वाद्दिशुष्टिमश्नीयात् गृहस्थिवराजोपकल्पितयथेष्टमाहारं कल्पयेत् शिष्याश्चास्यातीतानागतज्ञानादिकावापयेयुः॥
तेन बहुलोकवहनमाश्रमासाघमर्षं वाविश्रमनीयत्वात् सेवकार्थमकर्याच्चप्रवृत्तिश्चयस्थवक्रतिक्रियादिककथ्यपवर्गपवर्गयथावत्त्रियं देवपञ्चवर्गी
प्रकल्पतेनैवपञ्चवर्गद्वारेणाशतिराजस्मात्मीयानां वामात्याहीनामनुरागविरागौ ज्ञात्वा तद्वृत्तं चिन्तयेत् वक्ष्यमाणस्य राजमण्डलस्य प्रचारं कार्यं संधौ वा
विग्रहार्थोत्यत्त्यादिकं चिन्तयेत् तथा च ज्ञात्वा तदनुगुणं चिन्तयेत् १५४॥

मध्यमस्य प्रचारं च विजिगीषोश्च चेष्टितं उदासीनप्रचारं च यत्नवानुपलक्षयेत् १५५ मध्यमस्येति च विजिगीषोरन्तरः
संहतयोरनुग्रहे समर्थो निग्रहे वासंहतयोः समर्थः स मध्यमः तस्य प्रचारं चिन्तयेत् तथाप्रज्ञान्मादृशाणां प्रकृतिसंपन्नो विजिगीषुस्तस्य चेष्टितं चिन्तयेत्
तथाप्यरिविजिगीषुमध्यमानां यः संहतानामनुग्रहे समर्थोऽनिग्रहे चासंहतानां समर्थः स उदासीनः तस्य प्रचारं चिन्तयेत् प्रज्ञोपचितिर्यस्यापि सहजस्य
कृत्रिमस्य भूमिनैतस्य च प्रवापदपयायप्रयत्नतः प्रचारं चिन्तयेत् १५५॥

एताः प्रकृतयो मूलं मण्डलस्य समासतः अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः १५६
एता इत्यादि एता मध्यमाद्याश्चतस्रः प्रकृतयः संक्षेपेण मण्डलस्य मूलं प्रधानं प्रकृतीनामष्टादीनां मिलितं प्रख्यातेन्या अष्टौ समाख्याता तथाग्रय
तोरिभ्यो नामिवस्त्रारिमित्रं वर्तितवचनस्वः प्रकृतयो भवति पश्चाच्च पार्ष्णिग्राहश्चाक्रन्दः पार्ष्णिग्राहसारः आक्रन्दासारश्चेति चतस्रः एवमष्टौ प्रकृतयो भवन्ति पू
र्वोक्ताश्चतस्रो मध्यमादिविजिगीषूदासीनप्रत्युत्पाभिर्मूलप्रकृतिभिः सह द्वादशैताः प्रकृतयः स्मृता १५६॥

अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः १५७
अमात्येति आसां मूलप्रकृतीनां वक्ष्यमाणाष्टानां पार्ष्णिग्रावादीनां प्रकृतीनां द्वादशानां प्रत्येकं प्रत्येकस्याः प्रकृतेः अमात्यदेशदुर्गकोशदण्डाख्याः पञ्च द्रव्यप्रकृतयो भवन्ति
तथा मूलप्रकृतिभिस्ताभिः सह तिः षण्णां प्रकृतिभिश्चाग्रामिः सह समेतद्वादशप्रकृतयो द्विसप्ततिः प्रकृतयो मुनिभिः कथिताः १५७॥

अनन्तरमरिं विद्यादरिमित्रमतः परं अनन्तरमित्रमुदासीनं तयोः परं १५८ अनन्तरमिति विजिगीषोर्भूम्यनन्तरितमरि
पोऽहदासीनप्रकृतिर्विद्यात् आसामेव प्रकृतीनां मध्ये प्रधानान्तवभेदतपदभेदः आपाश्रवणिनापि व्यपदेशायैवपश्चाद्देति न स्वोरिमितीपाणिग्राह्यः विजिगी

तान्सर्वानभिसंदध्यात्सामादिभिरुपक्रमैः व्यस्तैश्चैव समस्तैश्च पौरुषेणा नयेन च १५९॥
तानिति तान्सर्वानरपान्नरपतीन्सामभेददानदण्डैरुपायैः यथासंभवं व्यस्तैः समस्तैर्वशीकुर्यात् अथवा पौरुषेणादण्डेनैव केवलेन नयेन साम्नैव वा
रूपाः १५८

म॰
टी॰ अ॰
७

केवलो नात्मवशगतत्कार्यार्थं तथा चोक्तं सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये १५९

संधिं च विग्रहं चैव यानमासनमेव च । द्वैधीभावं संश्रयं च षड्गुणांश्चिंतयेत्सदा १६० ॥

संधिमिति तत्रोभयोरनुग्रहार्थं हस्त्यश्वरथहिरण्यादिभिर्बंधनं तेन वाक्येन समयो मया सह कर्तव्य इति नियमबंधः संधिः विग्रहो विरोधः यानं शत्रुं प्रति गमनं आसनं [illegible] स्वबलस्य द्विधाकरणं द्वैधीभावः शत्रुपीडितस्य बलवत्तरराजान्तराश्रयणं संश्रयः एतान्गुणान्षट्प्रकारकान्सर्वदा चिंतयेत् यद्गुणाश्रयेणात्मनः उपचयः परस्यापचयः तं गुणमाश्रयेत् १६० ॥

आसनं चैव यानं च संधिं विग्रहमेव च कार्यं वीक्ष्य प्रयुंजीत द्वैधं संश्रयमेव च १६१ आसनमिति संध्यादिगुणानां [illegible] णानुष्ठानं [illegible] आत्मसमृद्धिपरहान्यादिकं कार्यं वीक्ष्य संध्यादीनां यानं विग्रहं वा यो द्वैधीभावं संश्रयो वा [illegible]

संधिं तु द्विविधं विद्याद्राजा विग्रहमेव च उभे यानासने चैव द्विविधः संश्रयः स्मृतः १६२ विग्रहस्त्यादिकमनुतिष्ठेत् १६२ ॥

संधिमिति संध्यादीन् षडेव गुणान् द्विप्रकारान् जानीयात् तत्स्वरूपं विवृणोति १६२

समानयानकर्मा च विपरीतस्तथैव च तदा त्वायतिसंयुक्तः संधिर्ज्ञेयो द्विलक्षणः १६३ ॥

समानेति तात्कालिकफललाभार्थं भवतान्यकालेन फललाभार्थं वा यत्र राज्ञा त्वयैव मया सह शत्रुं प्रति यानादिकं क्रियते स समानयानकर्मा संधिः यः पुनः त्वमात्र याहि अहं च त्वया स्वामी इति सार्थतिकान्यकालेन फलार्थिना एव क्रियते सोऽसमानयानकर्मा एवं द्विप्रकारः संधिर्ज्ञातव्यः १६३ ॥

स्वयंकृतश्च कार्यार्थमकाले काल एव वा मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः १६४

स्वयमित्यादि शत्रुजयप्रभृतिप्रयोजनार्थं प्राप्तवसंतादिकमाकलय्य वा मार्गशीर्षादिकालादन्यदा यात्राकाल एव वा स्वयंकृत इति एको विग्रहः [illegible] गोविंदराजेन तु मित्रेण चैवापकृते इति पठित्वा [illegible] मेधातिथिप्रभृतिभिः [illegible] लोकृतो मया १६४

एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया संहतस्य च मित्रेण द्विविधं यानमुच्यते १६५

एकाकिन इत्यादि आत्ययिके कार्ये शत्रोर्व्यसनादिके तस्मिन्नप्रसाज्ञाते प्राक् स्वयमेकाकिनो यानमपरा [illegible] मित्रसहितस्य द्वितीयं यानं द्विविधमभिधीयते १६५

क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम् १६६ क्षीणस्येति प्राग्जन्मार्जितेन दुष्कृतेन [illegible] हिकेन वा पूर्वकृतेन क्रमशः क्षीणस्य हस्त्यश्वकोशादिकस्य समृद्धस्यापि वा मित्रानुरोधेन न कार्यं तस्मादिति एवं द्विविधमासनं मुनिभिः स्मृतम् १६६

बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः १६७ बलस्येति साध्यप्रयोजनसिद्ध्यर्थं

106A

बलस्य स्वस्य चादेः सेनापतिप्रभृत्यधिष्ठितस्य एकत्र शत्रुनृपोपद्रववारणार्थमवस्थानमन्यत्र दुर्गदेशे राज्ञः कतिपयबलाधिष्ठितस्यावस्थानं द्वैधं संप्रोक्तं षाड्गुण्यवेदिभिः।

अर्थसंपादनार्थं च पीड्यमानस्य शत्रुभिः साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः १६८ ॥ कोपकारं द्विविधं द्वैधं कीर्त्यते

अर्थेति शत्रुभिः पीड्यमानस्य शत्रुपीडानिवृत्त्याख्यप्रयोजनसिद्ध्यर्थमसत्यामपि वा तत्काले पीडायां भाविशत्रुपीडनशङ्कया प्रबलमन्यं महाबलं नृपतिमाश्रित इति

यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः तदात्वे चाल्पिकां पीडां तदा संधिं समाश्रयेत् १६९ ॥ साधुषु व्यपदेशोऽसाधनार्थं बलवत्तमुपाश्रयेत् । द्विविधः संश्रयः स्मृतः १६८

यदेत्यादि यदा युद्धोत्तरकाले निश्चितमात्मन आधिक्यं जानीयात् तदात्वे तत्काले अल्पयत्नाद्युपद्रवः तदा हस्त्यश्वमग्रीकृत्यापि संधिमाश्रयेत् १६९

यदा प्रहृष्टा मन्येत सर्वास्तु प्रकृतीर्भृशम् अत्युच्छ्रितं तथात्मानं तदा कुर्वीत विग्रहम् १७० ॥

यदेति यदा अमात्यादिकाः सर्वाः प्रकृतीर्नम्रमानाधिकारी वदृष्टा मन्येत आत्मानं च हस्त्यश्वकोशादिभिः शक्तित्रयेण उपचितं तदा विग्रहमाश्रयेत् १७० ॥

यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकं परस्य विपरीतं च तदा यायाद्रिपुं प्रति १७१ ॥

यदेत्यादि यदात्मीयममात्यादि सैन्यं हृष्टं पुष्टं च धनधान्यादिना पुष्टतरं जानीयात् शत्रोश्चामात्यादिबलं विपरीतं तदा तं प्रति यायात् १७१ ॥

यदा तु स्यात्परिक्षीणो वाहनेन बलेन च तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन् १७२ ॥

यदेत्यादि यदा पुनर्वाहनेन हस्त्यश्वादिना बलेन चामात्यादिना परिक्षीणो भवेत् तदा शत्रून् सामप्रदानादिना शनैः सान्त्वयन् प्रयत्नेनासनमाश्रयेत् १७२ ॥

मन्येतारिं यदा राजा सर्वथा बलवत्तरं तदा द्विधा बलं कृत्वा साधयेत्कार्यमात्मनः १७३ मन्येतेति यदा राजा सर्वप्रकारेण बले

योऽसमर्थमात्मानं मन्येत शत्रुं च तदा कतिपयबलसहितः स्वयं दुर्गमाश्रयेत् बलैकदेशेन च शत्रुं रोधयेत् एवं द्विधा बलं कृत्वा मित्रसंग्रहादिकं स्वकार्यं साधयेत् १७३

यदा परबलानां तु गमनीयतमो भवेत् तदा तु संश्रयेत्क्षिप्रं धार्मिकं बलिनं नृपम् १७४ यदेति यदा तु सैन्यानाममात्यादिप्रकृति

दोषाद्धीनतः शत्रुबलानामाक्रमणीयो भवति बलद्वैधविधायकदुर्गाश्रयणेनापि नात्मरक्षा तदा शीघ्रमेव धार्मिकं बलवन्तं च राजानमाश्रयेत् १७४ ॥

निग्रहं प्रकृतीनां च कुर्याद्योऽरिबलस्य च उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा १७५ कीदृशं तं बलवन्तमित्याह निग्रहमिति

यो दुष्टानां प्रकृतीनां यस्माच्च शत्रुबलादस्य भयमुत्पन्नं तयोर्द्वयोरपि यः संस्थितानिग्रहं करोति तं सर्वयत्नैर्गुरुमिव नित्यं से

भवेत् १७५

यदि तत्रापि संपश्येद्दोषं संश्रयकारितं सुयुद्धमेव तत्रापि निर्विशङ्कः समाचरेत् १७६ यदीति आश्रितनृपकारिणि संश्रयो नाम

तत्रापि यदि संश्रयकृतं दोषं पश्येत् तदा निःसंशयो भूत्वा शोभनमेव युद्धं तस्मिन्काले समाचरेत् दुर्बलेनापि बलवतो दर्पाभावात् निहतस्य च स्वर्गप्राप्तेः १७६

सर्वोपायैस्तथा कुर्यान्नीतिज्ञः पृथिवीपतिः यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः १७७

सर्वोपायैरिति सर्वैः सामादि।

म॰ से॰
१०

107

मित्रपार्ष्णिः नीतिरेव जातशत्रुः तथा यतेत यथास्य मित्रोदासीनशत्रवो ऽपि कामं भवंति अर्थिको हि तेषामसौ ग्राह्यो भवति यत लोभेन मित्रस्यापि शत्रुर्जायते १७७

आयतिं सर्वकार्याणां तदात्वं च विचारयेत् अतीतानां च सर्वेषां गुणदोषौ च तत्त्वतः १७८ आयतिरिति सर्वेषां कार्याणामसमाप्तानां बहूनाम् आयतिमुत्तरकाले गुणदोषौ विचारयेत् वर्तमानकाले च शीघ्रं संपादनाय तथैव विचारयेत् अतीतानां च सर्वकार्याणां गुणदोषाः किमस्माकं कृतं विघटितं किं वा वशिष्टम् एवं यथावद्विचारयेत् १७८॥

आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः अतीते कार्यशेषज्ञः शत्रुभिर्नाभिभूयते १७९ यस्मात् आयतिं कार्याणामागामिकाले गुणदोषज्ञः स गुणवत्कार्यमारभते दोषवत्परित्यजति यश्च वर्तमानकाले क्षिप्रमेव यथार्थं कार्यं करोति अतीते च कार्यशेषज्ञः सतत कार्यसमाप्तेः तत्फलं लभते यस्मादेवं विषयकालत्रयं यथावज्जानाति नासौ कदाचित् शत्रुभिरभिभूयते १७९॥

यथैनं नाभिसंदध्युर्मित्रोदासीनशत्रवः तथा सर्वं संविदध्यादेष सामासिको नयः १८०॥ किं बहुना यथैनमादि [illegible] मित्रोदासीनशत्रवो नाभिभवेयुः तथा सर्वं संविधानं कुर्यात् इत्येष सांक्षेपिको नयो नीतिः १८०॥

यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः तदानेन विधानेन यायादरिपुरं शनैः १८१॥ यदेति यदा पुनः प्रभुः स्वामी अरिराष्ट्रं प्रति यात्रामारभेत तदा वक्ष्यमाणप्रकारेण शत्रुदेशं मन्दं मन्दं गच्छेत् १८१॥

मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः फाल्गुनं वाथ चैत्रं वा मासौ प्रति यथाबलम् १८२॥ मार्गशीर्ष इति यद्यपि रंगवलोपेतो राजा कदाचिदपि शरत्काले विलम्बेन विलम्बेनापि यानान्तरं तथा हैमन्तिकशस्यबहुलं परराष्ट्रं जिगमिषुः सर्वगमनाय शोभने मार्गशीर्षे मासि यात्रां कुर्यात् यः पुनः स्वबलप्रायो नृपतिः शीघ्रगतिर्वसन्तशस्यबहुलपरराष्ट्रं यियासुः स फाल्गुनं वा चैत्रं मासं स्वबलयोगका लानतिक्रमेण यायात् अत एवं मेधातिथिगोविन्दराजौ तत्र दोषेणायातु वल्लभवचनम् यदा शस्यगुणोपेतं परराष्ट्रं तदा व्रजेत् १८२॥

अन्येष्वपि तु कालेषु यदा पश्येद् ध्रुवं जयम् तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः १८३॥ अन्येष्वपीति उक्तकालव्यतिरिक्तेषु यदात्मनो निश्चितं जयं पश्येत् तदा स्वबलकालीयाऽपि ग्रीष्मादावपि हस्त्यश्वादिबलप्रायो विगृह्यैव यात्रां कुर्यात् अन्येषामपि शत्रोर्व्यसने समुत्पन्ने प्रकृतिकोपे उक्तकालादन्यत्रापि यायात् १८३॥ प्राचो स्वामात्यादिप्रकृतयो चरदाउपारुष्यादिव्यसने जाते ऽपि दम्भ [illegible]

कृत्वा विधानं मूले तु यात्रिकं च यथाविधि उपगृह्यास्पदं चैव चारान्सम्यग्विधाय च १८४ संशोध्य त्रिविधं मार्गं षड्विधं च बलं स्वकम् सांपरायिककल्पेन यायादरिपुरं शनैः १८५॥ कृत्वेत्यादि संशोध्येति मूले स्वीयदुर्गराष्ट्ररूपे यथा विधानं रक्षाविधानं यात्राविधानं च यथाशास्त्रं कृत्वा षड्विधं बलं स्वकं संशोध्य मौलभृत्यादि श्रेण्यादि ...

107A

तिमेनाकर्मकरात्मकं षड्विधं यद्योपयोगमाहारोषयमकरादिनासंयोग्यसांपरायिकं संपरायः संग्रामः तदवित्तविधिना शत्रुदर्शं समवायागच्छेत् ॥

शत्रुमेवं विनिर्मिये च गृहे गुल्मतो भवेत् गतप्रत्यागतेनैव समहिकष्टतोरिपुः १८६ ॥

शत्रुमेवं विनीति यन्निरंगूहे हृतनाशत्रुमेवं तथ्यश्वभृत्यादिः पूर्वं विरागात् गतः पश्चादागतः तयोः सावधानो भवेत् यस्मात्सा भवति शायेन डर्तिय हे हारिपुः १८६

दंडव्यूहेन तन्मार्गे यायात्तु शाकटेन वा वराहमकरेणापि वा सूच्या वा गरुडेन वा १८७ दंडेति दंडाकृतिर्व्यूहः सूचनादिं दंडव्यूहः

हः पूर्वं शाकटादि व्यूहाश्रयितनाग्रे बलाध्यक्षो मध्ये राजा पश्चात्सेनापतिः पार्श्वयोर्हस्तिनस्तत्समीपे योटकाः ततः पदातयः इत्येवंकृतः दंडव्यूहो दीर्घः सेव

गरुडविन्यासो दंडव्यूहेन तन्मार्गमवेत्तो भयेप्सतियायात् सूच्याकारमुखः पश्चात्पृथुकृत्स्थूलः शाकटव्यूहस्तेन पृष्ठतो भयमतिगच्छेत् सूच्य

शावपक्षाग्रगः पृथुपृथ्वावराहव्यूहः पृथुपवष्टश्चतरमध्यागरुडव्यूहः तान्पार्श्वयाभयाप्रतिवजेत् वराहविपर्ययेन मकरव्यूहः तेनाग्रपश्चाद्भयेत्

भयेप्सतिगच्छेत् पिपीलिकापंक्तिरिव यत्र पश्चाज्ञावेनसंहततयाह्यपयत्र से निकावस्था तस्यां च प्रवीरपुरुषश्रवः तेनाग्रेतो भयप्सतियायात् १८७ ॥

यतश्च भयमाशंकेत्ततो विस्तारयेद्बलं पद्मेनैव व्यूहेन विनिवेशेत सदा स्वयं १८८ यत इत्यादि यस्या दिशः शत्रुभयमा

शंकेत तस्यामेवात्मबलं विस्तारयेत् समविस्तृतपरिमंडलो मध्यापविष्टजिगीषुसमव्यूहः तेन पद्मव्यूहेन सर्वदा कपटान्तिवशानेनुयात् १८८ ॥

सेनापतिर्बलाध्यक्षो सर्वदिक्षु निवेशयेत् यतश्च भयमाशंकेत्प्राचीं ताकल्पयेद्दिशम् १८९

सेनापतीति सेनाया स्वार्थपरात्मकस्यागदशाकस्यैकः पतिः कार्यः स च पतिकउच्यते पतिकदशस्यैकः पतिः सेनापतिरुच्यते तद्दशकस्यैकः सेनानायकः

स एव च बलाध्यक्षः तौ सेनापतिबलाध्यक्षौ समस्तासु दिक्षु सपक्षयुद्धार्थं नियोजयेत् यस्मात्तु दिशायदा भयाशंका तदा तां मन्त्रे दिशाकुर्यात् १८९ ॥

गुल्मांश्च स्थापयेदाप्तान्कृतसंज्ञान्समंततः स्थानेयुद्धे च कुशलानभीरूनविकारिणः १९० ॥

गुल्मानित्यादि गुल्मान्समस्तकदेशान् आप्तान् पार्थिवहितान् स्थानेषु समरायुद्धार्थं कृतभेरीपटहघोषादिसंकेतान् अवस्थानयुद्धयोः प्रवीणान्

निर्भयान् अव्यभिचारिणः सेनापतिबलाध्यक्षान् इतः सर्वदिक्षु पारकाप्रवेशवारणाय शत्रुचेष्टापरिज्ञानाय च नियोजयेत् १९० ॥

संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून् सूच्या वज्रेण चैवैतान्व्यूहेन व्यूह्य योधयेत् १९१

संहतेति अल्पान्योधान्संहतान्कृत्वा बहून्विस्तारयेत् सूच्या पूर्वोक्तया वज्राख्येन व्यूहेन त्रिधावस्थितबलेन तरवयित्वा योधयेत् ॥१॥

स्यंदनाश्वसमे युध्येदनूपे नौद्विपैस्तथा वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले १९२ स्यंदनाश्वैरित्यादि समभूभागे र

थाश्वेन युद्धे तन्त्रतेन युद्धसामर्थ्यात् तथानुगते दके नौकाहस्तिभिस्तथा गुल्मावृते भिर्धन्विभिर्गतिकंटकपाषाणादिरहिते च फलवकं तासे गुहे

जयेच्छत्रुमस्त्रं च बालान्स्त्रमसेजनाम् दीर्घाल्हन्हे च वनदानयानीकेषु योधयेत् १९३ ॥ जयेत्तमा

म॰
मु॰ मे॰
१८

कुरुदेशानिति कुरुक्षेत्रभवान् मत्स्यान् विराटदेशनिवासिनः पंचालान् कान्यकुब्जादिदेशोद्भवान् शूरसेनजान् माथुरान् प्रयोगाहश्चशारीरशौर्याहंकारयोगात् सेनामुखे योधयेत् तथान्यदेशोद्भवानपि दीर्घलघुदेहान् सत्त्वाधिकान् युद्धाभिमानिनः सेनाग्रे प्रयोजयेत् १९३ ॥

प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक्परीक्षयेत् चेष्टाश्चैव विजानीयादरीन्योधयतामपि १९४

प्रहर्षयेदित्यादि बलं रचयित्वा जये भूमिलाभः स्वर्गप्राप्तिः पलायने तत्प्रभुदत्तग्रहणान्नरकगमनं च इत्यादि धैर्यवादैः युद्धार्थं प्रोत्साहयेत् तांश्च योधान् अभिप्रायेण हृष्टानुत्साहवतो वेति परीक्षयेत् तथा योधयतामरिभिः सह युद्ध्यमानानामपि स्वाभिप्रायचेष्टा बुध्येत १९४ ॥

उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् १९५ उपरुध्येत्यादि दुर्गस्थं शत्रुं दुर्गाद्बहिः निरुध्य आसीत तस्य च देशमुत्सादयेत् तथा चास्य घासान्नोदकेन्धनानि सर्वदा स्वापद्रव्यसंमिश्रणादिना दूषयेत् १९५ ॥

भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा १९६ भिन्द्यादित्यादि शत्रोरुपजीव्यानि तडागादीनि नाशयेत् तथा दुर्गप्राकारादीन्भिन्द्यात् तत्परिखाश्च पूरणादिना निरुदकाः कुर्यात् एवं च शत्रुं शंकितं सम्यगवस्कन्देत् तथा रात्रौ ढक्काहलिकादिशब्देन वित्रासयेत् ।

उपजप्यानुपजपेद्बुध्येतैव च तत्कृतम् युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः १९७

तदादीनिति उपजप्यानित्यादि उपजाप्याः राज्यार्थिनः दुर्व्याननमात्यादीन् भेदयेत् उपजप्तानात्मीयकृतं तेन चेष्टां जानीयात् शुभग्रहदशादिना फलदाने दैवे अनुकूले भयं त्यक्त्वा जयार्थी युध्येत १९७

साम्ना दानेन भेदेन समस्तैरथवा पृथक् विजेतुं प्रयतेतारीन्न युद्धेन कदाचन १९८

साम्नेत्यादि प्रीत्यादर्शनसहितकथनात्मकेन साम्ना दानेन भेदेन समस्तैः व्यस्तैर्वा विजेतुं यत्नं कुर्यात् न युद्धेन कदाचित् १९८ ॥

अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् १९९ ॥

अनित्येति यस्माद्युध्यमानयोर्बहुलबलतापि नियमेन जयपराजयौ दृश्येते तस्मात्सत्युपायान्तरे युद्धं परिहरेत् १९९

त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे तथा युध्येत संपन्नो विजयेत रिपून्यथा २००

त्रयाणामित्यादि पूर्वोक्तानां त्रयाणामपि सामादीनामुपायानामसाधकत्वे सति जयपराजयसंदेहेपि तथा प्रयत्नवान् सम्यग्युध्येत यथा शत्रून् जयेत् पराजये अपि स्वर्गप्राप्तिः संदिग्धे पराजये युद्धादपसरणमाधर्मोयं यथावत् आत्मानं सर्वदा रक्षेदिति मेधातिथिगोविन्दराजौ २००

जित्वा संपूजयेद्देवान्ब्राह्मणांश्चैव धार्मिकान् प्रदद्यात्परिहारांश्च ख्यापयेदभयानि च २०१

जित्वेति परराष्ट्रं जित्वा तत्रत्यदेवान् ब्राह्मणांश्च धार्मिकान् भूमिसुवर्णादिदानसंमानादिभिः पूजयेत् जितदेशे करदानादिना वचेदं पूजनं तेषां परिहारान् दद्यात् अभयं सदा तथा देवब्राह्मणेभ्यो जितदेशवासिनां च तथाह याज्ञवल्क्यः

108A

विहायानरक्षात् तथा स्वामिभक्ता येस्माकमकृतं तेषां मया दत्तमिदानीं निर्भयाः संतः सर्वे स्वव्यापारमनुतिष्ठंतीति अभयान्विज्ञापयेत् २१॥

सर्वेषां विदितेनैव समामेन विकीर्षितं स्थापयेन्न च तद्यत्प्रकुर्याच्च समयक्रियां २२ सर्वेषामिति एषां प्रागनुरूपाणाममात्यानां

सर्वेषामेव संक्षेपतोऽभिप्रायं ज्ञात्वा तस्मिन्राष्ट्रे बलं निहत्य राजवत्स्वयमेव राज्येऽभिषेचयेत् तद्दत्तं कार्यं न यावद्दत्तेन तिन्नस्वतद्मात्यानां चातियमकुर्यात् २२

प्रमाणानि च कुर्वीत तेषां धर्म्यान्यथोदितान् रत्नैश्च पूजयेद्देवानाश्रयानपश्चमैः सह २३॥

तेषां च परकीयानां धर्मं दत्तपेतानाचरत् देशधर्मं तथा पूर्वस्थितान्प्रमाणानि कुर्याद्देवांश्चाभिषिक्तसमस्तादिभिः सह रत्नादिदानेन पूजयेत् २३

आदानमप्रियकरं दानं च प्रियकारकं अभीप्सितानामर्थानां काले युक्तं प्रशस्यते २४॥

यस्मादादानमिति यथाभिलषितानां द्रव्याणां ग्रहणमप्रियकरं दानं च प्रियकारकमित्युत्सर्गः तथापि समयविशेषे दानमादानं च प्रशस्यते तस्मात् तस्मिन्काले प्रदेयं जयेत २४

सर्वं कर्मेदमायत्तं विधाने दैवमानुषे तयोर्दैवमचिन्त्यं तु मानुषे विद्यते क्रिया २५

सर्वमित्यादि युक्तिं वितर्कापाधं तत्र प्राक्तनमर्जितं सुकृतदुष्कृतं तद्रूपकमेकं मणीदैवशब्दाभिधेयं तथेहलोकार्जितं मानुषशब्दवाच्यं व्यापारं आयतनं तत्र यन्मध्ये दैवमचिन्त्यं मानुषं तत्पर्यालोचनमस्ति अतो मानुषव्यापारेणैव कार्यं सिद्ध्यतीति न्यायम् २५॥

सहत्वाविज्ञजेष्ठुक्तः संधिं कृत्वा प्रयत्नतः मित्रं हिरण्यं भूमिश्च वा संपत्पर्यासि विषयेः फलं २६ महत्त्वादपि वस्तूपकर्माणी सहत्वादिकं संधिं कृत्वा प्रयत्नवान्व्रजेत् २६॥

येन यातुगुणपुरस्कार्येयदि वा सम्पदं मित्रं तवदत्तं हिरण्यं भूम्येकदेशो वार्पितं एतत्त्रयं यात्राफलं महत्तातेन समहत्सं धिं कृत्वा यत्नवान्व्रजेत् २६॥

पार्ष्णिग्राहं च संप्रेक्ष्य तथाक्रंदं च मंडले मित्राद्यात्यामित्राद्वा यात्राफलमवाप्नुयात् २७

पार्ष्णिग्राहमित्यादि विजिगीषोः शरीरं विनियुक्त लिर्यान्तमयः पृष्ठवर्ती नृपतिः देशाक्रमणाय चरति स पार्ष्णिग्राहः तस्य तथाक्रंदितो यानियामकः तस्या तत्र तो नृपतिः मध्यो केदः तावेपेक्ष्य यातव्यामित्रामित्राद्वा यात्राफलं गृह्णीयात् तावत्तपेक्ष्य गृह्णतः कदाचित्क्वते नदोषाणगृह्यते २७॥

हिरण्यभूमिसंप्राप्ता पार्थिवोनतथैधते यथामित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमं २८॥

हिरण्यभूमीति सवर्णभूमिलाभेन तथा राजा न हि मितियथेदानीं कृशमप्यागामिकाले हि द्वियुतं स्थिरं मित्रं लब्ध्वा वर्धते २८॥

धर्मज्ञं च कृतज्ञं च तुष्टप्रकृतिमेव च अनुरक्तं स्थिरारंभं लघुमित्रं प्रशस्यते २९

धर्मज्ञमिति धर्मज्ञं कृतोपकारस्य स्मर्तारं सानुरागामनुरक्तं स्थिरकार्यारंभं प्रीतिमत् प्रकृतीकयंत मित्रमतिपायेन प्रशस्यते २९॥

प्राज्ञं कुलीनं शूरं च दक्षं दातारमेव च कृतज्ञं धृतिमंतं च कष्टमाहुररिं बुधाः ३०

प्राज्ञमित्यादि विद्वांसं महाकुलविज्ञं नेचवरं दातारं उपकारस्य कर्तारं सावष्टंभं तयोरेकरूपं शत्रुं डकष्टं दंपंडितान्वदंतीति तेनैवविषयगुणाः सहसेया नेष्टम्

म.
तु. मे.
२.५ 109

आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता। स्थौललक्ष्यं च सततमुदासीनगुणोदयः॥ २११॥
आर्यतेत्यादि साधुत्वं पुरुषविशेषज्ञत्वं विक्रान्तत्वं कृपालुत्वं दानेन स्थौललक्ष्यं बहुप्रदत्वं सततमेवं सर्वदा यस्य स्थौललक्ष्यं दानप्रौढत्वं बहुप्रदेषु सम्भाव्यतानीकं स्थौ-
ललक्ष्यमथ स्थूललक्ष्यं दर्शितत्वमिति तन्मेधातिथिगोविन्दराजयोः पदार्थकथनमनागमं तदुदासीनगुणसामग्र्यं तस्मात्तं देवं विजयेदुदासीनम्॥
क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि। परित्यजेन्नृपो भूमिमात्मार्थमविचारयन्॥ २१२॥ क्षेम्यामिति निरुपद्रवां मर्यादिकल्याणत्वमा-
मपि नदीमातृकतया सर्वशस्यप्रदामपि प्रचुरतृणादियोगात्पशुवृद्धिकरीमपि भूमिमात्मरक्षार्थं विलम्बितमानो राजा निजरक्षाकारी तत्राभावात्त्यजेत्॥ २१२॥
आपदर्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि। आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥ २१३॥ यस्मात्सर्वविपद्यो ये धर्माः स्मर्यते आपदर्थमित्यादि आपन्निवा-
रणार्थं धनं रक्षणीयं धनपरित्यागेनापि दारान्रक्षेत् आत्मानं पुनः सर्वदा दारधनपरित्यागेनापि रक्षेत् सर्वत एवात्मानं गोपायीतेति श्रुत्या प्राणसंशयमरणादि-
सह सर्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशम्। संयुक्तांश्च सर्वोपायान्सृजेद्बुधः॥ २१४॥ रेकेणात्मरक्षायाः सम्पदेशात्॥ २१३॥
उपेतारमिति उपेतारमात्मानं उपेयं प्राप्यं उपायाः सामादयः सर्वमेतत्परिपूर्णं एतत्त्रयमवलम्ब्य यथासामर्थ्यं प्रयोजनसिद्धये यत्नं कुर्यात्॥ २१४॥
एवं सर्वमिदं राजा सह संमन्त्र्य मन्त्रिभिः। व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत्॥ २१५॥ एवमिति एवमुक्तप्रकारेण सर्वमिदं रा-
जकार्यं मन्त्रिभिः सह विचार्य ततो व्यायामं कृत्वा मध्याह्ने स्नानादिकं कृत्वा मध्याह्निके कृत्ये निर्वाप्य भोक्तुमन्तःपुरं प्रविशेत्॥ २१५॥
एवं सर्वमिदं राजा सह संमन्त्र्य मन्त्रिभिः। व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं प्रविशेत्॥ २१६॥
उपेतारमिति उपेतारमात्मानं उपेयं प्राप्यं उपायाः सामादयः सर्वमेतत्परिपूर्णं एतत्त्रयमवलम्ब्य यथासामर्थ्यं प्रयोजनसिद्धये यत्नं कुर्यात्॥ २१६॥
तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः। सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः॥ २१७॥ तत्रेति तत्रान्तःपुरे आत्मतुल्यैर्भोजनका-
लवेदिभिरभेद्यैः सूपकारादिभिः कृतं सुष्ठु च परीक्षितं चकोरादिदर्शनेन विषमन्नं दृष्ट्वा चकोरादीनां रक्तभवनादिना विषघ्नैर्मन्त्रैर्जपितमन्नमश्नीयात्॥ २१७॥
विषघ्नैरगदैश्चास्य सर्वद्रव्याणि योजयेत्। विषघ्नानि च रत्नानि नियतो धारयेत्सदा॥ २१८॥
विषघ्नैरिति विषनाशिभिरौषधैः सर्वाणि भोज्यद्रव्याणि योजयेत् विषहराणि च रत्नानि नियतः सर्वदा धारयेत्॥ २१८॥
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः। वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः॥ २१९॥ परीक्षिता इति स्त्रियश्च गूढचार-
हारेण कृतपरीक्षा गूढचारपरीक्षिता विषलिप्ताभरणपरीक्षिता अनन्यमनस्का मनस्विन्यः व्यजनोदकधूपनैः एनं राजानं परिचरेयुः॥ २१९॥
एवं प्रयत्नं कुर्वीत यानशय्यासनाशने। स्नाने प्रसाधने चैव सर्वालङ्कारकेषु च॥ २२०॥
एवमिति एवं विषपरीक्षादिप्रयत्नं वाहनशय्यासनाशनस्नानानुलेपनेषु सर्वेषु चालङ्कारेषु कुर्यात्॥ २२०॥
भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह। विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत्॥ २२१॥

109A

भुक्तवानिति कृतभोजनश्चान्तःपुरे भार्याभिः सह क्रीडेत् कालानतिक्रमेण च सप्तमे दिवसस्य भागे तत्र विहृत्याष्टमे भागे पुनः कार्याणि चिन्तयेत् २२१॥

अलंकृतश्च संपश्येदायुधीयं पुनर्जनम्। वाहनानि च सर्वाणि शस्त्राण्याभरणानि च २२२॥

अलंकृत इति कृतालंकारः सेनाशूरांश्चैव वाहनानि हस्त्यश्वादीनि सर्वाणि च शस्त्राणि खड्गादीनि अलंकाराश्च रत्नादीनि पश्येत् २२२॥

संध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत्। रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम् २२३ गत्वा कक्षान्तरं त्वन्यत्सम-
नुज्ञाप्य तं जनम्। प्रविशेद्भोजनार्थं च स्त्रीवृतोऽन्तःपुरं पुनः २२४॥ संध्यामिति गत्वेति ततः संध्योपासनं कृत्वा तस्मात्प्रदेशात्कक्षान्तरं द्वितीयं
कक्षान्तरं गत्वा तं जनमनुज्ञाप्य गृहाभ्यन्तर एव शस्त्रपाणी रहस्याभिधायिनां चराणां व्यापारं शृणुयात् ततस्तं चरसंघं परित्यज्य अन्यत्कक्षान्तरं गत्वा स्त्रीवृतः पुनर्भोजनार्थमन्तःपुरं प्रविशेत्
तत्र भुक्त्वा पुनः किंचित्तूर्यघोषैः प्रहर्षितः। संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः २२५ तत्रेत्यादि तत्रान्तःपुरे वादित्रशब्दैः
श्रुतिसुखैः प्रहर्षितः पुनः किंचिद्भुक्त्वा नातितृप्तः कालानतिक्रमेणागतमार्गप्रहरयोः स्वप्यात् ततो रात्रेः पश्चिमयामे च विश्रान्तः सन्नुत्तिष्ठेत् २२५॥
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः। अस्वस्थः सर्वमेतत्तु भृत्येषु विनियोजयेत् २२६ इति मानवे धर्मशास्त्रे भृगुप्रो-
क्तायां संहितायां राजधर्मो नाम सप्तमोऽध्यायः ७ एतदिति एतद्यथोक्तं राजानुष्ठानमरोगो
राजा स्वयमनुतिष्ठेत् अस्वस्थः पुनः सर्वमेतद्योग्येष्वमात्येषु समर्पयेत् २२६॥ इति श्रीकुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यां सप्तमोऽध्यायः ७॥

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः। मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् १॥

व्यवहारानिति एवं विधस्य महीक्षितः प्रजानां रक्षणादेव सम्प्रति तासामेव वृत्तेरेव विवादजपीडापरिहारार्थम् ऋणादानाद्यष्टादशविषयो विवादोऽर्थिप्र-
त्यर्थिवाक्यजनितसंदेहहारी विचारपदव्यवहारः युद्धहेतुकार्यायनैः विनानाप्यवसंदेहहरणे हारणाद्यवहार इति नानासंदेहहरणाद्व्यवहार इति स्मृतः तान्व्यवहारा-
न्द्रष्टुमिच्छन् पृथिवीपतिर्वेदव्याकरणलक्षणादिज्ञैर्ब्राह्मणैः सह मन्त्रज्ञैः मन्त्रिभिः सह विनीतो वाक्पाणिपादचापलविरहादनुद्धतः प्रवि-
शेत् विवादिप्रतिवादिनां प्रतिभाभयाद्यभिभावेन तन्निर्णयार्थं तत्र सभां प्रविशेद्व्यवहारदर्शने च दण्डप्रजानां मित्ररक्षणपीडाप्रयात्ने
निर्णये च रक्षणार्थं वक्ष्यमाणदृष्टादृष्टकरणफलेन च फलवत् १॥

तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम्। विनीतवेषाभरणः पश्येत्कार्याणि कार्यिणाम् २ तत्रेत्यादि तस्यां च सभायां कार्यगौरवा-
पेक्षायां उपविष्टः लघुनि कार्ये स्थितोऽपि वा पाणिं शाखिनो बाहुमुपरि दक्षिणमुद्यम्य अनुद्धतवेषालंकारः पूर्वोक्तः सोऽपि कृत्यार्थिनां कार्याणि विचार-
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः। अष्टादशसु मार्गेषु निबद्धानि पृथक्पृथक् ३ प्रत्यहमित्यादि ऋणादानादीनि कार्या-
येत् २॥
णि अष्टादशसु व्यवहारमार्गेषु विषयेषु पठितानि देशजातिकुलव्यवहारागतैः शास्त्रादिदृष्टिभिर्हेतुभिः पृथक्पृथक् प्रत्यहं विचारयेत् तेषामष्टादशानामपि
तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः। संभूय च समुत्थानं दत्तस्यानपकर्म च ४ वेतनस्यैव चादानं संविदश्च व्यति।

मा.
कु. मे.
११० 110

क्रमः क्रयविक्रयानुशयो विवादः स्वामिपालयोः ५ सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके स्तेयं च साहसं चैव स्त्री-
संग्रहणमेव च ६ स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च पदान्यष्टादशैतानि व्यवहारस्थिताविह ७॥

तेषामिति वृत्तनयेनैवं वदन्ति सेमेतिसीप्रसेतितेषामष्टादशानां मध्ये आद्या दा विहऋणादानं विचार्यते तत्र ऋणस्य उत्तमर्णेनाधमर्णेन ऋणादेयमदेयं च येन यत्र यथा चयत दा
नग्रहणधर्मा उत्तमर्णादानमुच्यते तत्रस्वमयत्नस्यास्वामिना अर्पणं न्यासः निक्षेपः अस्वामिना च कृतो विक्रयः संभूय वणिगादीनां क्रियानुष्ठानं दत्तस्य पुनस्तस्या
पाकरणं कर्मादिना वा ग्रहणं कर्मकरस्य भृतेरदानं कृतव्यवस्थातिक्रमः क्रयविक्रयं वा कृत्वा पश्चात्तापादिप्रतिपत्तिः स्वामिपशुपालयोर्विवादः ग्रामादिसीमा
विप्रतिपत्तिः वाक्पारुष्यमाक्रोशनादि दण्डपारुष्यं ताडनादि स्तेयं निक्षेपेन परद्रव्यग्रहणं साहसं प्रसह्य परद्रव्यहरणादि स्त्रियाः पुरुषेण धर्षणं स्त्रीसंग्रहणं स्त्रीपुंस
धर्मः व्यवस्थापकादिः पैतृकादिधनस्य विभागः द्यूतमप्राणिभिः क्रीडा पुनर्व्यवस्थापकपूर्वकं प्राणिभिः क्रीडा यथा एतानि व्यवहारस्य अष्टादशपदानि व्यवहारपदहेतुस्थानानि प्रा
णिद्यूतप्राणिरूपस्य भेदेन पृथगुक्तिः विशेषतया दुष्टादशपदत्वोपपत्तिः ४५६७॥

एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणाम्। धर्मं शाश्वतमाश्रित्य कुर्यात्कार्यविनिर्णयम् ८॥

एष्विति। एषु ऋणादानादिषु दानादिषु व्यवस्थातेषु बाहुल्येन विवादं कुर्वतां मनुष्याणां शास्त्रादिपारंपर्यागतेन नित्यधर्ममवलंब्य कार्यनिर्णयं कुर्यात् न भूयिष्ठग्रहणेन
स्यापि विवादपदानिमित्तानि संचयति तानि च प्रकीर्णकशब्देनाभिधेयानि अतएव नारदेनोक्तं यत्र पूर्वेषु सर्वेषु तस्मात् प्रकीर्णकमिति ८॥

यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम्। तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने ९॥

यदेत्यादि यदा कार्यान्तराकुलतया रोगादिना वा राजा स्वयं कार्यदर्शनम् न कुर्यात्तदा तद्दर्शनार्थं कार्यदर्शनाभिज्ञं ब्राह्मणं नियुञ्जीत ९॥

सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः। सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा १०

स इति स ब्राह्मणः अस्य राज्ञो द्रष्टव्यानि का
र्याणि त्रिभिः सभ्यैः सभायां साधुभिर्धार्मिकैः कार्यदर्शनाभिज्ञैर्वृतः तामेव सभामाविश्योपविष्टः स्थितो वा न तु चंक्रममाणः तस्यैव विद्यापेक्षया सभ्यैर्वा तादृशब्राह्मणादि
श्रेष्ठैः १०॥

यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः। राज्ञश्चाधिकृतो विद्वान्ब्रह्मणस्तां सभां विदुः।

नादीनि कार्याणि पश्येत १०॥

यस्मिन्निति यस्मिन्स्थाने ऋग्यजुःसामवेदविदस्त्रयोपि ब्राह्मणा अवतिष्ठन्ते राज्ञा चाधिकृतश्च विद्वान् ब्राह्मणश्च प्रकृतत्वात् तदवतिष्ठते तां सभां चतुर्मुखस्य सभामिव मन्यन्ते ११

धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठते। शल्यं चास्य न कृन्तन्ति विद्धास्तत्र सभासदः १२

धर्म इति सः प्रकाशार्थे यत्र सहव
र्ती अधर्मेणार्थिप्रत्यर्थिना पीडितस्त्राणार्थं गच्छति इति श्रुतिः प्रत्यर्थिनो
धर्मः सत्यमिथ्याज्ञानाः अन्यायेनाधर्मेण पीडितः सभागच्छति तत्र भवन्ति सभासदः धर्मो विद्धो भवति
तेन इति विद्धत्वं हतिरेवात्र सभाप्राड्विवाकाभिमतो यत्र देशे सभा हति धर्मो यस्मिन् सत्यमिथ्याज्ञानाः न्याभिधानं पीडाकरत्वात् शल्यमिवाधर्मेऽतो हतिरेव ते तदानेन वृत्तेनाथ
सभ्यैः पक्षपातेन मिथ्यानादरेण मृषावादान्तं च सभासदो धर्मस्य पीडाकरत्वात्

सभां वा न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम्। अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी १३

यत एवमतः सभामिति सभाम व्यवहार
दर्शनार्थं न प्रवेष्टव्यं वक्तव्यं वा सत्यं समञ्जसम् अन्यथा पापी भवति प्रमाणं मृषा वा वदन् उभयथापि सभ्यः पापी भवति मिथ्यावादिनाद्वा सभां वा न प्रवेष्टव्यं
वा इति सत्यं व्यपठितम् १३

यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च। हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः १४

यत्रेत्यादि यस्यां सभायामर्थिप्रत्यर्थिभ्यां धर्मेणाधर्मो

110A

नदृश्यन्ते यत्र चर्मादिभिः सत्यमनृतेन तत्र सभायां सदां प्रेक्षमाणानां तान् अनादृत्य तेषु तीकारं दमानं भवंतीत्यर्थः पृष्टैर्वा नावदद्भिस्तेन तत्र पापं तत्र एव सभासदो

धर्म एव हतो हंति धर्मो रक्षति रक्षितः तस्माद्धर्मो न हंतव्यो मानो धर्मो हतोवधीत् १५ ॥ स्तेन पापेन हंता भवतीत्यर्थः

धर्म इत्यादि यस्माद्धर्म एव ातिक्रांतः सन् हंति नाशयति धर्मो रक्षितः पालनाद्यर्थं रक्षति तस्माद्धर्मो नातिक्रमणीयः मा अस्मान् हतो धर्मो हतवान् इति

तान् अतिक्रांतो धर्मो वधीदिति सभ्यानां सत्यप्रवृत्तये प्राड्विवाक एवं ब्रूयात् नास्तिदमं तथा वा निषेधार्थः नो हतो धर्मो मा वधीत् न हंतव्य इत्यभिप्रायः १५ ॥

वृषो हि भगवान् धर्मस्तस्य यः कुरुते ह्यलं वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् १६ वृष इत्यादि कामान्वर्षतीति वृषः वृषशब्देन धर्मो

वाच्यः अलं शब्दो वारणार्थः यस्माद्धर्मस्य यो वारणं करोति तं देवा वृषलं जानंति तज्जातिवृषलः शूद्रादिनादलोपः तस्माद्धर्मं नो छिद्यादिति धर्मनाशकर्मा वृष

एक एव सुहृद्धर्मो निधनेप्यनुयाति यः शरीरेण समं नाशं सर्वमन्यद्धि गच्छति १७ ॥ नार्थे वृषलशब्दार्थनिर्वचनम् १६

एक इत्यादि धर्म एवैको मित्रं यो मरणेऽपि फलप्रदानार्थम् अनुगच्छति यस्मादन्यत् सर्वं भार्यापुत्रादि शरीरेण सममदर्शनं गच्छति तस्मात् सुहृदिव हापनीयो धर्मो

न हातव्यः १७

पादोऽधर्मस्य कर्तारं पादः साक्षिणमृच्छति पादः सभासदः सर्वान् पादो राजानमृच्छति १८ ॥

पाद इत्यादि दुष्टो व्यवहारः कृतो यदधर्मः तथा तत्र धर्मभागः पादः अधर्मकर्तारं प्रत्यर्थिनं वा गच्छति पादस्तत्र भागः साक्षिणं मिथ्यावादिनम् अन्यः पादः सभासदः

सर्वान् व्याप्नोति पादश्च राजानं व्रजति सर्वेषां पापाय सर्वथा भवतीत्यत्र विवक्षितम् १८ ॥

राजा भवत्यनेनास्तु मुच्यंते च सभासदः एनो गच्छति कर्तारं निंदार्हो यत्र निंद्यते १९ राजेत्यादि यत्र पुनः सभायाम्

सत्यवादिना तन्निंदार्हः अर्थी प्रत्यर्थी वा सम्यक् व्यवहारदर्शनेन निंद्यते तत्र राजा निष्पापो भवति सभासदश्च पापेन न संबध्यंते अर्थ्यादिकमेव कर्तारं पापं प्राप्नोति १९ ॥

जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथंचन २० जातिमात्रेति ब्राह्मणजातिमात्रेण एव

यजनादि ब्राह्मणकर्मानुष्ठानं विना यागादि वर्जितः स्यादिह ब्राह्मणः कामं राज्ञो धर्मनिरूपणे सभ्यो ब्राह्मणजातिरपि वा अयं सत्यात्मा ब्राह्मणं ब्रवीति स वदेत् न कथं

चन ब्राह्मणाभावे क्षत्रियो वैश्यो धार्मिको धर्मज्ञो विवक्षितो व्यवहारज्ञोऽपि शूद्रः ब्राह्मणो धर्मप्रवक्तेति विप्रानादेवं शूद्र इति स्मृतिः क्षत्रियेणेत्यत्र शूद्र इति

दर्शितः यथा ब्राह्मणाभावे क्षत्रियो वैश्यो वा राज्ञो धर्मप्रवक्ता नियोक्तव्यः अतएव कात्यायनः यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्ज

यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनं तस्य सीदति तद्राष्ट्रं पंके गौरिव पश्यतः २१ ॥ येत् २०

यस्मात्तस्येत्यादि यस्य राज्ञो धर्मविवेचनं शूद्रः कुरुते तस्य पश्यत एव पंके गौरिव तद्राष्ट्रम् अवसन्नं भवति २१ ॥

यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रांतमद्विजं विनश्यत्याशु तत्कृत्स्नं दुर्भिक्षव्याधिपीडितं २२ यदित्यादि यद्राष्ट्रं शूद्रबहुलं परलोकाभा

ववादाक्रांतं द्विजशून्यं तत्सर्वं दुर्भिक्षव्याधिपीडितं सत्शीघ्रं विनश्यति सङ्ग्रोपसंहृतिः सम्यगिति सत्याभावे न वृष्टिर्विरहात् उपजातदुर्भिक्षो रोगाद्युपसर्गप्रणाशयो

धर्मासनमधिष्ठाय संवीतांगः समाहितः प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत् २३ कर्माभावाच्च २२ ॥

धर्मासनमिति धर्मदर्शनार्थमासनमुपविश्य आच्छादितदेहो नम्रमना लोकपालेभ्यः प्रणामं कृत्वा कार्यदर्शनमनुतिष्ठेत् २३ ॥

म॰ नु॰ मे॰ ११२

अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ । वर्णक्रमेण सर्वाणि पश्येत्कार्याणि कार्यिणाम् २४ अर्थानिति प्रजारक्षणोच्छेदनाया

स्मकौ वैदिकावर्थानर्थौ बुद्ध्वा परलोकार्थं धर्माधर्मौ केवलावनुसृत्य यथाविरोधो न भवति तथा कार्यार्थिनां कार्याणि पश्येत् बहुवर्णमेलके तु ब्राह्मणादिक्रमेण पश्येत् २४

बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् । स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च २५ बाह्यैरिति बाह्यैः स्वरादिभिर्लिङ्गैरित्यभिधाना

द्व्यवधारिताव्यभिचारैः अर्थिप्रत्यर्थिनामन्तर्गतमभिप्रायं जानीयात् स्वरो गद्गदादिः वर्णः स्वाभाविकवर्णादन्यादृशो मुखवैकाल्यादि इङ्गितमयथार्थनिरीक्षणादिः आकारो देहभवः स्वेदरोमाञ्चादि चेष्टा हस्तास्फालनादि २५

आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च । नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥ २६ ॥

यस्मात् अर्थं कारैरिति आकारादिभिः पूर्वोक्तैः गत्या स्खलन्त्यादिविक्रियो अन्तर्गतम् मनो बुद्धिरूपेणावधारणमवधार्यते २६ ॥

बालदायादिकं रिक्थं तावद्राजानुपालयेत् यावत्स स्यात्समावृत्तो यावच्चातीतशैशवः २७ बालदायेति अनाथबालस्वामिक

धनं पितृव्यादिभिरन्यायेन गृह्यमाणं तावद्राजा रक्षेत् यावदसौ षट्त्रिंशदाब्दिकं ब्रह्मचर्यं समाप्य कृतेनोपकारेण गुरुकुलात्समावृत्तो न भवति तावत्स्याद्वा यस्य क

बाल्याविगमात् यस्त्वशास्त्रादिना बाल एव समावर्तते सोऽपि यावदतीतबाल्यो भवति तावद्रक्षणीयं रक्षेत् बालश्चाषोडशाद्वर्षपर्यन्तं बाल आषोडशाद्वर्षादिति नारद वचनात् २७ ॥

वशापुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च २८ ॥

वशेत्यादि वशास्वेवंथासु कृतदारान्तरपरिग्रहः स्वामी निर्वाहार्थोपकल्पितधनोपायासु निरपेक्षः अपुत्रासु स्त्रीषु प्रोषितभर्तृकासु विकलासु सपिण्डरहितासु

साध्वीषु च स्त्रीषु विधवासु रोगिणीषु च यद्धनं तस्यापि बालधनस्येव राज्ञा रक्षणं कर्तव्यं अत्र चानेकग्राह्योपादानेगोवलीवर्दन्यायेन पुनरुक्तिपरिहारः २८ ॥

जीवन्तीनां तु तासां ये तद्धरेयुः स्वबान्धवाः ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः २९ जीवन्तीनामिति वयमत्रानन्तराधिका

रिणो रक्षामहे इदं धनमित्यादिव्याजेन ये बान्धवा स्तासां जीवन्तीनां तद्धनं गृह्णन्ति तान् वक्ष्यमाणचौरदण्डेन धार्मिको राजा दण्डयेत् २९ ॥

प्रणष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् अर्वाक्त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत् ३० प्रनष्टेति अज्ञातस्वामिकधनं राजा कस्यापि

किं प्रनष्टमित्येवं पटहादिना उद्घोष्य राजद्वारादौ रक्षितं वर्षत्रयं स्थापयेत् वर्षत्रयमध्ये यदि धनस्वामी आगच्छति तदा स एव गृह्णीयात् तदूर्ध्वं तु नृपतिर्विनियुञ्जीत ३०

ममेदमिति यो ब्रूयात्सोऽनुयोज्यो यथाविधि संवाद्य रूपसंख्यादीन्स्वामी तद्द्रव्यमर्हति ३१ ममेदमित्यादि मदीयं धनमिति यो

वदति स किंरूपं किंसंख्याकं कुत्र प्रनष्टं तद्धनमित्यादिविधानेन प्रष्टव्यः ततो यदि रूपसंख्यादीन् सम्यग्वदति तदासौ तच्च धनस्वामी तद्धनं गृहीतुमर्हति ३१ ॥

111A

अवेदयानो नष्टस्य देशं कालं च तत्त्वतः वर्णं रूपं प्रमाणं च तत्समं दंडमर्हति ३२

अवेदयान इति नष्टद्रव्यस्य देशकालौ अस्मिन्देशेऽस्मिन्काले नष्टमिति तथा वर्णं शुक्लादि आकारं कटकमुकुटादि परिमाणं च यथावदजानन् नष्टद्रव्यसमं दंडमर्हति ३२

आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः दशमं द्वादशं वापि सतां धर्ममनुस्मरन् ३३ देशकालादि सम्वादे पुनराददीतेति यदेतच्च नाष्टद्रव्यं प्राप्तं तस्मात् षड्भागं दशमं द्वादशं वा रक्षणादि निमित्तं सतां धर्मं स्मरन् नाम येथ मेद इति जानन् राजा गृह्णीयात् यत्निस्वामिनो निर्गुणत्वसगुणत्वापेक्षया षड्भागादि ग्रहणविकल्पः अथवापि स्वामिनो क्लेशमपेक्ष्य ३३

प्रणष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितं यांस्तत्र चौरान्गृह्णीयात्तान्राजेभेन घातयेत् ३४

प्रनष्टेति यद्द्रव्यं कस्यापि प्रनष्टं सद्राजपुरुषैः प्राप्तं तद्रक्षायुक्तैः अधिष्ठितं कृत्वा राजा स्थापयेत् तस्मिन् द्रव्ये यांश्चौरान् गृह्णीयात्तान् हस्तिना घातयेत् गोविंदराजस्तु प्रनाशस्यापि केऽयमिति दर्शनात् अन्यापि प्रनष्टस्य वर्णं रूपं यापिकद्रव्यहरणेऽवधमाह तन्न तत्र संधिकृतात् ये चौर्यमिति सर्वस्यापि प्रनष्टराजेरितद्रव्यहरणे नैव विशेषणावध्यविधानात् घातादन्यथापि कश्चिद्वधः दण्डस्य विशेषापादिष्टवधेन विषयत्वात् ३४॥

ममायमिति यो ब्रूयान्निधिं सत्येन मानवः तस्याददीत षड्भागं राजा द्वादशमेव वा ३५॥

ममायमितीति यो मानुषः स्वयं निधिलब्धावेन वा निधेः प्राप्तिं ममायं निधिरिति वदति सत्येन प्रमाणेन च संस्थापयति तस्य पुरुषस्य निर्गुणत्वापेक्षया निर्गुणत्वा विद्यानात् षड्भागं द्वादशभागं वा राजा गृह्णीयात् अवशिष्टं तस्यार्पयेत् ३५

अनृतं तु वदन्दण्ड्यः स्ववित्तस्यांशमष्टमं तस्यैव वा निधानस्य संख्यायाल्पीयसीं कलां ३६ अनृतमिति अल्पीयं अल्पीयमिति ब्रुवन् स्वधनस्याष्टमभागं दंड्यः यद्वा तस्यैव निधेः संख्यातस्य भागं गणयित्वा येनावसादं न गच्छति न विषयबलभयेन तेन दंड्यः अल्पीयसीमिति यस्मिन्नर्ताने दंड्यात्सर्वस्मादल्पायुः दंडः कल्पः सद्गुणत्वनिर्गुणत्वापेक्षः ३६

विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिं अशेषतोप्याददीत सर्वस्याधिपतिर्हि सः ३७॥

विद्वानित्यादि विद्वांस्तु ब्राह्मणः पूर्वैरुपनिहितं निधिं दृष्ट्वा सर्वं गृह्णीयात् न षड्भागं दद्यात् यस्मात्सर्वस्य जगतः स प्रभुः अत एवोक्तं सर्वं स्वं ब्राह्मणस्येदमिति तत्स्मात्सनिहितविषयमेतद्वचनं तथा च नारदः पुराणनिहितं लब्ध्वा राजा सर्वं स्वं निधिं राजगामी निधिः सर्वः सर्वेषां ब्राह्मणादृते याज्ञवल्क्योप्याह राज्ञा लब्ध्वा निधिं दद्यात् द्विजेभ्योऽर्धं द्विजः पुनः विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः अत्रायमेवार्थस्य गोविंदराजाभ्यां ममायमिति यो ब्रूयादित्युक्तं राजदेयांशनिरासार्थमित्याद्विदिनिहितविषयत्वात् तमेवा स्ववचनस्य व्याख्यानं तद्वत्तार्थं नारदादि मुनिव्याख्याविपरीतं स्वकल्पितं न मथाति थिगोविन्दराजव्याख्यानमादृतं ३७॥

यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ तस्माद्द्विजेभ्यो दत्त्वार्धमर्धं कोशे प्रवेशयेत् ३८॥

यमिति यं पुनरस्वामिकं पुरातनं भूमिमध्यनिगतं निधिं राजा लभते तस्मात् ब्राह्मणेभ्योऽर्धं दत्त्वाऽर्धमात्मीयधनागारे प्रवेशयेत् ३८॥

निधीनां तु पुराणानां धातूनामेव च क्षितौ अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः ३९॥

निधीनामिति निधीनां पुरातनानां अस्वकीयानां विद्वद्ब्राह्मणेतरलब्धानां स्वर्णादीनां धातूनामुत्पत्तिस्थानानां चार्धहारी राजा यस्माद्रक्षति भूमेः प्रभुः ३९॥

म॰ मु॰ स॰ ११२ 112

दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनं राजा तदुपयुंजानश्चौरस्याप्नोति किल्बिषं ४० ॥

दातव्यमिति यद्धनं चौरैर्लोकानामपहृतं तद्राज्ञा चौरेभ्य आहृत्य धनस्वामिभ्यो देयम् तद्धनम् राजा स्वयमुपयुंजानश्चौरस्य पापं प्राप्नोति ४० ॥

जातिजानपदान्धर्मान्श्रेणीधर्मांश्च धर्मवित् समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत् ४१ जातिजानेति जातिधर्मान् ब्राह्मणादिजातिनियतान् जानपदान् देशनियतान् देशधर्मं व्यवस्थितान् आम्नायाविरुद्धान् देशजातिकुलधर्माश्चाम्नायेऽप्रतिषिद्धाः प्रमाणमिति गौतमस्मरणात् श्रेणीधर्मांश्च वणिगादिधर्मान् प्रतिनियतकुलव्यवस्थितान् ज्ञात्वा तदविरुद्धान् राजा व्यवहारेषु तत्तद्धर्मान् व्यवस्थापयेत् ४१ ॥

स्वानि कर्माणि कुर्वाणा दूरे सन्तोऽपि मानवाः प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः ४२ यस्मात्स्वानीत्यादि जातिकुलधर्मादीन्स्वात्मीयकर्मादीन्स्वात्मीयकर्माणि प्रकुर्वन्तः स्वे स्वे च नित्यनैमित्तिकादौ कर्मणि वर्तमानाः दूरेऽपि सन्तः सान्निध्याभावेऽपि स्नेहाभावेऽपि लोकस्य प्रिया भवन्ति ४२

नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः न च प्रापितमन्येन ग्रसेदर्थं कथंचन ४३ प्रासंगिकमिदमभिधाय पुनः प्रकृतमाह नोत्पादयेदिति राजा राजनियुक्तो वा पुरुषो धनलाभादिना कार्यं ऋणादिविवादं नोत्पादयेत् तदाह कात्यायनः न राजा न च धनिनं न धनलोभेन वा पुनः स्वयं कर्माणि कुर्वीत नराणामविवादिनां न चार्थिना वा प्रेरितो विवादयेत् नादिलोभेनापहरेत् ४३ ॥

यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदं नयेत्तथानुमानेन धर्मस्य नृपतिः पदं ४४

यथेत्यादि यथा मृगयुः शस्त्रहतस्य मृगस्य रुधिरपातैः व्याधः पदं स्थानं प्राप्नोति तथानुमानेन दृष्टप्रमाणेन वा राजा धर्मस्य तत्त्वं निश्चिनुयात् ४४

सत्यमर्थं च संपश्येदात्मानमथ साक्षिणः देशं रूपं च कालं च व्यवहारविधौ स्थितः ४५ ॥

सत्यमित्यादि व्यवहारदर्शनप्रवृत्तो राजा छलमपहाय सत्यं संपश्येत् तथार्थं च गोहिरण्यादिधनविषयं व्यवहारं पश्येत् तथा सत्यार्थं च आत्मानं साक्षिणस्तथा देशकालौ च देशकालोचितं स्वरूपं व्यवहारस्य रूपं पश्येत् तथात्मानं च तत्र निर्णये स्वर्गादिफलभागिनं साक्षिणः सत्यवादिनः देशकालरूपाणि च स्वरूपं व्यवहारस्य पश्येत् ४५ ॥ हमनेना दिनि कोचनेनोपहृ मितं इत्यादि स्वरूपं ज्ञात्वा तत्र निर्णयं

सद्भिराचरितं यत्स्याद्धार्मिकैश्च द्विजातिभिः तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत् ४६ एतत्सकलव्यवहाराणां प्रकल्पयेत् धार्मिकैर्द्विजातिभिः ४६

सद्भिरित्यादि शिष्टैर्धर्मप्रधानैर्द्विजातिभिर्यदनुष्ठीयमानं शास्त्रमनुष्ठितं तद्देशकुलजात्यविरुद्धमादाय व्यवहारनिर्णयं प्रकल्पयेत्

अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः दापयेद्धनिकस्यार्थमधमर्णाद्विभावितं ४७ ॥

संप्रति ऋणादानमधिकृत्याह अधमर्णेति अधमर्णार्थं प्रयुक्तमृणं पुनः सिद्ध्यर्थं धनस्वामिना राजा बोधितो वह्नमाणलेख्यादिप्रमाणप्रतिपादितं धनमुत्तमर्णस्याधमर्णं प्रदापयेत् अधमर्णाडत्तमर्णाय दापयेदित्यर्थः ४७ ॥ यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकम् ४७ ॥

यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकं ४८ ॥

112A

कथंचिद्दापयेदित्याह येर्यैरिति येर्यैरुपायैः स्वमृणमुत्तमर्णो लभते तैस्तैरुपायैर्वशीकृत्याधमर्णं दापयेत् ४८॥

धर्मेण व्यवहारेण छलेनाचरितेन च प्रयुक्तं साधयेदर्थं पंचमेन बलेन च ४९

तानुपायानाह धर्मेणेत्यादि धर्मादिना प्रयुक्तमर्थं साधयेत्तत्र धर्ममाह बृहस्पतिः सुहृत्संबंधिसंदिष्टैः साम्ना चानुगमेन च प्रायेण वा ऋणी दाप्यो धर्म एष उदाहृतः देयोर्थस्तत्र धर्मेण स विशति। पंचमो व्यवहारेणेति यथा व्यवहरति अर्थं प्रपद्यमानं त्विति मेधातिथिस्तु तिस्रोपायः व्यवहारेण दापयितव्यः प्रयुक्तमपकरणं देनार्था कृषिवाणिज्यादिना व्यवहारयित्वा उत्तमर्णेन तस्मात् गृह्णीयादित्याह छलादीनि त्रीण्याह बृहस्पतिः छद्मना याचितं चार्थमानीय ऋणिकाद्बली अन्याहृतादिनाहृत्य दाप्यते तत्र सोपधिः दारपुत्रपशून् हत्वा कृत्वा द्वारोपवेशनं यत्रार्थो दाप्यते स्वार्थं तदाचरितमुच्यते बद्ध्वा स्वगृहमानीय ताडनाद्यैरुपक्रमैः ऋणिको दाप्यते यत्र बलात्कारः स कीर्तितः ४९॥

यः स्वयं साधयेदर्थमुत्तमर्णोधमर्णिकात् न स राज्ञाभियोक्तव्यः स्वकं संसाधयंश्च तत् ५०॥

य इत्यादि उत्तमर्णः संप्रतिपन्नमर्थमधमर्णात्स्वयं बलादिना साधयति स धनीयं धनमस्मभ्यं कस्मात्साधयन् अस्मानवेदयित्वा किमिति बलादिकं कृतवानसीति न राज्ञा निषेद्धव्यः ५०

अर्थेपव्ययमानं तु करणेन विभावितं दापयेद्धनिकस्यार्थं दंडलेशं च शक्तितः ५१

अर्थं इति नाहमस्मै धारयामीति धनविषये अपह्नुवानं अधमर्णं करणेन लेखसाक्षिदिव्यादिना प्रतिपादितमर्थं उत्तमर्णस्य राजा प्रदापयेत् दंडलेशं च अपह्नवे तद्द्विगुणमिति वक्ष्यमाणदमस्य भागं देशकालस्वरूपमपेक्ष्य शक्त्या दापयेत् ५१

अपह्नवेधमर्णस्य देहीत्युक्तस्य संसदि अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत् ५२॥

अपेति उत्तमर्णेन सभायां देहीति प्राड्विवाकेनोक्तस्याधमर्णस्य नास्मै धारयामीति अपलापे सति अभियोक्ता अर्थी देश्यं यत्र प्रयोगदेशवर्ति साक्षिणां निर्दिशेत् प्रायेण साक्षिभिरेव स्थितमूलो विसंवादो निर्णीयते शाकसाक्ष्युपन्यासः अन्यदा करणं पत्रादिकं कथयेत् ५२॥

अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च यः यश्चाधरोत्तरानर्थान्विगीतान्नावबुध्यते ५३ अपदिश्यापदेश्यं च पुनर्यस्त्वपधावति सम्यक्प्रणिहितं चार्थं पृष्टः सन्नाभिनंदति ५४ असंभाष्ये साक्षिभिश्च देशे संभाषते मिथः निरुच्यमानं प्रश्नं च नेच्छेद्यश्चापि निष्पतेत् ५५ ब्रूहीत्युक्तश्च न ब्रूयादुक्तं च न विभावयेत् न च पूर्वापरं विद्यात्तस्मादर्थात्स हीयते ५६॥

अदेशमिति अपदिश्येति असंभाष्य इति ब्रूहीत्यादि अदेश्यं यत्र देशे अधमर्णस्य ग्रहणकाले सर्वदावस्थानेन न संभवतीति निर्दिश्य वादेशादिकं तेन न्यायान्निर्दिष्टमिति अपनयति यश्च पूर्वोत्तरानर्थान्विरुद्धान्नावगच्छति यश्च मम हस्तात्सुवर्णस्योपलभ्य न गृहीतमिति निर्दिश्य मम हस्तान्न गृहीतमिति एवमादिना पुनरपसरति यश्च सम्यक्प्रतिज्ञातमर्थं कस्मात्त्वया राजावमानादिकं कृतमिति एवमादि प्राड्विवाकेन पृष्टः सन्न समाधत्ते यश्च समाधिस्थाने हितेनादिदेशे साक्षिभिः सह संभाषते यश्च भाषायाः स्थिरीकरणाय तिरस्क्रियमाणं प्राड्विवाकेन प्रश्नं नेच्छेत् यश्च व्यवहारस्थानात्पलायते यथास्थानं तान्नीतं गच्छेत् यश्च ब्रूहीति किं विवदसीति उक्तं साध्यं न प्रतिपादयति पूर्वं साध्यं तस्य पश्चात्तद्योनिं जानाति असाधनमेव साधनमभिनिर्दिश्य निर्दिशति साध्यमेव ममानेन प्राक् गृहीतं धनं देयमित्यादि साध्यत्वेन निर्दिशति स तस्मात्साध्यादर्थाद्धीयते ५३ ५४ ५५ ५६॥

सा॰
ऋ॰ से॰
१४३

साक्षिणः संति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः। धर्मस्थः कारणैरेतैर्हीनं तमपि निर्दिशेत् ५७ साक्षिणः संतीति साक्षिणो मम विद्यं
त इत्युक्त्वा न निर्दिशेत् उक्तो यो न निर्दिशति तं पूर्वोक्तैरेभिः कारणैर्धर्मस्थः प्राड्विवाकः पराजितं कथयेत् साक्षिणः संति मेत्युक्त्वा इति वा पाठः। अत्र ऊकारदर्शी मिकारस्यापर
रूपत्वम् ५७

अभियोक्ता न चेद्ब्रूयाद्बध्यो दंड्यश्च धर्मतः। न चेत्त्रिपक्षात्प्रब्रूयाद्धर्मेण प्रतिपराजितः ५८॥
अभियोक्तेति योऽर्थी सन् राजस्थाने निवेद्य भाषायां न ब्रूयात्तदा विषमगौरवापेक्षया यथालघु निविषयेद्दंड्यश्च धर्मतः स्यात्त्रपक्षीयदि पक्षत्रयमध्ये न ब्रूयात्तदा धर्मेण पराजितः स्यान्न तु छलेन ५८

यो यावन्निह्नुवीतार्थं मिथ्या यावति वा वदेत्। तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम् ५९॥
यइति यः प्रत्यर्थी यत्परिमाणं धनमपनयति अर्थी वा यत्परिमाणधने मिथ्या वदति तावधार्मिकौ अपह्नुमितोक्तधनाद्द्विगुणं दंडरूपं दापनीयौ अधर्मज्ञाविति वच
नात् ज्ञानपूर्वापह्नवमिथ्योक्तिविषयमिदम् प्रमादादिना आलापमिथ्यानियोगेऽपह्नवे तद्द्विगुणमिति प्रातेदृशाममभागे वदति ५९॥

पृष्टोऽपव्ययमानस्तु कृतावस्थो धनैषिणा। त्र्यवरैः साक्षिभिर्भाव्यो नृपब्राह्मणसन्निधौ ६० पृष्ट इति धनार्थिनोत्तमर्णेन राजपुरु
पृष्टः सन्नपलपति कृतावस्थः प्राड्विवाके नष्टः सन्नपलपन्नयायामीत्यपह्नवान् भवति तदा नृपसन्निधि कृतब्राह्मणसमक्षं त्र्यवरैः साक्षिभिः कृतोऽवस्थाप्यमानो विभावनीयः ६०॥

यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः। तादृशान्संप्रवक्ष्यामि यथावाच्यमृतं च तैः ६१॥
यादृशा इति धनिभिरुत्तमर्णादिभिः ऋणादानादिव्यवहारेषु यथाविधाः साक्षिणः कर्तव्याः तथाविधान् वदिष्यामि यथा चैतैः सत्यं वक्तव्यं तमपि प्रकारं वक्ष्यामि ६१॥

गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः। अर्थ्युक्ताः साक्ष्यमर्हंति न ये केचिदनापदि ६२॥
गृहिण इति कृतदारपरिग्रहाः पुत्रवंतः तद्देशजाः क्षत्रियवैश्यशूद्रजातीयाः अर्थिनिर्दिष्टाः संतः साक्षित्वयोग्या भवंति तेऽपि दारपुत्रविनाशभयान्नेदृशा वाक्षिनाविरो
याज्ञ्वनान्यथा वदंति न त्वये केचित् ऋणादानादिव्यवहारेषु साक्षिणः स्युः आपदि तु वाग्दंडपारुष्यस्त्रीसंग्रहणादिषु कृत्स्नातिरिक्ता अपि साक्षिणो भवंति ६२॥

ब्राह्मणाः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः। सर्वधर्मविदोऽलुब्धा विपरीतांस्तु वर्जयेत् ६३ ब्राह्मणा इत्यादि क्षत्रविट्शूद्रयोनय
इति उक्तत्वात्तत्र ब्राह्मणपरिग्रहार्थं सर्वेषु वर्णेषु इत्यभिधानेन सर्ववर्णेषु मध्ये ये यथार्थावगततवादिनः सर्वधर्मज्ञा लोभरहिताः ते साक्षिणः कर्तव्याः उक्तविपरीतांस्तु वर्ज
येत् ६३॥

न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः ६४॥

नार्थसंबंधिनो नाप्ता न सहाया न वैरिणः। न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः ६४॥ ... रोगपीडितास्महापातकादिदुष्ट
अर्थसंबंधीत्यादि ऋणाद्यर्थसंबंधिनोऽधमर्णाद्याः आप्ता मित्राणि सहायास्तत्परिचारकाः प्रागवं स्यानानाते प्रवृत्तकौटसाक्ष्याः रोगपीडिता महापातकादिदुष्टाः
ताश्च साक्षिणो न कर्तव्याः लोभरागद्वेषस्मृतिभ्रंशादीनामन्यथाभिधानहेतूनां संभवात् ६४॥

न साक्षी नृपतिः कार्यो न कारुककुशीलवौ न श्रोत्रियो न लिंगस्थो न संगेभ्यो विनिर्गतः ६५॥

113A नसाक्षी प्रभुत्वात्साक्षित्वेनाह्वानायोग्यत्वात् न राज्ञा साक्षी कार्यः । कारुः सूपकारादिः कुशीलवो नटादिः तयोः स्वकर्मव्यग्रत्वात् प्रायेण धनलोभाच्च नासाक्षित्वे
श्रोत्रियो ऽध्ययनाग्निहोत्रादिकर्मव्यग्रत्वान्न साक्षी लिङ्गस्थो ब्रह्मचारी सङ्गविनिर्गतः परिव्राजकः तयोरपि स्वकर्मव्यग्रत्वात् अत एव निषेधाच्च साक्षित्वे श्रोत्रियग्रहणाद-
नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत् न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रि- ध्ययनाग्निहोत्रादिव्यग्रत्वात् ब्राह्मणस्यापि निषेधः ६५
यः ६६ नाध्यधीन इति अध्यधीनो गर्भदासः वक्तव्यो विहितकर्मत्यागविलोकविगर्हितः दस्युः क्रूरकर्मा न क्रुद्धो नापि तस्कर इति वक्ष्यमाणत्वात्
विकर्मकृत् निषिद्धकर्मकारी एतेषां रागद्वेषादिसंभवात् न बालो ऽप्राप्तव्यवहारत्वात् नैको विनाशप्रवासमरणाद्याशङ्कया तत्साक्ष्ये वैरीति विधानात् अत्र श्रुतिनिषेध
सिद्धो कस्याचिदवस्थायाम् द्वयोरभ्यनुज्ञार्थं निषेधवचनात् अन्त्यश्चाण्डालादिः धर्मानभिज्ञत्वात् विकलेन्द्रियः उपलब्धिविकल्पात् न साक्षी कार्यः ६६॥
नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः न श्रमार्तो न कामार्तो न क्रुद्धो नापि तस्करः ६७ नार्त इति आर्तो बन्धुविनाशादिना
मत्तो मद्यादिना उन्मत्तो भूतावेशादिना क्षुधा पिपासादिना पीडितः श्रमार्तो ऽध्वगमनादिना विवशः कामार्तः कामाक्रान्तः क्रुद्धः क्रोधी चौरश्च न साक्षी कार्य इति सर्वत्र सम्बध्यते तत्रार्तादि
स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः बुद्धिवैकल्यात् चौरस्तु अधर्मिकत्वात् ६७ ६८
स्त्रीणामित्यादि स्त्रीणामन्योन्यव्यवहारे ऋणादानादौ स्त्रियः साक्षिण्यो भवन्ति द्विजानां ब्राह्मणादीनां त्रिविधविशिष्टरूपाः सजातीयाः साक्षिणः शूद्राः पर्वं शूद्राः साधवः शूद्राणां
चाण्डालादीनां चाण्डालादयः साक्षिणो भवेयुः एतच्च सजातीयसाक्ष्यभिधानमुक्तलक्षणसजातीयसाक्षिसंभवे असंभवे विजातीया अपि साक्षिणो भवन्ति अत एव वक्ष्या-
अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनां अन्तर्वेश्मन्यरण्ये वा शरीरस्यापि चात्य- तं वक्ष्यते यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृ-ताः ६८
ये ६९ अनुभावीति गृहाभ्यन्तरे अरण्ये वा चौरादिकृते शरीरपीडायां वा तत्र वाक्पारुष्यादिकृते यः कश्चित् उपलभते स सर्वो विवादिनोः साक्षी भवति न तत्र साक्षिलक्षणादिनादिवडक्ष- लक्षणापेक्षा ६९॥
स्त्रियाप्यसंभवे कार्यं बालेन स्थविरेण वा शिष्येण बन्धुना वापि दासेन भृतकेन वा ७०॥
तेष्वेव दाहरणान्यसंभवेनि स्त्रियापीति उक्तविषये साक्ष्युक्तसाक्ष्यभावे सति स्त्रीबालवृद्धशिष्यबन्धुदासकर्मकरा अपि साक्षिणः स्युः ७०॥
बालवृद्धातुराणां च साक्ष्येषु वदतां मृषा जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा ७१ तेष्वस्थिरबुद्धित्वादिना स्त्रीबालादीनां
कथमज्ञाप साक्षित्वमित्यत्राह बालवृद्धेति बालवृद्धव्याधितानां उपप्लुतमानसानां च मनोन्मत्तादीनां साक्ष्ये अनृतं वदतां अस्थिरा वाग्भवति अतस्तां सम्यगनुमानेन जानी-
साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च वाग्दण्डयोश्च पारुष्ये न परीक्षेत साक्षिणः ७२ याद्यथाकारैरिङ्गितैर्भावैर्लिङ्गैरिति ७१
साहसेष्विति गृहदाहादिषु साहसेषु चौर्ये स्त्रीसंग्रहणे वाग्दण्डपारुष्ये च पूर्वोक्तसाक्षिपरीक्षा न कार्या स्त्रियाप्यसंभवे कार्यमित्यस्यैवायं प्रदाहरणप्र-
बहुत्वं परिगृह्णीयात्साक्षिद्वैधे नराधिपः समेषु तु गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ७३ पञ्चः ७२

मं.
व्य. सं.
११४ 114

व्युत्त्वेन साक्षित्वादिसाक्षिणांपरस्परविरुद्धाभिधानेवक्तुमिष्यते उक्तंतदेव निर्णयार्थत्वेनराजागृह्णीयात् समेषुतुविरुद्धाभिधायिषुगुणवतः प्रमाणीकुर्यात्
गुणवत्त्वमेवविशेषयितुमाह द्विजेषु येउत्तमाः क्रियावंतः तद्वचनंप्रमाणीकुर्यात् द्विजोत्तमानांत्राह्मणानांप्रमाणंनप्रमाणीकुर्यात्
यादित्याह ७३
समक्षदर्शनात्साक्ष्यंश्रवणाच्चैवसिध्यति तत्रसत्यंब्रुवन्साक्षीधर्मार्थाभ्यांनहीयते ७४
समक्षमेवेतिचवर्णयाहीसाक्षात्दर्शनात्श्रोत्रग्राह्येचश्रवणात् साक्षंसिध्यतितत्रसाक्षीसत्यंवदन् धर्मार्थाभ्यांनप्रच्यवतेसत्यवचनेनधर्मोपपत्तेर्दंडाभावेचार्थहान्यभावात्
साक्षीदृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि अवाङ्नरकमभ्येतिप्रेत्यस्वर्गाच्चहीयते ७५ ॥
साक्षीसाधि साक्षीदृष्टश्रुतादन्यत्सांसदसभायांवदन् अधोमुखोनरकंगच्छति परलोकेचकर्मांतरजन्यस्वर्गरूपफलदानेनपापेनहीयते ७५
यत्रानिबद्धोपीक्षेत शृणुयाद्वापिकिंचन पृष्टस्तत्रापितद्ब्रूयाद्यथादृष्टंयथाश्रुतं ७६
यत्रेत्यादिनमस्मिन् विषयेसाक्षीभवइत्येवमनुक्तोपियत्किंचित् ऋणादानादिप्रपतिवाक्पारुष्यादिकंवाशृणोतितत्रापिसाक्षीसपृष्टःसन् यथोपलब्धं
कथयेत् अयंचकृतसाक्षीसामान्येनमत्रनोक्तः अस्यग्रामस्थप्राड्विवाकस्थराजावेत्यादिनानारदादिभिःषड्विधप्रभेदम् ७६ ॥
एकोलुब्धस्तुसाक्षीस्याद्बह्व्यःशुच्योपिनस्त्रियः स्त्रीदोषादस्थिरत्वाच्चदोषैश्चान्येपियेवृताः ७७
एकइत्यादि एकोऽलुब्धइत्यत्राकारप्रश्लेषोद्रष्टव्यःएकोपिसाक्षीलोभादिरहितःस्यात् अतएववामःशुचिक्रियश्चधर्मज्ञःसाक्षीयत्रानुभूतवाक्प्रमाणमे
कोपिभवेत् साधुसुविशेषणतःस्मृतिषुगोविदराजाभ्यामेकोलुब्धस्तुसाक्षीस्यादितिपठितम् व्याख्यानंचलोभवान्एकःसाक्षीनभवति एववालुब्ध
गुणवान् कस्यांचिदवस्थायामेकोपिभवतीति स्त्रियःपुनरान्यशौचादियुक्तावाबह्व्योपिस्थिरबुद्धित्वात्ऋणादानादौप्रयोगालोचितव्यवहारेसाक्षिण्या
नभवतिस्त्रपर्यालोचितवस्तेयवाग्दंडादौपुरुषाश्रियाप्यसंभवेकार्यमितिसाक्षिणम् अन्यपियेस्तेयादिदोषैर्व्याप्तास्तेपिपर्यालोचितव्यवहारेसाक्षि
णोनस्युः ७७
स्वभावेनैवयद्ब्रूयुस्तद्ग्राह्यंव्यावहारिकं अतोयदन्यद्विब्रूयुर्धर्मार्थंतदपार्थकं ७८ ॥
स्वभावेनेतिभयत्साक्षिणोभयादिव्यति
रेकेनस्वभावाद्ब्रूयुःतद्व्यवहारनिर्णयार्थंग्राह्यंयत्पुनःस्वाभाविकादन्यत्कृतोपिकारणाद्वदंतितद्धर्मविषयेनिष्प्रयोजनंनतन्नग्राह्यम् ७८ ॥
साक्षिणःश्रावयेद्वादिप्रतिवादिसमीपगान् प्राड्विवाकोऽनुयुंजीतविधिनानेनसांत्वयन् ७९
साक्षोनःसाक्षिणःश्रावयेत् अर्थिप्रत्यर्थिनसमक्षंराजाधिकृतोब्राह्मणःप्रयोक्तिरेवयत् वक्ष्यमाणप्रकारेणपृच्छेत् ७९ ॥
समंतरित्यादिसभामध्येसाक्षिणःसप्राप्तान् अर्थिप्रत्यर्थिनसमक्षंराजाधिकृतोब्राह्मणःप्रयोक्तिरेवयत्
यद्द्वयोरनयोर्वेत्थकार्येऽस्मिन्चेष्टितंमिथः तद्ब्रूतसर्वंसत्येनयुष्माकंह्यत्रसाक्षिता ८० ॥ ८० ॥
यद्द्वयोरिति यद्द्वयोरर्थिप्रत्यर्थिनोरनयोःपरस्परमस्मिन्कार्येचेष्टितंजानीथतत्सर्वंसत्येनकथयतयतोयुष्माकमत्रसाक्षित्वम्

114A

सत्यं साक्ष्ये ब्रुवन्साक्षी लोकानाप्नोति पुष्कलान्। इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता ८१॥

सत्यमिति साक्षी साक्ष्ये कर्मणि सत्यं वदन्नुत्कृष्टान्ब्रह्मलोकादीन्प्राप्नोति इह लोके च उत्कृष्टां ख्यातिं लभते यस्मादेषा सत्यात्मिका वाक् चतुर्मुखेन पूजिता ८१

साक्ष्ये ऽनृतं वदन्पाशैर्बध्यते वारुणैर्भृशं। विवशः शतमाजातीस्तस्मात्साक्षी वदेदृतं ८२॥

साक्ष्य इत्यादि यस्मात्साक्षी मृषावाक्यं कथयन्वरुणसंबंधिभिः पाशैः सर्परज्जुभिः जलोदरेण परतंत्रीकृतः शतं जन्मानि यावत् भृशं पीड्यते तस्मात्साक्षी सत्यं ब्रूयात् ८२

सत्येन पूयते साक्षी धर्मः सत्येन वर्द्धते। तस्मात्सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ८३॥

सत्येत्यादि यस्मात्सत्येन पूर्वार्जितादपि पापात्साक्षी मुच्यते धर्मश्चास्य सत्याभिधानेन वृद्धिमेति तस्मात्सर्ववर्णविषये साक्षिभिः सत्यं वक्तव्यम् ८३॥

आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः। मावमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमं ८४

आत्मैवेति यस्मात्शुभाशुभकर्मण्यात्मैवात्मनः प्रमाणम् तस्मादेवं स्वमात्मानं नराणां मध्यादुत्तमम् साक्षिणं मृषाभिधानेनावज्ञासीः ८४॥

मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः। तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ८५॥

मन्यन्त इति पापकारिण एवं मन्यन्ते अस्मान् धर्मप्रवृत्तान् न कश्चित्पश्यतीति तानपुनर्वदमानान्देवाः प्रपश्यन्ति स्वस्यान्तरात्मा पुरुषश्च पश्यति ८५॥

द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः। रात्रिः संध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनां ८६ द्यौरित्यादि द्युलोकः पृथिवी जलानि हृदयस्थ जीवश्चन्द्रादित्याग्नियमवायवः रात्रिः संध्ये च धर्मः सर्वशरीरिणां शुभाशुभकर्मज्ञाः दिवा लोकानां वापि ज्ञाता देवतास्ति साक्षी शरीरे शरीरिणा कर्मविस्थितेव तत्सर्वं जानातीति आगमप्रमाणावेदात तदपि तत्संगीत सत्यदेशकैः ८६॥

देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्। उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन् ८७

देवब्राह्मणेति प्रतिमादिदेवब्राह्मणसन्निधाने शुचीन् द्विजातिप्रभृतीन्साक्षिणः उदङ्मुखान्प्राङ्मुखान्वा स्वयं शुचिः सन्पूर्वाह्णे काले यथार्थं साक्ष्यं पृच्छेत् ८७

ब्रूहीति ब्राह्मणं पृच्छेत्सत्यं ब्रूहीति पार्थिवं। गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ८८ ब्रूहीत्यादि ब्रूहीत्येवं ब्राह्मणं साक्षिणं पृच्छेत् सत्यं ब्रूहीति पार्थिवं क्षत्रियं पृच्छेत् गोबीजसुवर्णापहारे यत्पापं तत्तव स्यादनृताभिधानेनेत्यादि वैश्यं शूद्रं पुनः सर्वैर्वक्ष्यमाणैः पापैः संबध्यमान ब्रूहीति पृच्छेत् ८८

ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः। मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा ८९॥

ब्रह्मघ्न इति ब्रह्मघ्नस्य स्त्रीघातिनो बालघातिनश्च ये नरकादिलोका महर्षिभिः स्मृताः ये च मित्रद्रोहकारिणः ये चोपकर्तुरपकारिणस्ते तव मिथ्याभिधाने स्युः

म॰ टी॰ मे॰ ११५ 115

जन्मप्रभृति यत्किंचित्पुण्यं भद्र त्वया कृतं तत्ते सर्वं शुनो गच्छेद्यदि ब्रूयास्त्वमन्यथा ९०॥

जन्मप्रभृतीत्यादि हे शुभाचार यत्त्वया जन्मनः प्रारभ्य किंचित्सुकृतं कृतं तत्सर्वं त्वदीयं कुकुरादिकं संक्रामति यदि त्वमसत्यं ब्रवीषि ९०॥

एकोहमस्मीत्यात्मानं यत्त्वं कल्याण मन्यसे नित्यं स्थितस्ते हृद्येषः पुण्यपापेक्षिता मुनिः ९१

एकोहमित्यादि हे भद्र एक एवाहमस्मि जीवात्मक इति यदात्मानं मन्यसे नैवं मंस्थाः यस्मादेव पापानां पुण्यानां च द्रष्टा मननान्मुनिः सर्वज्ञः तव हृदये परमात्मा नित्यमवस्थितः तथा च श्रुतिः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ९१॥

यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः तेन चेदविवादस्ते मा गंगां मा कुरून्गमः ९२ यम इति सर्वसंयमनाद्यमः

परमात्मा वैवस्वत इति दंडधारित्वात् देवनाद्देवः यस्तवैष हृदि तिष्ठति तेन सह यथार्थकथनेन यदि ते वा विवादः यस्तत्त्वेनोक्तं ममापि यज्जानाति तं वा

सत्यं कथयसि तदा तयोर्मिथः सह तव विप्रतिपत्तिः स्यात् एवं च सत्याभिधानेनैव निष्पापः कृतकृत्योसि पापनिर्हरणार्थं मा गंगां मा च कुरून् देशं यासीः मनु

क्तमेवात्र गंगाकुरुक्षेत्रयोः साम्यं मत्स्यपुराणोक्तमेव स्फुटीकृतं कुरुक्षेत्रसमा गंगा यत्र तत्रावगाहिता इति मेधातिथिगोविन्दराजौ तु विवस्वतः पुत्रो यमो

दक्षिणदिक्पतिर्लोकतः कर्मणां गोचरीभूतत्वात् तव हृदये परिस्फुरति तेन सह यदि तवाधर्मकारित्वाद्विवादो नास्ति तदा मा गंगां मा कुरून् गच्छ यासीरिति वावदन्ति ९२॥

नग्नो मुंडः कपालेन भिक्षार्थी क्षुत्पिपासितः अंधः शत्रुकुलं गच्छेद्यः साक्ष्यमनृतं वदेत् ९३

नग्न इति यः साक्ष्यमसत्यं वदेत् स नग्नः कृतमुंडनपरिभवोऽन्धः कर्परेणोपलक्षितः भिक्षार्थी शत्रुकुलं गच्छेत् ९३॥

अवाक्शिरास्तमस्यंधे किल्बिषी नरकं व्रजेत् यः प्रश्नं वितथं ब्रूयात्पृष्टः सन्धर्मनिश्चये ९४॥

अवागिति यो धर्मनिश्चयनिमित्तं पृष्टः सन् प्रश्नमसत्यं ब्रूयात् स पापवान् अधोमुखो महान्धकारे यान्नरकं तं गच्छेत् ९४॥

अंधो मत्स्यानिवाश्नाति स नरः कंटकैः सह यो भाषतेर्थवैकल्यमप्रत्यक्षं सभां गतः ९५ अंध इति यः सभं प्राप्तः त

दर्थस्य यथाभावं ग्रहणं कर्णोपलब्धं चादिमुख्यलेशेन कथयति स नरोऽन्ध इव मत्स्यान् कंटकान् भक्षयति स्वादलुब्धः प्रहृतो दुःखमेव महदलभत ९५॥

यस्य विद्वान्हि वदतः क्षेत्रज्ञो नाभिशंकते तस्मान्न देवाः श्रेयांसं लोकेन्यं पुरुषं विदुः ९६

यस्येति यस्य वदतः सर्वज्ञोन्तर्यामी किमयं सत्यं वदत्युतानृतमिति न शंकते किं तु सत्यमेवायं वदतीति निर्विशंकः संपद्यते तस्मादन्यं श्रेष्ठं पुरुषं देवा न जानंति

यावतो बांधवान्यस्मिन्हंति साक्ष्येनृतं वदन् तावतः संख्यया तस्मिन् शृणु सौम्यानुपूर्वशः ९७ ९६

यावत इति यस्मिन्पश्वादिनिमित्ते साक्ष्येऽनृतं वदन् यत्संख्याकान् पित्रादीन्बांधवान् नरके योजयति तत्संख्याकान् क्रमेण परिगणनया समयोच्यमा
नान्यस्माच्छृणु अथवा यावतो बांधवान् हंति यावतां बांधवानां हननफलं प्राप्नोतीति तावत्संख्याकान् शृणु पंचेत्याद्यभिधानं विदार्थमिदम् ९७

पंच पश्वनृते हंति दश हंति गवानृते शतमश्वानृते हंति सहस्रं पुरुषानृते ९८ ॥ पंचेति पशुविषयेऽनृते
पंच बांधवान् नरके योजयति पंचानां बांधवानां वा हननफलं प्राप्नोति एवं दश गोविषये शतमश्वविषये सहस्रं पुरुषविषये संख्यायोगोऽयं वेदं प्रायश्चित्तगौ
रवार्थम् ९८॥

हंति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् सर्वं भूम्यनृते हंति मा स्म भूम्यनृतं वदीः ९९ हंतीति हिरण्यार्थेऽनृतं वदन् जाता
नजातांश्च पुत्रपौत्रादीन् हिरण्यार्थेऽनृतवादी नरके योजयति एषां हननफलं प्राप्नोति भूमिविषये चानृतं वदन् सर्वप्राणिनां हननफलं वा प्राप्नोति तस्माद्भूमिविषये
ऽनृतं मा वदीरिति विप्राद्यभिधानं ९९

अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने अब्जेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च १०० ॥
वैडूर्यादिष्वनृते भूमिवद्दोषमाह अप्स्विति तडागकूपवाप्याद्युदकविषयेऽनृते स्त्रीणां च मैथुनाख्योपभोगविषये अब्जेषु च मुक्तादिषु पाषाणमयेषु चैव वैडूर्यादिष्व
नृते भूमिवद्दोषमाहुः १००

एतान्दोषानवेक्ष्य त्वं सर्वाननृतभाषणे यथाश्रुतं यथादृष्टं सर्वमेवांजसा वद १०१ ॥
एतानिति एतान् सर्वाननृतभाषणदोषान् अधिगम्य दृष्टश्रुतानतिक्रमेण सर्वमेवांजसा त्वं तत्त्वतो ब्रूहि १०१ ॥

गोरक्षकान्वाणिजिकांस्तथा कारुकुशीलवान् प्रेष्यान्वार्द्धुषिकांश्चैव विप्राञ्छूद्रवदाचरेत् १०२ गोरक्षकान् कृष्यादिगोरक्ष
णजीविनो वणिज्याजीविनः सूपकारादिकारुकर्मजीविनः नटकर्मनृत्यगीतादिजीविनः दासकर्मजीविनः वृद्धिजीविनो ब्राह्मणान् प्रकृतसाक्ष्यादिषु शूद्र
वत्पृच्छेत् १०२ ॥

तद्वदन्धर्मतोऽर्थेषु जानन्नप्यन्यथा नरः न स्वर्गाच्च्यवते लोकाद्दैवीं वाचं वदन्ति तां १०३ ॥
नातः कारुण्यधर्मादयादिना व्यवहारेष्वन्यथा वदन् स्वर्गलोकान्न भ्रश्यति यस्मादेतन्नियमविशेषेण सत्याभिधानात्तो देवसंबंधिनीं वाचमवादयावदं
ति १०३
तद्वदन्निति तदेव तत्साक्ष्यमन्यथा पिज्ञा

शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते १०४ वाग्दैवत्यैश्च चरुभि
र्यजेरंस्ते सरस्वतीं अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं परां १०५ ॥ क्वचिदसत्यं वक्तव्यमित्याह शूद्रेति यस्मिन्व्यवहारे स
त्याभिधानेन शूद्रविट्क्षत्रियब्राह्मणानां वधः संपद्यते तत्रासत्यं वक्तव्यं यस्माद्यस्मिन्विषयेऽनृतं यत्सत्याद्वरं तत्सत्याद्विशिष्यते एतच्च प्रमादस्खलितधर्मविषयं
येन तत्त्वमतां धार्मिकस्यापि कारस्तेनादिविषये न त्यागो नमः ता च वदते दोषो यज्जीवनं चेदयीनं न तत्पापीयसो जीवनमिति न च न जात ब्राह्मणं हन्या...पेय

मं. से. ११६ 116

पापिष्ठं तमिति मनुनैव वक्ष्यमाणत्वान्न च ब्राह्मणवधप्रसक्तिरिति उग्रदण्डत्वाज्ञातः कथंचित्संभवात् अत्र वचने शूद्रादिक्रमेणाभिधानं वधस्य मंगलत्वात् १०४ वा
ग्दैवतैरिति सः साक्षिणोऽनृताभिधानेऽपि वाग्देवताकैश्चरुभिः सरस्वतीं यजेरन् तस्मादनृताभिधानजनितपापस्य प्रकृष्टोऽपि द्विजः वाण्याः साक्षिवधप्रायश्चित्तं चेदम
नेकैः साक्षिभिः कपिञ्जलन्यायेन चरुत्रयम् यद्यपि वाग्देवताकैश्चरुभिर्वाक् प्राधान्येनैव देवतात्वेन सरस्वती शब्देन विधिप्राप्तस्य मन्त्रत्वेनाभावः स्यादिति न्यायानुसारेण पि वा
ग्देवमन्त्रतीश्रुतेर्वाक्सरस्वत्योरेकार्थत्वात् सरस्वती मन्त्रस्य संग्रहः अत्र प्रकारान्तरे चेदं प्रायश्चित्ताभिधानं लाघवार्थं वक्ष्यमाणं शूद्रविट्क्षत्रियब्राह्मणवधविषयानन्त
रमेव ब्राह्मणादिक्रमेण वाक्यस्यैव कृतस्य १०५ ॥

कूष्माण्डैर्वापि जुहुयाद्घृतमग्नौ यथाविधि। उदित्यृचा वा वारुण्या तृचेनाब्दैवतेन वा १०६ ॥

कूष्माण्डैरिति कूष्माण्डमन्त्रैर्यद्देवा देवहेलनमित्येवमादिभिः तैर्मन्त्रदेवताभ्यो घृतमग्नौ जुहुयात् यथाविधि परिस्तरणादिहोमधर्मेणाग्नौ गृह्योक्ते
न उदुत्तमं वरुणपाशमित्येतया वरुणदेवताकया ऋचा आपो हि ष्ठेति तृचेन वाऽब्देवताकेन जुहुयात् घृतमग्नाविति सर्वत्रानुषङ्गः १०६ ॥

त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः। तदृणं प्राप्नुयात्सर्वं दशबन्धं च सर्वतः १०७ त्रिपक्षादिति अव्याधितः साक्षी ऋण
दानादिव्यवहारेषु त्रिपक्षपर्यन्तं यदि साक्ष्यं न वदेत् तदा तद्विवादास्पदं सर्वमृणमुत्तमर्णाय दद्यात् तस्य च सर्वस्य ऋणस्य दशभागं राज्ञे दण्डं दद्यात् १०७ ॥

यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः। रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः १०८ यस्येति यस्य साक्षिण उक्तसाक्ष्य
स्य सप्ताहमध्ये व्याध्यग्निदाहमहिषिज्ञात्यादिज्ञातिमरणानामन्यतमं भवति स दैवसूचितमिथ्याभिदोषत्वात् ऋणमुत्तमर्णाय दण्डं च राज्ञे दाप्यः १०८ ॥

असाक्षिकेषु त्वर्थेषु मिथो विवदमानयोः। अविन्दंस्तत्त्वतः सत्यं शपथेनापि लम्भयेत् १०९ ॥

असाक्षिकेष्विति अविद्यमानसाक्षिकेषु व्यवहारेषु परस्परं विवदमानयोस्तत्त्वच्छलादिव्यतिरेकेणासत्यमलभमानः प्राड्विवाकः वक्ष्यमाणेन शपथेन सत्यं लम्भयेत् १०९

महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः। वसिष्ठश्चापि शपथं शेपे पैजवने नृपे ११० ॥ वसिष्ठोऽपि शपथं शेपे पैजवने नृपे सुदासपुत्रशते भुक्तमिति विश्वामित्रेणाकृष्टः स्वपरिशुद्धये पिजवनाप
महर्षिभिश्चेति महर्षिभिर्देवैश्चेन्द्रादिभिः संदिग्धकार्यनिर्णयार्थं शपथाः कृताः वसिष्ठोऽप्यनेनैव कारणेन कार्यनिर्णयार्थं शपथं चकार राजन्यस्य सुदासोऽपि ११० ॥
त्ये सुदासे राजनि शपथं चकार इति नेनैका यमनात्वात्मनो राजपर्यपि करोत्यर्थः ११० ॥

न वृथा शपथं कुर्यात्स्वल्पेऽप्यर्थे नरो बुधः। वृथा हि शपथं कुर्वन्प्रेत्य चेह च नश्यति १११ ॥

नवृथेति स्वल्पेऽपि कार्ये न वृथा शपथं पण्डितः कुर्यात् यस्माद्वृथा शपथं कुर्वन् परलोके च नरकप्राप्त्या कीर्तिनाशाच्चेह नाशं प्राप्नोति १११ ॥

कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने। ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकं ११२

16A

वृथाशपथश्च निषिद्धः सर्वार्थमाह कामिनीष्विति बहुभार्यस्य नान्यामहं कामये त्वमेव मम प्रेयसीति एवंविधविषयेऽपि रतलाभार्थं कामिनीविषये विवाहविषये च मयाग्रन्यानयोरस्यामादौ गवार्थं घासाद्युपहारे वह्निहोमार्थमिंधनाद्युपहारे ब्राह्मणरक्षार्थमंगीकृतयत्नादौ वृथाशपथे पापं न भवति ११२ ॥

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ११३

सत्येनेति ब्राह्मणं सत्यशब्दोच्चारणेन शापयेत् क्षत्रियं वाहनायुधं मम विफलं स्यादिति वैश्यं गोबीजकांचनानि मम निष्फलानि स्युः शूद्रं तु सर्वाणि मे पातकानि स्युरिति वा शापयेत् ११३ ॥

अग्निं वाहारयेदेनमप्सु चैनं निमज्जयेत् पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत्पृथक् ११४ ॥

अग्निमिति अग्निवर्णं वा ताम्रफलिकमष्टांगुलमयःपिंडं हस्तद्वयविन्यस्तं सप्तपदं शूद्रादिकं सप्तपदानि पितामहानप्युक्तविधि कार्यगौरवलाघवापेक्षया नाहारयेत् जलौकादिरहितजले चैनं निमज्जयेत् अप्स्वेतिकर्तव्यता स्मृत्यंतरे ज्ञेया पुत्राणां दाराणां च पृथक् शिरांसि स्पर्शयेत् ११४ ॥

यमिद्धो न दहत्यग्निरापो नोन्मज्जयंति च न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः ११५ ॥

यमिति यं प्रदीप्तोऽग्निर्न दहति आपश्च यं नोर्ध्वं नयंति न चार्तिमेव महतीं प्राप्नोति स शपथे विशुद्धो ज्ञेयः ११५ ॥

वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा नाग्निर्ददाह रोमापि सत्येन जगतः स्पशः ११६ ॥

शपथप्रशंसार्थमर्थवादमाह वत्सस्येति यस्मात् पूर्वकाले वत्सनाम्न ऋषेर्न त्वं ब्राह्मणः शूद्रापत्योऽसीत्येवं कनीयसा वैमात्रेयेणाभिशस्तस्तेन तद्दिव्यमिति शपथं अग्निश्च विश्वस्याग्निः सर्वस्य जगतः शुभाशुभकर्मज्ञो वा चारभूतः सत्येन हेतुना रोमैकमपि न दग्धवान् ११६ ॥

यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत् तत्तत्कार्यं निवर्तेत कृतं चाप्यकृतं भवेत् ११७ ॥

यस्मिन्यस्मिन् व्यवहारे साक्षिभिरनृतमुक्तमिति निश्चितं भवेत् तत्कार्यमप्रमाणं प्राड्विवाको निवर्तयेत् यद्यपि च दंडसमाप्तिपर्यंतं नानीतं तदपि पुनः कुर्वीत ११७ ॥

लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैव च अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ११८ ॥

लोभादिति वक्ष्यमाणदंडविशेषार्थं लोभादीन् पृथक् निर्दिशति लोभेन विपरीतज्ञानेन साक्ष्यमसत्यमुच्यते ११८ ॥

एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत् तस्य दंडविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः ११९ ॥

एषामिति एषां लोभादीनां मध्यादन्यतमस्मिन् निमित्ते सति यो मिथ्यासाक्ष्यं कथयेत् दंडविशेषान् क्रमशो वदिष्यामि ११९ ॥

लोभात्सहस्रं दंड्यस्तु मोहात्पूर्वं तु साहसं भयाद्द्वौ मध्यमौ दंडौ मैत्रात्पूर्वं चतुर्गुणं १२० ॥

म। मे। ११२ 117

लोभादिति लोभेन मिथ्याभिधाने प्रतिवदमानः पणानां सहस्रं दंडः मोहेन प्रथमं साहसं वदमानं भये च वदमानं मध्यमसाहसौ मैत्र्यात्प्रथमसाहसं वन गुणं १२०

कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परं अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु १२१ कामादिति स्त्रीसंभोगादिरूपकामात् यो

येन मिथ्या वदन् प्रथमसाहसं दशगुणं दंडः क्रोधेन तत्परं वदमानो मध्यमसाहसं त्रिगुणं अज्ञानतो द्वे शते बालिश्यात् अनवधानात् पणशतमेव दंडः इति पूर्वेणान्वयः १२१

एतानाहुः कौटसाक्ष्ये प्रोक्तान्दंडान्मनीषिभिः धर्मस्याव्यभिचारार्थमधर्मनियमाय च १२२

एतानिति सत्यरूपधर्मस्यापरिलोपार्थमसत्यरूपाधर्मस्य च वारणार्थमेतान्कौटसाक्ष्यविषये पूर्वैर्मुनिभिरुक्तान्दंडान्मन्वादय आहुः एतत्प्रसक्तं कौटसाक्ष्ये १२२॥

कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः प्रवासयेद्दंडयित्वा ब्राह्मणं तु विवासयेत् १२३ भूयो भूयः कौटसाक्ष्यकरणे तु कौ

टसाक्ष्यमिति क्षत्रियादीन्वर्णान्कौटसाक्ष्ये प्रवृत्तान्दंडेन दंडयित्वा धार्मिको राजा स्वराष्ट्राद्विवासयेत् ब्राह्मणं तु धनदंडव्यतिरेकेणैव स्वराष्ट्रान्निःसारयेत् न तु जातु ब्रा

ह्मणं हन्यात्सर्वपापेष्ववस्थितम् राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतमिति धनसहितं निर्वासनस्याभिधास्यमानत्वात् गोविंदराजस्तु ब्राह्मणं पुनः पूर्वदंडेन

दंडयित्वा नग्नं कुर्यात् एतच्चाचष्टे मेधातिथिस्तु ब्राह्मणस्य विवासनं स्ववासापहरणं गृहभंगो वेत्याचष्टे १२३॥

दशस्थानानि दंडस्य मनुः स्वायंभुवोऽब्रवीत् त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत् १२४॥

दशेति हिरण्यगर्भो मनुर्दश दंडस्य स्थानानि उक्तवान् यानि क्षत्रियादिवर्णत्रयविषये भवंति ब्राह्मणः पुनर्महत्यपराधेऽक्षतशरीरो देशान्निःसार्यते १२४

उपस्थमुदरं जिह्वा हस्तौ पादौ च पंचमं चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च १२५ उपस्थेति लिंगादीन्येतानि दश दंडस्थानानि अ

तस्तत्तदंगेनापराधे सति अपराधलाघवगौरवापेक्षया तत्तदंगताडनच्छेदनादिकर्तव्यम् अल्पापराधे यथाशक्ति धनदंडः देहदंडो मारणं महापातकादौ १२५॥

अनुबंधं परिज्ञाय देशकालौ च तत्त्वतः सारापराधौ चालोक्य दंडं दंड्येषु पातयेत् १२६॥

अनुबंधमिति पुनः पुनरिच्छातोऽपराधकरणमवेक्ष्य ग्रामारण्यादिवा पराधस्थाने दिवारात्र्यादिकं वा अपराधकालं सम्यगवेक्ष्य सारं चापराधकारिणो धनयोगा

दिसमर्थ्यमपराधं च गुरुलघुभावेनालोक्य दंड्येषु दंडं कुर्यात् एतच्चाभिहिताभिधास्यमानदंडशेषभूतम् १२६॥

अधर्मदंडनं लोके यशोघ्नं कीर्तिनाशनं अस्वर्ग्यं च परत्रापि तस्मात्तत्परिवर्जयेत् १२७ अधर्मेति जीवतः ख्यातिर्यशः मृतस्य ख्याति

कीर्तिः यस्मादनुबंधाद्यनपेक्षं दंडनं इह लोके यशोनाशनं मृतस्य च कीर्तिनाशनं परलोके च धर्म्यान्तरार्जितस्वर्गप्रतिबंधकम् तस्मात्तत्परित्यजेत् १२७॥

अदंड्यान्दंडयन्राजा दंड्यांश्चैवाप्यदंडयन् अयशो महदाप्नोति नरकं चैव गच्छति १२८

अदंड्यानिति राजा दंडानर्हान् धनलोभादिना दंडयन् दंड्यांश्चापराधिनो धनादिवा उत्सृजन् महतीमख्यातिं प्राप्नोति नरकं च व्रजति १२८॥
वाग्दंडं प्रथमं कुर्याद्धिग्दंडं तदनंतरं तृतीयं धनदंडं तु वधदंडमतः परं १२९ वाग्दंडमिति न साधु कृतवानसि मैवं भूयः कार्षी
इत्येवं वाग्भिर्भर्त्सनं प्रथमापराधे गुणवतः कुर्यात् तथापि यदि नोपशाम्यति तदा धिक् जाल्म जीवनिपातस्ते पापस्य भूया इत्येवमादिनस्य कार्यं तथापि यदि सम्य
ग्गामी न भवति तदा धनदंडमस्य तृतीयं कुर्यात् एवमपि चेन्नावतिष्ठते तदा ताडनं वधदंडं ताडनांगच्छेदादि एतच्च शरीराद्यपराधतो मरणं यतो वक्ष्यति वधेनापि यदा त्वेतानिति
वधेनापि यदा त्वेतान्निगृहीतुं न शक्नुयात् तदेषु सर्वमप्येतत्प्रयुंजीत चतुष्टयं १३०॥ १२९
वधेनेति यदा यस्तेनांगच्छेदेनापि दंड्यान् वशीकर्तुं न शक्नुयात् तदा एषु सर्वं वाग्दंडादि चतुष्टयं कुर्यात् १३०॥
लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः १३१॥
लोकेति ताम्ररूप्यसुवर्णानां याः पणादिसंज्ञाः क्रयविक्रयादिलोकव्यवहारार्थम् पृथिव्यां प्रसिद्धास्तादंडाद्युपयोगार्थं साकल्येन कथयिष्यामि १३१॥
जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते १३२॥
जालांतरेति गवाक्षविवरप्रविष्टसूर्यरश्मिषु यत्सूक्ष्मं रजो दृश्यते तद्रजः परिमाणानां प्रथमम् त्रसरेणुं वदंति १३२॥
त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः १३३॥
त्रसेत्यादि अष्टौ त्रसरेणवो लिक्षैका परिमाणेन ज्ञेया तास्तिस्रो लिक्षा राजसर्षपो ज्ञेयः ते राजसर्षपास्त्रयो गौरसर्षपो ज्ञेयः १३३॥
सर्षपाः षड्यवो मध्यस्त्रियवं त्वेककृष्णलं पंचकृष्णलको माषस्ते सुवर्णस्तु षोडश १३४ सर्षपा इति गौरसर्षपाः षट्म
ध्यो नस्थूलो यवो भवति नापि सूक्ष्मो यवो भवति त्रिभिर्यवैः कृष्णलं रक्तिकेति प्रसिद्धं पंचभिः कृष्णलैर्माषः षोडशमाषाः सुवर्णः स्यात् पुल्लिंगश्चायं परिमाणवचनः
१३४
पलं सुवर्णाश्चत्वारः पलानि धरणं दश द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः १३५
पलमिति चत्वारः सुवर्णाः पलं स्यात् दशपलानि धरणं कृष्णलद्वयं समं कृत्वा तुलया धृतं रूप्यमाषको बोद्धव्यः १३५॥
ते षोडश स्याद्धरणं पुराणश्चैव राजतः कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः १३६॥
तेषोडशेति ते षोडश रूप्यमाषका रौप्यधरणं पुराणं च राजतो रजतसंबंधी स्यात् कार्षिकः ताम्रमयः कार्षापणः पण इति च विज्ञेयः कार्षिकश्च शास्त्रे पलच
तुर्थो भागो बोद्धव्यः अत एव पलकर्षचतुष्टयमित्यभिधानिकाः १३६॥

मा. तु. सं. ११८ 118

धरणानि दश ज्ञेयः शतमानस्तु राजतः कार्षापणस्तु विज्ञेययस्तु प्रमाणतः १३७ ॥

धरणेति दश रूप्यधरणानि शेष्य शतमानो ज्ञातव्यः चतुर्भिः सुवर्णैर्निष्कः परिमाणेन बोद्धव्यः १३७ ॥

पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः मध्यमः पंच विज्ञेयः सहस्रं त्वेव चोत्तमः १३८ ॥

पणेति पंचाशदधिके पणानां शते प्रथमसाहसो मन्वादिभिः स्मृतः पणपंचशतानि मध्यमः साहसो ज्ञेयः पणसहस्रं उत्तमसाहसो ज्ञेयः १३८ ॥

ऋणे देये प्रतिज्ञाते पंचकं शतमर्हति अपह्नवे तद्द्विगुणं तन्मनोरनुशासनं १३९ ऋणे इति मयोत्तमर्णस्य धनं देयमिति सभायाम धमर्णेनोक्ते सत्यमधमर्णः पणशतात्पंचपणान् इत्येवं दंडमर्हति यदा तु सभायामपि न किंचिद्धारयामीत्येवमपलपति तदा पणशताद्दशपणान् इत्येवं दंडमर्हति इत्येवं मनुस्मृतो दंडप्रकारः १३९ ॥

वसिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्द्धिनीं अशीतिभागं गृह्णीयान्मासाद्वार्द्धुषिकः शते १४० ॥

वसिष्ठेति वसिष्ठेनोक्तां वृद्धिं धनवर्द्धनाद्धनवृद्धिकरीं वृद्धिजीवी गृह्णीयात् तामेव दर्शयति शते प्रयुक्ते तस्मात् अशीतिभागं प्रतिमासं वृद्धिं गृह्णीयात् १४० ॥

द्विकं शतं वा गृह्णीयात्सतां धर्ममनुस्मरन् द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी १४१ ॥

द्विकमिति साधूनां धर्ममिति मन्यमानः पणशते प्रयुक्ते पणद्वयं वा प्रतिमासं गृह्णीयात् यस्माद्द्विकं शतं गृह्णानो वृद्धिधनग्रहणे किल्बिषी न भवति १४१ ॥

द्विकं त्रिकं चतुष्कं च पंचकं च शतं समं मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः १४२ द्विकमिति ब्राह्मणादिवर्णानां क्रमेणाद्विकं त्रिकं चतुष्कं च शते समं मितेनाधिकं मासस्य संबंधिनीं वृद्धिं गृह्णीयात् तत्राशीतिभागालघुः द्विकशतिग्रहणं गुरुकत्वमिमौ ब्राह्मणस्य लघुगुरुकल्पौ विकल्पेताश्चमे याज्ञिथिगोविंदराजोक्तं पूर्वं वृद्ध्याविभावाद्विसंभवे द्विकशतग्रहणमिति वा च दातेइ दत्तवदामः सबंधके अशीतिभागग्रहणं बंधरहिते तु द्विकशतं वृद्धिरित्युक्तः तदाह याज्ञवल्क्यः अशीतिभागो वृद्धिः स्यान्मासि मासि सबंधके वर्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथा वेदान्तो ज्ञातमहसामनेर्व्याख्यानमाद्विये तद्द्विकत्वे सबंधे वा निबंधमधुनातनैः १४२

न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात् न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः १४३ ॥

नत्विति भूमिगोदासमसौ भोगार्थं बंधके दत्ते धनप्रयोगभवामनेनत्तत्रको वृद्धिमुत्तमर्णो न लभते कालसंरोधश्चिरकालावस्थानेनन चभोग्याद्देश्चिरकालवृस्थानात द्विगुणी विदराजोक्त अर्थेश्चिरकालावस्थानेपि न निसर्गो नान्यत्र बंधकेनापणमित्याख्याचव्याने भूतमूल्यनप्रवेशेपि न तिसर्गो ऽस्मादानेन वास्तो विक्रयः मेधातिथिगोविंदराजोक्तश्चिरकालावस्थानेपि निसर्गोनान्यत्र बंधकेन धनाप्रविशत्यादानेन वास्य विरोधः बंधवृत्ताकृतभूम्यादेरस्याधीकरणमभावात् १४३ ॥
अद्यतन मेव दर्शयति गा वार विरोधः

न भोक्तव्यो बलादाधिर्भुंजानो वृद्धिमुत्सृजेत् मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेत् १४४ नभोक्तव्य इति गोप्राधिविषयं बलान्न भोक्तव्यः भुंजानो वृद्धिमुत्सृजेत् प्राग्मूल्येन तं तोषयेत् यद्वा भोगेनास्य तन्नाशयोनेनेनासारावस्थायि मूल्यदानेन स्वामिनं तोषयेत्
चतनमिदेवमत्रालेकारायिगोप्याधि

118A अन्यथा वंचकोरःस्यात् १४४ आधिश्चोपनिधिश्चोभौ न कालात्ययमर्हतः । अवहार्यौ भवेतां तौ दीर्घकालमवस्थितौ ॥ १४५

आधिश्चेति आधिर्बंधकः उपनिधीयत इत्युपनिधिः प्रीत्या भोगार्थमर्पितं द्रव्यं नारदस्मृतिलिखितो वा निक्षेपोपनिधी तावेवाधोपनिधी ह्येन गृहीते तेऽप्युभावप्युपनिधी चिरकालावस्थितावपि न कालात्ययमर्हतः यदैव स्वामिना प्रार्थितौ तदैव तस्यावहार्यौ समर्पणीयाविति अर्थः १४५ ॥

संप्रीत्या भुज्यमानानि न नश्यंति कदाचन । धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते ॥ १४६ ॥

संप्रीत्येति यत्किंचिद्दशवर्षाणि संततं भोगेन तु हानिर्वक्ष्यति तदपवादार्थमिदं उच्यमाना गौरुष्ट्रोऽश्ववहनदम्यमनार्थं च प्रयुक्तो बलीवर्दादिः एते प्रीत्या भुज्यमानाः कदाचिदपि स्वामिनो न नश्यंति प्रदर्शनार्थं चेदं प्रीत्योपभुज्यमानेन न नश्यंतीति विवक्षितं समाख्योपक्रमं चेदं विशेषाभिधानमिति न पंचमं सकलिंगत्वा १४६ ॥

यत्किंचिद्दशवर्षाणि संनिधौ प्रेक्षते धनी । भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥ १४७ यत्किंचिदिति यत्किंचिद्धनजातं समक्षमेव प्रीत्यादिव्यतिरेकेण परैर्दशवर्षाणि भुज्यमानं स्वामी प्रेक्षते न मम भुज्यते इत्यादि प्रतिषेधोक्तिं न रचयति नासौ तल्लब्धुं योग्यो भवति तस्य तत्र स्वाम्यं निवर्तत इति भावः १४७ ॥

अजडश्चेदपोगंडो विषये चास्य भुज्यते । भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति ॥ १४८ अजड इति जडो वृद्धविकलः न्यूनषोडशवर्षः पोगंडः तथा च नारदः बाल आषोडशाद्वर्षात्पोगंडश्चापि शब्द्यते स यदि स्वामी यदि जडः पोगंडश्च न भवति तदा यद्दर्शने विषये चास्य धनं भुज्यते तदा स्वामिनो व्यवहारेण तद्धनं नष्टं भवति भोक्तुरेव तद्धनं भवति १४८ ॥

आधिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः । राजस्वं श्रोत्रियस्वं च न भोगेन प्रणश्यति ॥ १४९ ॥

आधीरिति बंधो सीमा ग्राममर्यादा बालधनं निक्षेपो वासन समक्षमर्पितं उपनिधिः सम्पुटं दत्तं निबद्धमिति नारदोक्तलक्षण उपनिधिः दास्यादि स्त्रियो राजश्रोत्रिययोर्धनानि एतानि उक्तेन दशवर्षभोगेन स्वामिनो न पश्यंति न भोक्तुः स्वं भवंति १४९

यः स्वामिनाननुज्ञातमाधिं भुंक्ते विचक्षणः । तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः ॥ १५०

यः स्वामिनेति यो मूढ आधिं बंधं स्वाम्यनुज्ञाव्यतिरेकेन मूर्खो निःक्लेशेन भुंक्ते तेन तस्य भोगस्य संशोधनार्थमर्धवृद्धिस्त्यक्तव्या बलभोगेन न भोक्तव्यो बलात् इति सर्ववृद्धित्याग एव । कं १५०

कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता । धान्ये सदे लवे वाह्ये नातिक्रामति पंचताम् ॥ १५१ कुसीदेति वृद्ध्या धनप्रयोगः कुसीदं तत्र या वृद्धिः सकृदाहृता सा द्वैगुण्यं नातिक्रामति मूलद्विगुणैव भवति न तु प्रतिदिनं प्रतिमासं ग्रहणेन मूलेन सह द्विगुणाधिकापि पूर्वोक्ताद्यर्धप्रकारादन्यप्रकाराद्यासेति तत्राप्ययमं धान्ये सदे वृक्षफले लवे लूयत इति लवः ऊर्णादि लोम तस्मिन् वाह्ये बलीवर्दादौ प्रयुक्ते चिरेणापि कालेन मूलधान्यादिना सह पंचगुणत्वं नातिक्रामतीति १५१ ॥

कृतानुसारादधिका व्यतिरिक्ता न सिध्यति । कुसीदपथमाहुस्तं पंचकं शतमर्हति ॥ १५२ ॥ कृतानुसारादिति कृताया वृद्धेर्द्विकं त्रिकमिति शास्त्रेण वर्णक्रमेणोक्तायाः शास्त्रानुसारादधिका व्यतिरिक्ता कृता अभ्यासवृद्धिः कृतेप्यर्थः सा न संभवति किं तु कृतापि वृद्धिः वर्णक्रमेण द्विकत्रिकशतादिरूपैव मासे शास्या तथा च वसिष्ठः वृद्धिं दद्युः कृतामपि वत्सरातिक्रमेण यथाभिहितं वर्णक्रमेण द्विकत्रिकादिकामित्यर्थः किं तु कृतं दृष्टावपि विशेषांतरमाह कुसीदास्य

मा॰
धः॰ सं॰
११४

सात्यथं पंचयाशदिति कुसीदपथमाहुः अथ पुनरधमर्णोपेत् शूद्रविषयोक्तं पंचकं शतं द्विजातेरपि गृह्णानीत्येवकुसीदपथः पंचमाद्यध्यर्धं वृद्धिकरादयकृतः पृष्ठ इत्येव मन्वादयस्त्वाहुः
इत्यवाह्नता वृद्धिरुद्धारविषये याचनाहूतैवोद्धारदानादहकात्यायनः प्रीतिदत्तं न वर्द्धेत यावन्न प्रतियाचितं याच्यमानेन दत्तं चेद्वर्द्धते पंचकं शतम् १५२।।

नातिसांवत्सरीं वृद्धिं न चादृष्टां पुनर्हरेत् चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या १५३ नातीतिमित्येकस्मिन्मासि मासद्वये
मासत्रये वा गतस्य वृद्धिं विगणय्य एकदा दातव्येत्येवंविधनियमस्य पूर्वकृतस्य ग्रहणाधमर्णाः संवत्सरपर्यन्तं कुर्यात् नातिक्रान्तसंवत्सरेण नियमस्य वृद्धिं गृह्णीयात् न च शास्त्रा
दादृष्टां पुनः पंचकमाह्निकं त्रिकं शतस्य षकं वा गृह्णीयात् अयं मनवोयन्नाथो निषेधः चक्रवृद्ध्यादिचतुष्टयी वा शास्त्रीयां न गृह्णीयात् तामाह स्वरूपमाह बृहस्पतिः कायि
काकायिसंयुक्ता मासग्राह्या च कालिका वृद्धेर्वृद्धिश्चक्रवृद्धिः स्वरूपेण वगाहिता कालवृद्धिस्त्वगुणाधिकं ग्रहणेन कावातिवाहदोहादिना कारितासमुतिकेनयास्त्राप
कालएव उत्तमर्णो पीठयाकृता चतस्रोऽपि वृद्धीर्गृह्णास्येयान गृह्णीयात् तथा च बृहस्पतिः भागो यद्द्विगुणाद्धर्धं चक्रवृद्धिश्च गृह्यते मूलं च सोदयं पश्चात्तद्वद्धुं विनिर्दि
गर्हितं कात्यायनः ऋणिकेन तु या वृद्धिरधिका संप्रकल्पिता आपत्कालकृता नित्यं दातव्या कारिता तथा अन्यथा कारिता वृद्धिर्न दातव्या कथंचन १५३ ।।

ऋणं दातुमशक्तो यः कर्तुमिच्छेत्पुनः क्रियां स दत्त्वा निर्जितां वृद्धिं करणं परिवर्तयेत् १५४

ऋणं दातुमिति योऽधमर्णो यनदाना सामर्थ्यात्पुनर्लेख्यादिक्रियां कर्तुमिच्छेत्स निर्जितामुत्तमर्णेणास्यतया आत्मसात्कृतां वृद्धिं दत्त्वा करणं लेख्यं पुनः कुर्यात् १५४

अदर्शयित्वा तत्रैव हिरण्यं परिवर्तयेत् यावती संभवेद्वृद्धिस्तावतीं दातुमर्हति १५५ अदर्शयित्वेति यदि देवगत्या वृद्धिहिरण्य
मपि समग्रं दातुं न शक्नोति तदा तद्वृद्धीत्येवतत्रैव पुनः क्रियमाणे लेख्यादौ वृद्धिहिरण्यादि शेषमारोपयेत् यत्प्रमाणं चक्रवृद्धिधनं तदानीं संभवेत्तद्दातुमर्हति १५५

चक्रवृद्धिं समारूढो देशकालव्यवस्थितः अतिक्रामन्देशकालौ न तत्फलमवाप्नुयात् १५६ चक्रवृद्धिमिति चक्रवृद्धिः शकटेनात्र
चक्रवद्धकटादिभाटकरूपा वृद्धिरभिमता चक्रवृद्धिमाश्रितउत्तमर्णो देशकालदेशकालव्यवस्थितः यदि वाराणसीपर्यन्तं लवणाशकटेन वहामि तदा मम यदहं दातव्यमि
ति वा कृत्वा इयदेशव्यवस्थितिः यदि मासं यावद्वहामि तदा ममेयद्धनं दातव्यमिति कालव्यवस्थितिः एवमभ्युपगतदेशकालौ नियमस्याद्देवादतिक्रम्य न शकटादिना वहनलाभा
रूपफलमकलं न प्राप्नोति १५६ ।।

समुद्रयानकुशला देशकालार्थदर्शिनः स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति १५७
अपितु समुद्रेति स्थलपथजलपथयानेतिगुणा इयदेशपर्यन्तं इयत्कालपर्यन्तं वा उह्यमाने क्षतिपत्ताव्वालभो गृहीतव्यः कृत इत्येवं देशकाललाभयत्नज्ञा वणिगा
दयो या वृद्धिं तथाविधविषये व्यवस्थापयन्ति सैव तत्र व्यवस्थान्तराधिगमम् तत्प्राप्तिं प्रति प्रमाणम् १५७ ।।

यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः अदर्शयन्स तं तस्य प्रयच्छेत्स्वधनादृणम् १५८ ।।

योयस्येति यो मनुष्यो यस्य दर्शनाय प्रतिभूस्तिष्ठेत् यद्दानकाले मया यमधमर्णो दर्शनीय इति मतं तस्मिन्काले उत्तमर्णस्यादर्शयन् स्वधनात् तद्धनं दातव्यं तेन १५८ ।।

119A प्रतिभाव्यं वृथादानमाक्षिकं सौरिकं च यत् दंडशुल्कावशेषं च न पुत्रो दातुमर्हति १५९ प्रतिभाव्यमिति प्रतिभूत्वेन यद्देयं धनं तत्
त्यामिभाव्यं वृथादानं नियमपरिहासनिमित्तं षंडादिभ्यो देयत्वेनापि यदंगीकृतं द्यूतनिमित्तं सुरानिमित्तं च यद्देयं दंडे दंडनिमित्तं शुल्कं च यदादिदेयं तदवशेषं तु पितृसंबंधि पितृमरणे
न पुत्रो दातुं चार्हति १५९ ॥
दर्शनप्रतिभाव्ये तु विधिः स्यात्पूर्वचोदितः दानप्रतिभुवि प्रेते दायादानपि दापयेत् १६०
दर्शनेति प्रतिभाव्यं न पुत्रो दातुमर्हतीत्ययं पूर्वोपदेशः स दर्शनप्रतिभुवः पितर्येव ज्ञेयः दानप्रतिभुवि तु पितरि मृते पुत्रादीनपि ऋणं दापयेत् १६० ॥ ॥
प्रदातरि पुनर्दाता विज्ञातप्रकृतावृणं पश्चात्प्रतिभुवि प्रेते परेप्सः केन हेतुना १६१ निरादिष्टधनश्चेत्तु प्रतिभूः स्या
दलंधनः स्वधनादेव तद्दद्यान्निरादिष्ट इति स्थितिः १६२ ॥
प्रदातरीति निरादिष्टेति प्रदातरि दानप्रतिभुवो प्रमत्ते ... प्रतिभुवि प्रेते च प्रतिभुवि वा विज्ञातप्रतिभाव्यकारणम् ऋणं ... वितथं न ... प्रतिभुवि प्रति
भुवो मृत ... दानप्रतिभूः ... निरादिष्टेति ... दर्शनप्रतिभूः प्रत्ययप्रतिभूर्वा यदि निरादिष्टधनः ... ऋणं ... मर्णात् दद्यादिति शास्त्रम् १६२ ॥
... प्रतिभूः ... निरादिष्टधनः ... लक्षणयाच्यते ...
मत्तोन्मत्तार्तव्यसनी बालेन स्थविरेण वा असंबद्धकृतश्चैव व्यवहारो न सिध्यति १६३ ॥
मत्तोन्मत्तेति ... मत्तोन्मत्तो ... व्यसनी ... बालः ... स्थविरः ... व्यवहारो न सिध्यति १६३
सत्या न भाषा भवति यद्यपि स्यात्प्रतिष्ठिता बहिश्चेद्भाष्यते धर्मान्नियताद्व्यावहारिकात् १६४ सत्येति ...
... यदि ... धर्माद् ... व्यवहारात् बहिर्भाष्यते तदा सा सत्या न भवति ... १६४
योगाधमनविक्रीतं योगदानप्रतिग्रहं यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत् १६५ ॥ योगाधमनेति योगश्छल
वाची छलेन ... विक्रीतं दानप्रतिग्रहः ... उपधिः ... तत्सर्वं निवर्तयेत् १६५
गृहीता यदि नष्टः स्यात्कुटुंबार्थे कृतो व्ययः दातव्यं बांधवैस्तत्स्यात्प्रविभक्तैरपि स्वतः १६६ ॥
गृहीतेति ऋणगृहीता यदि मृतः स्यात्तेन च पूर्वं विभक्ताविभक्तसर्वभ्रातृकुटुंबसंवर्धनार्थं ऋणव्ययः कृतः तदा तदृणं विभक्तैरपि स्वधनाद्दातव्यम् १६६
कुटुंबार्थेऽध्यधीनोपि व्यवहारं यमाचरेत् स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् १६७
कुटुंबार्थे इति स्वदेशस्थे देशांतरस्थे वा स्वामिनि स्वामिसंबंधि कुटुंबव्ययनिमित्तं दासोपि यदृणादानादि कुर्यात्स्वामी न तत्प्रत्यनुमन्यते १६७ ॥

म॰
सु॰ से॰
१२॰
120

बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितं सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत् १६८॥

बलाद्दत्तमित्यादि बलाद्दत्तमप्रतिग्राह्यं बलाद्भुक्तं भूम्यादि बलाल्लेखितं च ऋणादिपत्रादि प्रदर्शनेन चैतान्सर्वान्बलकृतान्व्यवहारान्निवर्तनीयान्मनुराह १६८॥

त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलं चत्वारस्तूपचीयन्ते विप्र आढ्यो वणिङ्नृपः १६९॥

त्रयः परार्थे इति साक्षिणः प्रतिभूः कुलं च परार्थे व्यवहारे प्रयतमाना परार्थे क्लेशमनुभवन्ति तस्माद्देनेन साक्षिप्रतिभाव्ये व्यवहारे ऋणं च नामोकारयितव्याः चत्वारः पुनर्ब्राह्मणो महाजनो वणिग्राजा नाः परार्थे दानफलोत्पादनरूपणाद्यर्पणविक्रयव्यवहारे ऋणरूपम् ऋणाणार्थेन उपचयं प्राप्नुवन्ति तस्मात् विप्रो दाता रम् आढ्योऽधमर्णो वणिक् कर्ता राजा व्यवहर्ता रक्षणेन प्रवर्तयेत् पूर्वश्लोकाभिहितबलविषयं स्वोपायप्रपंचः १६९॥

अनादेयं नाददीत परिक्षीणोपि पार्थिवः न चादेयं समृद्धोपि सूक्ष्ममप्यर्थमुत्सृजेत् १७०॥

अनादेयमिति क्षीणधनोपि राजा न ग्राह्यमर्थं गृह्णीयात् समृद्धोपि स्वल्पमपि ग्राह्यमर्थं न त्यजेत् १७०॥

अनादेयस्य चादानादादेयस्य च वर्जनात् दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति १७१

यस्मादनादेयस्येति अग्राह्यस्य ग्रहणात् ग्राह्यस्य परित्यागाच्च राज्ञः दौर्बल्यं ख्याप्यते न च स प्रेत्य अधर्मेण नरकादिभोगादिह लोके च अकीर्त्या विनश्यति १७१

स्वादानाद्वर्णसंसर्गात्त्वबलानां च रक्षणात् बलं संजायते राज्ञः स प्रेत्येह च वर्धते १७२ स्वादानादिति न्याय्यधनग्रहणात् वर्णानां सजातीयैः शास्त्रीयपरिणयनादिसंबंधात् यद्वा वर्णसंसर्गाद्वर्णसंकरादित्याप्यपरिरक्षणादिति योजनीयं प्रजानां दुर्बलानां बलवद्भ्योऽपि रक्षणात्सामर्थ्यमुपजायते तस्मात्ततस्मात् इह लोके परलोके च प्रवर्धते १७२

तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये वर्तेत याम्यया वृत्त्या जितक्रोधो जितेन्द्रियः

यत एवं तस्माद्यम इति तस्माद्यम इव राजा वशीकृतक्रोधो जितेन्द्रियः स्वकीये प्रियाप्रिये परित्यज्य यमस्येव इच्छया सर्वेषु समया वृत्त्या वर्तेत १७३॥

कामक्रोधौ तु संयम्य योऽर्थान्धर्मेण पश्यति प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः १७४ कामक्रोधाविति यो राजा रागद्वेषौ परिहाय धर्मेण कार्याणि पश्यति तं राजानं प्रजा अनुवर्तन्ते समुद्रमिव नद्यः न घोषयाः समुद्रात्प्रतिनिवर्तन्ते तेन एकतां यान्ति प्रजा अपि तस्मान्नृपादपवर्जिताः तद्देवतानाम् भवन्ति तेन साम्य १७४

यः साधयन्तं छन्देन वेदयेद्धनिकं नृपे स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनं १७५

यः साधयन्तमिति योऽधमर्णो राजवल्लभोऽहमिति गर्वात् उत्तमर्णं स्वेच्छया धनं साधयन्तं नृपे निवेदयेत् स राज्ञा ऋणाच्चतुर्भागं दण्ड्यः तस्य तद्धनं दापयेत् १७५॥

कर्मणापि समं कुर्याद्धनिकायाधमर्णिकः समोऽवकृष्टजातिस्तु दद्याच्छ्रेयांस्तु तच्छनैः १७६ कर्मणापीति समानजातिरपकृष्टजा

120A

निश्चायमर्णो धनी वा। ऐवमिति विज्ञानमनुष्ठानकर्मकरणेनापि समं कुर्यात् न निकृष्टेन समर्णोयमर्णो व्यपदेशात् तथा यथा निकृष्टमात्मानं कुर्यात् समजातिश्चेद्ब्राह्मणेन च कर्म
णा हस्तविदश्चद्रव्यं भोजनहीनांश्च दापयेत् इति कात्यायनेन विशेषितत्वात् श्रेयांस्तु न कृष्टजातिं नेकर्मकारयितव्यः किंतु धनं यथासंभवं तदेव दद्यात् १७७॥

अनेन विधिना राजा मिथ्याविवदतो नृणाम् साक्षिप्रत्ययसिद्धानि कार्याणि समतां नयेत् १७८ ॥

अनेनेति अनेनोक्तप्रकारेण परस्परं विवदमानानामर्थिप्रत्यर्थिनां साक्ष्यादिप्रमाणेन निर्णीतानि कार्याणि विप्रतिपत्तिं छेत्वा अनेन राजा समीकुर्यात् १७८॥

कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः १७९

कुलज इति सत्कुलप्रसूते सदाचारवति धर्मवेदिनि सत्याभिधायिनि बहुपुत्रादिपरिजने सुप्रशक्ते मनुष्ये व्यभिचाराभावान्निक्षेपं स्थापयेत् १७९ ॥

यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः १८० ॥

यो यथेति यो मनुष्यो येन प्रकारेण मुद्रारहितं समुद्रं वा समाक्षिकं वा यमर्थं सुवर्णादिकं यस्य हस्ते निक्षिपेत् सोऽर्थस्तेन निक्षेप्त्रा तथैव ग्राह्यो यस्मात् येन प्रकारेण समर्पणं
तेनैव प्रकारेण ग्रहणं न्याय्यं समुद्रस्थापितं सुवर्णादिनिक्षेप्ता स्वयमेव मुद्राभिन्नाय दापयति मम देहलयित्वा समर्पयेत् अभियानं दण्डार्थं पृथगिदम् १८० ॥

यो निक्षेपं याच्यमानो निक्षेप्तुर्न प्रयच्छति स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसन्निधौ १८१ ॥

यो निक्षेपमिति यः पुरुषो देहि मे निक्षिप्तं हिरण्यादिद्रव्यमित्येवं निक्षेप्त्रा प्रार्थ्यमानस्तत्स्वयं दानसमर्पयति तदा निक्षेप्ता ज्ञापितेन प्राड्विवाकेन तस्य निक्षेप्तुरसन्निधौ याचनीयः

साक्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वतः १८२

किं कृत्वा याचनीय इत्याह साक्ष्यभावे इति प्रथमनिक्षे
पे साक्ष्यभावे सत्कीय समस्थेश्चापुरुषैः प्रतिकांतवाल्येसोम्यादिभिः रूपोपदवादिव्याज्ञाभियादिभिर्हिरण्यानि तस्तेन तस्य निक्षेपयित्वा तैरेव चारपुरुषैः स निःक्षेपार्थी प्राड्वि
वाकेन चारपुरुषनिक्षिप्तसुवर्णं याच्यः १८२

स यदि प्रतिपद्येत यथान्यस्तं यथाकृतं न तत्र विद्यते किंचिद्यत्परैरभियुज्यते १८३

स यदीति स निक्षेपधारी यथान्यस्तं समुद्रं वा यथाकृ
तं कृतकमुद्राचारपुरुषाकारेण रचितं यदि तेनैव प्रतिपद्यते तस्य निक्षेपसंबंधि तदा परेण पूर्वनिक्षेप्त्रा प्राड्विवाकवादिना यन्निक्षिप्तमित्यभियुज्यते न तत्र किंचिद
स्तीति ज्ञातव्यम् १८३॥

तेषां न दद्याद्यदि तत्तद्धिरण्यं यथाविधि उभौ निगृह्य दाप्यः स्यादिति धर्मस्य धारणा १८४

तेषां वा पुरुषाणां यन्निक्षिप्तं हिरण्यं यथास्थं
तद्यदि तन्न दद्यात् तदा द्वावपि निक्षेपौ ज्ञापकचारसंबंधिनौ समीकृत्य दापनीयः स्यादित्येवं रूपो धर्मस्य धारणा निश्चयः यो निक्षेपमित्यादि श्लोकचतुष्टयं स वेदव्याप
कत्वात् मनुस्मृतिभोजदेवादिभिर्निश्चितः सोऽविद्याजेन तस्माद्धाभावप्राणाय भिरिति श्लोकांतं प्रवपठितः तदा चतुर्णां समस्कृतिः न वा हेत्राम्नायाद्वरः १८४॥

निक्षेपोपनिधी नित्यं न देयौ प्रत्यनंतरे नश्यतो विनिपाते तावनिपाते त्वनाशिनौ १८५ ॥

निक्षेप इति निक्षिप्यत इति निक्षेपः शुद्धोक्तिसमगणितं वा सन्यस्तं वा परिधीयते स उपनिधिः आसाम्यापरिगणकवस्तुयदेशाभेदः तौ निक्षेपोपनिधी नेदेयौ उप
धिनिधातरि जीवति प्रत्यनन्तरेण दीयं पुत्रादौ तदनन्तरे तद्धनादिकारिणि कदाचिन्न निक्षेपधारिणा देयौ यतस्तस्य पुत्रादेः पितृसमर्पणाविना ऽतो निक्षेपोपनि
धीनष्टप्यतः पुत्रादेः पुनरपि नाशो समर्पणे च कदाचिदपि नाशितो स्यात्तस्मादनयोः सन्देहान्न देयौ १८५ ॥

स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे न स राज्ञा नियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः १८६ स्वयमेवेति निक्षिप्तं मृतस्य निक्षेपधारि

निक्षिप्तमर्थं तद्धनाधिकारिणि पुत्रादौ तदनभ्यर्थितः स्वयमेव यः समर्पयति स राज्ञा निक्षेप्तुः पुत्रादिभिर्वान्यदपि तत्र यन्निक्षिप्तमस्तीति नाशंक्यः १८६ ॥

अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकं विचार्य तस्य वा वृत्तं साम्नैव परिसाधयेत् १८७ यदि कथंचिद्विप्रतिपत्तिः स्यात्तदा अच्छलेनैव

तितवृत्तं यथनोत्तरसंगावलक्षणा वाकछलादिपरिहारेणैव प्रीतिपूर्वकं निश्चिनुयात् तत्र जतिदिव्यादिदानेन तस्य निक्षेपधारिणः शीलमवेक्ष्य धार्मिकोऽयमि

निक्षेपेष्वेषु सर्वेषु विधिः स्यात्परिसाधने समुद्रे नाप्नुयात्किंचिद्यदि तस्मान्न संहरेत् १८८ तिज्ञात्वा साम्ना प्रयोगेणानिश्चिनुयात् १८७

निक्षेपेष्विति सर्वेषु निक्षेपेषु प्रक्रियमाणेषु एष साम्नाभावस्थादिपूर्वोक्तविधिर्निर्णय इहो स्यान्मुद्रितापनलस्य निक्षेपधारी यदि प्रतिमुद्रादिना नाकिमप्यप

चौरैर्हृतं जलेनोढमग्निना दग्धमेव वा न दद्याद्यदि तस्मात्स न संहरति किंचन १८९ हरेत्तदानेन तस्मिन्नर्पितेन किंचिद्दूषणं प्राप्नुयात् १८८

चौरैरिति चौरैर्मुषितं उदकेन देशान्तरप्रापितं अग्निना दग्धं वा निक्षेपादि निक्षेपधारी न दद्यात् यदि स्वयमुत तस्मान्न किंचिदपहरति १८९ ॥

निक्षेपस्यापहर्तारमनिक्षेप्तारमेव च सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः १९०

निक्षेपस्येति निक्षेपस्यापह्नोतारं अथवानिक्षिप्य याचितारं सर्वैः सामादिभिरुपायैर्वैदिकैश्च शपथैः अग्निहरणादिभिर्नृपो निरूपयेत् १९० ॥

यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् १९१ ॥

यो निक्षेपमिति निक्षिप्तमर्थं यो नानुसमर्पयति यश्चानिक्षिप्यार्थ इति तौ दोषवर्णगुरुत्वादौ महति विषये चौरवद्दण्ड्यौ स्वल्पविषये तु तत्समं दण्डनीयौ १९१

निक्षेपस्यापहर्तारं तत्समं दापयेद्दमम् तथोपनिधिहर्तारमविशेषेण पार्थिवः १९२ निक्षेपेति निक्षेपापहारिणं निक्षिप्तसमधनेन दण्डये

महत्यपराधेऽज्ञानेन तस्य चौरवदिति पूर्वश्लोकेन शारीरदण्डस्याभिहितत्वात् तन्निवृत्त्यर्थमिदम् दापये वाभ्यामेव चौराणां समसाह साधियन दण्डवीर्यकामात्

तस्य समविषमत्वात् निक्षिप्यमवतारमपि तत्र गुरुकृतिः महत्यपराधे ज्ञानेन तस्य चौरवदिति पूर्वश्लोकेन अस्य प्रथमापराधविषयत्वात् पूर्वोक्तम् राजा दण्डयेत् १९२ ॥
दिति यत्र दण्डनियमात् तथानेन पूर्वश्लोकवैयर्थ्यम् तस्यापहर्तारम कथितविशेषेण
उपनिधिमुद्रादिविरहितत्वात् निक्षिप्तधनम्

121A उपधाभिश्च यः कश्चित्परद्रव्यं हरेन्नरः। ससहायः स हन्तव्यः प्रकाशं विविधैर्वधैः॥ १९३ उपधेति राजा त्वयि हृष्टस्तस्मात्त्वां राजाभिम
मतं नेदेहि यत्नतया मादिलोभोपकरणैर्यः कृत्रिममभिधाय यच्छसमभिधाय परद्रव्यं गृह्णाति स च सहायतस्त्रहणसहकारिसहितो बहुजनसमक्षं करचरणशिरश्छेदादिभि नानाप्रकारैर्वधोपायैः राज्ञा हन्तव्यः १९३
निक्षेपो यः कृतो येन यावांश्च कुलसन्निधौ। तावानेव स विज्ञेयो विब्रुवन्दण्डमर्हति॥ १९४
निक्षेप इति यः सुवर्णादिर्यावत्परिमितो येन साक्षिसमक्षं निक्षेपः कृतः तत्र परिमाणादिविप्रतिपत्तौ साक्षिवचनात्तावानेव वित्तस्तथा विप्रतिपत्तिमूर्ध्वं न्यूनं वदन्दण्डनीयः १९४
मिथो दायः कृतो येन गृहीतो मिथ एव वा। मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः॥ १९५॥
मिथो दाय इति रहसि येन निक्षेपो रहस्येव प्रत्यर्पणीयः न प्रत्यर्पणी साक्षयेत्तावत् स येनैव प्रकारेण दानं तेनैव प्रकारेण दानं तेनैव प्रकारेण प्रत्यर्पणं प्रदातव्य
इति श्रवणान्निक्षेपधारिणां नियमविधिः यो यथा निक्षिपेद्धस्त इति तु निक्षेप्तृनियमार्थं गृहीतवद् इति श्रवणात् अतो न पौनरुक्त्यम् १९५॥
निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च। राजा विनिर्णयं कुर्यादक्षिण्वन्न्यासधारिणम्॥ १९६ निक्षिप्तस्येति रा
जा निक्षिप्तस्य धनस्य मुद्रासमुद्रादिगुणस्य वा उपनिधिरूपस्य तथा प्रीत्या कतिचित्कालं भोगार्थमर्पितस्य साक्षितोक्तप्रकारेण न्यासधनधारिणमपीडयन्निर्णयं कुर्यात् १९६
विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसम्मतः। न तं नयेत साक्ष्यं तु स्तेनमस्तेनमानिनम्॥ १९७॥
विक्रीणीत इति अस्वामी यः स्वामिना चाननुमतः परकीयं द्रव्यं विक्रीणीते तं स्तेनं चोरमचौरमात्मानं मन्यमानं तं साक्षित्वेन कारयेत् न कञ्चिदपि प्रमाणीकुर्या दित्यर्थः १९७
अवहार्यो भवेच्चैव सान्वयः षट्शतं दमम्। निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषम्॥ १९८ अवहार्य इति एष परस्वविक्रयी यदि
स्वामिनो भ्रात्रादिरूपत्वेन सान्वयः संबन्धी भवति तदा षट्शतपणान्दण्डनीयः यदि पुनः स्वामिनः संबन्धी न भवति अनपसरश्च स्यात् अपसरत्यनेना
स्मात् सकाशात् वनमित्यपसरः प्रतिग्रहक्रयादिः स यस्य स्वामिसंबन्धिप्रत्यादेः सकाशान्नास्ति तदा चौरसबधिपापं प्राप्नोति तद्वद्दण्डनीय इत्यर्थः १९८॥
अस्वामिना कृतो यस्तु दायो विक्रय एव वा। अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः॥ १९९॥
अस्वामिनेति अस्वामिना यद्दत्तं यच्च क्रीतं विक्रीतं वा तदकृतमेव बोद्धव्यं व्यवहारे यथा मर्यादा तथा कृतं न भवतीत्यर्थः १९९॥
सम्भोगो दृश्यते यत्र न दृश्येतागमः क्वचित्। आगमः कारणं तत्र न सम्भोग इति स्थितिः॥ २००
सम्भोग इति यस्मिन् वस्तुनि सम्भोगो विद्यते क्रियादिरूपस्त्वागमो नास्ति तत्र प्रथममुपभोगोचरः आगम एव प्रमाणं न भोग इति शास्त्रीयमर्यादा २००॥
विक्रयाद्यो धनं किंचिद्गृह्णीयात्कुलसन्निधौ। क्रयेण स विशुद्धं हि न्यायतो लभते धनम्॥ २०१
विक्रयादिति विक्रीयतेऽस्मिन्निति विक्रयदेशो विक्रयः ततो यत्क्रेयपण्यं किंचिद्व्यवहारसमूहसमक्षं क्रीयते नैतेति ज्ञेयो मूल्यः तेन यस्माद्गृह्णीयात्स ते नाय त एव

स्वामिविक्रेतृसकाशात्क्रयणाद्धि शुद्धं धनं लभते २०१

अथ मूलमनाहार्यं प्रकाशक्रयशोधितः अदंड्यो मुच्यते राज्ञा नाष्टिको लभते धनं २०२

अथेति अथ मूलस्वामी विक्रेतृमरणात् देशांतरगमनादिना वाऽप्यवहर्त्तुं न शक्यते प्रकाशक्रयेणाऽसौ निश्चितः तदा दंडनार्हः पूर्वक्रेता राज्ञा मुच्यते नष्टधनस्वामी नाविक्रीतद्रव्यं नतत्क्रेतुर्हस्ताल्लभते अत्र च विषये हेममूल्यक्रेतृदत्ताद्धं धनं स्वामिना ग्राह्यं तदाह बृहस्पतिः वणिग्वीथीपरिगतं विज्ञातं राजपौरुषैः अविज्ञाताश्रयात्क्रीतं विक्रेता यत्र वा मृतः स्वामी दत्वार्धमूल्यं तत्प्रगृह्णीयात्स्वकं धनम् अर्धं द्वयोरपहृतं तत्र स्याद्व्यवहारतः २०२॥

नान्यदन्येन संसृष्टरूपं विक्रयमर्हति न चासारं न च न्यूनं न दूरेण तिरोहितं २०३ नान्यदिति कुंकुमादि द्रव्यं कुसुंभादिना मिश्रीकृत्य न विक्रेतव्यम् न चासारं सारमित्यभिधाय न च तुलादिना न्यूनं न च परोक्षावस्थितं न च रागादिना स्थापितं न रूपं अत्र स्वामिविक्रयमाहृत्य परस्वामिविक्रयदंडप्रकरणे २०३

अन्यां चेद्दर्शयित्वान्या वोढुः कन्या प्रदीयते उभे ते एकशुल्केन वहेदित्यब्रवीन्मनुः २०४ अन्यां चेति शुल्कदेयां कन्यां शुल्कव्यवस्था काले स्विवयां दर्शयित्वा यदि साऽवयवा वरस्य दीयते तदा द्वे अपि कन्ये तेनैवैकेन शुल्केन असौ वरः परिणयेदिति मनुराह शुल्कग्रहणात्पूर्वके कन्याया दानस्य विक्रयरूपतां द्युतक्रयसाधर्म्येणास्याभिधानं २०४

नोन्मत्ताया न कुष्ठिन्या न च या स्पृष्टमैथुना पूर्वं दोषानभिख्याप्य प्रदाता दंडमर्हति २०५॥ नोन्मत्तेति उन्मत्तायास्तथा कुष्ठवत्याश्चानुभूतमैथुनायास्तस्याश्चाक्षतयोनिविवाहात्पूर्वमुन्मादादीन्दोषान्वरस्य कथयित्वा दाता दंडार्हो न भवति तेनाकथने दंड्यः द्रविणमप्येयं सदोषवती कन्यामिति २०५

ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत् तस्य कर्मानुरूपेण देयोंऽशः सहकर्तृभिः २०६ ऋत्विगिति यज्ञे कृतवरणः स्त्विक् यदि किंचित्कर्म कृत्वा व्याध्यादिना कर्म त्यजति तदा तस्य तत्कृतकर्मप्रमाणापर्यालोचया कृतानुसारेण दक्षिणांशो देयः २०६

अथ संभूय समुत्थानमाह

दक्षिणासु च दत्तासु स्वकर्म परिहापयन् कृत्स्नमेव लभेतांशमन्येनैव च कारयेत् २०७॥ दक्षिणास्विति माध्यंदिनसवनादौ दक्षिणाकाले दक्षिणासु दत्तासु व्याध्यादिना कर्मपरित्यजंस्तत्पाठात् कृत्स्नमेव दक्षिणाभागं लभेत कर्मशेषः प्रकृतमन्येन कारयेत् २०७

यस्मिन् कर्मणि यास्तु स्युरुक्ताः प्रत्यंगदक्षिणाः स एव ता आददीत भजेरन्सर्व एव वा २०८ दक्षिणेति माध्यंदिनसवनादौ दक्षिणाकाले दक्षिणासु दत्तासु व्याध्यादिना कर्मपरित्यजन् ततस्तद्भागमात्रं सर्वे विभज्य गृह्णीरन्निति संशयः २०८॥

रथं हरेत्त चाध्वर्युर्ब्रह्माधाने च वाजिनं होता वापि हरेदश्वमुद्गाता चाप्यनः क्रये २०९ यस्मिन्निति यस्मिन्कर्मण्याधानादौ अंगप्रत्यंगप्रतिया दक्षिणा यत्संबंधेनोक्ताः स स एव ता आददीत उत तेन तद्भागमात्रे सर्वे विभज्य गृह्णीरन्निति संशयः अत्र सिद्धांतमाह रथमितिकेषां चित् शाखिनामाधाने सोमक्रये सोमवहनशकटं मत्तोऽयव्यस्याम्नायसामर्थ्याद्दक्षिणायत्नं ब्रह्मा तत्र स्वयमेव तामादाद्दीत २०९॥

नामाधाने अध्वर्युर्वेरथो देयस्तेनाम्नायते ब्राह्मणे वेगवानश्वः उद्गात्रे सोमक्रये

सर्वेषामर्धिनो मुख्यास्तदर्धेनार्धिनोऽपरे तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः २१०॥

122A संप्रतिपत्तिविधानेन दक्षिणाविभागमाह सर्वेषामिति तेषां तेन दीक्षयतीति श्रूयते तत्र सर्वेषां षोडशानां ऋत्विजां मध्ये ये चत्वारः ऋत्विजः होत्रध्वर्युब्रह्मोद्गातारः समस्तदक्षिणाया अर्द्ध
ग्रहीतारः अर्द्धचत्वारिं[illegible]भाजो भवंति अतएव कात्यायनेन द्वादशगोदाने विहिते यद्यपि शतस्यार्द्धं पंचाशद्भवति तथाप्यौहस्त्यूनाद्ययहणेनापि इमे अर्द्धिनः उच्यंते सामीप्यात् द्वितीये ऋत्विक्
णाप्रतिम्लोनत्रयः समस्तादद्दक्षिणाया अर्द्धिनो ग्रहीतारः इति दक्षिणार्द्धग्रहणेनार्द्धिन उच्यंते तृतीयन्नो चत्वारः प्रतिहर्त्रादयः तुर्यास्ति गृहीतस्तेन तृतीयमंशं लभंते
पादिनः चत्वारः ... तेन पादिनः तृतीयभागं लभंते एतत्पट्षट्षट् द्वितीयेभ्यः ... तृतीयेभ्यः इति सूत्रयता कात्यायनेन स्फुटीकृतम् २१०
संभूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः अनेन विधियोगेन कर्त्तव्यांशप्रकल्पना २११ ॥
संभूयेति मिलिता गृहनिर्माणादीनि स्वकर्माणि लोके स्थपतिसूत्रधारादिभिर्मनुष्यैः कुर्वद्भिरनेन यज्ञदक्षिणाविधानाश्रयणेन विज्ञानव्यापाराद्यपेक्षया भागकल्पना कार्या २११ ॥
धर्मार्थं येन दत्तं स्यात् कस्मैचिद्याचते धनं पश्चाच्च न तथा तत्स्यान्न देयं तस्य तद्भवेत् २१२ इदानीं दत्तानपकर्मोच्यते धर्मार्थमिति येन यागादि
कर्मार्थं कस्मैचिद्याचमानधनाय धनं दत्तं प्रतिश्रुतं वा स्यात् पश्चाच्च तद्धनमसौ यागार्थे न विनियुंजीत तदा तद्दत्तमपि दानं ग्राह्यं प्रतिश्रुतं च न देयं यदाह गौतमः प्रतिश्रुत्याप्य
धर्मसंयुक्ताय न दद्यात् २१२ ॥
यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः राज्ञा दाप्यः सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिः २१३ ॥
यदीति यदि तद्दत्तमसौ गृहीत्वा लोभाद्दर्पाद्वा यज्ञं न कुर्यात् प्रतिश्रुतं वा धनं बलेन गृह्णाति तदा तस्य चौर्यपापस्य शुद्ध्यर्थं राज्ञा सुवर्णं दंडं दापनीयो भवेत् २१३ ॥
दत्तस्यैषोदिता धर्म्या यथावदनपक्रिया अत ऊर्द्ध्वं प्रवक्ष्यामि वेतनस्यानपक्रियां २१४ ॥
दत्तस्येति एतद्दत्तस्याप्रतिपादनेधर्मो दत्तपेतं वेतन उक्तं अतोऽनंतरं भृत्ये समर्पणादिकं वक्ष्यामि २१४ ॥
भृतो नार्त्तो न कुर्याद्यो दर्पात्कर्म यथोदितं स दंड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनं २१५ ॥
भृत इति यो भृतिपरिक्रीतो व्याधिपीडितो यथा निरूपितं कर्माहंकारान्न कुर्यात् स कर्मानुरूपेण सुवर्णकृष्णलान्यष्टौ दंडनीयः वेतनं चास्य न देयम् २१५ ॥
आर्त्तस्तु कुर्यात्स्वस्थः सन्यथाभाषितमादितः स दीर्घस्यापि कालस्य तल्लभेतैव वेतनं २१६ ॥
आर्त्त इत्यादि यदा व्याध्यादिपीडया कर्म न करोति स्वस्थः सन् यथा पूर्वभाषितं पूर्वमनाटक कर्म कुर्यात् वेतनं तेनैव स चिरकालादपि लभेतैव २१६ ॥
यथोक्तमार्त्तः सुस्थो वा यस्तत्कर्म न कारयेत् न तस्य वेतनं देयमल्पोनस्यापि कर्मणः २१७ ॥
यथोक्तमिति यत्कर्म यथाभाषितमपीडितो न स्वनकारयेत् स्वस्थो वा न कुर्यात् नापि कारयेत् तस्य किंचिदवशेषस्यापि कृतस्य कर्मणो वेतनं न देयम् २१७ ॥
एष धर्मोऽखिलेनोक्तो वेतनादानकर्मणः अत ऊर्द्ध्वं प्रवक्ष्यामि धर्मं समयभेदिनाम् २१८ ॥
एष धर्म इति एषा व्यवस्था वेतनादानकर्मणो निःशेषेणोक्ता अतोऽनंतरं संविदातिक्रमकारिणाम् दंडादिव्यवस्थां वदिष्यामि २१८ ॥

म॰
टी॰ सं॰
१२४

यो ग्रामदेशसंघानां कृत्वा सत्येन संविदं विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् २१९ यो ग्रामेति ग्रामदेशयोर्यः संघः समूहस्तयोर्वा यो वणिगादिसमूहस्तद्दमस्माभिः कर्तव्यमपरिहार्यमित्येवंरूपं संकेतं सत्यादिशपथेन कृत्वा तन्मध्ये यो नरो लोभादिना तिक्रामेत्तं राजा राष्ट्रान्निर्वासयेत् २१९ ॥

निगृह्य दापयेच्चैनं समयव्यभिचारिणं चतुःसुवर्णान्षण्णिष्कांश्छतमानं च राजतं २२० निगृह्येति ग्रथयेनं संविद्व्यतिक्रमकारिणं निगृह्य चतुरः सुवर्णान्षण्णिष्कान्प्रत्येकं चतुःसुवर्णपरिमितान् राजतं च शतमानं विंशत्यधिकरक्तिकाशतत्रयपरिमाणं त्रयमेतद्विषयलाघवगौरवापेक्षया समुच्चितं व्यस्तं वा राजा दंडं दापयेत् २२० ॥

एतद्दंडविधिं कुर्याद्धार्मिकः पृथिवीपतिः ग्रामजातिसमूहेषु समयव्यभिचारिणां २२१ ॥
एतमिति ग्रामेषु ब्राह्मणादिजातिसमूहेषु च संविद्व्यतिक्रमकारिणामिमं दंडविधिं धर्मप्रधानो राजानुतिष्ठेत् २२१ ॥

क्रीत्वा विक्रीय वा किंचिद्यस्येहानुशयो भवेत् सोन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा २२२ क्रीत्वेति क्रीत्वा विक्रीय वा किंचिद्द्रव्यमविनश्वररूपं स्थिरार्घं भूमितामपट्टादि यस्य लोके पश्चात्तापो जायते तेन साधु मया क्रीतमिति मन्क्रीतं दशाहमध्ये प्रत्यर्पयेत् विक्रीतं वा गृह्णीयात् २२२

परेण तु दशाहस्य न दद्यान्नापि दापयेत् आददानो ददच्चैव राज्ञा दंड्यः शतानि षट् २२३
परेणेति दशाहादूर्ध्वं क्रीतं न त्यजेन्नापि विक्रीतं विक्रायको बलेन दापयेत् विक्रीतं बलेन गृह्णन् क्रीतं च परित्यजन् राज्ञा षट्शतानि पणानां दंड्यः २२३ ॥

यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति तस्य कुर्यान्नृपो दंडं स्वयं षण्णवतिं पणान् २२४ यस्त्विति योन्मत्तत्वादिदोषवतीं कन्यां वराय यः प्रयच्छति तस्य राजा स्वयमादरेण षण्णवतिपणात्मकं दंडं कुर्यात् स्वयंग्रहणेन कन्यामनतिक्रम्य न्यायमतत्युक्तं २२४
न्येनोक्तं दंडविशेषाभिधानार्थमिदं उन्मादादिदोषानकथयित्वा दोषवतीं कन्यां वराय यः प्रयच्छति २२४ ॥

अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः स शतं प्राप्नुयाद्दंडं तस्या दोषमदर्शयन् २२४ ॥
अकन्येति नेयं कन्या क्षतयोनिरियमिति यो मनुष्यो द्वेषेण ब्रूयात् स तस्याः उक्तं दोषमविभावयन् पणशतं राजदंडं प्राप्नुयात् २२४ ॥

पाणिग्रहणिका मंत्राः कन्यास्वेव प्रतिष्ठिताः नाकन्यासु क्वचिन्नॄणां लुप्तधर्मक्रिया हि ताः २२५ ॥

पाणिग्रहणिका मंत्राः कन्यास्वेव प्रतिष्ठिता इत्येवमादयो वैवाहिका मनुष्याणां मंत्राः कन्यास्वक्षतयोनिष्वेव व्यवस्थिता नाकन्या
सु क्षतयोन्यां कन्येति वादिनो दंडाय पाणिग्रहणेति सर्वमार्देवं कन्यास्वेव प्रतिष्ठिता अक्षतयोनिष्वेव वैवाहिकमंत्रैः संक्रियमाणा अपि यस्मादपगतधर्मविवाहादिकि
विषये क्वचित्प्रशस्तधर्मविवाहसिद्धये व्यवस्थिता अत्र समवेतार्था ततः तत्तयोर्वैवाहिकमंत्रहोमादिविषयकमिदं प्रागभिणी संक्रियते तथा वा कन्यास्वक्षतयोनिष्वेव
यायालिस्याभवति नासेयमो विवाहसंस्कारः ततस्तयोर्वैवाहिको विधिः कर्तव्यः विभिवेणः समये नाग्निसाक्षिकइति गांधर्वेषु विवाहेषु होममंत्रादिविधिः
ह्येनैव विवाहसंस्कारस्य वक्ष्यमाणत्वात् देवलेन तु गांधर्वेषु विवाहे वैवाहिको विधिः कर्तव्यः सामान्यविशेषन्यायात् इतरो विषयोऽप्यक्षतयोनिविवाहस्यायमेवो
क्तः गांधर्वस्त्र्योपगमनपूर्वकोऽपि भवति तस्य तद्विषये यमंत्रमनोऽक्षम
पदेशः २२६ ॥

123A

पाणिग्रहणिका मंत्रा नियतं दारलक्षणं तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे २२७ पाणिग्रहणिका इति वैवाहिका मंत्रा नियते निश्चितं भार्यात्वनिमित्तं तेषां तु मंत्राणां सप्तमे सप्तपदे भार्यात्वनिष्पत्तेः शास्त्रज्ञैः समाप्तिर्विज्ञेया एवं च सप्तपदीदानात्प्राग्भार्यात्वानिष्पत्तेः सप्तपदे जज्ञाप्तिर्हेम् २२७॥

यस्मिन्यस्मिन्कृते कार्ये यस्येहानुशयो भवेत् तमनेन विधानेन धर्म्ये पथि निवेशयेत् २२८॥ यस्मिन्निति न केवलं क्रयविक्रययोरेव अपि तु यस्मिन्यस्मिन् संविदिते नादौ कार्ये यस्य पश्चात्तापो जायते तमनेन दशाहविधिना धर्मादनपेते मार्गे नृपः स्थापयेत् २२८॥

पशुषु स्वामिनां चैव पालानां च व्यतिक्रमे विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः २२९॥

पशुष्विति गवादिपशुविषये स्वामिनां पालानां च व्यतिक्रमे जाते विवादे सम्यग्धर्मम् यथातत्त्वमवश्यं वक्ष्यामि २२९॥

दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात् २३० दिवेति दिवा पशूनां पालहस्तन्यस्तानां योगक्षेमविषये दोषे पाले जाते सहर्त्तव्यता रात्रौ पुनः पालेन समर्पितानां स्वामिगृहस्थितानां स्वामिनो दोषोऽन्यथा यदि रात्रावपि पालहस्तगता भवेत् तिनत्र दोषे सति पाल एव गर्हणीयतां प्राप्नोति २३०॥

गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वरां गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिः २३१॥

गोपः क्षीरेति यो गोपालो गोभ्यः क्षीरेणाभृतो न भक्तादिना स स्वाम्यनुज्ञया दशभ्यो गोभ्यः श्रेष्ठामेकां गां भृत्यर्थं दुह्यात् भक्तादिरहिते गोपाले भृतिः स्यात् एवं चैक गवीक्षीरदानेन दशगोपालये दितं स्व २३१ नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतं हीनं पुरुषकारेण प्रदद्यात्पाल एव तु २३२॥

नष्टमिति नष्टं दृष्टिपथातीतं कृमिभिर्नाशितं श्वभिर्हतं तलादितं विषमादिप्रदेशे मृतं प्रदर्शनार्थं चैतत् यालं संबंधिपुरुषव्यापाररहितं मृतं स्खलायितं गवादिपशु पालएव तत्स्वामिने दद्यात् २३२

विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति यदि देशे च काले च स्वामिनः स्वस्य शंसति २३३॥

विघुष्यतिचौरैः पुनः बटहादिना विघुष्य हृतं पालो दातुं नार्हति विघुष्येति चौराणां बहुत्वप्रबलत्वदर्शनार्थं यदि स निहिते देशे हरणकाले नंतरमेव स्वीय स्वामिनः कथयति २३३

कर्णौ चर्म च बालांश्च बस्तिं स्नायुं च रोचनां पशुषु स्वामिनो दद्यान्मृतेष्वङ्गानि दर्शयेत् २३४

वर्णाविति स्वयं मृतेषु पशुषु कर्णचर्मलांगूलवालनाभ्यधोभागस्नायुरोचना स्वामिनो दद्यात् अन्यानि च विज्ञानसाधारणानि शृंगखुरादीनि दर्शयेत् २३४

अजाविके तु संरुद्धे वृकैः पाले त्वनायति यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत् २३५॥

अजाविके इति अजाविकाश्च अजाविकं गवाश्वप्रभृतीनि चेति द्वंद्वैकवद्भावः तस्मिन् अजाविके वृकैः परिहते सति पालेनागच्छति यामजामेकां वा वने वृको हन्यात्तत्पालस्य दोषः स्यात् २३५

तासां चेदवरुद्धानां चरन्तीनां मिथो वने यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी २३६॥

मा॰
टी॰ से॰
१२४

ताश्चेति तासामजाविकानां पालेन नियमितानां संघीभूय वने चरंतीनां मध्याद्यदि कश्चिद्वृकः उत्पत्य हन्यात्पालदितो यां कंचिद्धन्यान्न पालस्तद्दोषभाक् २३६

धनुःशतं परीहारो ग्रामस्य स्यात्समंततः शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु २३७ धनुःशतमिति चतुर्हस्तो धनुः शम्या यष्टिः तस्याः पाताः प्रक्षेपा ग्रामसमीपे सर्वासु दिक्षु चतुर्हस्तशतानि शम्याप्रक्षेपान्वा यावत् पशुप्रचारार्थं शस्यवपनादिसंरोधपरिहारः कार्यः नगरसमीपे पुनरयं त्रिगुणः कर्तव्यः २३७

तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि न तत्र प्रणयेद्दंडं नृपतिः पशुरक्षिणां २३८ ॥

तत्रापरीति तस्मिन्परिहारस्थाने यदि केनचिद्धान्यं वृतिमकृत्वा उप्तं तत्र पशवो भक्षयेयुः तत्र पशुपालानां नृपो दंडं न कुर्यात् २३८ ॥

वृतिं तत्र प्रकुर्वीत यामुष्ट्रो न विलोकयेत् छिद्रं च वारयेत्सर्वं श्वसूकरमुखानुगं २३९ वृतिमिति तत्र परिहारस्थाने क्षेत्रे वृतिं कंटकादिमयीं तथाविधामुच्छ्रितां कुर्यात् यामपरपार्श्वस्थ उष्ट्रो न विलोकयेत् तस्यां च यत्किंचिच्छिद्रं श्वसूकरमुखप्रवेशयोग्यं तत्सर्वं संवृणुयात् २३९ ॥

पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथवा पुनः सपालः शतदंडार्हो विपालान्वारयेत्पशून् २४० पथीति वर्त्मसमीपे ग्रामसमीपे वा परिहारे क्षेत्रे वृते सपालः पशुपालानिवारितो धान्यादिनाशं कुर्वन् विशेषो यदा भक्षितं तदा पणशतं दंड्यः विपालान्पुनर्भक्षणप्रवृत्तान्पशून्क्षेत्रस्वामी निवारयेत् २४०

क्षेत्रेष्वन्येषु तु पशुः सपादं पणमर्हति सर्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा २४१ ॥ क्षेत्रेष्विति वर्त्मग्रामान्तव्यतिरिक्तेषु क्षेत्रेषु पशुर्भक्षयन्सपादं पणं दंडमर्हति सपालेऽपि पालवद्दंड्यः सर्वत्र क्षेत्रे पशुभक्षितं फलं क्षेत्रस्वामिने स्वामिना वा यथापराधं दातव्यमिति निश्चयः २४१ ॥

अनिर्दशाहां गां सूतां वृषान्देवपशूंस्तथा सपालान्वा विपालान्वा न दंड्यान्मनुरब्रवीत् २४२ अनिर्दशाहामिति प्रसूतां गाम
निर्गतदशाहां तथा च वृषान् लौकिकोत्सृष्टवृषान् देवसंबंधिपशून्पालसहितान्वा पालरहितान्वा भक्षयतः प्रवृत्तान्मनुर्दंड्यान्नाह उत्सृष्टवृषाणामपि गवां मध्ये गोकुले
धारणात्सपालत्वसंभव २४२

क्षेत्रियस्यात्यये दंडो भागाद्दशगुणो भवेत् ततोऽर्धदंडो भृत्यानामज्ञानात्क्षेत्रिकस्य तु २४३ सति यावान्राजभागस्य तेन हानिः कृता ततो दशगुणो दंडः स्यात्क्षेत्रिकाविदिते भृत्यापराधे ततोऽर्धदंडः क्षेत्रिणः सस्यनाशे तु २४३ ॥
क्षेत्रियस्येति क्षेत्रकर्षकस्य स्वामिनः पशुपालस्य अत्यये अनवधानात् शस्यनाशे यथाकाले वपनादौ वा अप्रवृत्ते
नाशुक्लपापार्थं क्षेत्रिकं स्ववदवश्य

एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः स्वामिनां च पशूनां च पालानां च व्यतिक्रमे २४४

एतदिति स्वामिनां पालानां हरणादपराधे पशूनां च शस्यभक्षणात् व्यतिक्रमे पशुस्वामिनां भूपतिरेतत् पूर्वोक्तं कर्तव्यमनुतिष्ठेत् २४४

ग्रामयोर्द्वयोः ज्येष्ठे मासि नयेत्सीमां सुप्रकाशेषु सेतुषु २४५
सीमां प्रति समुत्पन्ने विवादे

124A सामामितिद्वयोर्ग्रामयोर्ग्रामयोर्मर्यादां प्रतिविप्रतिपन्नायां ज्येष्ठमासि ग्रीष्मे वितोपशुष्कतृणात् प्रकटीभूतेषु सीमालिङ्गेषु राजा सीमां निश्चिनुयात् २४५

सीमावृक्षांश्च कुर्वीत न्यग्रोधाश्वत्थकिंशुकान् शाल्मलीन् सालतालांश्च क्षीरिणश्चैव पादपान् २४६

सीमावृक्षानिति न्यग्रोधादीन् वृक्षानुदुम्बरादीन् विरसम्यापि तान् सीमालिङ्गभूतान् कुर्वीत २४६॥

गुल्मान्वेणूंश्च विविधान् शमीवल्लीस्थलानि च शरान्कुब्जकगुल्मांश्च तथा सीमा न नश्यति २४७॥

गुल्मानिति गुल्मान् बहुकाण्डरहितान् वेणूंश्च बहुप्रकारान् कण्टकानाल्पकण्टकत्वादिभेदेन नानाप्रकारान् शमीवल्लीः संतताः स्थलानि कृत्रिमोन्नतभूभागान् शरान् कुब्जकान् गुल्मांश्च बहुप्रभोगत्वेनादरार्थं पृथक् निर्दिष्टान् सीमालिङ्गभूतान् कुर्यात् एवं कृते सीमा न नश्यति २४७॥

तडागान्युदपानानि वाप्यः प्रस्रवणानि च सीमासन्धिषु कार्याणि देवतायतनानि च २४८ तडागानिति तडागकूपदीर्घिका जलनिर्गममार्गदेवगृहाणि सीमासन्धिषु ग्रामद्वयसन्धिस्थाने च कर्तव्यानि एतेषु सीमानिर्णयाय लोके विख्यातत्वेन तत्कार्यजनाश्रयेक्षणानि प्रायेण चिरकाले ऽपि साक्षिणो भवन्ति २४८

उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत् सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययं २४९

उपच्छन्नानीत्यादि सीमानिर्णये सर्वदास्मिन् लोके मनुष्याणां भ्रमदर्शनात् दृष्ट्वा ऽभिहितवक्ष्यमाणानि गूढानि वक्ष्यमाणानि सीमाचिह्नानि कारयेत् २४९

अश्मनोऽस्थीनि गोवालांस्तुषान्भस्मकपालिकाः करीषमिष्टकाङ्गारांश्छर्करावालुकास्तथा २५० यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत् तानि सन्धिषु सीमायामप्रकाशानि कारयेत् २५१ अश्मन इति यानीति स्थूलप्रस्तरास्थिगोबालान् तुषभस्मकपालिका शुष्कगोमयं पक्वेष्टकाङ्गारशर्करासिकता एतान्यन्यान्येवंप्रकाराणि कालान्तरेणापि स्थिरभूतानि यानि चिरकालेनापि भूमिर्न भक्षयति तानि ग्रामयोः सन्धिषु सीमायां प्रच्छन्नानि भूमौ निखातानि सीमानिर्णयार्थं वर्तमानानि विवदमानयोः ... शुद्धानि कृत्वा प्रच्छन्नानि भूमौ निखातानि कारयेत् २५१

एतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः पूर्वभुक्त्या च सततमुदकस्यागमेन च २५२॥

एतैरिति विवदमानयोर्ग्रामयोः प्रागुक्तैर्लिङ्गैः राजा सीमां निश्चिनुयात् पुनर्विच्छिन्नयाप्युक्त्या सीमानिर्णयो न तत्र त्रिपुरुषादिकन्याय्यः तस्मात्पूर्वं सीमा निर्णीता ग्रामद्वयस्य सन्निहितस्य यादृग्वाहप्रवाहो वा तद्ग्रामयोः सीमां निश्चिनुयात् २५२॥

यदि संशय एव स्याल्लिङ्गानामपि दर्शने साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णयः २५३ यदीति यदि संशय एव स्यात् दर्शनेऽपि केन विसदृशत्वं लिङ्गानामाद्यसीमात्वेन संदिग्धानि तदा सीमा तत्र संशये सति साक्षिप्रत्ययादि निर्णयः स्यात् तदा साक्षिप्रमाणक एव सीमावि-

ग्रामीयककुलानां च समक्षं सीम्नि साक्षिणः प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः २५४ वादनिर्णयो भवेत् २५३

म.
बृ. सं.
१२५ 125

ग्रामीति ग्रामिकश्च न समूहो तो ग्राममध्यस्थ मित्रकुल्या वादिप्रतिवादिनो श्च समक्षं सीमाविषये सीमालिंगसंदेहे लिंगानि साक्षिणः पृष्टव्याः २५४ ॥

ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयं निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः २५५

ते इति ते पृष्टाः साक्षिणः समस्ता न द्वैध्येन सीमाविषये येन प्रकारेण निश्चयं ब्रूयुः तेन प्रकारेण विस्मरणार्थं पत्रे सीमां लिखेत् तांश्च सर्वानेव साक्षिणो नामभिः सह लिखेत् २५५

शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसं २५६

श्रवणा पि रक्तवाससः सीमां नयेयुरिति याज्ञवल्क्यवचनात् रक्तपुष्पमाला लोहितवाससो मस्तके मृल्लोष्टान् गृहीत्वा यदस्माकं सुकृतं तन्निष्फलं साक्षिणस्त्वां मा स्मीयैः सुकृतैः शा

शिरोभिरिति ते साक्षिण इति सामान्य पिताः सन्तः तां सीमां यथार्थं साक्षिणो नयेयुः २५६

यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमं २५७ ॥

यथोक्तेनेति ते सत्यप्रधानाः साक्षिणः शास्त्रोक्तेन विधानेन निर्णयं तो निष्पापा भवन्ति अन्यथा नयन्तो निश्चितं नः प्रत्येकं पणशतद्वयं दण्डं दाप्या भवेयुः २५७ ॥

साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ २५८ ॥

साक्ष्येति ग्रामद्वयमध्ये सीमाविवादे साक्ष्यभावे चतुर्दिशं समन्तभवाः सामन्तास्तद्वासिनः चत्वारो ग्रामाः साक्षित्वेन राजसमक्षं सीमानिर्णयं कुर्युः २५८ ॥

सामन्तानामभावे तु मौलानां सीम्नि साक्षिणां इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान् २५९

सामन्तानामिति साक्षित्वेन राजसमक्षं सामन्तभवग्रामनिर्माणकालादारभ्य पुरुषक्रमेणागतास्तन्नामग्रस्थानां सीम्नि साक्षिणामभावे इमान्वक्ष्यमाणान्वनचारिणः पुरुषानप्यनुयुञ्जीत २५९

व्याधाञ्छाकुनिकान्गोपान्कैवर्तान्मूलखानकान् व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः २६०

व्याधेति लुब्धकान् पक्षवधजीविनः गोपालान् मत्स्यजीविनो मूलोत्पाटवृत्तिजीविनः सर्पग्राहिणः शिलोञ्छवृत्तीनन्यांश्च फलपुष्पेन्धनार्थं वनचरान् वहारिणः पृ
च्छेत् एते हि स्वयोजनार्थं तेन ग्रामेण सदैव वनं गच्छन्ति तेऽत्र सीमाभिज्ञा भवन्ति २६० ॥

ते पृष्टास्तु यथा ब्रूयुः सीमासन्धिषु लक्षणं तत्तथा स्थापयेद्राजा धर्मेण ग्रामयोर्द्वयोः २६१ ॥

ते पृष्टा इति ते व्याधादयः पृष्टाः सीमासन्धिषु ग्रामसन्धिषु येन प्रकारेण चिह्नं ब्रूयुः तेनैव प्रकारेण राजा द्वयोर्ग्रामयोः सीमां व्यवस्थापयेत् २६१ ॥

क्षेत्रकूपतडागानामारामस्य गृहस्य च सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः २६२ ॥

क्षेत्रेति एकग्रामेऽपि क्षेत्रकूपतडागोद्यानगृहाणां सीमासेतुविवादे सामन्तदेशावस्थितसाक्षिप्रमाणकं एव मर्यादाचिह्ननिश्चयो विज्ञेयो न व्याधादिप्रमाणकः २६२

सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणां सर्वे पृथक्पृथग्दण्ड्या राज्ञा मध्यमसाहसं २६३

सामन्तेति सीमाचिह्नमिति
विवदमानानां मनुष्याणां यदि सामन्तदेशवासिनो मिथ्या ब्रूयुस्तदा ते सर्वे प्रत्येकं राज्ञा मध्यमसाहसं दण्डनीयाः एवं वा सामन्तस्य पूर्वोक्तसाक्षिणो दण्डनीयाः २६३

125.A

गृहं तडागमारामं क्षेत्रं वा भीषया हरन् शतानि पंच दंड्यः स्यादज्ञानाद्द्विशतो दमः २६४ ॥

गृहमिति गृहतडागौ प्रसिद्धौ आरामं पुष्पवाटिकादि भयकथनपूर्वमाक्रम्य हरणे पंचशतानि दंडनीयः स्यात् अज्ञानात् हरतो द्विशतो दमः २६४॥

सीमायामविषह्यायां स्वयं राजैव धर्मवित् प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिः २६५ सीमेति लिंगाभावात् ज्ञायमाने सीमा यां परिच्छेत्तुमशक्यायां राजैव धर्मज्ञः स्वयमेतेषामुपकारं कुर्वाणः प्रामसमृद्धयमध्यवर्तिनीं विवादविषयां भूमिं प्रदिशेत् ग्रामवासिनामुपकारातिशयो भवतीति तद्धानिरेकेन च महानेति चोक्तं तेषामेव दद्यादिति शास्त्रव्यवस्था

एषोऽखिलेनाभिहितो धर्मः सीमाविनिर्णये अतः ऊर्ध्वं प्रवक्ष्यामि वाक्पारुष्यविनिर्णयं २६६

एष इति एष सीमानिश्चयार्थो नीतिः शेषेण उक्तः अतः ऊर्ध्वं वाक्पारुष्यं वक्ष्यामि दंडपारुष्यात् शाकशाकपारुष्यं पूर्वं तेः पूर्वमभिधानेऽपि क्रमस्तु मांसं यथा पारुष्ये दंडं वा विकेद्रतिदंडशेषत्वात् सर्वत्रानुष्ठेयं पूर्वं निपातनं २६६

शतं ब्राह्मणमाक्रुश्य क्षत्रियो दंडमर्हति वैश्योऽप्यर्धशतं द्वे वा शूद्रस्तु वधमर्हति २६७॥

शतमिति द्विजश्रेष्ठो ब्राह्मणं प्रति पारुष्यं प्रकृष्टक्रुद्धः क्षत्रियाः पणशतं दंडमर्हति वैश्योऽर्धशतं वा द्विशतं वा लाघवगौरवापेक्षयैव स्यात् शूद्रोऽप्येवं ब्राह्मणं क्रोशेता ताडनादिरूपं वधमर्हति २६७

पंचाशद्ब्राह्मणो दंड्यः क्षत्रियस्याभिशंसने वैश्ये स्यादर्धपंचाशच्छूद्रे द्वादशको दमः २६८॥

पंचाशदिति ब्राह्मणः क्षत्रियस्याक्रोशरूपाभिशंसने कृते पंचाशत्पणान् दंड्यः वैश्ये पंचविंशतिः शूद्रे द्वादशपणाः क्रमेण ब्राह्मणस्य दंडः स्यात् २६८॥

समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् २६९ समेति द्विजातीनां समानजातिविषये यथा क्रोशे द्वादशपणो दंडः अवचनीयेषु नराक्रोशवादेषु आत्ममातृभगिन्यादिदश्लीलरूपेषु तदेव तिन्नपुंसकनिर्देशात् शतं ब्राह्मणमाक्रुश्येत्यादिषूक्तं तदेव द्विगुणं दंडरूपं भवेत् २६९

एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन् जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः २७०॥

एकेति शूद्रो द्विजातीन् पातकाभियोगिना वाचाक्रुश्य जिह्वाच्छेदं लभेत् यस्मादसौ पादाख्यात् निकृष्टांगाज्जातः २७०॥

नामजातिग्रहं त्वेषामभिद्रोहेण कुर्वतः निःक्षेप्योऽयोमयः शंकुर्ज्वलन्नास्ये दशांगुलः २७१॥

नामेति अभिद्रोहेणाक्रोशेन ब्राह्मणादीनां रे देवदत्त ब्राह्मणापसदेत्याक्रोशेन नामजातिग्रहणं कुर्वतो लोहकीलो ज्वलन्नापदीतो दशांगुलो मुखे प्रक्षेप्यः २७१

धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः २७२॥

धर्मेति कथं चिद्धर्मलेशमवगम्यायं तेऽयं धर्मोऽनुष्ठेय इति ब्राह्मणस्याहंकारादुपदिशतोऽस्य शूद्रस्य मुखे कर्णयोश्च ज्वलत्तैलं राजा प्रक्षेपयेत् २७२॥

श्रुतं देशं च जातिं च कर्म शारीरमेव च वितथेन ब्रुवन्दर्पाद्दाप्यः स्याद्द्विशतं दमं २७३॥९२

म
नु॰ मे॰
१२६

126

कृतेति समानजातिविषयमिदं दंडलाघवात् न तु शूद्रस्य द्विजात्यादिविषयम् न ह्यस्य ततः कृतेनं भवानेन देशजातिनन्नवेयम जातिर्न च शारीरसंस्कार
श्रुतं नयनादिकं कृतमित्यहंकारेणापि मिथ्याब्रुवन् द्विशतं दंडं दाप्यः स्यात् वितथेनेति प्रकृत्यादिष्वपयसबलानमितिनन्वीया २७३॥

काणं वाप्यथवा खंजमन्यं वापि तथाविधं तथ्येनापि ब्रुवन्दाप्यो दंडं कार्षापणावरं २७४ सत्येनापि काणादिशब्देन ब्रुवन्न्य-
नेतासेनदा कार्षापणं दंडं दाप्यः २७४ मातरं पितरं जायां भ्रातरं तनयं गुरुं आक्षारयञ्छतं दाप्यः पंथानं चाददद्गुरोः २७५॥

मातेति आक्षारितः तारितोऽभिशमः स्यात् अभियानिकाः मात्रादीन् पातकादिना अभिशपन् गुरोश्च पंथानमददत् एकविंशतं दंडः अत्र मातृभ्रातृभार्यादीनां गुरुलघुपाप्म
अभिशापेन दंडसाम्यं समापनं यथा तथा विधि तु भ्रातुरभेदनमित्युक्ता मातृपितृपित्रादीनां परस्परभेदेन कर्तव्यो यम दंडविधिरिति व्याख्यातवान् २७५॥

ब्राह्मणक्षत्रियाभ्यां तु दंडः कार्यो विजानता ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः २७६ ब्राह्मणेति ब्राह्मणक्षत्रियाभ्यां परस्परं
पतनीयाक्रोशे कृते दंडः शास्त्रज्ञेन राज्ञा दंडः कार्यः दंडमेव विशेषेणाह ब्राह्मणे क्षत्रियाक्रोशिनि प्रथमसाहसः कार्यो ब्राह्मणाक्रोशिनि पुनः क्षत्रिये मध्यमसाहसः २७६॥

विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः छेदवर्जं प्रणयनं दंडस्येति विनिश्चयः २७७॥

विडिति वैश्यशूद्रयोरन्योन्यजातिं प्रति पतनीयाक्रोशे ब्राह्मणक्षत्रियवत् वैश्ये शूद्राक्रोशिनि प्रथमसाहसः शूद्रे वैश्याक्रोशिनि मध्यमसाहसः एवं दंडस्य प्रणयनं जि-
ह्वाच्छेदरहितं यथा वक्तव्यमिति शास्त्रनिश्चयः एवं चैकजातिर्द्विजातीनिति विशेषात् जिह्वाच्छेदो वैश्यं निवारितो ब्राह्मणक्षत्रियाक्रोशविषय एवावतिष्ठते २७७॥

एष दंडविधिः प्रोक्तो वाक्पारुष्यस्य तत्त्वतः अत ऊर्ध्वं प्रवक्ष्यामि दंडपारुष्यनिर्णयं २७८॥

एष इति एषोऽनंतरोक्तो वाक्पारुष्यस्य यथावत् दंडविधिरुक्तः इतः परं ताडनादेर्दंडपारुष्यस्य निर्णयं वक्ष्यामि २७८॥

येन केनचिदंगेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनं २७९॥ येनेति अन्त्यजः शूद्रो येन
केनचित्करचरणादिनांगेन मात्रादंडादिनाव्यवहितेन वा द्विजातिं प्रहरेत् तदेवांगमस्य छेत्तव्यमित्ययं मनोरुपदेशः मनुग्रहणमादरार्थं अत्रैवोत्तरः प्रपंचः २७९

पाणिमुद्यम्य दंडं वा पाणिच्छेदनमर्हति पादेन प्रहरन्कोपात्पादच्छेदनमर्हति २८०॥

पाणिमिति प्रहर्तुं पाणिं दंडं वोद्यम्य पाणिच्छेदं लभते पादेन कोपात् प्रहरन् पादच्छेदं प्राप्नोति २८०॥

सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः कट्यां कृतांको निर्वास्यः स्फिचं वास्यावकर्तयेत् २८१

सहेति ब्राह्मणेन सहैकासने उपविष्टः शूद्रः कट्यां तप्तलोहकृतचिह्नो देशान्निर्वासनीयः स्फिचं वा अस्य यथा न म्रियते तथा छेदयेत् २८१॥

अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः अवमूत्रयतो मेढ्रमवशर्धयतो गुदं २८२॥ अवेति दर्पाद्ब्राह्मणोपरि ब्राह्मणानवमानय-
तः शूद्रस्य राज्ञा द्वावोष्ठौ छेदयेत् मूत्रप्रक्षेपणाय मानयतो मेढ्रं ... गुदशब्दः तेनावमानयतो दर्पात् प्रमादात् गुदं छेदयेत् २८२॥

126A

केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् पादयोर्दाढिकायां च ग्रीवायां वृषणेषु च २८३॥ केशेष्विति दर्पाद्धिंसाबुद्ध्या वा पीडा
ग्रहणं कारेण केशेषु ब्राह्मणं गृह्णतः शूद्रस्य पीडार्थं ज्ञाताज्ञातावेत्यविचारयन् हस्तौ छेदयेत् पादयोः श्मश्रुणि ग्रीवायां वृषणे च हिंसार्थं गृह्णतो हस्तद्वयच्छेदमेव कुर्यात्
२८३

त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः मांसभेत्ता तु षण्निष्कान्प्रवास्यस्त्वस्थिभेदकः २८४॥ त्वग्भेदेति चर्ममात्रभे
दकः समानजातिर्न तु शूद्रो ब्राह्मणस्य दण्डेनाल्पत्वात् पणशतं दण्डनीयः तथा रक्तोत्पादकोऽपि पणशतमेव दण्ड्यः मांसभेदी षण्निष्कान्दाप्यः अस्थिभेदकस्तु देशान्निर्वास्यः
२८४

वनस्पतीनां सर्वेषामुपभोगो यथा यथा तथा तथा दमः कार्यो हिंसायामिति धारणा २८५ वनस्पतीनामिति वृक्षगुल्मादीनां म
ध्ये येन येन प्रकारेण उपभोगः फलपुष्पपत्रादिना उत्तममध्यमाधमरूपो भवति तथा तथा हिंसायामुत्तममध्यमाधमो दण्डो विधेय इति निश्चयः तथा च विष्णुः फलो
पभोगद्रुमच्छेदी तूत्तमसाहसं पुष्पोपभोगद्रुमच्छेदी मध्यमं वल्लीगुल्मलताच्छेदी कार्षापणशतं च पणमेवं मनुनोक्तो वेदितव्यः २८५॥

मनुष्याणां पशूनां च दुःखाय प्रहृते सति यथा यथा महद्दुःखं दण्डं कुर्यात्तथा तथा २८६ मनुष्याणामिति मनुष्याणां पशूनां पीडोत्पा
दनार्थं प्रहारे कृते सति यथा यथा पीडाधिक्यं तथा तथा दण्डमप्यधिकं कुर्यात् एवं च मर्मस्थानादौ त्वग्भेदनादिषु कृते पूर्वोक्तभेदकः शतं दण्ड्य इत्यस्मादपि अधिको दण्डो वि
शेषोपदेशाय कर्तव्यः २८६

अङ्गावपीडनायां च व्रणशोणितयोस्तथा समुत्थानव्ययं दाप्यः सर्वदण्डमथापि वा २८७॥
अङ्गेति अङ्गानां करचरणादीनां व्रणशोणितयोश्च पीडनायां सत्यां समुत्थानार्थं व्ययो भवति तावता कालेन पथ्यौषधादिना यावान्व्ययो भवति तमसौ दापनीयः अथ यस्य
यः पीडोत्पादकोऽननुमिच्छति तेन सर्वः समुत्थानव्ययाय सर्वदण्डस्तेनेन दण्डेन राज्ञा दाप्यः २८७॥ अयं यावता कालेन स्वास्थ्यं प्राप्नोति स समुत्थानः॥

द्रव्याणि हिंस्याद्यो यस्य ज्ञानतोऽज्ञानतोऽपि वा स तस्योत्पादयेत्तुष्टिं राज्ञो दद्याच्च तत्समम् २८८॥
द्रव्याणीति द्रव्याण्युक्तविशेषदण्डानि कटकनामव्यादीनि यो यस्य ज्ञानादज्ञानाद्वा नाशयेत्स तस्य द्रव्यान्तरादिना तुष्टिमुत्पादयेत् राजे च विनाशितद्रव्यसमं दण्डं दद्या
त् २८८

चर्मचार्मिकभाण्डेषु काष्ठलोष्टमयेषु च मूल्यात्पञ्चगुणो दण्डः पुष्पमूलफलेषु च २८९॥
चर्मेति चर्मघटितवरत्रादौ चर्मकाष्ठमृत्तिकानिर्मितेषु च भाण्डेषु पुष्पमूलफलेषु च स्वनाशितेषु तन्मूल्यात्पञ्चगुणो दण्डो राज्ञो देयः स्वामिनश्च तुष्टिः कार्यानीयेषु २८९

यानस्य चैव यातुश्च यानस्वामिन एव च दशातिवर्तनान्याहुः शेषे दण्डो विधीयते २९० यानस्येति यानस्य रथादेः यातुः सारथ्यादेर्यानस्वा
मिनश्च यस्य तद्यानं तेषां छिन्ननास्यादीन्दश निमित्तानि दण्डमतिक्रम्य वर्तन्ते निमित्तेषु सत्सु प्राणिमारणेऽप्यनपराधकृतेन यानस्वाम्यादीनां दण्डो न भवतीति मन्वादय आहुः एत
द्व्यतिरिक्तनिमित्तेषु पुनर्दण्डः स्मर्यते २९०

छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च।
च २९१ छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत् २९२॥

127

मा॰
वृ॰ सं॰
१२२

छिन्नेति छेदनं इति नासायां भुक्ता स्यशासौ गावयवनाय स्माचेद्बलीवर्दादि नासासंवृषिनीरक्षः छिन्ननास्य रज्जौ बलीवर्दादि केभग्नयुगाद्यका घ्नंगे यंत्राणा
न्यमिवंथनानां च्छेदनेयो कस्य पशुर्ग्रीवारज्जोरथेभः प्रहरणस्यच्छेदनेत्रपमरण्पमरेत् चेः शहेमारथ्यादिना कृतेनवयानेन प्राणिहिंसाद्युपविनाशयोः कृतयाः मारथ्यादेर्दंडो नास्तीति मनुराह २९१

यत्रापवर्तते युग्यं वैगुण्यात्प्राजकस्य तु तत्र स्वामी भवेद्दंड्यो हिंसायां द्वि

यत्रेति यत्र सारथ्या रके पाल्पायानमन्यथा व्रज शतं दमं २९२॥ तित्रहिंसायां मथिदिन सारथ्यिति यानगात्स्वामी द्विशतं दंडं दाप्यः स्यात् २९३

प्राजकश्चेद्भवेदाप्तः प्राजको दंडमर्हति युग्यस्थाः प्राजकेनाप्ते सर्वे दंड्याः शतंशतं २९४ प्राजक इति यदि न सारथिर्बो
कृद्विशतं दमं व स्यमाणं च मनुष्यमारणाद्यादिकं दंडमर्हति न स्वामी यच्च कुशले न त स्मिन्सारथ्यि स्वामिवृत्तिरिकायुग्मे पियावारूढाः कुशल सारथ्यि कृयानारूढा सर्वे प्रत्येकं शतं शतं दंड्याः २९४

स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा प्रमापयेत्प्राणभृतस्तत्र दंडो विचारितः २९५
स चेदिति स चेत्प्राजकः संमुखागतैः पशुरगवादिभी रथांतरेण वा संरुद्धः स्वरथगमनानवधाना स्वमकस्मसर्पणा त्वमासंकटेपि स्वरथतः स्वगान्नियंतरेण येन वा पथा वयवैर्वा प्राणिनो मारयति तत्रा विचारितो दंडः कर्तुपुव २९५

मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषं भवेत् प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु २९६ तत्र मारणाद्रूपः प्रदत्ल भृत्सर्दामितिय
रथसंकटापराधे कीदृशाद्दत्याह मनुष्येति तत्र मनुष्यमारणे प्राजकस्य तत्र यान यानेन हतेऽपि चमे व चौरदंडो न स्यात्किल्बिषं भवेत्
वर्णात् गोगजादिषु महत्सु प्राणिषु मारितेषु उत्तमसाहसस्यार्द्धं पंच शतपणा दंडो भवेत् २९६॥

क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः पंचाशत्तु भवेद्दंडः शुभेषु मृगपक्षिषु २९७ क्षुद्रेति क्षुद्रकाणां पशूनां जातितोवि
शेषापदिष्टेत्ये षां वनचारादीनां वयसां च किशोरादीनां मारणे द्विशतो दंडः स्यात् शुभेषु रूरुपृषतादिपक्षिषु च शुक हंसमसारसादिषु पक्षिषु पंचाशत्पणो दंडो भवेत् २९७

गर्दभाजाविकानां तु दंडः स्यात्पंचमाषिकः माषकस्तु भवेद्दंडः श्वसूकरनिपातने २९८ गर्दभेति गर्दभच्छागैडकानां तु
मारणे यंच रूप्यमाषकपरिमाणो दंडः स्यान्न चात्र हेरण्यमाषग्रहणं अतो न्यूनत्वं दंडाभिधानात् श्वसूकरमारणेषु पुनरेकरूप्यमाषपरिमाणो दंडः स्यात् २९८॥

भार्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा २९९
भार्येति भार्या पुत्रादयः कृतापराधा रज्ज्वा तिलघु वेणुशलाकया वा ताड्या भवेयुः शिलाद्यैस्ताडने विधानाद त्र दंडापवादः २९९॥

पृष्ठतस्तु शरीरस्य नोत्तमांगे कथंचन अतोन्यथा तु प्रहरन्प्राप्तः स्याच्चौरकिल्बिषं ३००॥
पृष्ठत इति रज्ज्वादिभिरपि देहस्य पृष्ठदेशे ताडनीयाः न तु शिरसि प्रकारव्यतिरेकेण प्रहरणे वाग्दंडायनं दंडरूपे चौरदंडभाक् स्यात् ३००॥

127 A

एषोऽखिलेनाभिहितोदंडपारुष्यनिर्णयः स्तेनस्यातःप्रवक्ष्यामिविधिंदंडविनिर्णये ३·१

एष इति एषदंडपारुष्यनिर्णयोऽखिलेनोक्तः अतऊर्ध्वंचौरदंडनिर्णयेविधानंवक्ष्यामि ३·१ स्तेनानांनिगृहादस्ययशोराष्ट्रंचवर्द्धते ३·२॥

परमंयत्नमातिष्ठेत्स्तेनानांनिगृहेनृपः

परममिति चौराणांनियमनेराजापरमप्रयत्नंकुर्यात् यस्माच्चौरनिग्रहाद्राज्ञः ख्यातिर्निरुपद्रवत्वाद्राष्ट्रंचवृद्धिमेति ३·२॥

अभयस्यहियोदातासपूज्यःसततंनृपः सत्रंहिवर्द्धतेतस्यसदैवाभयदक्षिणं ३·३॥

अभयस्येति हियस्माद्यथाराणांचौराणांनियमेननयोनप्रतिःसाधूनामभयंददातिसएवपूज्यः सर्वेषांश्लाघ्योभवति सत्रंगवायनादिक्रतुविशेषः यस्मात्सत्रमिवसततंतत्फल दानंचौराणांनियहरूपाभयदक्षिणा सर्वदैवतस्यवृद्धिमेति अन्यद्धिसत्रंनियतकालीनंनियतदक्षिणंच एतत्सर्वकालीनमभयदक्षिणंचेतिव्यतिरेकालंकारः ३·३॥

सर्वतोधर्मषड्भागोराज्ञोभवतिरक्षतः अधर्मादपिषड्भागोभवत्यस्यह्यरक्षतः ३·४॥

सर्वतइतिप्रजारक्षतोराज्ञःसर्वस्माद्भूम्यदातृवणिगादेर्भूम्यदातृश्रोत्रियादेःसकाशाद्धर्मषड्भागोभवति अरक्षतस्तु अधर्मादपिलोकेकृतकृतात्षड्भागःस्यात्तस्माद्यत्न तःस्तेननियहः राज्ञारक्षांकुर्यात् ननुभूमिविक्रीतत्वात् राज्ञोधर्मषड्भागेनयुक्तइतिवाच्यम् अधर्मषड्भागेनचपरिरक्ष्यस्यपालनीयत्वात् ३·४॥

यदधीतेयद्यजतेयद्ददातियदर्चति तस्यषड्भागभाग्राजासम्यग्भवतिरक्षणात् ३·५॥

यदिति यःकश्चिज्जपयागदानदेवतार्चादीनिकरोतितस्यराजासम्यक्पालनेनषड्भागंप्राप्नोति ३·५॥

रक्षन्धर्मेणभूतानिराजावध्यांश्चघातयन् यजतेहरहर्यज्ञैःसहस्रशतदक्षिणैः ३·६॥

रक्षन्निति भूतानिसर्वाणिस्थावरजंगमादीनियथाशास्त्रंदंडप्रणयनरूपेणधर्मेणरक्षन्वध्यांश्चस्तेनादीन्ताडयन्प्रत्यहंलक्षगोदक्षिणैर्यज्ञैर्यजतेतज्जंपुण्यमाप्नोतीतिभावः ३·६

योऽरक्षन्बलिमादत्तेकरंशुल्कंचपार्थिवः प्रतिभागंचदंडंचससद्योनरकंव्रजेत् ३·७॥

योऽरक्षन्निति योराजारक्षामकुर्वन्बलिंधान्यादेःषड्भागादिकंकरंग्रामवासिभ्यःप्रतिमासंभाद्रपदादिमासनियमेनवाग्राह्यंशुल्कंस्थलजलपथादिनावाणिज्यकारिभ्योनि यतस्थानेग्राह्यंप्रतिभागंफलकुसुमशाकतृणाद्युपायनंप्रतिदिनग्राह्यंदंडंचव्यवहारादौगृह्णातिसमृतःसन्नरकंयाति ३·७॥

अरक्षितारंराजानंबलिषड्भागहारिणं तमाहुःसर्वलोकस्यसमग्रमलहारकं ३·८॥

अरक्षितारमिति योराजानरक्षति अथचधान्यादिषड्भागादिकंबलिरूपंगृह्णाति तंसर्वलोकानांसकलपापहारिणंमन्वादयआहुः ३·८॥

अनपेक्षितमर्यादंनास्तिकंविप्रलुंपकं अरक्षितारमत्तारंनृपंविद्यादधोगतिं ३·९॥

अनपेक्षितमिति लंघितशास्त्रमर्यादंपरलोकाभाववादिनं विप्राणांधनमपहरन्तं दंडादिनाधनग्राहिणं रक्षारहितंकरवत्त्वादेर्भक्षितारंराजानं नरकगामिनंजानीयात् ३·९

128

म॰
टी॰ मे॰
१२८

अधार्मिकं त्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः निरोधनेन बंधेन वधेन विविधेन च ३१० ॥
अधार्मिकमिति अधार्मिकं चोरादिपरपीडाकरं त्रिभिरुपायैः प्रयत्नेन नियमयेत् नानाहकारागारप्रवेशनेन निगडादिबंधनेन ताडनकरचरणादिच्छेदनादिना प्रकारत्रयेणैव ३१०
निग्रहेण हि पापानां साधूनां संग्रहेण च द्विजातय इवेज्याभिः पूयंते सततं नृपाः ३११ ॥
निग्रहेणेति पापशालिनां निग्रहेण साधूनां संग्रहेण द्विजातय इव महायज्ञादिभिः सर्वकालं नृपतयः पवित्रीभवंति तस्मादधार्मिकान् निगृह्णीयात् ३११ ॥
क्षंतव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां नृणां बालवृद्धातुराणां च कुर्वता हितमात्मनः ३१२
क्षंतव्यमिति कार्यवतामर्थिप्रत्यर्थिनां दुःखेनाक्षेपं कुर्वतां तथा बालवृद्धव्याधितानामाक्षिपतां वचनमात्मनः श्रेयस्कामेन क्षंतव्यं प्रभुणा क्षमणीयम् ३१२ ॥
यः क्षिप्तो मर्षयत्यार्तैस्तेन स्वर्गे महीयते यस्त्वैश्वर्यान्न क्षमते नरकं तेन गच्छति ३१३ ॥
यः क्षिप्त इति दुःखितैराक्षिप्तः सहते यः स तेन स्वर्गलोके पूजां लभते ऐश्वर्यदर्पान्न सहते यः स तेन नरकं गच्छति ३१३ ॥
राजा स्तेनेन गंतव्यो मुक्तकेशेन धावता आचक्षाणेन तत्स्तेयमेवंकर्मास्मि शाधि मां ३१४ स्कंधेनादाय मुसलं लगुडं
वापि खादिरं शक्तिं चोभयतस्तीक्ष्णामायसं दंडमेव वा ३१५ राजेति स्कंधेन निधायात्मनो बाह्मणस्वर्णस्तेयकृद्दिव्यमुसलादिकान् प्राय.श्चित्तं करणीयमस्मीति
तथापि स्वर्णस्तेनः प्रति राज्ञे दंडं रूपतामस्य दर्शयित्वा दंडप्रकरणे पाठः ब्राह्मणस्वर्णापहारी अपराधं कृत्वा शीघ्रं मुक्तकेशो धावन्नेव गत्वा एवंकर्माहमस्मीति निग्रहं याचेत तच्च
तथापि स्वर्णस्तेनप्रति राज्ञे दंडं शक्तिं चोभयतस्तीक्ष्णां शक्तिं लोहमयं वा दंडं स्कंधे गृहीत्वा राजसमीपे गंतव्यं ततस्तस्य ब्राह्मणस्वर्णहार्यहमस्मीति मुसलादिना मां व्यापादयेति वदेत् राजेति
लाखमायसं वा दारुमयं वा ३१५
शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते अशासित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषं ३१६ शासनादिति स्तेनो मुसलादिप्रहारेण
परित्यागे वा मृतकल्पः सन् जीवन्नपि वा परित्यागात्स चौरः स्तेयात्पापात्प्रमुच्यते अत एव याज्ञवल्क्यः मृतकल्पः प्रहारार्तो जीवन्नपि विशुध्यतीति तं पुनः स्तेयकरणादिभिः राजा स्तेन
स्य पापमाप्नोति ३१६
अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषं ३१७ ॥
अन्नाद इति ब्रह्महा यस्तस्यान्नं भुंक्ते तस्मिन्संक्रमयति भ्रूणहा स भोक्तुः पापं भवतीत्यर्थः विवादितं नैव स्वं पापं न्यस्यति तथा भार्या व्यभिचारिणी जारपतिं सम
अन्नाद इति ब्रह्महा पत्न्यां वधिष्यति शिष्यश्च संध्याग्निकार्याद्यकरणजन्यपापं गुरौ स एव माने न्यस्यति याज्यश्च विधिमतिक्रम्य याजके एवं ममापि पापानि क्षिपति स्तेन स्वं राजन्युपेक्षमाणे पाप
मात्मनो भर्त्रि पापं स्वं ग्रहयति शिष्यश्च ... समर्पयति तत्र स्मादाज्ञा स्तेनो निग्रा
ह्यो नवा ३१७
राजभिः कृतदंडास्तु कृत्वा पापानि मानवाः निर्मलाः स्वर्गमायांति संतः सुकृतिनो यथा ३१८
राजेति स्वर्णस्तेयादीनि पापानि कृत्वा पश्चाद्राजभिर्विहितदंडा मनुष्याः प्रतिबंधकदुरिताभावात्स्वार्जितपुण्यवशेन साधवः सुकृतकारिण इव स्वर्गं गच्छंति एवं च प्राय
श्चित्तवद्दंडस्यापि पापक्षयफलत्वमुक्तं ३१८
यस्तु रज्जुं घटं कूपाद्धरेद्भिंद्याच्च यः प्रपां स दंडं प्राप्नुयान्माषं तच्च तस्मिन्समाहरेत् ३१९

128A

यस्मिंस्तु कूपसमीपे स्वल्पे उदके जलोद्वहनाय घटो रज्जुर्वा दंडो वा योऽपहरेत्तेन पानीयदाने शूर्विवर्धितव्येन समो माषो दंडः प्रयात्तेन निर्दिष्टस्तैर्वर्णमाषैस्तत्प्रकल्प्येदिति कूपात्

धान्यं दशभ्यः कुंभेभ्यो हरतोऽभ्यधिके वधः शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनं ३२० ॥ यत्न वचनात्तच्चरन्त्यादितस्मिन्कूपे समर्पणे ३२०

धान्यमिति द्विपलशतं द्रोणो विंशतिद्रोणः कुंभः दशसंख्येभ्यः कुंभेभ्योऽधिकं धान्यं हरतो वधः सचहर्तृस्वामिगुणावेक्षया ताडनांगच्छेदमारणात्मको ज्ञेयः शेषेष्वेक

तथा धरिममेयानां शतादभ्यधिके वधः सुवर्णरजतादीनामुत्तमानां च वाससां ३२१ स्मादारभ्य दशकुंभपर्यंतं हरतोऽपि निकृत एकादशगुणं दद्यात् स्वामिनश्चापहृतं

तेयेति धरिमानि तुलया धार्यमाणानि सुवर्णरजतादीनाम् उत्तमानां च वाससां शतादीनां पलशतादधिके परे तेन वधः कर्तव्य एव विषयसमीकरणं वा देशकालापेक्षं भिज्जाति गुणापेक्षया परिहार्यं पर एवं शतं त्वपि ३२१

पंचाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते शेषे त्वेकादशगुणं मूल्याद्दंडं प्रकल्पयेत् ३२२

पंचेति सुवर्णादीनां पंचाशतः ऊर्ध्वं शतं यावदपहारे कृते हस्तच्छेदनं मन्वादिभिरभिहितं शेषेषु पुनरेकपलादारभ्य पंचाशत्पलपर्यंतापहारे स्वपहृतधनादेकादशगुणं दंडं दाप्यः ३२२

पुरुषाणां कुलीनानां नारीणां च विशेषतः मुख्यानां चैव रत्नानां हरणे वधमर्हति ३२३ ॥

पुरुषाणामिति महाकुलजातानां मनुष्याणां विशेषेण स्त्रीणां महाकुलप्रसूतानां श्रेष्ठानां च रत्नानां वज्रवैदूर्यादीनामपहारे वधमर्हति ३२३ ॥

महापशूनां हरणे शस्त्राणामौषधस्य च कालमासाद्य कार्यं च दंडं राजा प्रकल्पयेत् ३२४ ॥

महेति महतां पशूनां हस्त्यश्वगोमहिष्यादीनां तथा खड्गादीनां शस्त्राणां कल्याणघृतादेश्चौषधस्य अभिन्नादिरूपं कार्यं प्रयोजनं च समवेक्ष्य हीनरूपताडनात् राजांगच्छेदनवधरूपं दंडं प्रकल्पयेत् ३२४

गोषु ब्राह्मणसंस्थासु छुरिकायाश्च भेदने पशूनां हरणे चैव सद्यः कार्योऽर्धपादिकः ३२५ ॥

गोष्विति ब्राह्मणसंबंधिनीनां गवामपहारे वंध्याया स्त्रियो गोर्वा हननार्थं नासाच्छेदने पशूनां वाजेडकानां दंडभूयस्त्वाद्याग गर्यानां हरणेनं तेरेम वच्छिन्नार्धपादकः कार्यः ३२५

सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ३२६ वेणुवैदलभांडानां लवणानां तथैव च मृण्मयानां च हरणे मृदो भस्मन एव च ३२७ मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवं ३२८ अन्येषां चैवमादीनां मद्यानामोदनस्य च पक्वान्नानां च सर्वेषां तन्मूल्याद्द्विगुणो दमः

सूत्रेति वेणुवैदलेति मत्स्यानामिति अन्येषामिति कार्पासादिसूत्रस्य कार्पासिकस्य च किण्वस्य सुराबीजद्रव्यस्य तृणस्य वेणुखंडनिर्मितजलाहरणभांडादीनां यद्दन्यत् मः ३२९

पशुसंभवं चर्म गवमेढ्रश्रृंगादि अन्येषामप्येवंविधानां मसुरराज्यादीनां मनःशिलादीनां मद्यानां हृदयानां पक्वान्नानां मोदनव्यतिरिक्तानामपूपमोदकादीनां च कार्यासादि शेषाणां

यांनाश्च सिद्धानां चापहारे अपहृतद्रव्यमूल्याद्द्विगुणो दंडः कार्यः ३२६ ३२९ ॥

पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च अन्येष्वपरिपूतेषु दंडः स्यात्पंचकृष्णलः ३३० ॥ पुष्पेष्विति पुष्पेषु हरिते च क्षेत्रस्थे धान्येषु

गुल्मवल्लीतरुष्वपरिपूतेष्वनपानीतबुसादिकेषु धान्येषु माषमुद्गादिकेषु परिपवनसंभवात् अन्येषु धान्येषु समर्थेषु हृत्वा पञ्चकृष्णलदंडः कालापेक्षया सवर्णास्यो

129

म.
नु.सं.
१२५

प्रस्थवापंचकृष्णलपरिमाणो दंडः स्यात् ३३० ॥ परिपूतेषु धान्येषु शाकमूलफलेषु च निरन्वये शतं दंडः सान्वयेऽर्द्धशतं दमः ३३१ ॥
परिपूतेति निष्पुलाकीकृतेषु धान्येषु शाकादिषु चापहृतेषु अन्वयोऽत्र स्वामिनी संबंधस्तेन सह कश्चिदपि संबंधो नास्ति पक्षग्रामवासादिः तत्र शतं दंडः सान्वयेन पंचाशत्पणो दमः स्वल्पेषु धान्येषु अयं दंडः बहुषु हि पूर्वमुक्तमेकादशगुणो दंडः ३३१
स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतं निरन्वयं भवेत्स्तेयं हृत्वापह्नूयते च यत् ३३२ ॥
स्यादिति यद्द्रव्यापहारादिकं कर्म द्रव्यस्वामिसमक्षं बलान्नहृतं तत्साहसं स्यात् परोक्षमप्यपहृत्य यदपह्नूयते नैवमाहमेतदकार्षमिति तदपि स्तेयमेव ३३२ ॥ पतदर्थं स्तेयप्रकरणे साहसपाठः यस्तु तु
यस्त्वेतान्युपक्लृप्तानि द्रव्याणि स्तेनयेन्नरः तमाद्यं दंडयेद्राजा यश्चाग्निं चोरयेद्गृहात् ३३३ ॥
यस्त्वेतानीति यः पुनरेतानि सूत्रादिद्रव्याणि उपभोगार्थं कृतसंस्काराणि सत्यपहारयेत् यश्चैताग्निं वा अग्निगृहाच्चोरयेत्तं राजा प्रथमसाहसं दंडयेत् अग्निस्वामिनश्चाथ नोपरक्ष्योदानव्य
गोविंदराजस्तु लौकिकमप्यग्निं चोरयतोयं दंड इत्याह तदयुक्तं प्रथमसाहसं शूद्रदंडस्यान्याय्यत्वात् ३३३ ॥
येन येन यथांगेन स्तेनो नृषु विचेष्टते तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ३३४ ॥ येनेति येन येनांगेन हस्तपादादिना येन प्रका
रेण संधिच्छेदादिना चौरो मनुष्येषु विरुद्धं यथा हस्तादिकं चेष्टते तत्तस्य तदेवांगं प्रसंगनिवारणाय राजा छेदयेत् तत्रयथा स्वाम्यकर्षते नाकर्षयेत् यथा यमंगच्छेदः ३३४ ॥
पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः नादंड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति ३३५
पितेति पित्राचार्यमित्रभ्रातृमातृपत्नीपुत्रपुरोहितानां मध्यात्स्वधर्मे यो नावतिष्ठते स राज्ञोऽदंडनीयो नास्ति अपितु दंडनीय एव ३३५ ॥
कार्षापणं भवेद्दंड्यो यत्रान्यः प्राकृतो जनः तत्र राजा भवेद्दंडः सहस्रमिति धारणा ३३६ ॥
कार्षेति यस्मिन्नपराधे राजव्यतिरिक्तो जनः कार्षापणं दंडनीयो भवेत्तस्मिन्नपराधे राजा पणसहस्रं दंडनीय इति निश्चयः सोयं दंडं जले प्रक्षिपेद्ब्राह्मणेभ्यो वा दद्यादित्येतद्दंडस्य वरुणाय इति वक्ष्य माणत्वात् ३३६ ॥
अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषं षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य च ३३७ ॥
ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत् द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः ३३८ ॥
अष्टेति ब्राह्मणस्य तद्दोषविद्धि स इति सर्वत्र संबध्यते यस्मिन् स्तेये यो दंड उक्तः स स्तेयगुणदोषज्ञस्य शूद्रस्याष्टगुणः ... इति अष्टगुणकं तेषु षोडशगुणो द्विगुणो वैश्यस्य द्वात्रिंशद्गुणः स्तेयाविशेषः क्षत्रियस्य चतुःषष्टिगुणो द्विगुणो वैश्यस्य विद्वान् ब्राह्मणस्य चतुःषष्टिगुणो वा अष्टाविंशत्यधिकशतगुणो वा गुणातिशयापेक्षया ब्राह्मणस्यैव ३३८
वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् ३३९ वानस्पत्यमिति वीरुद्वनस्पतीनामपु
ष्पाणि सवृत्तादीनि फलानि चापरिवृत्तानां इति गौतमवचनात् अपरिवृत्तवानस्पत्यादीनां मूलफलं होमयाग्न्यर्थं च दारु गोग्रासार्थं च तृणं परकीयमस्तेयं मनुराह तस्मादिह न दंडो नापधर्मः ३३९
योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनं याजनाध्यापनेनापि यथा स्तेनस्तथैव सः ३४०
योदत्तेति अदत्तादायिनश्चौरस्य हस्तात् यो ब्राह्मणो याजनाध्यापनप्रतिग्रहैरपि परकीयद्रव्यं गृह्णाति दंडदानयोग्यो न भवति ३४० ॥

129A

द्विजःध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके आददानः परक्षेत्रान्न दंडं दातुमर्हति ३४१ ॥

द्विज इति द्विजातिः पथिकः क्षीणपाथेयः द्वाविक्षुदंडौ द्वे च मूलके परकीयक्षेत्राद्गृह्णन् दंडदानयोग्यो न भवति ३४१ ॥

असंधितानां संधाता संधितानां च मोक्षकः दासाश्वरथहर्ता च प्राप्तः स्याच्चौरकिल्बिषं ३४२ असंधीतीति पुरुषाणामश्वादीनां परसंबद्धानां यो दर्पणं बंधयिता बद्धानां मुक्ता यो मोचयिता वहानां यो वा दासाश्वरथापहारी स चौरदंडमाप्नुयात् स च गुरुलघुचौर्यानुसारेण मारणांगच्छेदनधनापहारो बोद्धव्यः ३४२ ॥

अनेन विधिना राजा कुर्वाणः स्तेननिग्रहं यशोऽस्मिन्प्राप्नुयाल्लोके प्रेत्य चानुत्तमं सुखं ३४३ ॥

अनेनेति अनेनोक्तविधानेन राजा चौरनियमं कुर्वाण इह लोके ख्यातिं परलोके चोत्कृष्टसुखं प्राप्नुयात् ३४३ ॥

ऐंद्रं स्थानमभिप्रेप्सुर्यशश्चाक्षयमव्ययं नोपेक्षेत क्षणमपि राजा साहसिकं नरं ३४४ ॥

ऐंद्रमिति सर्वाधिपत्यलक्षणं पदं ख्यातिं च विनाशरहितामनपचयां चातिशयेन प्राप्तुमिच्छन्राजा बलेन गृहदाहधनग्रहणकारिणं साहसिकं क्षणमपि नोपेक्षेत ३४४ ॥

वाग्दुष्टात्तस्कराच्चैव दंडेनैव च हिंसतः साहसस्य नरः कर्ता विज्ञेयः पापकृत्तमः ३४५ ॥

वागिति वाक्पारुष्यकृतश्चौराच्च दंडपारुष्यकारिणश्च मनुष्यात्साहसकृन्मनुष्योऽतिशयेन पापकारी बोद्धव्यः ३४५ ॥

साहसे वर्तमानं तु यो मर्षयति पार्थिवः स विनाशं व्रजत्याशु विद्वेषं चाधिगच्छति ४६ ॥

साहस इति यो राजा साहसे प्रवर्तमानं दममन्तरेण क्षमते स पापकृत्ताप्युपेक्षणाद्धर्मं च विनश्यति अप्रक्रियमाणात्प्रकृतया जनविद्वेषं च गच्छति ३४६ ॥

न मित्रकारणाद्राजा विपुलाद्वा धनागमात् समुत्सृजेत्साहसिकान्सर्वभूतभयावहान् ३४७

नमित्रेति मित्रवाक्येन बहुधनप्राप्त्या वा सर्वभूतभयजनकान्साहसिकान्राजा न त्यजेत् ३४७ शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते द्विजातीनां च वर्णानां विप्लवे कालकारिते ३४८ आत्मनश्च परित्राणे दक्षिणानां च संगरे स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न

शस्त्रमिति आत्मन इति ब्राह्मणादिभिर्वर्णैः स्वधर्माद्यनुष्ठानहीनं यस्मिन्काले वर्णानां साश्रमिणां च साहसकारादिभिर्धर्मः कर्तुमशक्यते तस्मिन्काले वर्णानां दुष्यति ३४९

कानामराजके च स्त्रीशूद्रसंकरागमनादिकाले जनितसंगरादौ आत्मत्राणार्थं दक्षिणाधनगवाद्यपहारनिमित्ते च संग्रामे स्त्रीब्राह्मणरक्षार्थं च धर्मयुद्धेनाततायिनं

तिकृतपापगतं न हिंसन् न दोषभागी भवति परमारणेऽप्यत्र साहसदंडो न कार्यः ३४८ ३४९ ॥

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं आततायिनमायांतं हन्यादेवाविचारयन् ३५० ॥

गुरुं वेति गुरुबालवृद्धबहुश्रुतब्राह्मणानामन्यतमं वधोद्यतमागच्छंतं विद्याहतादिभिरुत्कर्षपलायनादिभिरपि स्वनिस्तरणाशक्तो निर्विचारं हन्यात् अतएव उशना गुरुहीनमाततायिनं हत्वा न दोषः कात्यायनस्तु भृगुशाठ्योल्लेखेन मनुश्लोकमेव वाक्यं व्याख्यातवान् आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः वधस्तत्र तु नैव स्यात्पापे हीने

130

म॰
नु॰ से॰
१३

नैवयोभयुः मेधातिथिगोविंदराजौ तु स्त्रीविप्राभ्युपपत्तौ च वधमिच्छन्तौ नत्वहमतीति पूर्वस्यायमनुवादः शर्वविदिकमपि हन्यात् किमुतान्यमपीति व्याचक्षाते ३५० ॥

नाततायिवधे दोषो हन्तुर्भवति कश्चन प्रकाशं वाप्रकाशं वा मन्युस्तं मन्युमृच्छति ३५१ नाततेति जनसमक्षं रहसि वा वधोऽस्य तत्समारब्धे हन्तुर्न कश्चिदपि धर्मदण्डः प्रायश्चित्तात्मको दोषो वा भवति यस्माद्धन्यमानस्य मन्युः क्रोधाभिमानिनी देवता हन्तुमानगतं क्रोधं निवर्तयति मा स्मैव चाण्डालाय गोरक्षापहृत्य मामाश्रूणा गच्छेदनयोर्न ग्रहणार्थं दर्शयति दण्डः कार्यः ३५१

परदाराभिमर्शेषु प्रवृत्तान्नॄन्महीपतिः उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत् ३५२

इदानीं स्त्रीसंग्रहणमाह परदारेति परदारसंभोगेषु प्रवृत्तान्मनुष्यानुद्वेजनकरैर्दण्डैर्नासिकाकर्तनादिभिरंकयित्वा राजा देशान्निःसारयेत् ३५२ ॥

तत्समुत्थो हि लोकस्य जायते वर्णसंकरः येन मूलहरोऽधर्मः सर्वनाशाय कल्पते ३५३ तदिति यस्मात्परदाराभिगमनात्तत्संभूतो वर्णसंकरः संपद्यते येन वर्णसंकरेण विशुद्धपत्नीयजमानाभावात् यज्ञोऽग्रौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते तस्याभावे सति वृष्ट्याद्यभावाज्जगन्मूलविनाशाय धर्मो जगन्नाशाय संपद्यते ३५३

परस्य पत्न्या पुरुषः संभाषां योजयन्रहः पूर्वमाक्षारितो दोषैः प्राप्नुयात्पूर्वसाहसम् ३५४

परस्येति तत्स्त्रीप्रार्थनादिदोषैः पूर्वमुपात्ताभिशापः पुरुषः उचितकारणव्यतिरेकेण परभार्यया सह संभाषणं कुर्वन् प्रथमसाहसं दण्डं प्राप्नुयात् ३५४ ॥

यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात् न दोषं प्राप्नुयात्किंचिन्न हि तस्य व्यतिक्रमः ३५५

यस्त्विति यः पुनः पूर्वं तत्स्त्रीप्रार्थनाभिशापरहितः केनचित्कारणेन जनसमक्षमभिभाषणं कुर्यात् स पुनर्दण्डनादिदोषं प्राप्नुयात् यस्मान्न कश्चित्तस्यापराधोऽस्ति ३५५ ॥

परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा नदीनां वापि संभेदे स संग्रहणमाप्नुयात् ३५६

परेति तीर्थेऽरण्ये वनादिके निर्जनदेशोपलक्षणार्थं यः पुरुषः परस्त्रियमुदकावतरणमार्गे अरण्ये ग्रामाद्बहिर्गुल्मलताकीर्णे निर्जने देशे वने बहुवृक्षे संततेन नदीनां संगमे एवमनाक्षारितोऽपि कारणादपि संभाषेत स संग्रहणदण्डं सहस्रपणं प्राप्नुयात् सम्यग्गृह्यते ज्ञायते येन परस्त्रीसंभोगाभिलाषः इति संग्रहणम् ३५६ ॥

उपचारक्रिया केलिः स्पर्शो भूषणवाससां सह खट्वासनं चैव सर्वं संग्रहणं स्मृतम् ३५७ ॥

उपचारेति स्रग्गन्धानुलेपनप्रेषणादिरुपचारकरणं केलिः परिहासालिंगनादिः अलंकारवस्त्राणां स्पर्शनं एकखट्वासनमित्येतत्सर्वं संग्रहणं मन्वादिभिः स्मृतं ३५७

स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया परस्परस्यानुमते सर्वं संग्रहणं स्मृतम् ३५८

स्त्रियमिति यः स्तनाद्यनुचितस्थाने स्त्रियं स्पृशेत्तया वा वृषणादिके स्पृष्टः सन्मर्षयेत् तदिदं मोहाद्गीकारद्रूपं सर्वं संग्रहणं मन्वादिभिः स्मृतम् ३५८

अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति चतुर्णामपि वर्णानां दारा रक्ष्यतमाः सदा ३५९ अब्राह्मण इति अब्राह्मणः क्षत्रियादेः पूर्वोक्तं संग्रहणं कुर्वन् प्राणान्तं दण्डं प्राप्नोति चतुर्णामपि ब्राह्मणादीनां वर्णानां यत्नः क्षत्रादीनां सर्वदा रक्षणीयाः तेन न प्रसंगनिवृत्त्यर्थं उक्त-
भूयस्त्वाद्ब्राह्मणमनिच्छेया मुत मसंग्रहणे प्राणान्तं दण्डं प्राप्नोतीति वर्णामपि ब्राह्मणादीनां वर्णानां यत्नः क्षत्रादीनां

130 A

इत्येतद्ग्रहणादपि सर्वैर्वर्णैर्भार्या रक्षणीयाः ३५९ **भिक्षुका बन्दिनश्चैव दीक्षिताः कारवस्तथा संभाषणं सह स्त्रीभिः कुर्युरप्रतिवारिताः**

भिक्षुका इति भिक्षाजीवनाः स्तुतिपाठकाः यज्ञार्थं कृतदीक्षिकाः सूपकारादयश्च भिक्षादिस्वकार्यार्थं गृहस्त्रीभिः सह संभाषणमनिवारिताः कुर्युः एवं चैषां संग्रहणाभावः ३६०

न संभाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत् निषिद्धो भाषमाणस्तु सुवर्णं दंडमर्हति ३६१

न संभाषामिति स्वामिना निषिद्धः स्त्रीभिः संभाषणं न कुर्यात् प्रतिषिद्धः संभाषणमाचरन् राज्ञः षोडशमाषात्मकसुवर्णं दंडयोग्यो भवति ३६१ ॥

नैष चारणदारेषु विधिर्नात्मोपजीविषु सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च ३६२ ॥

नैष इति परस्त्रियं योऽभिवदेदित्यादिसंभाषणनिषेधविधिर्नटगायनादिदारेषु नास्ति तथा भार्यासु यः स्वकान्तत्रिरस्कृत्वा तद्भार्यैवात्मा सुनया उपजीवंति स्वलाभाय तत्स्याजारं त्संतेषु तेषु न दोषस्त्यिति किं च यस्मात्ते चारणादयः स्वप्रवेनिषेधविधिनाऽन्यस्माच्चारणाद्यात्मोपजीविनश्च परपुरुषानानीय तैः स्वभार्याः संश्लेषयंते स्वयमागतानपि परपुरुषान्सज्जनाभू कुलासाक्षात्तान्न विभावयंतो व्यवहारयंति ३६२

किंचिदेव तु दाप्यः स्यात्संभाषां ताभिराचरन् प्रेष्यासु चैकभक्तासु रहः प्रव्रजितासु च ३६३

किंचिदिति निर्जनदेशे चारणात्मोपजीविस्त्रीभिः संभाषणं कुर्वन् स्वल्पं दंडलेशं राज्ञा दाप्यः तासामपि परदारत्वात् तथा दासीभिरवरुद्धाभिर्वौद्धादिव्रतचारिणीभिश्च संभाषां कुर्वन् किंचिद्दंडमात्रं दाप्यः स्यात् ३६३ ॥

योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ३६४

योऽकामामिति यस्तु सजातिरनिच्छन्तीं कन्यां गच्छति स तत्क्षणादेव व्याप्नोति ते लिंगच्छेदनादिकं वधमर्हति इच्छन्तीं पुनर्गच्छन्नयं वधार्हो मनुष्यो न भवति ३६४ ॥

कन्यां भजन्तीमुत्कृष्टं न किंचिदपि दापयेत् जघन्यं सेवमानां तु संयतां वासयेद्गृहे ३६५

कन्यामिति कन्यां संभोगार्थमुत्कृष्टजातिपुरुषं सेवमानां स्वल्पमपि दंडं न दापयेत् हीनजातिं पुनः सेवमानां वध्यापयेत् यावत्सा निवृत्तकामा स्यात् ३६५ ॥

उत्तमां सेवमानस्तु जघन्यो वधमर्हति शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि ३६६

उत्तमामिति हीनजातिरुत्कृष्टजातीयां कन्यामिच्छन्तीं वा गच्छन्जात्यपेक्षयांगच्छेदनमारणात्मकं वधमर्हति समानजातीयां पुनरिच्छन्तीं गच्छन् यदि पिता मन्येत तदा पित्रे शुल्कं तद्रूपमर्थं दद्यात् एवंविधः सा च कन्या तेनैव वोढव्या ३६६ ॥

अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः तस्याशु कर्त्ये अंगुल्यौ दंडं चार्हति षट्शतं ३६७

अभीति यो मनुष्यः प्रसह्य बलात्कारेण समानजातीयां गमनवर्जमहंकारेणांगुलिप्रक्षेपमात्रेणैव नाशयेत्तस्य शीघ्रमेवांगुलिद्वयच्छेदः कर्तव्यः षट्पणशतानि वायं दंडः स्यात् ३६७

सकामां दूषयंस्तुल्यो नांगुलिच्छेदमाप्नुयात् द्विशतं तु दमं दाप्यः प्रसंगविनिवृत्तये ३६८

सकामामिति समानजातिरिच्छन्तीं कन्यामंगुलिप्रक्षेपमात्रेण नाशयन्नांगुलिच्छेदमाप्नोति किं तु प्रसक्तिनिवारणाय द्विशतं दंडं दाप्यः ३६८ ॥

131

म॰
बृ॰ सं॰
१३१

कन्यैव कन्यां या कुर्यात्तस्याः स्याद्द्विशतो दमः शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश ३६९

कन्यैवेति या कन्यैवापरां कन्यां संश्लिष्टदेशेणानाशयेत् तस्या द्विशतो दंडः स्यात् कन्यापुर्शुल्कं च द्विगुणं कन्यापितुर्दद्यात् शिफाप्रहारान् दश प्राप्नुयात् ३६९ ॥

या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौंड्यमर्हति अंगुल्योरेव वा छेदं खरेणोद्वहनं तथा ३७० ॥

यात्विति या पुनः स्त्री कन्यां अंगुलिप्रक्षेपेणानाशयेत्तस्यास्तत्क्षणादेव शिरोमुंडनं अंगुलिद्वयं वा तस्याश्छेदनं गर्दभेण च राजमार्गे वहनमर्हति ३७० ॥

भर्तारं लंघयेद्या तु स्त्री ज्ञातिगुणदर्पिता तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ३७१ ॥

भर्तारमिति या स्त्री प्रबलधनिकपित्रादिबांधवदर्पेण सौंदर्यादिगुणदर्पेण वा पतिं पुरुषांतरोपगमनाल्लंघयेत् तां राजा बहुजनाकीर्णदेशे श्वभिर्भक्षयेत् ३७१ ॥

पुमांसं दाहयेत्पापं शयने तप्त आयसे अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् ३७२ ॥

पुमांसमिति अनंतरोक्तं जारं पापकारिणं पुरुषं अयोमयशयने प्रज्वलिते राजा दाहयेत् तत्र शयने वधकाश्च तावत्काष्ठानि निक्षिपेयुः यावत्पापकारी दग्धः स्यात् ३७२ ॥

संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः व्रात्यया सह संवासे चांडाल्या तावदेव तु ३७३ ॥

संवत्सरेति परस्त्रीगमनेन दुष्टस्य पुंसो दंडितस्य पुनः संवत्सरातिक्रमे तस्यामेव चाभिशस्तस्य पूर्वदंडाद्द्विगुणो दमः कार्यः तथा व्रात्यजायागमने यो दंडः परिकल्पितः चांडाल्यां सह संवत्सरेति परस्त्रीगमनेन दुष्टस्य पुंसो दंडितस्य पुनः संवत्सरातिक्रमे ... चांडालीगमनीयो दंडः सहस्रं त्वेव स्त्रीजनमिति यमविशेषः संवत्सरे गते तेन इति पूर्वदंडाद्द्विगुणो दंडो वाच्यः ३७३
निर्देशात् चांडालीगमनरूपः तथा चांडालीगमनीयो दंडः ... चांडालीगमनदंडप्रदर्शनार्थं संवेश्यवत्पूर्वाभिशस्तस्य दंडितस्य संवत्सरातिक्रमे पुनस्तामेव गच्छतः पूर्वदंडाद्द्विगुणो दंडो वाच्यः
तत्पूर्वं सैवोदाहरणद्वयं व्रात्यजायागमनेपि चांडालीगमनदंडप्रदर्शनार्थं

शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् अगुप्तमंगसर्वस्वैर्गुप्तं सर्वेण हीयते ३७४ शूद्र इति भर्त्रादिभिः रक्षितामरक्षितां वा द्विजातिस्त्रियं गच्छतः शूद्रस्य अगुप्तं गच्छतः लिंगं सर्वस्वाभ्यां वियोजनीयः अगुप्तां गच्छतः लिंगविशेषाङ्गच्छेदनेन ... रक्षितां गच्छतः सर्वस्वेन शरीरेण च हीनः कार्यः ३७४

वैश्यः सर्वस्वदंडः स्यात्संवत्सरनिरोधतः सहस्रं क्षत्रियो दंड्यो मौंड्यं मूत्रेण चार्हति ३७५
वैश्य इति वैश्यस्य गुप्तब्राह्मणीगमने संवत्सरं बंधनादनंतरं सर्वस्वग्रहणरूपो दंडः कार्यः क्षत्रियागमने तु वैश्यश्च क्षत्रियामिति बध्नतिक्षत्रियो गुप्तब्राह्मणीगमने सहस्रं दंडनीयः खरमूत्रेण चास्य मुंडनं कर्तव्यम् ३७५ ॥

ब्राह्मणीं यद्यगुप्तां तु गच्छेतां वैश्यपार्थिवौ वैश्यं पंचशतं कुर्यात्क्षत्रियं तु सहस्रिणम् ३७६
ब्राह्मणीमिति अरक्षितां तु ब्राह्मणीं यदि वैश्यक्षत्रियौ गच्छतः तदा वैश्यं शतपंचदंडयुक्तं कुर्यात् क्षत्रियं पुनः सहस्रदंडोपेतं वैश्यस्य चायं पंचशतदंडः शूद्रावधमादिना निर्गुणजातिमात्रोपजीविब्राह्मणीगमनविषयः तदित्थं ब्राह्मणीगमने तु वैश्यस्यापि सहस्रदंड एव ३७६

उभावपि तु तावेव ब्राह्मण्या गुप्तया सह विप्लुतौ शूद्रवद्दंड्यौ दग्धव्यौ वा कटाग्निना ३[illegible] ॥

131A

उभावपि तौ वैश्यौ वा पि क्षत्रियवैश्यौ ब्राह्मण्या रक्षितया सह कृतमैथुनौ शूद्रवत् सर्वेण हीयेते गुप्ते इति दंड्यौ यं ब्राह्मकदेन कटावेष्टनदग्धव्यौ तत्र वैश्यं लोहितं दर्भैः क्षत्रियं शर
पत्रैर्वा वेष्टयेदिति विशिष्टको विशेषो ग्राह्यः एवं सहस्रं क्षत्रियो दंड्यो वैश्यः सर्वस्वमित्युक्तत्वाद् यथा प्राणांतिकदंडो गुणवद्ब्राह्मणीगमनविषयो बोद्धव्यः ३७७ ॥

सहस्रं ब्राह्मणो दंड्यो गुप्तां विप्रां बलाद्व्रजन् शतानि पंच दंड्यः स्यादिच्छंत्या सह संगतः ३७८ ॥

सहस्रमिति रक्षितां विप्रां ब्राह्मणो बलेनोपगच्छन् सहस्रं दंड्यः स्यात् इच्छंत्या पुनः सह कृतमैथुने पंचशतानि दंडनीयो भवेत् ३७८ ॥

मौंड्यं प्राणांतिको दंडो ब्राह्मणस्य विधीयते इतरेषां तु वर्णानां दंडः प्राणांतिको भवेत् ३७९ ।

मौंड्यमिति ब्राह्मणस्य वधदंडस्थाने शिरोमुंडनं दंडः शास्त्रेणोपदिश्यते क्षत्रियादीनां तु उक्तेन घातेन दंडो भवति ३७९ ॥

न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितं राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतं ३८० ।

न जात्वित्यादि ब्राह्मणं सर्वपापकारिणमपि कदाचिन्न हन्यात् अपि तु सर्वस्वयुक्तमक्षतशरीरं राष्ट्रान्निर्वासयेत् ३८० ॥

न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि तस्मादस्य वधं राजा मनसापि न चिंतयेत् ३८१

न ब्राह्मणेति ब्राह्मणवधान्महापृथिव्यामधर्मो नास्ति तस्मात् राजा सर्वपापकारिणो ब्राह्मणस्य मनसापि वधं न चिंतयेत् ३८१ ॥

वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हतः ३८२ वैश्यश्चेदिति रक्षितां क्षत्रियां य
दि वैश्यो गच्छेत् क्षत्रियो वा यदि रक्षितां वैश्यां तदा तयोर्ब्राह्मण्यामगुप्तायां गमने यो दंडो ब्रुक्तो वैश्यं पंचशतं कुर्यात् क्षत्रियं तु सहस्रिणमिति द्वावेव तौ दंडौ वैश्यक्षत्रिययोर्भवतः अथ च
वैश्यस्य रक्षितक्षत्रियागमने पंचाशतरूपो दंडो लघुत्वात् गुणवद्वैश्यस्य निर्गुणजातिमात्रोपजीविक्षत्रियायाः शूद्राद्यास्यादि गमनविषयो बोद्धव्यः क्षत्रियस्य रक्षितवैश्यायां ज्ञातनन्तोऽयमुक्त
एव सहस्रदंडः ३८२

सहस्रं ब्राह्मणो दंडं दाप्यो गुप्ते तु ते व्रजन् शूद्रायां क्षत्रियविशोः सहस्रो वै भवेद्दमः ३८३ ॥

सहस्रमित्यादि क्षत्रियावैश्यरक्षिते ब्राह्मणो व्रजन् सहस्रं दंडं दापनीयः शूद्रायां रक्षितायां क्षत्रियवैश्ययोर्गमने सहस्रमेव दंडः स्यात् ३८३ ॥

क्षत्रियायामगुप्तायां वैश्ये पंचशतं दमः मूत्रेण मौंड्यमिच्छेत्तु क्षत्रियो दंडमेव वा ३८४ ॥

क्षत्रियेति अरक्षितक्षत्रियागमने वैश्यः पंचशतानि दंड्यः स्यात् क्षत्रियस्त्वरक्षितक्षत्रियागमने गर्दभमूत्रेण मुंडनं पंचशतरूपं दंडं वा प्राप्नुयात् ३८४ ॥

अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् शतानि पंच दंड्यः स्यात्सहस्रं त्वंत्यजस्त्रियं ३८५ ॥

अगुप्ते इति अरक्षितां क्षत्रियाम् वैश्यां शूद्रां वा ब्राह्मणो गच्छन् पंचशतानि दंड्यः स्यात् अंते भवोऽन्त्यजः यस्मादधमो नास्ति चांडालादिस्तस्य स्त्रियं गच्छन् सहस्रं दंड्यः ३८५

यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक् न साहसिकदंडघ्नौ स राजा शक्रलोकभाक् ३८६

म॰
तृ॰ से॰
१३२

यस्येति यस्य राज्ञो राष्ट्रे चोरः परदारगामी परुषवादी गृहदाहादिसाहसकारी दंडपारुष्यकर्ता नास्ति स राजा शक्रपुरं याति ३८६ ॥

एतेषां निग्रहो राज्ञः पंचानां विषये स्वके साम्राज्यकृत्सजातेषु लोके चैव यशस्करः ३८७ ॥

एतेषामिति एतेषां स्तेनादीनां पंचानां स्वराष्ट्रे निग्रहः समानजातीयेषु राजसु मध्ये राज्ञां साम्राज्यकृत् इहलोके च यशस्करो भवति ३८७ ॥

ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक्त्यजेद्यदि शक्तं कर्मण्यदुष्टं च तयोर्दंडः शतं शतं ३८८ ॥

ऋत्विजमिति यो याज्यः ऋत्विजं कर्मानुष्ठानसमर्थं अतिपातकादिदोषरहितं ऋत्विग्वा याज्यमदुष्टं त्यजति तयोः शतं शतं दंडः कार्यः इति दंडप्रसंगादिदमुक्तम् ३८८ ॥

न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति त्यजन्नपतितानेतान्राज्ञा दंड्यः शतानि षट् ३८९ ॥

न मातेति मातृपितृभार्यापुत्राः त्यागं पोषणशुश्रूषणाद्यकरणात्मकं नार्हंति तस्मादेतान्पातकादिदोषरहितान्परित्यजन्नेकैकपरित्यागे राज्ञा षट्शतानि दंड्यः ३८९

आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः न विब्रूयान्नृपो धर्मं चिकीर्षन्हितमात्मनः ३९०

आश्रमेष्विति द्विजातीनां गार्हस्थ्याद्याश्रमविषये कार्ये अयं शास्त्रार्थो नायं शास्त्रार्थ इति परस्परं जातविवादानां राजात्मीयहितं चिकीर्षुरयं शास्त्रार्थ इति सहसा विशेषेण न ब्रूयात् ३९०

यथार्हमेतानभ्यर्च्य ब्राह्मणैः सह पार्थिवः सांत्वेन प्रशमय्यादौ स्वधर्मं प्रतिपादयेत् ३९१ ॥

यथार्हमिति यो यादृशीं पूजामर्हति तं तथा पूजयित्वा अथ ब्राह्मणैः सह प्रशमं शीघ्रमपगतकोपं कृत्वा ततः पश्चाद्यः स्वधर्मः तं बोधयेत् ३९१ ॥

प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे अर्हावभोजयन्विप्रो दंडमर्हति माषकं ३९२ प्रातीति निरंतरं तत्र गृहवासी प्रातिवेश्यः तदनंतरगृहवासी अनुवेश्यः यस्मिन्नुत्सवे विंशतिरपि ब्राह्मणा भोज्यंते तत्र प्रातिवेश्यो प्रातिवेश्यब्राह्मणमतिक्रमकारी चेति विश्ववक्ता ब्राह्मणो भोजनार्हावभोजयन्ब्राह्मणस्तद्गृहे राजतादिरूप्यमाषकं दंडमर्हति ३९२

श्रोत्रियः श्रोत्रियं साधुं भूतिकृत्येष्वभोजयन् तदन्नं द्विगुणं दाप्यो हिरण्यं चैव माषकं ३९३

श्रोत्रिय इति विद्याचारवान् तथाविधमेव गुणवंतं विभवकार्येषु विवाहादिषूपकृतत्वात् प्रातिवेश्यानुवेश्यावेवाभोजयंस्तदन्नमभोजितायाद्विगुणं दाप्यो हिरण्यमाषकं च राज्ञे ३९३

अंधो जडः पीठसर्पी सप्तत्या स्थविरश्च यः श्रोत्रियेषूपकुर्वंश्च न दाप्याः केनचित्करं ३९४ अंध इति अंधो बधिरः पंगुः सप्तत्या सम- तिवर्षः समतीतः पुरुषार्थादिभिरुपसंख्यानमिति तत्तीया श्रोत्रियेषु यत्र यान्यत्र शुश्रूषादिनोपकारकः एते कीदृशेभ्यो दरिद्रेभ्यो पीडनकोषेणापि राज्ञा स्वयं ग्रासकरेन दापनीयाः ३९४ ॥

श्रोत्रियं व्याधितार्तौ च बालवृद्धावकिंचनं महाकुलीनमार्यं च राजा संपूजयेत्सदा ३९५ ।

श्रोत्रियमिति विद्याचारवंतं ब्राह्मणं रोगिणं पुत्रवियोगादिदुःखितं बालवृद्धदरिद्रमहाकुलप्रसूतोदारचरितान् राजा दानमानहितकरणैः संपूजयेत्सदा ३९५ ॥

शाल्मलीफलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ३९६ ॥

132 A

नवपरकीयैर्वस्त्रैः सह स्वत्वातान्नयेतेन तन्वान्यवा मांसिग्रमणं स्यान्नार्थं द्वयोर्घं वक्रयोर्वा सोऽदण्ड्यः स्यात् ३९६ ॥

शाल्मलीति शाल्मल्यादिवृक्षसंबंधिफलके श्लक्ष्णे रजकः शनैः शनैर्वासांसि प्रक्षालयेत्

तन्तुवायो दशपलं दद्यादेकपलाधिकं अतोऽन्यथा वर्तमानो दाप्यो द्वादशकं दमं ३९७ ॥

तंतुवाय इति तंतुवायो वस्त्रनिर्माणार्थं दशपलानि सूत्रं गृहीत्वा पिष्टभक्तादियनुप्रवेशादेकादशपलं वस्त्रं दद्यात् यदि न दद्यात्तदा द्वादशपणान् राज्ञा दाप्यः स्वामिनश्च तुष्टिः कर्तव्या ३९७

शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ३९८ ॥

शुल्कस्थानेषु कुशलाः तथा सर्वपण्यानां सारासारज्ञाः ते पण्यं प्रत्यर्घं च मूल्यमवरूपं कुर्युः ततो लाभधनाद्विंशतिभागं राजा गृह्णीयात् ३९८

शुल्केतिस्य लाभलपवस्थव वहर्तव्यो राजग्राह्योभागः शुल्कं तत्स्थानं शुल्कस्थानं तेषु ये कुशलाः

राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च तानि निर्हरतो लोभात्सर्वहारं हरेन्नृपः ३९९

राज्ञ इति राज्ञः संबंधीनि यानि विक्रेयद्रव्याणि प्रख्यातानि राजयोग्यानि हस्त्यादीनि तद्देशोद्भवानि तथा यानि वस्त्रप्रतिषिद्धानि यथा दुर्भिक्षे धान्यं देशांतरे नेतुं निषिद्धानि तानि लोभाद्देशांतरं नयतो वणिजः सर्वहरणं राजा कुर्यात् ३९९

शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययं ४०० ॥

शुल्कमिति शुल्कमोषणाद्देउत्सत्य वक्रपथेन गच्छति अकाले रात्र्यादौ वा क्रयविक्रयं करोति शुल्कार्थं वंचनार्थं विक्रयद्रव्यस्य वा शुल्कलोभात्संख्यां वा किराजदेयमपलपितमष्टगुणं दाड्यरूपं तया दाप्यः ४०० ॥

आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ विचार्य सर्वपण्यानां कारयेत्क्रयविक्रयौ ४०१

आगममिति कियतो दूराद्देशादागतमिति देशांतरगमने कियद्दूरं नियतं ह्रासे देशे प्रोढं वस्तुनिर्गमं किं यत्कालं स्थितं किं यत्तन्मूल्यं लभते यति स्यात् तथा कियती वृद्धिरत्र तथा कर्मकारणेभ्यः कारणं क्राद्यादिना कियान् उपलयस्तत्सर्वं विचार्य यथा वणिजां क्रेतॄणां च पीडा न भवति तथा सर्वपण्यानां क्रयविक्रयौ कारयेत्

पञ्चरात्रे पञ्चरात्रे पक्षे पक्षेऽथवा गते कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः ४०२ ॥

पंचरात्र इति आगमादिनिर्गमोपयोगादेः पण्यानामर्घनियतत्वात् अस्थिरार्घाणां पंचरात्रे पंचरात्रे गते स्थिरार्घाणां पक्षे गते वणिजां सर्वविधीयां प्रत्यक्षं नृपतिरामपुरुषैरर्घव्यवस्थां कुर्यात् ४०२

तुलामानं प्रतीमानं सर्वं च स्यात्सुलक्षितं षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत् ४०३ ॥

तुलेति तुलामानं सुवर्णादीनां परिच्छेदार्थं यत् क्रियते प्रतिमानं प्रस्थद्रोणादि तत्सर्वं राजनिरूपितं यथा स्यात् षट्सु षट्सु मासेषु गतेषु पुनस्तत्सर्वं राजपुरुषैर्नृतिः परीक्षयेत् ४०३

पणं यानं तरे दाप्यं पौरुषोऽर्धपणं तरे पादं पशुश्च योषिच्च पादार्धं रिक्तकः पुमान् ४०४

पणमिति भाण्डपूर्णानि यानानीति वक्ष्यति तेन रिक्तं शकटादियानं नद्यादिविषये पणं दाप्यं एवं पुरुषभारः सभारो वोढव्यः पणोऽर्धपणं तरे पादं दापयेत् पशुः स्त्री गवादिः पादचतुर्थभागं भाररहितो मनुष्यः पणाष्टमभागं दापनीयः ४०४ ॥

भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः रिक्तभाण्डानि यत्किंचित्पुमांसश्चापरिच्छदाः ४०५

भाण्डेति पण्यद्रव्यपूर्णानि शकटादीनि द्रव्यगतोत्कर्षापकर्षापेक्षया तरं दाप्यानि द्रव्यरहितानि च गोणीकंडोलादीनि यत्किंचित्स्वल्पं तार्यं दाप्यानि परिच्छदादिरहितः पुरुषोऽल्पं यत्किंचिद्दापनीयः ४०५

दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत् नदीतीरेषु तद्विद्यात्समुद्रे नास्ति लक्षणं ४०६

133

म· वृ· से· ३३३

दीर्घेति पूर्वपारावारसमुद्रे शुल्कं स्वामीनदीमार्गेण यद्रात्रिगतं अप्रवलेवेगस्थिरोदकत्वाद्विदेशे ग्रीष्मवर्षादिकालापेक्षया तरमूल्यं कल्पनीयं एतच्च नदीतीरेष्वेव द्रव्यं समुद्रे तु वाताधीनपातगमनत्वात् स्थायनत्वाभावेन योजनापरिमाणं ... नदीवयोजनादिकं नास्तीत्यतस्तत्रो चितमेव तरपण्यं ग्राह्यम् ४०६॥

गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः। ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे ४०७॥

गर्भिणीति संजातगर्भा स्त्री मासद्वयादूर्ध्वं तथा प्रव्रजितो भिक्षुर्मुनिर्वानप्रस्थो ब्राह्मणाश्च लिङ्गिनो ब्रह्मचारिणः तरमूल्यं तरेन दाप्याः ४०७॥

यन्नावि किंचिद्दाशानां विशीर्येतापराधतः। तद्दाशैरेव दातव्यं समागम्य स्वतोंऽशतः ४०८॥

यन्नावीति नौकारूढानां यत्किंचिद्वस्तु विकापराधेन नष्टं तन्नाविकैरेव मिलित्वा यथाभागं दातव्यम् ४०८॥

एष नौयायिनामुक्तो व्यवहारस्य निर्णयः। दाशापराधतस्तोये दैविके नास्ति निग्रहः ४०९ एष नावीति नाविकापराधेन नष्टं तन्नाविकैरेव दातव्यमिति पूर्वोक्तमनूद्यते दैविके नास्ति निग्रह इति विधातुं नौयायिनामेष व्यवहारस्य निर्णय उक्तः दैवोपजातवात्यादिना नौभङ्गेन पण्यनाशे न नाविकानां दण्डः ४०९॥

वाणिज्यं कारयेद्वैश्यं कुसीदं कृषिमेव च। पशूनां रक्षणं चैव दास्यं शूद्रं द्विजन्मनाम् ४१०

वाणिज्यमिति वाणिज्यकुसीदकृषिपशुरक्षणानि वैश्यं कारयेत् शूद्रं च राजा द्विजातीनां दास्यं कारयेत् शुश्रूषाणां वैश्यशूद्रयो राज्ञा दण्ड्या विशेषतः ... इत्युपदेशः ४१०॥

क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ। बिभृयादानृशंस्येन स्वानि कर्माणि कारयन् ४११ क्षत्रियमित्यादि ब्राह्मणः क्षत्रियवैश्यौ वृत्तिक्षीणौ स्वानि कर्माणि रक्षणकृष्यादीनि कारयन् ग्रासाच्छादनादिना पोषयेत् एवं च न वा न ब्राह्मणाः ... [illegible] ... भृत्यभावेन पीडितौ कारयन् स्वानि कर्माणि ... ४११

दास्यं तु कारयँल्लोभाद्ब्राह्मणः संस्कृतान्द्विजान्। अनिच्छतः प्राभवत्याद्राज्ञा दण्ड्यः शतानि षट् ४१२

दास्यं त्विति प्रभवतो भावः प्राभवत्यं ब्राह्मणः कृतोपनयनान्द्विजातीननिच्छतः प्रभुत्वेन लोभाद्दास्यकर्म पादधावनादि कारयन् षट्शतानि दण्ड्यः ४१२॥

शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा। दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयंभुवा ४१३॥

शूद्रं त्विति शूद्रं पुनर्भक्तादिभृतमभृतं वा दास्यं कारयेत् यस्मादसौ ब्राह्मणस्य दास्यायैव प्रजापतिना सृष्टः ४१३॥

न स्वामिना निसृष्टोऽपि शूद्रो दास्याद्विमुच्यते। निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति ४१४ न स्वामिनेति यस्मादेषो ... [illegible] ... शूद्रो ब्राह्मणादिद्विजशुश्रूषार्थं ... स्वामिना स्वदास्यान्मुक्तोऽपि शूद्रो दास्याद्विमुच्यते यस्मात्तस्य शूद्रस्य सहजं कः शूद्रजातिमिव दास्यमपनयति ... [illegible] ... संगतः सर्वत्रः सदास्यभावे शूद्रोऽपि ब्राह्मणस्य दासत्वाच्च विमुच्यते ... ४१४

ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ। पैत्रिको दण्डदासश्च सप्तैते दासयोनयः ४१५ ... ध्वजाहृत इति संग्रामे स्वामिसकाशाज्जितो भक्तलोभात्प्रपन्नो दासो भक्तदासः तथा स्वदासीपुत्रः मूल्येन क्रीतोऽन्येन दत्तः पित्रादिक्रमागतः दण्डादि ... [illegible] ... तन्नादीनि दासत्वकारणानि ४१५॥

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ४१६॥

133A

भार्येति भार्यापुत्रदासास्त्रयोमी निर्धना एव मन्वादिभिः स्मृताः यस्मात् यद्धनं ते र्जयंति यस्य ते भार्यादयस्तस्य तद्धनं भवति एतच्च भार्यादीनां पारतंत्र्यप्रदर्शनार्थं न पुनः धनाभावादेः एवंविधस्य त्वीयत
स्य वदनमात्मात्वात् यस्मात् धनं स्वामिनोपदेशाच्च भार्यादीनामप्रत्यर्थिकरणं पत्यनुज्ञाभियोगादिकारस्य उक्तत्वात् स्त्रीपुंसयोर्मध्ये एकदिने यथनेचात्र मतिः कारणं स्त्रियाश्चापि कर्तृत्वात् ४१६

विस्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादानमाचरेत् नहि तस्यास्ति किंचित्स्वं भर्तृहार्यधनो हि सः ४१७ विस्रब्धमिति निर्विचिकित्समेव ब्राह्मणो दास
शूद्राद्धनग्रहणं कुर्यात् ब्राह्मणः यतस्तस्य किंचिदपि स्वं नास्ति यस्मात् भर्तृग्राह्यधनोऽसौ एवं चापद्विकलादपि दासात् ब्राह्मणोयं नेग्रहणे न राज्ञा दंडनीय इत्येवमर्थमेतदुच्यते ४१७॥

वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत् तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतामिदं जगत् ४१८

वैश्येति वैश्यं कृष्यादीनि शूद्रं च द्विजातिशुश्रूषादीनि कर्माणि यत्नतो राजा कारयेत् यस्मात् तौ स्वकर्मभ्यश्च्युतौ धनगर्वात् यो पार्जितधनमदादिना जगदाकुली कुर्यातां ४१८॥

अहन्यहन्यवेक्षेत कर्मान्तान्वाहनानि च आयव्ययौ च नियतावाकरान्कोशमेव च ४१९ अहनीति प्रत्यहं तद्यक्तकृतकर्मान्तारम्भस्थानानि हस्त्यश्वादीनि आयव्ययौ नियतावाकरान् स्वर्णरत्नाद्युत्पत्तिस्थानानि भांडागारं चावेक्षेत यद्यवहारोदर्शनामत्तोपि राजा यथार्थं परीक्षेदिति तदर्थं अपि तदुक्तस्यापि पुनर्वचनम् ४१९

एवं सर्वानिमान्राजा व्यवहारान्समापयन् व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ४२० ॥ ॥ ॥

एवमिति एवं प्रकृतप्रकारेण एतान् सर्वान् ऋणादानादीन् व्यवहारान् तत्त्वतो निर्णयेन राजा पापं सर्वमपहाय स्वर्गादिप्राप्तिरूपां उत्कृष्टां गतिं लभते ४२० इति श्रीकुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यामष्टमः ८

पुरुषस्य स्त्रियाश्चैव धर्म्ये वर्त्मनि तिष्ठतोः संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान् १॥ पुरुषस्येति पुरुषस्य स्त्रियाश्च धर्मादनपेतेभ्यो
व्यभिचाररहिते वर्त्मनि वर्तमानयोः संयुक्तयोर्वियुक्तयोश्च धर्मान् पारंपर्यागतत्वेन नित्यान् वक्ष्यामि दंपत्योः परस्परस्य धर्मव्यतिक्रमे सत्यप्यतरक्षापि तेन राज्ञा दंडेनापि स्वधर्मे व्यवस्थापनं कर्तव्यमिति व्यवहारसमयेप्युपदेशः १॥

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे २॥

अस्वतन्त्रा इति स्त्रियो भर्त्रादिभिः सदा स्वाधीनाः कार्याः अनिषिद्धेष्वपि रूपरसादिविषयेषु प्रसज्जन्त्यः प्रसंगं कुर्वाणा आत्मवशाः कार्याः २॥

पिता रक्षति कौमारे भर्ता रक्षति यौवने रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ३॥

पितेति पिता विवाहात्पूर्वं स्त्रियं रक्षेत् ऊर्ध्वं पश्चात् तदभावे पुत्राः तस्मात् स्त्री कस्यांचिदप्यवस्थायां स्वातंत्र्यं भजेत् भर्ता रक्षति यौवनादिस्यादिप्रार्थिकं प्रभर्तृपुत्राभावास्तु संनिहिताः पित्रादयोपि रक्षणाः ३

कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता ४॥

कालेइति प्रदानकाले पिता तामददत् गर्ह्यो भवति प्रदानं प्राक् ऋतोरिति गौतमवचनात् ऋतोः प्राक्प्रदानकालः पतिश्च ऋतुकाले पत्नीमगच्छन् गर्हणीयो भवति पत्यौ मृते मातरमरक्षन् पुत्रो निंद्यः स्यात् ४

सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ५॥

सूक्ष्मेभ्य इति सूक्ष्मेभ्योपि दुःसंगेभ्यो दौःशील्यसंपादकेभ्यो विशेषेण स्त्रियो रक्षणीयाः किं पुनर्महद्भ्यः यस्मादरक्षिता रक्षणादयोः पितृभर्तृगणयोः संतापं दापयेयुः ५॥

134

इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमं यतन्ते रक्षितुं भार्यां भर्त्तारो दुर्बला अपि ६ ॥
इममिति सर्वेषां ब्राह्मणादिवर्णानां भार्यारक्षणलक्षणं धर्ममेवं समानं श्रेष्ठं करीत्या सर्वधर्मेभ्य उत्कृष्टं जानंतोऽन्धपंगवादयोऽपि भार्यां रक्षितुं यतेरन् ६ ॥
स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च स्वं च धर्मं प्रयत्नेन जायां रक्षन्हि रक्षति ७ स्वामिति यस्माद्भार्यां यत्नतो रक्षणेन संकीर्णविशुद्धा पत्यो ना
दनेन स्वसंततिं तथा शिष्टसमाचारं पितृपितामहाद्यन्वयं आत्मानं विशुद्धसंताननिमित्तो हि देहकलाभेन स्वधर्मं च विशुद्धभार्यस्याधानादावधिकारादिति तस्मात्स्त्रियो रक्षितव्या तेन स्वधर्मस्य विरोधः ७ ॥
पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ८ ॥
पतिरिति। पतिः शुक्ररूपेण भार्यां संप्रविश्य गर्भो भूत्वा मातुरस्यां भार्यायां पुत्ररूपेण जायते तथा श्रुतिः आत्मा वै पुत्रनामासीति जायायास्तदेव जायात्वं यतोऽस्यां पतिः पुनर्जायते।
तथा च बह्वृचब्राह्मणं पतिर्जायां प्रविशति गर्भो भूत्वेह मातरं तस्यां पुनर्नवो भूत्वा दशमे मासि जायते तज्जाया जाया भवति यदस्यां जायते पुनः। ततश्च सा रक्षणीयेति तदर्थं नामनिर्वचनं ८
यादृशं भजते हि स्त्री सुतं सूते तथाविधं तस्मात्प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः ९ ॥
यादृशमिति यस्माद्यादृशं पुरुषं शास्त्रेण विहितं प्रतिषिद्धं वा स्त्री तादृशं शास्त्रोक्तपुरुषमेव सेवते तादृशं निषिद्धपुरुषमेव सेवते न च निकृष्टं पुत्रं जनयति तस्मात्प्रजाविशुद्ध्यर्थं पत्नीं यत्नतो रक्षेत् ९ ॥
न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुं एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुं १० ॥
कथं रक्षणीयेत्यत आह नेति कश्चिद्बलात्संरोधादिनापि स्त्रियो रक्षितुं न शक्तस्तत्रापि व्यभिचारदर्शनात् किं त्वेतैर्वक्ष्यमाणै रक्षणोपाययोगैस्ता रक्षितुं समर्थाः १० ॥
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ११ तानुपायानाह अर्थस्येति धनस्य संग्रहे व्ययविनि
योगे च शरीरशुद्धौ धर्मे अग्निशुश्रूषादिके अन्नसाधने पारिणाह्यस्य गृहोपकरणस्य शय्यासनकुण्डकटाहादेरवेक्षणे एतान्नियोजयेदेवं रक्षणाद्व्यापृतिर्लोकः ११ ॥
अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः १२ अरक्षिता इति आप्तैश्च आज्ञाकारिभिः
पुरुषैर्गृहे रुद्धा अपि अरक्षिता भवंति या दुःशीलतया नात्मानं रक्षंति यास्तु धर्मेण तया आत्मानमात्मना रक्षंति ताः सम्यग्रक्षिता भवंति अतो धर्मार्थमफलस्वर्गनरकशास्त्राद्युपदेशेन स्त्रीणाम्
माकार्षीदिति शुभं रक्षणोपायकथनमिह १२
पानं दुर्जनसंसर्गः पत्या च विरहोऽटनं स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् १३
पानमिति मद्यपानमसज्जनैः संसर्गः भर्त्रा सह विरहः इतस्ततश्च भ्रमणं अकाले स्वापः परगृहे निवास इत्येतानि षट् स्त्रिया व्यभिचारादिदोषजनकानि तस्मादेतेभ्यो यत्नाद्रक्षणीयाः १३
नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते १४ ॥
नैता इति नैताः कमनीयं रूपं विचारयंति न चासां यौवनादिके वयसि आदरो भवति किंतु सुरूपं कुरूपं वा पुमानिति तावतैव तेन सह उपभुंजते १४ ॥
पौंश्चल्याच्चलचित्ताच्च नैःस्नेह्याच्च स्वभावतः रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते १५

अपि च पौंश्चल्यादिति पुंसो दर्शनेन संभोगायाभिलाषशीलत्वात् चित्तस्थैर्याभावात्स्वभावतः स्नेहरहितत्वाच्च पत्या यत्नेनापि लोके रक्षिताः सत्यो व्यभिचाराश्रयेण भर्तृषु विकुर्वते गच्छन्ति १५

एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजं परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति १६ ॥

एवमिति एवं श्लोकद्वयोक्तमासां स्वभावं हिरण्यगर्भसृष्टिकालजनितं ज्ञात्वा रक्षणार्थं प्रकृष्टं यत्नं पुरुषः कुर्यात् १६ ॥

शय्यासनमलंकारं कामं क्रोधमनार्जवं द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् १७ ॥

शय्येति शयनोपवेशनालंकरणशीलत्वं कामक्रोधानार्जवपरहिंसाकुत्सिताचारत्वानि सर्गादौ मनुः स्त्रीभ्यः कल्पितवान् तस्माद्यत्नतो रक्षणीयाः १७ ॥

नास्ति स्त्रीणां क्रिया मंत्रैरिति धर्मो व्यवस्थितः निरिंद्रिया ह्यमंत्राश्च स्त्रियोऽनृतमिति स्थितिः १८

नास्तीति जातकर्मादिक्रिया स्त्रीणां मंत्रैर्नास्तीत्येवं शास्त्रमर्यादाव्यवस्थिता ततश्चामंत्रवत्त्वसंस्कारगुणाभावात्तन्निष्पापता न । करणमिंद्रियं प्रमाणं धर्मज्ञतिस्मृतिरहितत्वा अथ मंत्रा अमंत्राः पापापनोदनमंत्रजपरहितत्वात्तु पापायत्तनिर्व्याजेनात्मनः अनृतवदशुभाः स्त्रिय इति शास्त्रमर्यादा तस्माद्यत्नतो रक्षणीया इत्येव तात्पर्यम् १८ ॥

तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः १९

व्यभिचारशीलत्वं स्त्रीणां स्वाभावक्तं तत्र श्रुतिप्रमाणं तयोपपादयति तथा चेति बहिःकृतयो बह्व्यो निष्कृतिरकाः निगीता वेदेषु हि सोऽत्र ब्राह्मणः सोऽत्र ब्राह्मणा वेदेष्वेवमादि निगमेषु स्वालक्षण्यं स्त्रीणां व्यभिचारशीलत्वं तत्परीक्षार्थं तासां व्यभिचारप्रायश्चित्तभूतास्ताः कृतीः शृणुत एकस्याः कृते वक्ष्यमाणत्वान्निष्कृतिं शृणुतेत्यर्थे स्त्रीयास्तुपापं भवतीति द्वितीयेकवचने बहुवचनं १९

यन्मे माता प्रलुलुभे विचरंत्यपतिव्रता तन्मे रेतः पिता वृंक्तामित्यस्यैतन्निदर्शनं २० ॥

यदिति कश्चित्पुत्रो मातुर्मानसव्यभिचारमवगम्य ब्रूते मम माता वाक्कायकर्मभिः व्यतिरिक्तपुरुषं यान् कामयते सा पतिव्रता ततोऽन्याश्च पतिव्रता मम माता पतिव्रता सती परगृहान् गच्छते यत् प्रलुलुभे परपुरुषं प्रतिसंजातलोभा अभूत् तस्य स्त्रिया व्यभिचारशीलत्वस्य दर्शितकरणीतेऽमत्रपादत्रयं तापकं यच्च मम स्याद्विगर्हितं निरूपितं अन्यत्र मातुर्या मे पिता शोधयत्वित्यस्य प्रकृतस्य स्त्रिया व्यभिचारशीलत्वस्य

ध्यायत्यनिष्टं यत्किंचित्पाणिग्राहस्य चेतसा तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते २१

मंत्रमिमानसव्यभिचारप्रायश्चित्तरूपतामाह ध्यायतीति भर्तुरप्रियं यत्किंचित्परपुरुषानुगमनं स्त्री मनसा चिंतयति तस्य मानसस्य व्यभिचारस्य प्रकृतो मंत्रः सम्यक्शोधको मन्वादिभिरुच्यते मातुरंश्च वाग्यस्त्रस्वे प्रायश्चित्तरूपो मंत्रो न मातः २१ ॥

यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि तादृग्गुणा सा भवति समुद्रेणेव निम्नगा २२ ।

यादृग्गुणेनेति यथारूपेण भर्त्रा साधुना वा स्त्री विवाहविधिना संयुज्यते सा भर्तृसदृशगुणा भवति यथा समुद्रेण संयुज्यमाना नदी स्वादूदकापि क्षारजला जायते तैर्भर्तृभिः सम्यक्संयमनाय स्त्रीणां गुणोपयोगोपदेशार्थमिदं २२ ॥

अक्षमाला वसिष्ठेन संयुक्ताधमयोनिजा शारंगी मंदपालेन जगामाभ्यर्हणीयतां २३ ॥

उक्तोऽर्थे दृष्टांतमाह अक्षेति अक्षमालाख्या निकृष्टयोनिजा वसिष्ठेन परिणीता तथा चटका मंदपालाख्येन ऋषिणा संगता पूज्यतां गता २३ ॥

एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः २४

135

म।
नु। मं।
१३५

एता इति यद्यपि द्वेषकृतेन तथापि प्रदर्शनार्थं न मनयोर्मत्वा एता इति बहुवचनं कृतं एता अन्याश्च स्त्रियः सत्यवत्यादयो निकृष्टप्रसूतयः स्वभर्तृगुणैः प्रकृष्टैरस्मिन् लोके उत्कृष्टतां प्राप्ताः २४ ॥

एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा प्रेत्येह च सुखोदर्कान्प्रजाधर्मान्निबोधत २५ ॥

एषेति एषा लोके संयोजायापतिविषयः सदा शुभ उक्ता इदानीमिह लोके परलोके च उत्तरकालसुखहेतून् किं देशिणः अपत्यसुत बीजिन इत्यादीन् प्रजाधर्मान् शृणुत २५ ॥

प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन २६ ॥

प्रजेति यस्मात्संसारदाणार्थं दोषा उक्तास्तथापि शक्यप्रतीकारत्वादिह दोषाभावः एताः स्त्रियो महोपकारका गर्भोत्पादनार्थं बहुकल्याणभाजनभूता वस्त्रालंकारादिदानेन संमानार्हाः स गृहस्य शोभाकारिण्यः स्त्रियः स्त्रियश्च गेहेषु तत्स्वरूपमानानयोर्विशेषो विद्यते यथा निःश्रीकं गृहं न राजते एवं निःस्त्रीकमिति २६ ॥

उत्पादनमपत्यस्य जातस्य परिपालनं प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबंधनं २७ ॥

अपि च उत्पादनमिति अपत्यस्य जननं जातस्य परिपालनं प्रतिदिनं चातिथिमित्रभोजनादेर्लोकव्यवहारस्य प्रत्यक्षं भार्यैव निदानम् २७ ॥

अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह २८

अपत्यमिति अपत्योत्पादनमुक्तमप्येतद्दृष्टार्थं हि तत्तत्रायनार्थं पुनरभ्यधानं धर्मकार्याणि अग्निहोत्रादीनि परिचर्या उत्कृष्टा रतिः पितॄणामात्मनश्चापत्यजननादिना स्वर्ग इत्येतत् सर्वं भार्याधीनम् २८ ॥

पतिं या नाभिचरति मनोवाग्देहसंयता सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते २९

पतिमिति या स्त्री मनोवाग्देहसंयता सती विशेषणोपादानसामर्थ्यान्मनोवाग्देहैरेव न व्यभिचरति सा भर्त्रा सहार्जितान् स्वर्गादिलोकानाप्नोति इह लोके च शिष्टैः साध्वीत्युच्यते २९

व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निंद्यतां शृगालयोनिं चाप्नोति पापरोगैश्च पीड्यते ३० व्यभिचारादिति पुरुषांतरसंपर्कात् स्त्री लोके निंद्यतां जन्मांतरे च शृगालजातिं प्राप्नोति क्षयरोगादिभिश्च पीड्यते एवं च माधवीये स्त्रीधर्मा उक्तमप्येतत्तु श्लोकद्वयं मदपत्यसंपत्त्यर्थं तेन महाप्रयोजनेन तया पुनः पठितम् ३० ॥

पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत ३१ ॥

पुत्रमिति पुत्रमधिकृत्य शिष्टैर्मन्वादिभिः पूर्वोत्पन्नैश्च महर्षिभिः अभिहितमिमं वक्ष्यमाणं सर्वजनहितं विचारं शृणुत ३१ ॥

भर्तुः पुत्रं विजानंति श्रुतिद्वैधं तु भर्तरि आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ३२ भर्तुरिति भर्तुः पुत्रो भवतीति शुनेयामन्यंते भर्तरि द्विःप्रकारा श्रुतिर्वर्तते केचिदुत्पादकमवोढारमपि भर्तारं तेन पुत्रेण पुत्रिणमाहुः अन्ये तु वोढारं भर्तारमनुत्पादकमपि स्वक्षेत्रजनितेन पुत्रेण पुत्रिणमाहुः ३२ ॥

क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् क्षेत्रबीजसमायोगात्संभवः सर्वदेहिनां ३३ क्षेत्रेति व्रीह्याद्युत्पत्तिस्थानं क्षेत्रं तत्तुल्या स्त्री मुनिभिः स्मृता पुरुषश्च व्रीह्यादिबीजतुल्यः स्मृतः यद्यपि रेतो बीजं तथापि तदधिकारात् पुरुषो बीजमिति व्यपदिश्यते क्षेत्रबीजसमायोगात् सर्वशरीरिणां संभवः एवं चोभयोः कारणत्वस्याविशिष्टत्वाद्युक्ता विप्रतिपत्तिः ३३

135 A

विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित् उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते ३४ कियत्कं वृध्यि देवैतव्यापतिं उत्तयदीयं बीजं तत्स्यति विशि-
ष्टमिति क्वचित्तद्बीजं प्रधानेनोतो येन निकृष्टायामपि तिर्यग्योनौ जातो वीचिनो ऋष्य इव सोमस्य तथा व्यास ऋष्यशृङ्गादयो बीजिनामेव सुताः क्वचित्क्षेत्रं प्रधानं यथा यस्य पत्न्यां क्षेत्रज्ञः प्रमीतस्य
इति वक्ष्यति यत्र पुनर्विचित्रवीर्यक्षेत्रे तद्विधायां ब्राह्मणोत्पादिता अपि धृतराष्ट्रादयो क्षेत्रियाः क्षत्रियाणामेव पुत्रा बभूवुः यत्र पुनर्बीजयोन्योः साम्यं तत्र वोढेव जनयिता तदपत्यं प्रशस्तं भवति ३४

बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता ३५ ॥
तत्र बीजप्राधान्यपक्षं तावदाह बीजस्येति बीजक्षेत्रयोर्बीजं प्रधानमभिधीयते यस्मात्सर्वेषां भूतानां व्यावर्तनां उत्पत्तिर्बीजगतवर्णरूपादिचिह्नैः उपलक्षिता दृश्यते ३५॥

यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते तादृग्रोहति तत्तस्मिन्बीजं स्वैर्व्यञ्जितं गुणैः ३६॥
तादृशमिति यत्सजातीयं बीजं व्रीह्यादि ग्रीष्मादिकाले कर्षणादिना संस्कृते क्षेत्रे उप्यते तज्जातीयमेव तद्बीजमात्मीयैर्वर्णादिभिरुपलक्षितं तस्मिन्क्षेत्रे जायते ३६ ॥

इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते न च योनिगुणान्कांश्चिद्बीजं पुष्यति पुष्टिषु ३७ एवमन्वयप्रकारेण बीजप्राधान्यं प्रद-
र्श्य व्यतिरेकमुखेन दर्शयितुमाह इयमिति हि यस्मात्कारणात् इयमेव भूमिर्भूतानां तरुगुल्मलतादीनां नित्या योनिः कारणं क्षेत्रात्मकं सर्वलोके रुच्यते न च भूम्याख्ययोनिधर्मान् कां-
श्चिदपि मृत्तिकारूपतादीन् बीजं स्वविकारेषु अङ्कुरकाण्डादिषु वृक्षस्याप्रभजते भजते तथैव तस्य पुष्यतेः सकर्मता तस्माद्योनिगुणावर्तनाभावान्न क्षेत्रप्राधान्यम् ३७॥

भूमावप्येककेदारे कालोप्तानि कृषीवलैः नानारूपाणि जायन्ते बीजानीह स्वभावतः ३८
अपि च भूमाविति भूमावेकस्मिन्नपि केदारे कर्षकैर्वपनकालोप्तानि व्रीहिमुद्गादीनि नानारूपाणि स्वस्वभावाज्जायन्ते न तु भूमेरेकत्वादेकरूपाणि भवन्ति ३८॥

व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः यथाबीजं प्ररोहन्ति लवनीदयस्तथा ३९
तथा हि व्रीहीति व्रीहयः षष्टिकाः शालयः कलमाद्याः तथा मुद्गादयो बीजस्वभावानतिक्रमेण नानारूपाणि जायन्ते ३९ ॥

अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ४०।
एवं च सति अन्यदिति व्रीहिरुप्तो मुद्गादिर्जायत इत्येतन्न संभवति यस्माद्यदेव बीजमुप्यते तत्तदेव जायते एवं बीजगुणानुवर्तनात् क्षेत्रधर्मानवृत्तेश्च बीजस्य क्षेत्रमपेक्ष्यापि बीजप्राधा-
न्यम् ४०।

तत्प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना आयुष्कामेन वप्तव्यं न जातु परयोषिति ४१ संप्रति क्षेत्रप्राधान्यमा-
ह तदिति तद्बीजं सहजप्रज्ञावता पित्रादिभिरनुशिष्टेन जायते नेनेति ज्ञानं वेदः एवं विज्ञानमपि तदङ्गादिशास्त्राणि तद्वेदिना आयुरिच्छता न कदाचित्परजायायां वपनीयम् ४१

अत्र गाथा वायुगीताः कीर्तयन्ति पुराविदः यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ४२॥
अत्रेति अत्रैतत्कालज्ञाः अस्मिन्नर्थे वायुप्रोक्ता गाथाः छन्दोविशेषयुक्तानि वाक्यानि कथयन्ति यथा परपरिग्रहे परपत्न्यां बीजम् न वप्तव्यमिति ४२॥

नश्यतीषुर्यथा विद्धः खे विद्धमनुविध्यतः । तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे ४३ नश्यतीति यथा येन विद्धं मृगं कृष्णसारं तस्मिन्नेव क्षि-
प्त इषुः पश्चादन्यस्य विध्यतः आविद्धः द्विमः पुरेयो निष्फलो लाभो भवति पूर्वविद्धे वहतस्तावत्तस्यैव तन्मृगलाभात् एवं परपत्न्यां उप्तं बीजं शीघ्रमेव निष्फलं भवति गर्भग्रहणानन्तरं क्षेत्रिणः स्वापत्यफललाभात् ४३

पृथोरपीमां पृथिवीं भार्यां पूर्वविदो विदुः । स्थाणुच्छेदस्य केदारमाहुः शल्यवतो मृगं ४४ पृथोरिति इमामपि पृथ्वीं पृथुना पूर्वं स्वामिगृहीतत्वा-
दनेकराजसंबंधेपि पृथोर्भार्यामित्यतीतज्ञा जानन्ति तथा स्थाणुच्छेदः कर्मणा येन तापेन स्थानमुत्पाटितं क्षेत्रं कृतं तस्यैव तत्क्षेत्रं वदंति तथा शास्त्रविदः शल्यं येन पूर्वं मृगे क्षिप्तं तस्यैव तं मृगमाहुः एवं पूर्वपरिगृहीतः स्वामिनो द्वितीयवापस्य भवति न जनयितुः ४४

एतावानेव पुरुषो यज्जायात्मा प्रजेति ह । विप्राः प्राहुस्तथा चैतद्यो भर्ता सा स्मृतांगना ४५ एतावानिति नैकः पुरुषो भवति अपितु भार्या स्वदेहः स्वपत्यानीत्येतत्परिमाण एव पुरुषः तथा च वाजसनेयब्राह्मणं अर्द्धो ह वा एष आत्मनो यज्जाया तस्मात् यावज्जायां न विंदते नैतावत्प्रजायते असर्वो हि तावद्भवति अथ यदैव जायां विंदते अथ प्रजायते तर्हि सर्वो भवति तथा चैतद्वेदविदो विप्रा वदंति यो भर्त्ता सैव भार्या स्मृतेति एवं च तत्स्यामुत्पादितं भवतीति ४५

न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते । एवं धर्मं विजानीमः प्राक् प्रजापतिनिर्मितं ४६ यतश्चैवं पत्योरैकात्म्यमतः नेतीति निष्क्रयो विक्रयः विसर्गस्त्यागः ताभ्यां स्त्री भर्तुर्भार्या न दयेते एवं पूर्वं प्रजापतिना स्मृतं नित्यं धर्ममन्यामहे एवं च क्रियादिनापि परस्त्रियमात्मसात्कृतात् उत्पादितमपत्यं क्षेत्रिण एव भवति न बीजिनः ४६

सकृदंशो निपतति सकृत्कन्या प्रदीयते । सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ४७ ॥ सकृदिति पित्रादिधनविभागो भ्रातृणां धर्मतः कृतः सकृदेव भवति न पुनरन्यथा क्रियते इति तथा कन्यापि पित्रादिना सकृदेकस्मै दत्ता न पुनरन्यस्मै दीयते एवं चान्येन पूर्वमस्याः सकृद्दत्ता या पश्चात्पित्रादिभिः प्रमायामपि जनितमपत्यं न बीजिनो भवतीत्येतदर्थमस्योपन्यासः तथा कन्यादाने अस्मिन्नपि गवादिद्रव्ये सकृदेव ददानीत्याह न पुनस्तदस्मै दीयते प्रसंगाद्दानयोरपि सकृत्त्वाभिधाने सकृदाह ददानीत्यनेनैव कन्यादानस्यापि सकृत्करणसिद्धौ प्रकृतोपयोगित्वाद्देव पृथगभिधाने ४७ त्रीण्येतानि साधूनां सकृद्भवतीति

यथा गोश्वोष्ट्रदासीषु महिष्यजाविकासु च । नोत्पादकः प्रजाभागी तथैवान्यांगनास्वपि ४८ यथेति यथा गवादिषु परकीयेषु आत्मवृषभादिकं नियुज्य वत्सोत्पादको न तद्भागी तथा परकीयभार्यास्वपि नोत्पादकः प्रजाभागी भवति ४८ ॥

येऽक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः । ते वै सस्यस्य जातस्य न लभन्ते फलं क्वचित् ४९ ॥ येऽक्षेत्रिण इति क्षेत्रस्वामिनो ये न भवंति अथ बीजस्वामिनः संतः परक्षेत्रे बीजं वपंति ते तत्क्षेत्रसस्यजातस्य धान्यादेः फलं क्वचिदपि देशे न लभंते इति प्रकृतस्य दृष्टांतः ४९ ॥

यदन्यगोषु वृषभो वत्सानां जनयेच्छतं । गोमिनामेव ते वत्सा मोघं स्कंदितमार्षभं ५० । यदन्येति यदन्यदीयगवीषु वृषभो वत्सशतमपि जनयेत् सर्वे ते वत्साः गोस्वामिनामेव भवेयुः न वृषभस्वामिनः वृषभस्य यत् शुक्रसेचनं तत् वृषभस्वामिनो निष्फलमेव भवति यथा गोश्वोष्ट्रेत्यनेनोत्पादकस्य प्रजाभागित्वं न भवतीति परं तेन दृष्टान्तकः अयं तु क्षेत्रस्वामिनः प्रजाभागित्वं भवतीत्येतत्परत्वेन शतोत्पन्नेऽपि न पुनरुक्तिः ५० ॥

तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः । कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलं ५१

136 A

लोकामर्थेऽर्वतिवीजसेक्ता न यत्पाल्यं फलं न लभते ५१॥

तथैवेति यथाश्वादिगर्भे उत्तत्तथैव ह्यपत्यं स्वामिरहिताः संतः परकीयभार्यायां ये वीजं वपंति क्षेत्रे क्षेत्रस्वामिनामेवापत्यं प्रत्यक्षंक्षेत्रिणामर्थोवीजाद्योनिर्गरीयसी ५२॥

फलंत्वनभिसंधायक्षेत्रिणांवीजिनांतथा संदिग्धमेव क्षेत्रिणोऽपत्यं उक्तरीत्या वीजात्क्षेत्रं वलवत् ५२॥

फलमिति यदस्य उत्पन्नं तत्र नैष्पन्नं तदा वयोरुभयोरेवेवं यन्नियमो न कृतस्तत्र तिः संदिग्धमेव क्षेत्रिणोऽपत्यं उक्तरीत्या ... क्षेत्रिकपद्व ५२

क्रियाभ्युपगमात्वेतद्वीजार्थं यत्प्रदीयते तस्येह भागिनो दृष्टौ वीजी क्षेत्रिक एव च ५३॥

क्रियेति यदत्रापत्यं भविष्यति तदावयोरेवेति नियमेन तत्क्षेत्रं स्वामिना वीजवपनार्थं यद्वीजिने दीयते तत्रापत्यस्य लोके वीजिक्षेत्रिणौ द्वावपि भागिनौ दृष्टौ ५३॥

ओघवाताहृतं वीजं यस्य क्षेत्रे प्ररोहति क्षेत्रिकस्यैव तद्वीजं न वप्ता लभते फलं ५४ ओघेति यद्वीजं जलवेगवायुभ्यामन्यदीयक्षेत्रादानीतं यस्य क्षेत्रे जायते तत्क्षेत्रस्वामिन एव तद्वीजं भवति न तु येन वीजमुप्तं स तत्फलं लभते एवं च स्वभार्याभ्रमेणापरभार्यागमनेऽममायं पुत्रो भविष्यत्येवमभिसंधाय क्षेत्रिणापवा ... नेन यत् ५४

एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च विहंगमहिषीणां च विज्ञेयः प्रसवं प्रति ५५॥

एष इति एष न्यायो गवाश्वादीनां संततिं प्रति ज्ञातव्यो यत्क्षेत्रस्वामी वृषभादिस्वामी नियमेन तत्क्षेत्रे तयोरेवं संततिस्वाम्यम् ५५॥

एतद्वः सारफल्गुत्वं वीजयोन्योः प्रकीर्तितं अतः परं प्रवक्ष्यामि योषितां धर्ममापदि ५६

एतदिति एतद्वीजयोन्योः प्राधान्याप्राधान्यं युष्माकमुक्तं अतोऽनंतरं स्त्रीणां संतानाभावे यत्कर्तव्यं तत्तद्वदामि ५६॥

भ्रातुर्ज्येष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा यवीयसस्तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता ५७ भ्रातरिति ज्येष्ठस्य भ्रातुर्या सा कनिष्ठस्य भ्रातुर्गुरुपत्नी भवति कनिष्ठस्य च भ्रातुर्या सा ज्येष्ठभ्रातुः स्नुषा मुनिभिः स्मृता ५७ ज्येष्ठो यवीयसो भार्यां यवीयान्वाग्रजस्त्रियं पतितौ भवतो गत्वा नियुक्तावप्यनापदि ५८ ज्येष्ठ इति ज्येष्ठकनिष्ठभ्रातरावितरेतरभार्यागमनात्संतानाभावं विना नियुक्तावपि पतितौ स्याताम् ५८॥

देवराद्वा सपिंडाद्वा स्त्रिया सम्यङ्नियुक्तया प्रजेप्सिताधिगंतव्या संतानस्य परिक्षये ५९ देवरादिति संतानाभावे स्त्रिया पत्यादिगुरु नियुक्तया देवराद्वा सपिंडाद्वा सम्यग्वक्ष्यमाणघृताक्तादिनियमवत्त्या ऋतुगमनेनेष्टा प्रजा उत्पादयितव्या ईप्सितस्याभिधानमर्थात्कार्यो यद्यमपुत्रोऽस्य पुत्रगमनार्थम् ५९॥

विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ६०

विधवायामिति विधवायामित्यपत्योत्पादनयोग्यपत्यभावपरमिदं जीवत्यपि पत्यौ अयोग्यपत्यादिगुरुनियुक्तो घृताक्तसर्वगात्रो मौनी रात्रावेकं पुत्रं जनयेत् कथंचिद्द्वितीयम् ६०॥

द्वितीयमेके प्रजनं मन्यंते स्त्रीषु तद्विदः अनिर्वृत्तं नियोगार्थं पश्यंतो धर्मतस्तयोः ६१॥

द्वितीयेति अन्ये पुनराचार्या नियोगात्पुत्रोत्पादनविधिज्ञाता अपुत्र एकपुत्र इति शिष्टप्रवादादनिष्पन्नं नियोगप्रयोजनं मन्यमानाः स्त्रीषु पुत्रोत्पादनं द्वितीयं धर्मा मन्यंते ६१॥

म। पु। मे। १३०

विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि गुरुवच्च स्नुषावच्च वर्तेयातां परस्परं ६२॥

विधवायामिति विधवादिकायां नियोगप्रयोजने गर्भधारणे तु यथाशास्त्रं संपन्ने सति ज्येष्ठो भ्राता कनिष्ठभ्रातृभार्या च परस्परं गुरुवत् स्नुषावच्च व्यवहरेताम् ६२॥

नियुक्तौ यौ विधिं हित्वा वर्तेयातां तु कामतः तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ ६३॥

नियुक्ताविति ज्येष्ठकनिष्ठभ्रातरौ परस्परभार्यायां नियुक्तौ घृताक्तादिविधानं त्यक्त्वा स्वेच्छातो वर्तेयातां तौ स्नुषागगुरुदारगमनपतितौ भवेताम् ६३॥

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः अन्यस्मिन्हि नियुञ्जाना धर्मं हन्युः सनातनं ६४

एवं नियोगमभिधाय इदानीं निषेधमाह नान्यस्मिन्निति ब्राह्मणादिभिर्विधवा स्त्री भर्तुरन्यस्मिन्देवरादौ न नियोजनीया यस्मादन्यस्मिन्नियुञ्जाना ते स्त्रीणामेकपतित्वधर्ममनादिं हन्युः ६४

नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् न विवाहविधावुक्तं विधवावेदनं पुनः ६५

नोद्वाहिकेष्विति अर्यमणं नु देवमित्येवमादिषु विवाहप्रयोजनकेषु मन्त्रेषु क्वचिदपि शाखायां न नियोगः कथ्यते न च विवाहविधायकशास्त्रेष्वन्येन पुरुषेण सह पुनर्विवाह उक्तः ६५॥

अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः मनुष्याणामपि प्रोक्तो वेणे राज्यं प्रशासति ६६

अयमिति यस्मादयं पशुसंबन्धी मनुष्याणामपि धर्मत्वेन विद्वद्भिर्निन्दितः योयमधार्मिके वेणाख्ये राज्ञि राज्यं कुर्वाणे तेनैव कर्तव्यतयोपदिष्टः अतो वेणादारभ्य प्रवृत्तत्वेन यमादिमानिति विधूतः ६६

स महीमखिलां भुञ्जन्राजर्षिप्रवरः पुरा वर्णानां संकरं चक्रे कामोपहतचेतसः ६७॥

स महीमिति स वेणो महीं समग्रां पूर्वं पालयन् अत एव राजर्षिश्रेष्ठो न तु धार्मिकत्वात् कामोपहतबुद्धिर्भ्रातृभार्यादिगमनरूपं वर्णसंकरं प्रावर्तयत् ६७॥

ततः प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियं नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ६८॥

तत इति वेणकालात्प्रभृति यो मृतभर्तृकां स्त्रियं शास्त्रार्थं तत्त्वानवगमात् अपत्यनिमित्तं देवरादौ नियोजयति तं साधवो नियतं गर्हयन्ते अयं च स्मोक्तनियोगनिषेधः कलियुगविषयः तदाह बृहस्पतिः उक्तो नियोगो मनुना निषिद्धः स्वयमेव तु युगह्रासादशक्योऽयं कर्तुमन्यैर्विधानतः तपोज्ञानसमायुक्ताः कृतत्रेतायुगे नराः द्वापरे च कलौ नृणां शक्तिहानिर्हि निर्मिता अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः न शक्यन्तेऽधुना कर्तुं शक्तिहीनैरिदंतनैः अतो यज्ञविदा राज्ञा युगविशेषव्यवस्थामज्ञात्वा सर्वदेव सत्ताभावे नियोगादनियोगपक्षे श्रेयानिति स्वमनीषया कल्पितेन तन्मुनिवाक्याविरोधानादियामहे प्रायेणामनुवाक्यं प्रभुनिवाङ्गा महीलिकान् नाप्यगण्योऽस्मि विडम्बकाह सर्वविदः कृथी। ६८॥

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः तामनेन विधानेन निजो विन्देत देवरः ६९

नियोगप्रकरणं त्वाक्रम्य गतं विशेषमाह यस्या इति यस्याः कन्याया वाग्दाने कृते सति भर्ता म्रियते तामनेन वक्ष्यमाणानुष्ठानेन भर्तुः सोदरभ्राता परिणयेत् ६९॥

यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रतां मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ ७० यथेति स देवरो विवाहविधिना प्राप्तां स्वीकृत्य शुक्लवस्त्रां कायमनोवाङ्मनःशौचपालिनीमागर्भग्रहणात् तरहस्यित्रताहृतावेकैकवारं गच्छेत् एवं कन्याया नियोगप्रकारस्तादिवाहस्यग्रहाद्यागमनोपदेशाद्धर्मे वाग्दानमात्रे वर्तते पत्नी भवति ७०

137 A

नदत्त्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः दत्त्वा पुनः प्रयच्छन्हि प्राप्नोति पुरुषानृतं ७१ न दत्त्वेति कस्मैचिद्विद्वान्कन्यां दत्त्वा तस्मिन्मृते दान
गुणदोषज्ञः पुनरन्यस्मै न दद्यात् यस्मादेकस्मै दत्त्वाऽन्यस्मै ददत् पुरुषानृतं महत् पुरुषानृतजं इत्युक्तदोषं प्राप्नोतीति सप्तपदीकरणस्याजातत्वात् भार्यात्वानिष्पत्तेः पुनर्दानाशंकायामिदं वचनं ७१
विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हितां व्याधितां विप्रदुष्टां वा छद्मना चोपपादितां ७२ विधिवदिति शुद्धैरेव द्विजातयाणामित्येवमादि
विधिना प्रतिगृह्यापि वैधव्यादिलक्षणोपेतां रोगिणीं क्षतयोनित्वाद्यभिघातवतीमधिकांगादिगोपनच्छद्मोपपादितां सप्तपदीप्राक्करणात्प्राक् त्यजेत् तत्सुतत्यागे दोषाभावद्योतनार्थं तत्सांगोपांगं ७२॥
यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत् तस्य तद्वितथं कुर्यात्कन्यादातुर्दुरात्मनः ७३॥
यस्त्विति यः पुनर्दोषवतीं कन्यां दोषाननभिधाय ददाति तस्य कन्यादातुर्दुरात्मनो दानं तत्सत्त्वर्पणेन वैयर्थ्यं कुर्यात् एतदपि त्यागे दोषाभावकथनार्थम् ७३॥
विधाय वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः अवृत्तिकर्षिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि ७४॥
विधायेति कार्यवान्मनुष्यः पत्न्या ग्रासाच्छादनादि प्रकल्प्य देशान्तरं गच्छेत् यस्माद्ग्रासाद्यभावपीडिता स्त्री शीलवत्यपि पुरुषान्तरसंपर्कं भजेत् ७४॥
विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ७५॥
विधायेति भर्त्रा ग्रासाच्छादनादि दत्त्वा पत्यौ देशान्तरं गते देहप्रसाधनपरगृहगमनरहिता जीवेत् अदत्त्वा पुनर्गते सूत्रनिर्माणादिभिरनिन्दितशिल्पैर्जीवेत् ७५॥
प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः विद्यार्थं षट् यशोऽर्थं सो ...... त्रिवत्सरान् ७६
प्रोषित इति गुर्वाज्ञासंपादनादिधर्मकार्यनिमित्तं प्रोषितः पतिरष्टौ वर्षाणि पत्न्या प्रतीक्षणीयः ऊर्ध्वं पतिसमीपं गच्छेत् तदाह वसिष्ठः प्रोषितपत्नी पञ्च वर्षाण्युपासीत ऊर्ध्वं पतिस
काशं गच्छेदिति विद्यार्थं प्रोषितः षड्वर्षाणि प्रतीक्ष्यः निजविद्यादिविभावनेन यशोऽर्थमपि प्रोषितः पतिः षडेव भार्यान्तरोपभोगाद्यर्थं गते त्रीणि वर्षाणि ७६॥
संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ७७॥
संवत्सरमिति पतिविषये जातद्वेषां स्त्रियं वर्षं यावत्प्रतीक्षेत तत ऊर्ध्वमपि द्विषन्तीं स्वदत्तमलंकारादिधनं हृत्वा नोपगच्छेत् ग्रासाच्छादनमात्रं तु देयमेव ७७॥
अतिक्रामेत्प्रमत्तं या मत्तं रोगार्तमेव वा सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा ७८॥
अतीति या स्त्री द्यूतादिप्रमादजनकपानादिमत्तं व्याधितं वा शुश्रूषाकरणेनावजानाति सा विगतालंकारशय्यादिपरिच्छदा त्रीन्मासान्मासान्नोपगन्तव्या ७८॥
उन्मत्तं पतितं क्लीबमबीजं पापरोगिणं न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्तनं ७९॥
उन्मत्तमिति वातादिदोषादप्रकृतिस्थं पतितमेकादशाध्याये वक्ष्यमाणं नपुंसकमबीजं वा ध्वजरेतस्त्वादिना बीजरहितं कुष्ठाद्युपेतं च पतिमपरिचरन्त्या त्यागो न करणीयो न च धनग्रहणं करणीयं ७९
मद्यपासाधुवृत्ता च प्रतिकूला च या भवेत् व्याधिता वाधिवेत्तव्या हिंस्रार्थघ्नी च सर्वदा ८०।

138

म॰
वृ॰ मे
१३८

मद्येति निषिद्धमद्यपानरता असाध्वाचारा भर्तुः प्रतिकूलाचरणशीला कुष्ठादिरोगग्रस्ता भृत्यादिताडनशीला सततमतिव्ययकारिणी या भार्या भवेत्सा अधिवेत्तव्या तस्यां सत्यामन्यो विवाहः कार्यः ८०

वंध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ८१

वंध्येति प्रथमरजोदर्शनमारभ्याष्टमे वर्षेऽप्रसूता अष्टमे वर्षेऽधिवेदनीया मृतापत्या दशमे वर्षे स्त्रीजननी एकादशे अप्रियवादिनी तु सद्य एव यदि पुत्रवत्यां तत्संगतो धर्मप्रजासंपन्ने दारे नान्यां कुर्वीत अन्यतराभावे तु कुर्वीतान्यां परिवेत्तार्थं दधिवेदनकार्यम् ८१॥

या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित् ८२

येति या पुनर्व्याधिता अपि हिता सती पत्युर्नरतेहि लाभवति शीलवती च सा तामनुज्ञाप्यान्यो विवाहः कार्यः कदाचिच्च सो नावमननीया ८२॥

अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात् सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ ८३॥

अधीति या पुनः कृताधिवेदना स्त्री क्रुपिता गृहात् निर्गच्छति सा तत्क्षणेव रज्वादिना बद्धा स्थापनीया आकोपनिवृत्तेः पित्रादिकुलसन्निधौ वा त्याज्या ८३॥

प्रतिषिद्धापि चेद्या तु मद्यमभ्युदयेष्वपि प्रेक्षासमाजं गच्छेद्वा सा दंड्या कृष्णलानि षट् ८४॥

प्रतीति या पुनः क्षत्रियादि स्त्री भर्त्रादिनिवारिता विवाहाद्युत्सवेषु प्रतिषिद्धमद्यं पिबेत् नृत्यादिस्थानजनसमूहे वा गच्छेत्सा षट्कृष्णलानि व्यवहारस्वकराणाद्राज्ञा दंडनीया ८४

यदि स्वाश्चापराश्चैव विंदेरन्योषितो द्विजाः तासां वर्णक्रमेण स्याज्ज्यैष्ठ्यं पूजा च वेश्म च ८५॥

यदीति यदि द्विजातयः सजातीया विजातीयाश्च भार्या उद्वहेयुस्तदा तासां द्विजातिक्रमेणैव सम्मानदायविभागो कर्मार्थे ज्येष्ठत्वं पूजा च वस्त्रालंकारादिदानेन गृहं च प्रधानं स्यात् ८५॥

भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यिकं स्वा चैव कुर्यात्सर्वेषां नास्वजातिः कथंचन ८६॥

भर्तुरिति भर्तुर्देहपरिचर्यामन्नदानादिरूपं धर्मकार्यं च भिक्षादानातिथिपरिवेषणहोमीयद्रव्योपकल्पनादिरूपं नित्यकं सर्वेषां द्विजातीनां सजातिभार्यैव कुर्यान्न तु कदाचिद्विजातीयेति ८६

यस्तु तत्कारयेन्मोहात्सजात्या स्थितयान्यया यथा ब्राह्मणचांडालः पूर्वदृष्टस्तथैव सः ८७॥

यस्त्विति यः पुनः सजातीयया संनिहितया देहशुश्रूषादिकं कर्म विजातीयया मोहात्कारयेत्स यथा ब्राह्मण्यां शूद्राज्जातो ब्राह्मणचांडालः तथैव पूर्वैर्महर्षिभिर्दृष्ट इति पूर्वोक्तवत् ८७

उत्कृष्टायाभिरूपाय वराय सदृशाय च अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि ८८॥

उत्कृष्टेति कुलाचारादिभिरुत्कृष्टाय सुरूपाय समानजातीयाय वराय अप्राप्तकालामपि विवाहयेदष्टवर्षीयमेवं धर्मो न हीयते इति दद्यात् तस्मादपि कालात्प्राप्तामपि कन्यां ब्राह्मविवाहविधिना दद्यात् ८८॥

काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ८९॥

काममिति संजातार्तवापि कन्या वरं मरणपर्यन्तं पितृगृहे तिष्ठेत् न पुनरेनां विद्यागुणरहिताय कदाचित्पित्रादिर्दद्यात् ८९॥

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ऊर्ध्वं तु कालादेतस्माद्विंदेत सदृशं पतिं ९०

138 A

त्रीणीति पित्रादिभिर्गुणवद्वरायादीयमानायामेवं जातर्तुर्वा सती त्रीणि ऋतून्प्रतीक्षेत वर्षं च यावत् पुनः ऊर्ध्वमधिकगुणवराभावे समानजातिगुणं वरं स्वयं वृणीत ९०॥

अदीयमाना भर्तारमधिगच्छेद्यदि स्वयं नैनः किंचिदवाप्नोति न च यं साधिगच्छति ९१॥

अदीयमानमिति अदीयमानाति पित्रादिभिरदीयमाना कुमारी यथोक्तकाले यदि भर्तारं स्वयं वृणुते तेन दोषेण न किंचित्पापं प्राप्नोति न च तत्पतिः पापं प्राप्नोति ९१॥

अलंकारं नाददीत पित्र्यं कन्या स्वयंवरा मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत् ९२॥

अलंकारमिति स्वयंवृतपतिका कन्या वरलेकरणात्पूर्वं पितृमातृभ्रातृभिर्दत्तमलंकारं तेभ्यः समर्पयेत् यदा नार्पयेदा चौरी स्यात् ९२॥

पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् स च स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात् ९३॥

पित्रेणेति ऋतुयुक्तां कन्यां वरः परिणयन् पित्रे शुल्कं न दद्यात् यस्मात्स पिता तत्कार्यापत्यो भवति निरोधात् कन्यायाः स्वामित्वाद्धीयते ९३॥

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीं त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ९४ त्रिंशदिति त्रिंशद्वर्षः पुमान्द्वादशवर्षवयस्कां मनो-
हारिणीं कन्यामुद्वहेत् चतुर्विंशतिवर्षो वाष्टवर्षां धर्मे सीदति स्वधर्मे अवसादं गच्छति त्वरावान् पतत्रयोग्यकालप्रदर्शनपरं न तु नियमार्थं प्रायेणैतावता कालेन गृहीतवेदो भवति त्रिभागवयस्का च कन्या वोढुः

देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् ९५ देवेति भगोऽर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवा इत्यादिमन्त्रलिंगाद्देवैर्दत्तां भार्यां तां पतिर्लभते न तु स्वेच्छया तां सती देवानां प्रियं कुर्वन् वस्त्राच्छादनादिना सम्यक्पोषयेत् ९५॥
ऋतुयोगे गृहीतवेदस्य गृहस्थाश्रमप्रतिने-
विलेबेनेति सम्बन्धः तस्यार्थः

प्रजनार्थं स्त्रियः सृष्टाः संतानार्थं च मानवाः तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः ९६ प्रजनेति यस्माद्गर्भग्रहणार्थं स्त्रियः सृष्टाग-
र्भाधानार्थं च मनुष्याः तस्मादग्न्याधानादिरपि धर्मः पत्न्या सह साधारणो वेदे मया पत्न्यावयोरनार्थ्यायात्मित्यादि वेदे विहितः तस्माद्भार्या बिभृयादिति पूर्वोक्तस्य शेषः ९६

कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः देवराय प्रदातव्या यदि कन्यानुमन्यते ९७॥ कन्येति कन्यायां दत्तशुल्कायां
सत्यामसंजातविवाहायां यदि शुल्कदो वरो म्रियेत तदा देवराय पित्रादिभिरसौ कन्या दातव्या यदि सा स्वीकरोतिय स्याद्विधेये नेति प्रागुक्तं नियोगहरूपमिदं तत् शुल्कग्रहणविषयम् ९७॥

आददीत न शूद्रोऽपि शुल्कं दुहितरं ददत् शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयं ९८॥

आददीतेति शास्त्रानभिज्ञः शूद्रोऽपि पुत्रीं ददत् शुल्कं न गृह्णीयात् किं पुनः शास्त्रज्ञो द्विजातिः यस्मात् शुल्कं गृह्णन् प्रच्छन्नं दुहितृविक्रयं कुरुते नन्वार्षे विवाहे गोमिथुनं ग्रहणं पित्रोक्तं सत्यं नन्विह मपि
शुल्कं गृह्णन् कन्याया मिथुनं गृहीतशुल्कायाः प्रसाधनियमदर्शनात् शुल्कग्रहणप्राप्तौ यत्र नियमदर्शनात् शुल्कग्रहणप्राप्तौ यत्र शास्त्रकाप्या पुनस्तन्निषिध्यते ९८॥

एतत्तु न परे चक्रुर्नापरे जातु साधवः यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते ९९॥ एतदिति एतत्पूर्वे शिष्टाः न चक्रुर्नाप्यधुना
तनाः परे वर्तमानकालीयाः कुर्वन्ति यदन्यस्य कन्यामंगीकृत्य पुनरन्यस्मै दीयत इति एतच्च गृहीतशुल्ककन्याविषयं न दत्ताकस्य विक्रेयात्वमिति गृहीतशुल्कविषयम् ९९॥

नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु शुल्कसंज्ञेन मूल्येन छन्नं दुहितृविक्रयं १००॥

139

म॰
नु॰ सं॰
२३५

नेति पूर्वेकलत्रेषु ये प्रहृतामिति कदाचित् व्ययनश्यत्तवं तो यत्र शुल्काभिधानेन मूल्येन कन्याविक्रयः पूर्वैर्हितं गूढं हितविक्रयमकार्षीदिति शुल्कनिषेधानुवादः १०० ॥

अन्योन्यस्याव्यभिचारो भवेदामरणान्तिकः एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः १०१ ॥

अन्योन्यस्येति भार्यापत्योर्मरणान्तं यावत्तद्धर्मार्थकामेषु परस्पराव्यभिचारः स्यादित्येष संक्षेपतः स्त्रीपुंसयोः प्रकृष्टो धर्मो ज्ञातव्यः १०१ ॥

तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ यथा नाभिचरेतां तौ वियुक्ताविततरेतरं १०२ ॥

तथेति कृता इति तथेति स्त्रीपुंसौ कृतविवाहौ तथा सदा यत्नं कुर्यातां यथा धर्मार्थकामविषये वियुक्तौ परस्परं न व्यभिचरेताम् १०२ ॥

एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः आपद्यपत्यप्राप्तिश्च दायभागं निबोधत १०३ ॥

एष इति एष भार्यापत्योरन्योन्यानुरागयुक्तो धर्मो युष्माकमुक्तः संतानाभावे चापत्यप्राप्तिरुक्ता इदानीं दीयत इति दायः पित्रादिधनं तस्य विभागव्यवस्थां शृणुत १०३ ॥

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समं भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः १०४ ॥

ऊर्ध्वमिति भ्रातरो मिलित्वा पितृमरणादूर्ध्वं पैतृकं मातृमरणादूर्ध्वं मातृकं धनं समं कृत्वा विभजेरन् ज्येष्ठगोचरतयोद्धारस्य वक्ष्यमाणत्वात्समभागो यं ज्येष्ठभ्रातरि उद्धारमनिच्छति विधेयः पित्रोर्मरणादूर्ध्वं विभागे हेतुमाह यस्मात्तत्पुत्रा जीवतोः पित्रोस्तद्धनस्वामिनो न भवन्ति मातुरपि पितृकृतत्वात् पैतृकमित्यनेन मातृकस्यापि ग्रहणात् एवं च पितृमरणानन्तरं विभागो जीवतः पितुरिच्छाभावे द्रष्टव्यः पितुरिच्छया जीवत्यपि तस्मिन्विभागः तदाह याज्ञवल्क्यः विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतानिति १०४ ॥

ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः शेषास्तमुपजीवेयुर्यथैव पितरं तथा १०५ ॥

यदा पुनर्ज्येष्ठो धार्मिको भवति तदा ज्येष्ठ इति ज्येष्ठ एव पितृसंबंधि धनं सर्वं गृह्णीयात् कनिष्ठाः पुनर्ज्येष्ठं भक्ताच्छादनार्थं पितरमिवोपजीवेयुः एवं च सर्वेषां सहैवावस्थानं १०५

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति १०६ ज्येष्ठेनेति उत्पन्नमात्रेण ज्येष्ठेन संस्काररहितेनापि मनुष्यः पुत्रवान्भवति ततश्च नापुत्रस्य लोकोऽस्तीति श्रुतेः पुत्राप्यलोकाभावपरिहारो भवति तथा प्रजया पितृभ्य इति श्रुतेः पुत्रेणोत्पादितमात्रेण पितॄणामनृणश्च भवति तस्मात् ज्येष्ठ एव सर्वं धनमर्हतीति संक्षेपार्थः

यस्मिन्नृणं संनयति येन चानन्त्यमश्नुते स एव धर्मजः पुत्रः कामजानितरान्विदुः १०७ ॥

यस्मिन्निति यस्मिन्जाते ऋणं पैतृकं संनयति येन जातेनानन्त्यं मोक्षमेति तथा च श्रुतिः ऋणमस्मिन्संनयत्यमृतत्वं च गच्छति पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखमिति स एव पितृधर्मार्थं हेतुना जातः पुत्रो भवति तेनैकेनैव ऋणापनयनाद्युपकारस्य कृतत्वात् इतरांस्तु कामभावहेतुकजन्मनः पुत्रान्ज्ञानिनो जानन्ति तस्मात्स एव सर्वं धनं गृह्णीयादिति पूर्वस्यैवाक्षेपः पिराधः १०७

पितेव पालयेत्पुत्रान्ज्येष्ठो भ्रातॄन्यवीयसः पुत्रवच्चापि वर्तेरन्ज्येष्ठे भ्रातरि धर्मतः १०८ ।

पितेवेति ज्येष्ठो भ्राता विभागाभावे स्वानुजान् भ्रातॄन् भक्ताच्छादनादिभिः पितेव बिभृयात् ते चानुजा भ्रातरः पुत्रा इव ज्येष्ठे भ्रातरि धर्मार्थं वर्तेरन् १०८ ॥

ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः १०९ ज्येष्ठ इति प्रकृतविभागे ज्येष्ठो यदि धार्मिको भव

139 A

तितदा उज्जानामपितद्वयापितेन धार्मिकत्वाज्ज्येष्ठः कुलं वर्द्धयति यथा धार्मिको भवति तदनुजानामपि तद्वयापितो ज्येष्ठः कुलं नाशयति […] याशुणवान् ज्येष्ठो लोके प्रशस्यतमः साधु

योज्येष्ठो ज्येष्ठवृत्तिः स्यान्मा`````` तेवसः अज्येष्ठवृत्तिर्यस्तुस्यात्ससंपूज्यस्तुबंधुवत् ११० ॥ भिश्चागर्हितो भवति १०९

योज्येष्ठ इति यो ज्येष्ठोऽनुजेषु भ्रातृषु पितृवद्वर्तते स पितेव मातेव चागर्हणीयो भवति यः पुनस्तथा न वर्तते स मातुलादिवद्बन्धुवदर्चनीयः ११० ॥

एवंसहवसेयुर्वापृथग्वाधर्मकाम्यया पृथग्विवर्द्धतेधर्मस्तस्माद्धर्म्यापृथक्क्रिया १११ एवमिति एवमविभक्ता भ्रातरः सह संवसेयुः या

दि वा धर्मकामनया कृतविभागाः पृथग्वसेयुः यस्मात्पृथग्वस्थाने सति पृथक् पृथक् पंचमहायज्ञाद्यनुष्ठानाद्धर्मस्तेषां वर्द्धते तस्माद्विभागो […] धर्मार्थस्तथा च बृहस्पतिः एकपाकेन

ज्येष्ठस्यविंशउद्धारःसर्वद्रव्याच्चयद्वरं ततोर्द्धंमध्यमस्यस्यात्तुरीयंतुयवीयसः ११२ ॥ वसतां पितृदेवद्विजार्चनं । एकं भवेद्विभक्तानां तदेव

स्याद्गृहे गृहे १११

ज्येष्ठस्येति उद्ध्रियत इत्युद्धारः ज्येष्ठः ज्येष्ठस्य विभक्तसाधारणधनादुद्धृत्य विंशतितमो भागः सर्वद्रव्येभ्यश्च यच्छ्रेष्ठं तद्दातव्यम् मध्यमस्य चत्वारिंशत्तमो भागो देयः कनिष्ठस्य पुनरशीतितमो भागो दातव्यः

ज्येष्ठश्चैवकनिष्ठश्चसंहरेतांयथोदितं येन्येज्येष्ठकनिष्ठाभ्यांतेषांस्यान्मध्यमंधनं ११३ ॥ शेषं पिष्टधनं समं कृत्वा विभजनीयम् ११२ ॥

ज्येष्ठश्चेति ज्येष्ठकनिष्ठौ सर्वेष्वनेके यथोक्तमुद्धारं गृह्णीयातां ज्येष्ठकनिष्ठव्यतिरिक्ता ये मध्यमास्तेषां सर्वेषां ज्येष्ठकनिष्ठतामनपेक्ष्य मध्यमस्योक्तश्चत्वारिंशद्भागः प्रत्येकं दातव्यः मध्यमानाम

सर्वेषांधनजातानामाददीताग्र्यमग्रजः यच्चसातिशयंकिंचिद्दशतश्चाप्नुयाद्वरं ११४ वोत्तरज्येष्ठकनिष्ठतया भागवैषम्यवारणार्थमिदं ११३

सर्वेषामिति सर्वेषां धनप्रकाराणां मध्यात्प्रशस्तं धनं ज्येष्ठस्तदुद्धृत्य गृह्णीयात् सर्वद्रव्याच्च यद्वरमित्युक्तमनूदितं तेषु च यदेव तत्रायं श्रेष्ठमेकमपि श्रेष्ठं द्रव्यं विद्यते तदपि ज्येष्ठ एव गृ

ह्णीयात् तथा दशतः पशूनामिति गोव्यतिरेकेणात्र दशभ्यो गवादिपशुभ्य एकं श्रेष्ठं ज्येष्ठो लभते इदं च यदि ज्येष्ठो गुणवानितरे निर्गुणास्तद्विषयम् ११४ ॥

उद्धारोनदशस्वस्तिसंपन्नानांस्वकर्मसु यत्किंचिदेवदेयंतुज्यायसेमानवर्द्धनं ११५ सर्वेषां समगुणानां दश उद्धार इति दशतः श्रेष्ठं प्राप्नुयाद्वरमिति योऽयमु

द्धारकः सोऽयमध्ययनादिकर्मसु संपन्नानां भ्रातॄणां ज्येष्ठस्य नास्ति तथापि यत्किंचिदल्पमपि द्रव्यं पूजार्हं किंचिज्ज्येष्ठाय देयं एवं च समगुणो ज्येष्ठः प्रतिषेधदर्शनात्पूर्वं गुणोत्कर्षापेक्षयोद्धारवे

एवंसमुद्धृतोद्धारेसमानंशान्प्रकल्पयेत् उद्धारेनुद्धृतेत्वेषामियंस्यादंशकल्पना ११६ ॥ षम्येवोद्धरणम् ११५

एवमिति एवमुक्तप्रकारेण समुद्धृतविंशांशादिके धने समान भागान् भ्रातॄणां कल्पयेत् विंशतितमभागादौ पुनरनुद्धृते इयं वक्ष्यमाणा भागकल्पना भवेत् ११६ ॥

एकाधिकंहरेज्ज्येष्ठःपुत्रोध्यर्द्धंततोनुजः अंशमंशंयवीयांसइतिधर्मोव्यवस्थितः ११७ एकेति एकाधिकमंशं द्वावंशाविति यावज्ज्येष्ठपुत्रो गृह्णी

तदधिकमर्द्धं यस्यांशस्य सार्द्धमंशं ज्येष्ठादनन्तरजातो गृह्णीयात् […] शिष्टाः पुनरेकैकमंशं गृह्णीयुरिति व्यवस्थितो धर्मः इदं च ज्येष्ठतदनुजयोर्विद्यादिगुणवत्तापेक्षया कनिष्ठानां च निर्गुणत्वे वेदितव्यं ज्येष्ठ

स्वेभ्योंशेभ्यस्तुकन्याभ्यःप्रदद्युर्भ्रातरःपृथक् स्वात्स्वादंशाच्चतुर्भागंपतिताःस्युरदित्सवः ११८ ॥ तदनुजयो रधिकदानदर्शनात् ११७

स्वेभ्य इति ब्राह्मणक्षत्रियवैश्यशूद्रा भ्रातरो भ्रातरः सजातीयेभ्यो ऽपि स्वेभ्यो अंशेभ्यः […] इत्यादिना वक्ष्यमाणेभ्यो मार्गेभ्यः सजातीयाः सजातीयाभ्यश्चतुर्थं भागं पृथक् कन्याभ्यो ऽनूढाभ्यो भ

गिनीभ्यः यथायथमादद्युः भगिनीनां नात्मपा एवं संस्कारार्थमित्येवं ददतुः मोदयाभावे विभागज्ञेषु पृष्ठे रपि कृष्टे रपि संस्कार्यं प्रवत्तथा च याज्ञवल्क्यः असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः

म॰
९॰ मे॰
१४॰

भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकम् यदि भगिनीसंस्कारार्थं चतुर्भागं दातव्यं नेच्छंति तदा पतिता भवेयुः एतेनैकजातीयैव मात्रेयवक्तुः अत्र भगिनी सर्वावपि सोदर्य भगिनीभ्यस्तुर्यभा गदानमवगंतव्यं ११८

अजाविकं सैकशफं न जातु विषमं भजेत् अजाविकं तु विषमं ज्येष्ठस्यैव विधीयते ११९

अजेति एकशफा अश्वाद्यस्य छागमेषादिकं सैकशफं सहितं विभागकाले समं कृत्वा विभक्तमशक्यं तु न विभजेत् किंतु ज्येष्ठस्यैव तत्स्यात् न तु तत्स्य द्रव्यांतरदानेन समीकृत्य विक्रीय वा तन्मूल्यं विभजेत् अजाविकमिति पशुद्वारा द्विभागप्रदर्शनमेकवडवः ११९

यवीयाञ्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः १२०॥

यवीयानिति कनिष्ठो यदि ज्येष्ठभ्रातृभार्यायां नियोगेन पुत्रं जनयेत् तदा तेन पितृव्येण सह तस्य क्षेत्रजस्य समो विभागः स्यात् न तु तत्तस्य ज्येष्ठो पितृवत्सोद्धारो भवति इति धर्मो व्यवस्था
नियता शास्त्रनियोगे तस्य स्थाने पितृवदंशांतियद्यपि समेत्य भ्रातरः समम् पितृकं तथाप्यस्माद्वचनलिंगात् पौत्रस्यापि मृतपितृकस्य पितामहधने पितृवद्विभागो नास्तीति गम्यते १२०॥

उपसर्जनं प्रधानस्य धर्मतो नोपपद्यते पिता प्रधानं प्रजने तस्माद्धर्मेण तं भजेत् १२१

उपेति ज्येष्ठभ्रातुः क्षेत्रजः पुत्रोऽपि पितेव सोद्धारविभागी भुक्त
इतीमां शंकां निराकृत्य पूर्वोक्तमेव द्रढयति अप्रधानं क्षेत्रजः पुत्रः प्रधानस्य क्षेत्रिणः पितृवद्धर्मेण सोद्धारविभागग्रहणरूपेण न संबध्यते अपि पिता क्षेत्री ह्युत्पादने प्रधानं तस्मात् पूर्वोक्तेनैव धर्मेण विभागव्यवस्थायां पितृव्येण सह तं क्षेत्रजं विभजेदिति पूर्वोक्तमेव शास्त्रं १२१

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः कथं तत्र विभागः स्यादिति चेत्संशयो भवेत् १२२

पुत्र इति यदि प्रथमोढायां कनीयान् पुत्रो जातः पश्चादूढायां च ज्येष्ठस्तदा तत्र कथं विभागो भवेदिति संशयो यदि स्यात्किं च
जन्मक्रमेण पुत्रस्य ज्येष्ठत्वमुत मातृजन्मक्रमेणेति ता १२२

एकं वृषभमुद्धारं संहरेत स पूर्वजः ततोऽपरे ज्येष्ठवृषास्तदूनानां स्वमातृतः १२३

एकमिति पूर्वस्मात् जातः पूर्वजः ज्यायोः संज्ञा स्वदमोर्व्वहुलमि
ति कृतस्तयः कनिष्ठायामेकं वृषभमुद्धारं गृह्णीयात् ततः श्रेष्ठवृषभादन्ये ये सन्त्यश्रेष्ठभाः ते तस्माज्ज्येष्ठिनीयातान् मातृतदूनानां कनिष्ठिनीयातानां प्रत्येकमेकैको भवंतीति मातृक्रमेण ज्येष्ठ

ज्येष्ठस्तु जातो ज्येष्ठायां हरेद्वृषभषोडशाः ततः स्वमातृतः शेषा भजेरन्निति धारणा १२४

ज्येष्ठ इति प्रथमोढायां या ज्येष्ठा तस्यां जातो जन्मना च भ्राता
ज्येष्ठः स वृषभाः षोडशो यासां गवां ता गृह्णीयात् पंचदश गाः एकं वृषभमित्यर्थः ततोऽनंतरं येऽन्ये बहुभ्यो मातृभ्यो जातास्ते स्वमातृक्रमेण हारज्येष्ठतापेक्षया शेषभागान् विभजेरन्निति निश्चयः १२४

सदृशस्त्रीषु जातानां पुत्राणामविशेषतः न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते १२५

सदृशीति समानजातीयस्त्रीषु जातानां पुत्राणां जा
तगतविशेषाभावे सति न मातृक्रमेण ज्यैष्ठ्यं मुनिभिरुच्यते किंतु जन्मक्रमेणैव अतः कनिष्ठजोऽपि पूर्वोक्तमेव विंशभागाद्यंशादिकं गृह्णीयात् मातृज्येष्ठस्य विहितं इति विरुद्धत्वात् षोडशी गृ
हणाय हरणावद्धिकल्पः सवर्णावर्णे गुणतया भ्रातृणां गुरुलघुतावगमाद्व्यवस्थितः अत एव जन्मविशेषगुणाज्ज्येष्ठ्ये शंदाया द्वानुयात् इति वृहस्पत्यादिभिर्जन्मज्येष्ठस्य विषयो गुरूपेण
हारोक्तषंडकः एवं च निर्गुणस्यैकवृषभमिति मेदगुणस्य वृषभषोडशा इति मातृज्येष्ठस्याश्रयणेन उद्धारो वाढव्यः मातृज्येष्ठविधिनं तथा वादमेधातिथिर्वदन् न सम्यगाह गोविंदराजस्तु न्मतज्ये
१२५

जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम् यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता १२६

न केवलं विभागे जन्मज्येष्ठ्यं किंतु जन्मेति सुब्र
ह्मण्याख्यो मंत्रो ज्योतिष्टोमे इन्द्रागच्छेत्याह्वानार्थं प्रयुज्यते तत्र प्रथमपुत्रेणापि तत्पुत्रदिश्याह्वानं क्रियते अमुकस्य पिता यजते इत्येवमृषिभिः स्मृतं तथा यमयोर्गर्भ एककाले निषिक्तयोरपि जन्मक्रमे
णैव ज्येष्ठता स्मृता गर्भाधिस्ते बहुवचनं यमौ बहुत्वापेक्षया १२६

अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरं १२७॥

अपुत्र इति अविद्यमानपुत्रोऽयं यदस्यामपत्यं जायते तन्मम श्राद्धादि और्ध्वदेहिकं स्यादिति कन्यादानकाले जामात्रा सह संप्रतिपत्तिरूपेण विधानेनैव दुहितरं पुत्रिकां कुर्यात् १२७॥

140A

अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः १२८

अत्र परकृतरूपमर्थवादमाह अनेनेति दक्षः प्रजापतिः पुत्रोत्पादनविधिज्ञः स्ववंशाभिवृद्ध्यर्थमनेनोक्तविधानेन कृत्स्ना दुहितॄः पूर्वं पुत्रिकाः स्वयं कृतवान् कात्स्न्येन ग्रन्थार्थः १२८

ददौ स दश धर्माय कश्यपाय त्रयोदश सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिं १२९

ददाविति स दक्षो भाविपुत्रकाः पुत्रिकाः प्रीतात्मा सत्कृत्य दश पुत्रिका धर्माय त्रयोदश कश्यपाय सप्तविंशतिं सोमाय द्विजानामोषधीनां च राज्ञे दत्तवान् सत्कारवचनमेषामपि पुत्रिकाकरणे सत्कारैर्लिंगदर्शनादिवद्बहूनामपि पुत्रिकाकरणज्ञापके

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् १३०॥

यथैवेति आत्मस्थानेयः पुत्रः आत्मा वै पुत्रनामासीति मन्त्रलिंगात् तत्समा च दुहिता तस्याश्चाङ्गेभ्य उत्पादात् अतस्तस्यां पुत्रिकायां पितुरात्मस्वरूपायां विद्यमानायामपुत्रस्य मृतस्य पितुर्धनं पुत्रिकाव्यतिरिक्तः कथमन्यो हरेत् १३०

मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः दौहित्र एव च हरेदपुत्रस्याखिलं धनं १३१

मातुरिति मातुर्यद्धनं तत्तस्यां मृतायां कुमारीभाग एव स्यात् तत्पुत्राणां तस्य भागः कुमारी चाहुता तथाभिपुत्राश्च तथा चगोतमः स्त्रीधनं दुहितॄणामदत्तानामप्रतिष्ठितानां च अपुत्रस्य च मातामहस्य दौहित्र एव पुत्रकृतत्वात् सो रिक्थं सम्यग्धनं गृह्णीयात् १३१

दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च १३२॥

दौहित्र इति दौहित्रः पुत्रकृतत्वात् पौत्रिकेय एव तस्य मातामहस्य धनं गृह्णाति अनन्तरोक्तं जनकधनग्रहणं पिण्डदानार्थमारंभः पितृधनस्य तत्रैव प्रसिद्धत्वात् अपुत्रस्य पौत्रिकेयः पुत्रान्तररहितस्य जनकस्य सम्यग्धनं गृह्णीयात् स एव पितृमातामहाभ्यां द्वौ पिण्डौ दद्यात् पिण्डदानश्राद्धोपलक्षणार्थं पौत्रिकेयस्यैव जनकधनग्रहणे पिण्डदानार्थमाह निरासार्थं वचनम् १३२॥

पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः तयोर्हि मातापितरौ संभूतौ तस्य देहतः १३३॥

पौत्रेति पौत्रपौत्रिकेययोर्लोके धर्मकृते च न कश्चिद्विशेषोऽस्ति यस्मात्तयोर्मातापितरौ तस्य देहादुत्पन्नाविति पूर्वस्यैवानुवादः १३३॥

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः १३४॥

पुत्रिकायामिति कृतायां पुत्रिकायां यदि तत्कर्तुः पुत्रोऽनन्तरं जायते तदा तयोर्विभागकाले समो विभागो भवेत् नोद्धारः पुत्रिकायै देयः यस्माज्ज्येष्ठाश्रितस्य उद्धारविषये ज्येष्ठता नास्ति स्त्रियाः १३४

अपुत्रायां मृतायां तु पुत्रिकायां कथंचन धनं तत्पुत्रिकाभर्ता हरेतैवाविचारयन् १३५॥

अपुत्रेति अपुत्रायां पुत्रिकायां कथंचन मृतायां तदीयधनं तद्भर्तैवाविचारयन् गृह्णीयात् पुत्रिकायाः पुत्रसमत्वेनानपत्यस्य पत्नीरहितस्य तस्य पुत्रस्य पितृधनग्रहणप्रसक्तौ तन्निवारणार्थमिदं वचनं॥

अकृता वा कृता वापि यं विन्देत्सदृशात्सुतं पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनं १३६

अकृतेति अकृता वा कृता वेति पुत्रिकायाः एवं हि विधेयं तत्रैव अपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरमिति अभिधाय कन्यादानकाले वराय समर्प्यया या क्रियते सा कृता अभिसंधिमात्रकृता वा व्यवहारेण तत्कृता तथा च गौतमः अभिसंधिमात्रात्पुत्रिकेत्येके सामि ... पुत्रिके ... कृता वा ... सवर्णजातीयात् ... दौहित्रः ... मातामहः पौत्री तथा च ... दद्यात् तस्य पुत्रिका ... दितेत्वाञ्च पिण्डं दद्यात् ... तद्धनं हरेत् ... योगादिति १३६॥

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपं १३७॥

म॰
नु॰ से॰
१४१ 141

पुत्रेणेति पुत्रेण जातेन स्वर्गादिलोकान्प्राप्नोतीति पौत्रेण तेष्वेव चिरकालमवतिष्ठते तेन दत्तं प्रपौत्रेणादित्यलोकं प्राप्नोतीति पूर्वस्य दायभागप्रकरणे अभिधानं पित्र्यर्णदाने पुत्रादिसद्भावेपि पुत्रस्य तदभावे पौत्रस्य तदभावे प्रपौत्रस्य ताताधिकारबोधनार्थं १३७

पुत्रेणेति पुत्राम्नो नरकाद्यस्मात्त्रायते पितरं सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा १३८

पुन्नाम्न इति यस्मात्पुन्नामधेयनरकात्सुतः पितरं त्रायते तस्मात्त्राणात्पुत्र इति ब्रह्मणा पुत्र इति प्रोक्तः तस्मान्महोपकारकत्वात्पुत्रस्य पुत्रे सति तदीयं सर्वं धनं तस्य दायभागित्वमिति सर्वदायार्थमिति १३८

पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते दौहित्रोपि ह्यमुत्रैनं संतारयति पौत्रवत् १३९ ॥

पौत्रेति दौहित्रः पुत्रिकापुत्रः पौत्रदौहित्रयोर्लौकिके श्रित्ये विशेषो न संभाव्यते यस्माद्दौहित्रोपि मातामहं परलोके निस्तारयति पौत्रवत् पौत्रिकेयस्य पौत्रेण सह धनदत्तस्य भागबोधनार्थं १३९

मातुः प्रथमतः पिंडं निर्वपेत्पुत्रिकासुतः द्वितीयं तु पितुस्तस्यास्तृतीयं तत्पितुः पितुः १४०

मातुरिति पौत्रिकेयः प्रथमं मातुः पिंडं द्वितीयं मातुः पितुस्तृतीयं मातुः पितामहाय दद्यात् पित्रादीनां तु पिंडे मातामहादीनां चेत्प्रक्रमत्वात् पितृक्रमेणैव पिंडदानम् १४० ॥

उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्रिमः स हरेतैव तद्रिक्थं संप्राप्तोप्यन्यगोत्रतः १४१ ॥

उपपन्न इति पुत्ररिक्थहारा पितरिति हा दत्रिमा पित्रा मे वर्णरिक्थहरत्वेन वक्ष्यति दत्रिमा पौत्रेत्र क्रमशः इति औरसदेत्रभावे दत्तकस्य पितृरिक्थहरत्वं शास्त्रमेव अत्र सत्यौरसपुत्रे दत्तकस्य मपि प्रवृत्तः प्रवृत्तिरिति औरसस्य सर्वोक्तवीभिधानात्तेन नाशमभागिते किं तर्हि दत्तकस्य प्रभावित्वमेवासत्यौरसे गोविन्दराजस्तु औरसदेत्रजाभावे सर्वगुणोपपन्नस्य दत्तकस्य रिक्थभागित्वार्थमिदं वचनमित्याचष्ट तन्न सर्वमादीनां निर्गुणानामपि पितृरिक्थभागित्वे दत्तकस्य तत्तत् वपठितस्यापि सर्वगुणोपपन्नस्य वचनं निर्गुणस्य तत्राह्यात्वात् १४१ ॥

गोत्ररिक्थे जनयितुर्न हरेद्दत्रिमः क्वचित् गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधा १४२

गोत्रेति गोत्ररिक्थे जनकसंबंधिनी दत्तको न कदाचिद्गृह्णीयात् पिंडश्च गोत्ररिक्थानुगामी यस्य गोत्ररिक्थभजते तस्यैव पिंडो दीयते तस्मात्पुत्रं ददतो जनकस्य स्वधापिंडश्राद्धादितत्सुतकर्तृकं निवर्तते १४२

अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात् उभौ तौ नार्हतो भागं जारजातककामजौ १४३ ॥

अनियुक्तेति नियोगं विदितं नियोगं विना जातो यश्च सपुत्रया नियोगेनापि देवरादेः कामादुत्पादितस्तावुभौ क्रमेण जारोत्पन्नकामाभिलाषजौ धनभागं नार्हतः १४३ ॥

नियुक्तायामपि पुमान्नार्यां जातोविधानतः नैवार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः १४४ ॥

नियुक्तायामिति नियुक्तायामपि स्त्रियां घृताभ्यक्तत्वादिनियोगेतिकर्तव्यतां विना पुत्रो जातः स क्षेत्रिकस्य पितृधनं लब्धुं नार्हति यस्मादसौ पतितेनोत्पादितः नियुक्तो यो विधिं हित्वा तेन पतितत्वोक्तत्वात् १४४

हरेत्तत्र नियुक्तायां जातः पुत्रो यथौरसः क्षेत्रिकस्य तु तद्बीजं धर्मतः प्रसवश्च सः १४५ ॥

हरेदिति तत्र नियुक्तायां यो जातः क्षेत्रजः पुत्र औरस इव धनं हरेत् यस्माद्यत्तत्प्रकारेण भवेद्बीजं तत्तत्स्वामित्वतत्कार्यकरणात् धर्मतः सपिण्डमेतत्सदर्शमेकं यदीयात् ज्येष्ठभार्यायां पुत्रं उत्पादयेद्यदीयेनैव तत्क्षेत्रं पितामहत्वेन पितृत्वेन सहसमभागस्य प्राप्तत्वात् गुणवतः क्षेत्रजस्य औरसवत्सर्वधनहारभागप्राप्त्यर्थमिदं औरसतुल्यता विधानम् १४५ ॥

धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव च सोपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनम् १४६ धनमिति यो मृतस्य भ्रातुः स्थावरजंगमं धनं तस्या

141 A

रक्षणादनया समर्पितं तदेतत्तां च गृह्णीयात् स नियोगधर्मेण तत्स भ्रातुः स्वयं तत्पुत्रमुत्पाद्य तस्मा अपत्याय दद्यात् एतच्च धनं बिभृयात् भ्रातृस्त्रियमियानात् ... क्षयात् विषयं सम भागाविधानात् १४६ ॥ कृत्वा

यानियुक्तान्यतः पुत्रं देवराद्वाप्यवाप्नुयात् तं कामजमरिक्थीयं वृथोत्पन्नं प्रचक्षते १४७ येति या स्त्री गुर्वादिभिरनुज्ञाता देवराद्वाप्यतो वा

सपिंडात्पुत्रमुत्पादयेत्स यदि कामजो भवति तदा तमरिक्थभाजं मन्वादयो वदंति अकामजः पुनः क्षेत्रजः कृत्स्नभागी स च व्याहृतो नारदेन मृतोत्पन्नस्त्वपरिहरन्गोत्रे गोत्राएपक्षे शंन्क्रुली तद्वत्पोषवसंश्च।

एतद्विधानं विज्ञेयं विभागस्यैकयोनिषु बह्वीषु चैकजातानां नानास्त्रीषु निबोधत १४८ ॥ नाथ न कामत इति १४७

एतदिति समानजातीयासु भार्यासु एकेन भर्त्रा जातानामेष विभागविधिर्वेदितव्यः इदानीं नजातीयासु स्त्रीषु बह्वीषु उत्पन्नानां पुत्राणां विभागं शृणुत १४८ ॥

ब्राह्मणस्यानुपूर्वेण चतस्रस्तु यदि स्त्रियः तासां पुत्रेषु जातेषु विभागेऽयं विधिः स्मृतः १४९ ॥

ब्राह्मणस्येति ब्राह्मणाद्यनुक्रमेण ब्राह्मणस्य यदा चतस्रो भार्या भवेयुः तदा तासां पुत्रेषूत्पन्नेषु अयं वक्ष्यमाणो विभागविधिर्मन्वादिभिरुक्तः १४९ ॥

कीनाशो गोवृषो यानमलंकारश्च वेश्म च विप्रस्यौद्धारिकं देयमेकांशश्च प्रधानतः १५० कीनाश इति कीनाशः कर्षकः

गवां सेक्ता वृषो यानमश्वादि अलंकारोऽङ्गुलीयकादि वेश्म गृहं च प्रधानं यावंतस्त्वंशाः तेष्वेकः प्रधानभूतोंऽशः इत्येतद्ब्राह्मणीपुत्रस्योद्धारार्थे देयं अवशिष्टं वक्ष्यमाणरीत्या विभजनीयम् १५० ॥

त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः वैश्याजः सार्धमेवांशमंशं शूद्रासुतो हरेत् १५१ त्र्यंशमित्यादि शिष्टं ... ब्राह्मणीपुत्रो धनाद्

हरणीयात् द्वौ क्षत्रियापुत्रः सार्धं वैश्यापुत्रः एकं शूद्रासुतः सर्वं च यत्र ब्राह्मणीक्षत्रियापुत्रौ द्वावेव विद्येते तत्रापि एवं यथोक्त एव तत्र त्रयो भागा ब्राह्मणस्य द्वौ क्षत्रियापुत्रस्य अनयैव दिशा ब्राह्मणीवैश्यापुत्रयोः

सर्वं वा रिक्थजातं तद्दशधा परिकल्प्य च धर्म्यं विभागं कुर्वीत विधिनानेन धर्मवित् १५२ ॥ द्विवर्णपुत्रयोश्च कल्पना कार्या १५१

सर्वमिति यद्वा सर्वं रिक्थस्य प्रकारमनुक्त्वा उद्धारं दशधा याकृत्वा विभागधर्मज्ञो धर्मादनपेतं विभागमनेन वक्ष्यमाणविधिना कुर्वीत १५२ ॥

चतुरोंशान्हरेद्विप्रस्त्रीनंशान्क्षत्रियासुतः वैश्यापुत्रो हरेद्द्व्यंशमंशं शूद्रासुतो हरेत् १५३ चतुर इति तत्र भागान्...

क्षत्रियापुत्रो द्वौ वैश्यापुत्रः एकं शूद्राजः यत्रापि ब्राह्मणीक्षत्रियापुत्रौ स्यातां तत्रापि यथोक्ते तथैव चत्वारो भागा ब्राह्मणीसुतस्य त्रयः क्षत्रियापुत्रस्य एवं ब्राह्मणीवैश्यापुत्रयोः द्विवर्णपुत्रेषु च कल्पना शूद्रजातीया।

यद्यपि स्यात्तु सत्पुत्रोऽप्यसत्पुत्रोऽपि वा भवेत् नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः १५४ यद्यपीति यदि ब्राह्मणो द्विजातिस्त्रीपुत्रसर्व...

विद्यमानपुत्रः स्यात् अविद्यमानपुत्रो वा तथापि शूद्रापुत्राय नेतराधिकारी यस्तेषु दशमभागादधिकं धर्मतो न दद्यात् एवं चाश्रु शूद्रापुत्रविषये निषेधाद् विद्यमाने सजातिपुत्रे ... १५३ ॥

ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक् यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत् १५५ ॥ क्षत्रियावैश्यापुत्रो सर्वेश्व

ब्राह्मणेति ब्राह्मणक्षत्रियवैश्यानां शूद्रापुत्रो धनभाक् न भवति किं तु धनमेव मस्मै पिता दद्यात्तदेव तस्य भवेत् एवं च सर्वोऽत्र विभागनिषेधात् विकल्पः सवर्णगुणवद्गुणापेक्षः क्रम्यते ... स्याताम् १५४

समवर्णासु ये जाताः सर्वे पुत्रा द्विजन्मनां उद्धारं ज्यायसे दत्वा भजेरन्नितरे समम् १५६ ॥ तच्छूद्रापुत्रविषयाय दशमभागनिषेधः १५५

म॰ वृ॰ मे॰ १४२ 142

समवर्णास्विति द्विजातीनां समानजातिभार्यासु पुत्रा जातास्ते सर्वे ज्येष्ठयोद्धारं दत्वा अवशिष्टं समभागं कृत्वा ज्येष्ठेन सहान्ये विभजेरन् १५६ ॥

शूद्रस्य तु सवर्णैव नान्या भार्या विधीयते तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत् १५७ ॥

शूद्रस्येति शूद्रस्य पुनः समानजातीयैव भार्योपदिश्यते नोत्कृष्टा अपकृष्टा वा तस्यां च ये जातास्ते यदि पुत्रशतमपि तदा समभागा एव भवेयुः तेनोद्धारः कस्यचिन्न देयः १५७ ॥

पुत्रान्द्वादश यानाह नृणां स्वायंभुवो मनुः तेषां षड् बन्धुदायादाः षडदायादबान्धवाः १५८ ॥

पुत्रानिति यान् द्वादश पुत्रान् हिरण्यगर्भो मनुराह तेषां मध्याद्याः षड् बान्धवाः गोत्रदायादास्ततस्माद्बान्धवत्वेन सपिण्डसमानोदकानां पिण्डोदकदानादि कुर्वन्त्यनन्तराभावे च गोत्रदायं शूद्रान्तानिति पि
तृरिक्थहराः पितृरिति द्वादशविधपुत्राणामेव वक्ष्यमाणत्वात् उत्तरे षट् न गोत्ररिक्थहरा भवन्ति बान्धवास्तु भवन्ति तेन तद्बन्धुकार्यमुदकक्रियादि कुर्वन्ति मेधातिथिस्तु षडदायादबा
न्धवा इत्युत्तरषट्कस्यादायादत्वमबान्धवत्वं चाह तन्न बान्धवायनेनेत्थं पुत्रस्याभिहितत्वात् तदाह कानीनं च सहोढं च क्रीतं पौनर्भवं तथा स्वयंदत्तं निषादं च गोत्रभाजं प्रचक्षते १५८ ॥

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् १५९ ॥

औरस इति औरसादयो वक्ष्यमाणलक्षणाः षट् रिक्थभाजो बान्धवाश्च भवन्ति १५९ ॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा स्वयंदत्तश्च शौद्रश्च षडदाया
दबान्धवाः १६० कानीनश्चेति कानीनादयो वक्ष्यमाणलक्षणाः षट् गोत्ररिक्थहरा न भवन्ति बान्धवास्तु भवन्तीति १६० ॥

यादृशं फलमाप्नोति कुप्लवैः संतरञ्जलं तादृशं फलमाप्नोति कुपुत्रैः संतरंस्तमः १६१ ॥ औरसेन सह क्षेत्रजादीनां पाठात्तत्तुल्यत्वाशंका यामाह
सादृश्यमाह यादृशमिति तृणादिनिर्मितकुत्सितोडुपादिभिरुदकं तरन् यथाविधं फलं प्राप्नोति तथाविधमेव कुपुत्रैः क्षेत्रजादिभिः पारलौकिकं दुःखदुस्तरं प्राप्नोतीत्यनेन क्षेत्रजादीनां पुत्रत्वारम्भ

यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः १६२ ॥ वचनं सर्वकार्यकरणक्षमत्वं न भवतीति दर्शितम् १६१ ॥
यदीति अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मत इति याज्ञवल्क्योक्तविषये यदा क्षैत्रिकस्यापि पितुः क्षेत्रजानन्तरमौरसः पुत्रो भवति तदा तावौरसक्षेत्रजौ एक
रिक्थिनौ एकपितृकौ यद्यपि जनकस्यापि भवतः तथापि यद्यस्य जनकसंबन्धि यत्तत्तदेव स गृह्णीयात् न क्षेत्रजः क्षैत्रिकपितुः यत्तु वक्ष्यति षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात्
औरसो विभजन्दायमिति तत्पुत्रवद्बीजविषयं यत्तु याज्ञवल्क्येन उभयस्य बीजिक्षैत्रिकयो रिक्थहरत्वमुक्तं तत्क्षैत्रिकपितुरौरसपुत्राभावे बोद्धव्यं मेधातिथिर्गोविन्दराजौ तु औरसमनियुक्तापुत्रं वा
विषयीकृत्य श्लोकं व्याचक्षाते तेन नष्टनियुक्तापुत्रस्य क्षेत्रजत्वादनियुक्तासुतस्तेनत्वेन तस्य रिक्थग्रहणनिषेधात् यद्येकरिक्थिनाविति नैव याज्ञ १६२ ॥

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनं १६३ एक इति बाध्यादिना प्रथमौरसपुत्राभावे क्षेत्रजादिपु
त्रेषु पश्चाद्दोषयादिना विगतबाधे औरसे उत्पन्ने सतीदमुच्यते औरस एवैकः पुत्रः पित्र्यधनस्वामी शेषाणां क्षेत्रजव्यतिरिक्तानां तस्य वक्ष्यमाणादेव वक्ष्यमाणानां ग्रासमेव यथा विहितार्थं ग्रासाच्छाद
नं दद्यात् १६३

षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् औरसो विभजन्दायं पित्र्यं पञ्चममेव वा १६४ ॥

औरस इति औरसक्षेत्रजौ पुत्रावुक्तौ प्रकीर्णपितृधनहरौ स्यातां अन्ये पुनर्दश दत्वा षष्ठमिति औरसः पुत्रः पितृसंबन्धि दायं विभजन्क्षेत्रजस्य ततः षष्ठं पञ्चमं वा दद्यात् निर्गुणसगुणापेक्षया यो विकल्पः १६४

औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः १६५ ॥

142A

औरसइति औरसदत्तेत्येवं पुत्रा वक्ष्यमाणप्रकारेण पितृधनहरा स्यातामस्य पुनर्दश दत्तकादयः पुत्रा गोत्रभाजो भवंति पूर्वाभावे परः परः इत्येवं क्रमेण ... नांशहराश्च १६५ ॥ ...नी

स्वे क्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यं तमौरसं विजानीयात्पुत्रं प्रथमकल्पितं १६६

तविवाहसंस्कारायां यं स्वयमुत्पादयेत् तं पुत्रं औरसं मुख्यं विद्यात् सवर्णायां संस्कृतायां स्वयं उत्पादितं औरसं पुत्रं विद्यादिति बौधायनदर्शनात् सजातीयायामेव स्वयमुत्पादितं औरसं जानीयात् १६६ स्व इति स्व भार्यायां कन्यायाम्...यामेव क्षे

यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः १६७ ॥

यइति यो मृतस्य नपुंसकस्य प्रसवविरोधिव्याध्युपेतस्य भार्यायां गुरुनाभ्यक्तः आदि नियोगेन धर्मेण ... नियुक्तायां जातः स क्षेत्रजः पुत्रो मन्वादिभिः स्मृतः १६७ ॥

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः १६८ मातेति शुक्रशोणितसंभवः पुत्रो मातापितृनिमित्तकः

तस्य प्रदाने विक्रयपरित्यागेषु मातापितावापत्सु ... पुत्रपरिग्रहीतुः समानजातीयं तस्य च पुत्राभावनिमित्ताया मापदि प्रीतियुक्तं न तु भयादिना उदकपूर्वं दद्यातां स दत्त्रिमाख्यः पुत्रो विज्ञेयः १६८

सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणं पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः १६९ ॥

सदृशमिति यं पुनः समानजातीयं पित्रोः पारलौकिकश्राद्धादिकरणाकरणयोः गुणदोषौ भवतः ... एवमादिभिः पुत्रगुणैर्युक्तं मातापित्रोः... पुत्रं कुर्यात् स कृत्रिमाख्यः पुत्रो बोद्धव्यः १६९ ॥

उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः १७० ॥

उत्पद्यत इति यस्य गृहे स्थितायां भार्यायां पुत्र उत्पद्यते सजातीयोऽयं भवतीति ज्ञाते न पिकस्मात्पुरुषविशेषाज्जात इति न ज्ञायते स गृहे प्रच्छन्नं उत्पन्नत्वात् गूढोत्पन्नः पुत्रः स्यात् यदीयायां भार्यायां जातः १७०

मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते १७१ मातेति मातापितृभ्यां त्यक्तं तयोरन्यतरेण त्यक्तं परित्यक्त योग्या

त्यक्तं पुत्रं स्वीकुर्यात् सोऽपविद्धः पुत्र उच्यते १७१ ॥ पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवं १७२

पितृरिति पितृगृहे कन्या यं पुत्रं प्रच्छन्नं जनयेत् तं कन्यापरिणेतुः पुत्रं नाम्ना कानीनं वदेत् १७२ ॥

या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती वोढुः स गर्भो भवति सहोढ इति चोच्यते १७३ ॥ येति या गर्भवती ज्ञाताज्ञातगर्भा परिणीयते तस्या... गर्भः परिणेतुः पुत्रो भवति सहोढ इति च व्यपदिश्यते १७३ ॥

क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा १७४ ॥

क्रीणीयादिति यः पुत्रार्थं मातापित्रोः सकाशात् क्रीणीयात् संक्रीतकस्तस्य पुत्रो भवति क्रीतगुणैस्तुल्यो हीनो वा भवेत् न तु जात्या तनाः सादृश्यं वैसादृश्यं सजातीयपुत्र्यंशे केवलं नवेषु मा

पादिति याज्ञवल्क्येन सर्वेषामेव पुत्राणां सजातीयत्वाभिधानात् तेन मानवे पि क्रीतव्यतिरिक्ताः सर्वे पुत्राः सजातीया बोद्धव्याः १७४ ॥

या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते १७५ येति या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य

पुनर्भार्या भूत्वा यं उत्पादयेत् स उत्पादकस्य पौनर्भवः पुत्र उच्यते १७५ ॥ सा चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति

सा चेदिति सा स्त्री यद्यक्षतयोनिः सत्यन्यमाश्रयेत् तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति यद्वा कौमारं पतिं त्यक्त्वा अन्यमाश्रित्य पुनस्तमेव प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुनर्विवाहाम

म॰ 143
ऊ॰ से॰
१४३

त्वेसंस्कारमर्हति १७६ मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः १७७ ॥
मातेति यो मृतमातापितृकस्त्यागोचितकारणं विना द्वेषादिना ताभ्यां त्यक्तो वा आत्मानं यस्मै ददाति स स्वयंदत्ताख्यः तस्य पुत्रो मन्वादिभिः स्मृतः १७७ ॥
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतं स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः १७८ यमिति विज्ञास्य इव विधिः स्मृत इति याज्ञवल्क्य
वर्णानां परिणीतायामेव शूद्रायां ब्राह्मणः कामाद्यं पुत्रं जनयेत्स जीवन्नेव शवस्तस्मात्पारशवः स्मृतः यद्यप्ययं पित्रुपकारार्थं श्राद्धादिकं करोति तथाप्यसंपूर्णोपकारकत्वाच्छवव्यपदेशः १७८
दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः १७९ ॥
दास्यामिति ध्वजाहृतादिदास्यां दासदास्यां वा शूद्रस्य यः पुत्रो जायते स पित्रा अनुज्ञातः परिणीतापुत्रैः समानभागभाग्भवेदिति तत्समाभागं लभेतेति शास्त्रव्यवस्था नियता १७९
क्षेत्रजादीन्सुतानेतानेकादश यथोदितान् पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः १८० ॥
क्षेत्रजेति एतान्क्षेत्रजादीन् एकादशपुत्रान् औरसाद्यभावे विधिलोपः पुत्रकर्तव्यः श्राद्धादिलोपस्तु मा भूदित्येवमर्थं पुत्रप्रतिनिधीन्मन्वादय आहुः १८० ॥
य एतेऽभिहिताः पुत्राः प्रसंगादन्यबीजजाः यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु १८१ ॥
य इति य एते क्षेत्रजादयोऽन्यबीजोत्पन्ना औरसपुत्रप्रसंगेनोक्ताः ते यद्बीजोत्पन्नास्तस्यैव पुत्रा भवंति नेतरस्य निकादेरिति सत्यौरसे पुत्रे पुत्रिकायां च सत्यां न ते कर्तव्या इत्येवंपरमिदमन्य
बीजजा इत्येकादशपुत्रापलक्षणार्थं स्वबीजजानामपि पुत्रेन भवतो द्वौ न कर्तव्यौ अत एव बृहस्पतिः आज्यं विना यथा तैलं सद्भिः प्रतिनिधिः स्मृतः तथैकादश पुत्रास्तु पुत्रिकौरसयो
विना १८१
भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत् सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् १८२ ॥
भ्रातॄणामिति भ्रातॄणामेकमातापितृकाणां मध्ये एकः पुत्रवान्स्यात् अन्ये च पुत्ररहितास्तदा तेनैकपुत्रेण सर्वान् भ्रातॄन् सपुत्रान्मनुराह तत्त्वतस्तस्मिन्सति अन्यपुत्रप्रथानयो
प्रतिनिधयो न कर्तव्याः स एव पिंडदो धनहरश्च भवतीत्येतेनोक्तं पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा इति याज्ञवल्क्यवचनाद्भ्रातृपर्यंताभावे वोढव्यम् १८२ ॥
सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत् सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः १८३ ॥
सर्वासामिति एकपतिकानां सर्वासां स्त्रीणां मध्ये यद्येका पुत्रवती स्यात् तदा तेन पुत्रेण सर्वास्ताः पुत्रयुक्ता मनुराह तत्त्वश्च सपत्नीपुत्रे सति स्त्रिया न दत्तकादिपुत्राः कर्तव्या इत्येतदर्थमिदं
१८३
श्रेयसः श्रेयसोऽभावे पापीयान्रिक्थमर्हति बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः १८४
श्रेयस इति औरसादीनां सर्वेषां पुत्राणां प्रक्रांतत्वात् औरसादीनुपक्रम्य तेषां पूर्वः पूर्वः श्रेयान्स एव दायहरः स चान्यान्बिभृयादिति विष्णुवचनात् औरसादीनां पुत्राणां पूर्वपूर्वाभावे परः परः रि
क्थमर्हति पूर्वमुक्तावेव पूर्वं सवर्णेन स एव कुर्यात् एवं च सिद्धे पुत्रेष्वनूद्य पुत्रस्य द्वादशपुत्रमध्ये पाठः क्षेत्रजादिसंज्ञावचनानेहतावत्तेनार्थेनेत्सार्थकः अन्यथा तु दत्तक्रियादौ पुत्रत्व
दौरसत्वात् क्षेत्रजादिसंज्ञाविधिरेत्तल्लभेत् पूर्वं स्यापरं सवर्णेन सा भेजाय वादेतरविषये द्रष्टव्यं क्षेत्रजगुणवदनकपुत्रयोः पंचमषष्ठं वा भागं दद्यादिति विहितत्वात् घटितसमानरूपाः पौनर्भवा
न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः पिता हरेदपुत्रस्य रिक्थं भ्रातर एव च १८५ दयो बहवः पुत्रास्तदा सर्व एव विभज्य रिक्थं गृह्णीयुः
नेति न सोदरभ्रातरो न पितरः किंत्वौरसाभावे क्षेत्रजादयो गौणपुत्राः पितृरिक्थहरा भवंतीति त्रिनेनोच्यते औरसस्य तु एकपदे औरसः पुत्र इत्यनेनैव स्यात्सिद्धत्वात् अविद्यमान आत्माऽपु

स्य पुत्रस्य पत्नी दुहितरश्च हितरि तस्य च पिता धनं गृह्णीयात् तेषां मातरः भावे भ्रातरो धनं गृह्णीयुः। एतच्चानन्तरं प्रपंचयिष्याम। १८५॥

त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते चतुर्थः संप्रदातैषां पञ्चमो नोपपद्यते १८६॥

इदानीं क्षेत्रजादीनामपुत्रपितामहादिधनेऽप्यधिकारं दर्शयितुमाह त्रयाणामिति त्रयाणां पित्रादीनामुदकदानं कार्यं त्रिभ्य एव चैतेभ्यः पिण्डो देयश्चतुर्थः पिण्डोदकयोर्दाता पंचम स्यासंबंधो नास्ति तस्मात्पुत्रकोऽपुत्रपितामहादिधने गोत्रपुत्राणामधिकारः औरसपुत्रपौत्रयोः पुत्रेण लोकाञ्जयतीत्यनेनैव पितामहादिधनभागित्वमुक्तम्। १८६॥

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत् अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा १८७॥

अनन्तर इति अस्य सामान्यवचनस्योक्तक्रमादिसपिण्डमात्रादिविषयत्वं वेदितव्यं तत्र च पत्न्यादिदायप्रास्यर्थमिदं सपिण्डमध्यात्तत्रिकृष्टतरो यः सपिण्डः प्रमातामही वा तस्य तद्धनं भवत् नैकपत्नीरमः पुत्ररहितस्य बालस्यैव भर्तृधने धिकारी क्षेत्रजगणवदनकयोस्तु पत्योक्तं पंचमषष्ठवा भागं दद्यात् कृत्रिमादिपुत्राणां सवर्णेन मात्रकं याज्ञात् औरसाभावे पुत्रिका तत्पत्रचक्षुद्धौहि त्र स्त्रीद्वापुत्रा येत्युक्तत्वात् दशममभागवशिष्टधनं सन्निकृष्टसपिण्डा गृह्णीयात् त्रयोदशविधपुत्राभावे पत्नी सर्वभर्तृधनभागिनी यदाह याज्ञवल्क्यः पत्नी दुहितरश्चैव पितरौ भ्रातरस्त या तत्सुतो गोत्रजा बन्धुः शिष्यः सब्रह्मचारिणः एषामभावे पूर्वस्य धनभागुत्तरोत्तरः स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः बृहस्पतिरप्याह आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः शरीरा र्द्धं स्मृता जाया पुण्यापुण्यफले समा यस्य नोपरता भार्या देहार्द्धं तस्य जीवति जीवत्यर्द्धशरीरे तु कथमन्यः स्वमाप्नुयात् सकुल्यैर्विद्यमानैस्तु पितृमातृसनाभिभिः असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी पूर्वं प्रमीताग्निहोत्रं मृते भर्तरि तद्धनम् विन्देत्पतिव्रता नारी धर्म एष सनातनः जंगमं स्थावरं हेम कुप्यं धान्यं रसाम्बरम् आदाय दापयेच्छ्राद्धं मासषाण्मासिकादिकं पितृव्यगुरुदौहित्रान्भर्तुः स्वस्रीयमातुलान् पूजयेत्कव्यपूर्ताभ्यां वृद्धानाथातिथीन्स्त्रियः तत्सपिण्डा वा बान्धवा वा ये तस्याः परिपन्थिनः हिंस्युर्धनानि तान्राजा चौरदण्डेन शासये त् इत्यमनुः अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च यदुक्तं स्त्रीणां तु जीवनं दद्यादिति तदवरुद्धस्त्रीविषयं अतोऽतिस्थैर्यात्तिथिना पत्नीनामंशभागित्वं बृहस्पत्यादिसम्मतं मेधातिथिनिराकृतं न प्रीणाति सतां मनः पत्न्यभावे पुत्रिकादुहिता तदभावे पिता माता च तयो भावे मातुर्दत्तं भ्राता तदभावे भ्रातृसुतः मातर्यपि च वृत्तायां पितुर्माता हरेद्धनं इति वक्ष्यमाणत्वात् पितृमाता तदभावे अन्योऽपि सन्निकृष्टसपिण्डो मृतधनं गृह्णीयात् तद्यथा पितामहस मानोदकाः तेषामभावे आचार्यः शिष्यो नाभावे समानोदकाभावे आचार्यः शिष्यो वा क्रमेणैव धनं गृह्णीयात् १८७॥

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते १८८ सर्वेषामिति एषामभावे त्रिविद्याः सर्वेषा मभाव इति यदुक्तं तदभावे सवर्णादेरपि धनहारित्वं सर्वेषामभावे ब्राह्मणा वेदत्रयाध्यायिनो बाह्यान्तरशौचयुक्ता जितेन्द्रियाश्च धनहारिणो भवन्ति एवं च पिण्डदा तथा सति धर्मो न हीयते १८८॥

अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः १८९॥

अहार्यमिति ब्राह्मणसंबंधिधनं न राज्ञा कदाचित् ब्राह्मणमात्रेभ्यो देयं क्षत्रियादिधनं पुनः पूर्वोक्तरिक्थहराभावे राजा गृह्णीयात् १८९॥

संस्थितस्यानपत्यस्य सगोत्रात्पुत्रमाहरेत् तत्र यद्रिक्थजातं स्यात्तत्तस्मिन्प्रतिपादयेत् १९० संस्थितस्येति मृतस्यानपत्यस्य भार्या स मानगोत्रं पुत्रं गुरुनियुक्ता सती नियोगधर्मेण पुत्रमुत्पादयेत् तस्मिन्जातविषये यद्धनजातं भवेत्तत्तस्मिन्पुत्रे समर्पयेत् देवराद्वा सपिण्डाद्वा इत्युक्तमात्सगोत्रात्तु नियोगप्राप्त्यर्थम् तत्र च तस्य रिक्थभागित्वार्थमिदम् १९०॥

द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने तयोर्यद्यस्य पित्र्यं स्यात्तत्स गृह्णीत नेतरः १९१॥

मा० १४४
कु० मे०
१९५

दाविति यद्येकस्मात्कस्मिंश्चित्पूर्वमुत्पादितस्ततस्तस्मिन्मृते तज्जायायामन्येनोत्पादितस्तयोर्विषये यद्यो... समस्तः स्वकीयात्तद्रिक्थं ... नान्येन तस्माद्यो न भवेद्यस्य च भर्तुर्मृतस्य तद्धनं तस्य रिक्थं हरेत् नान्यो भाव्या
त यत्नेन गृहीतवतीयस्मात् ... द्वाभ्यां जातो यदि विवादयितास्त्रीहस्तागतधनेन तदा ... पित्र्यं स्वजनकस्य स एव धनं तदेव गृह्णीयात् न तस्य पितृजामजनकस्य १९१ ॥

जनन्यां संस्थितायां तु समं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः १९२ जनन्यामिति मातरि मृतायां सोदर्या भ्रातरो मातृधनं समं विभज्य गृह्णीयुः ऊढा अपि च नानारूपे संमानेन भवेत् तत एव बृहस्पतिः स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी अप्रत्ता चेत्समूढा तु लभते मानमात्रकं तत्र च ऊढानामपि यथा तद्वाढा तासां मातृधनेऽपि भागो देयः १९२

यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात्किंचित्प्रदेयं प्रीतिपूर्वकम् १९३ ॥
या इति तासां दुहितॄणां या असमूढा दुहितरः तासामपि मातामहीधनाद्यथा तासां सज्जा भवति तथा प्रीत्या किंचिद्दातव्यम् १९३ ॥

अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् १९४ अध्यग्नीति अध्यग्नीत्यव्ययं विभक्तिसमीपेत्यादिना समासे
आसमीपार्थेऽव्ययीभावः विवाहकाले अग्निसंनिधौ यत्पित्रादिदत्तं तदध्यग्नि स्त्रीधनं तथा च कात्यायनः विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितं यत्पुन
लभते नारी नीयमाना तु पैतृकादध्यावाहनिकं नाम तत्स्त्रीधनमुदाहृतं यत्प्रीतिहेतुकं ... भर्त्रादि
पितृगृहाद्भर्तृगृहे नीयमानया लब्धं तदध्यावाहनिकं तथा च कात्यायनः यत्पुनर्लभते नारी यस्माज्ज्ञातिपैतृकम् अध्यावाहनिकं ... तथा भ्रात्रा पित्रा मात्रा यद्दत्तं एवं षड्प्रकारकं स्त्रीधनं स्मृतम् १९४

अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत्। पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत् १९५
अन्वाधेयमिति अन्वाधेयं व्याख्यातं कात्यायनेन विवाहात्परतो यत्तु लब्धं भर्तृकुलात्स्त्रिया अन्वाधेयं तदुक्तं तु लब्धं बन्धुकुलात्तथा विवाहादूर्ध्वं भर्तृकुले वा पितृकुले वा यत्स्त्रिया लब्धं भर्त्रा च प्रीतेन दत्तं यत्तदपि स्त्रीधनं ... कन्यकायां जीवति मृतायाः स्त्रियाः सर्वं धनं तदपत्यानां भवति १९५

ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्वसु। अप्रजायामतीतायां भर्तुरेव तदिष्यते १९६
ब्राह्मेति ब्राह्मादिषु पञ्चसु विवाहेषु क्रमलब्धं यत्स्त्रियाः षड्विधं धनं तदनपत्यायां मृतायां भर्तुरेव मन्वादिभिरिष्यते १९६ ॥

यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु। अप्रजायामतीतायां मातापित्रोस्तदिष्यते १९७ ॥
यदिति यत्पुनः स्त्रिया आसुरराक्षसपैशाचेषु क्रमलब्धं यत्स्त्रियाः षड्विधमपि धनं तदनपत्यायां मृतायां मातापित्रोरिष्यते १९७ ॥

स्त्रियां तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन। ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत् १९८ ॥
स्त्रियामिति ब्राह्मणस्य नानाजातीयासु स्त्रीषु क्षत्रियादिस्त्रियामनपत्यपतिकायां मृतायां तस्याः पित्रा यद्धनं सजातिविजातिसापत्न्यकन्यासु ब्राह्मणी सापत्न्यपी कन्या गृह्णीयात्तदभावे तदपत्यस्य वा धनं भवेत् १९८ ॥

न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात्। स्वकादपि च वित्ताद्धि स्वस्य भर्तुरनाज्ञया १९९
नेति भ्रात्रादिबहुसाधारणं कुटुम्बं भार्यादिभिः स्त्रीभिः ... अलंकाराद्यर्थं धनं संचयो न कर्तव्यो नापि च भर्तुरनुज्ञां विना भर्तृधनादपि कार्यं तत्र च धनं स्त्रीधनम् १९९ ॥

पत्यौ जीवति यः स्त्रीभिरलंकारो धृतो भवेत्। न तं भजेरन्दायादा भजमानाः पतन्ति ते २००
पत्यादिति भर्तरि जीवति तत्सम्मत्या योऽलंकारः स्त्रीभिर्धृतः तस्मिन्मृते विभागकाले तं पुत्रादयो न भजेरन् भजमानाः पापिनो भवन्ति २०० ॥

उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः २०१
अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा

144 A

अनंशाविति नपुंसकपतितजात्यंधश्रोत्रविकलोन्मत्तजडमूकाः ये च कुणिपंगवादयो विकलेंद्रियास्ते पित्रादिधनहरा न भवंति किंतु ग्रासाच्छादनभागिनः २०१॥

सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा ग्रासाच्छादनमत्यंतं पतितो ह्यददद्भवेत् २०२

तदेवाह सर्वेषामिति सर्वेषामेषां क्लीबादीनां शास्त्रज्ञेन सत्कर्तव्यं धनिना यावज्जीवं स्वशक्त्या ग्रासाच्छादनं देयं अददत्पापी स्यात् २०२॥

यद्यर्थिता तु दारैः स्यात् क्लीबादीनां कथंचन तेषामुत्पन्नतंतूनामपत्यं दायमर्हति २०३॥

यदीति कथंचनेत्यभिधानात् क्लीबादयो विवाहानर्हा इति सत्यपि तेषां कथंचिद्दारैर्विवाहेच्छा भवेत् तथा क्लीबस्य क्षेत्रजः उत्पन्ने तेषामुत्पन्नापत्यानामपत्यं धनभाग्भवति २०३॥

यत्किंचित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति भागो यवीयसां तत्र यदि विद्यानुपालिनः २०४॥

यत्किंचिदिति पितरि मृते सति भ्रातृभिः सहाविभक्तो ज्येष्ठः यत्किंचित्स्वेन पौरुषेण धनं लभेत तत्र धनात् विद्याभ्यासवतां कनिष्ठभ्रातॄणां भागो भवति तेषाम् २०४॥

अविद्यानां तु सर्वेषामीहातश्चेद्धनं भवेत् समस्तत्र विभागः स्यादपित्र्य इति धारणा २०५॥

अविद्यानामिति सर्वेषां भ्रातॄणां कृषिवाणिज्यादिचेष्टया यदि धनं स्यात् तदा पित्र्यवर्जितेऽपि तस्मिन्धने स्वार्जिते समो विभागः स्यात् न तत्र ज्येष्ठस्य इति निश्चयः २०५॥

विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत् मैत्र्यमौद्वाहिकं चैव माधुपर्किकमेव च २०६॥

विद्येति विद्या मैत्री विवाहार्जितं मधुपर्किकं मधुपर्कदानकाले पूज्यत्वात् यल्लब्धं तत्सर्वं तस्यैव यत्किंचित् पितरीत्यस्यायमपवादः विद्याधनं च व्याहृतं कात्यायनेन परभक्तप्रदानेन प्राप्ता विद्या यदन्यतः तया प्राप्तं च विधिना विद्याप्राप्तं तदुच्यते उपन्यस्ते च यल्लब्धं विद्ययापणपूर्वकं विद्याधनं तु तद्विद्याद्विभागे न विभज्यते शिष्यादार्त्विज्यतः प्रश्नात् संदिग्धप्रश्नि र्णयात् स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत् विद्याधनं तु तत्प्राहुर्विभागे न विभज्यते अतोऽयमेव न्यायोऽविदितो ज्ञानाभ्यां माधुपर्किकमार्त्विज्ये तत्र दशकं विद्याधनमात् २०६

भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्मणा स निर्भाज्यः स्वकादंशात्किंचिद्दत्त्वोपजीवनं २०७॥

भ्रातॄणामिति राजानुगमनादिकर्मणा यो धनमर्जितुं शक्तो भ्रातॄणां साधारणं धनं नेच्छति स स्वीयादंशात् किंचिदुपजीवनं दत्त्वा भ्रातृभिः पृथक्कार्यः तेन तत्पुत्रादयः पश्चात्कालांतरे न विवदंते २०७

अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जयेत् स्वयमीहितलब्धं तन्नाकामो दातुमर्हति २०८॥

अनुपघ्नन्निति पितृधनानुपघातेन यत्कृष्यादिक्लेशादर्जयेत् तत्स्वचेष्टाप्राप्तमनिच्छन् भ्रातृभ्यो दातुं नार्हति २०८॥

पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात् न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितं २०९

पैतृकमिति यत्पुनः पितृसंबंधिधनं तेनानाप्तं पूर्वं नोपेक्षितं तदनवाप्तं पुत्रैः स्वशक्त्या प्राप्नुयात् तत् स्वयमर्जितमनिच्छन् स्वपुत्रैः सह न विभजेत् २०९॥

विभक्ताः सह जीवंतो विभजेरन्पुनर्यदि समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्यते २१०॥

विभक्ता इति पूर्वं मोहात्संविभक्ता भ्रातरः पश्चादेकीभूय धनं सह जीवंतो यदि पुनर्विभागं कुर्वंति तदा तत्र समो विभागः कार्यः ज्येष्ठस्योद्धारो न देयः २१०॥

145

म॰ 145
उ॰ से॰
१४५

सोदर्या विभजेरंस्तं समेत्य सहिताः समं भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः २१२ किंचैवं सोदर्या इत्यादि सोदर्या भ्रातरः समाग
त्य सहिताः भगिन्यश्च सोदर्या समं अंशं समं कृत्वा विभजेरन् सोदर्याणां सापत्नानामपि मध्यात् ये मिश्रीकृतधनास्तेनैकयोगक्षेमास्ते विभजेयुः न सर्वे सोदर्या सापत्ना वा त्मा वा पतत्वाच्च पुत्रपत्नी
येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः म्रियेतान्यतरो वापि तस्य भागो न लुप्य पितृमातृसमा वेदितव्या २१२
ते २११
येषामिति येषां भ्रातॄणां मध्ये कश्चिद्विभागकाले प्रव्रज्यादिना स्वांशाद्धीयेत मृतो वा भवेत्तस्य भागो न लुप्येत २११ ॥
यो ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः सोऽज्येष्ठः स्यादभागश्च नियंतव्यश्च राजभिः २१३ यो ज्येष्ठ इति यो ज्येष्ठो भ्राता लोभात्कनीय
सो भ्रातॄन्वंचयेत् स ज्येष्ठो भ्रातृपूजाशून्यः सोद्धारभागरहितश्च राजदंड्यश्च स्यात् २१३ सर्व एव विकर्मस्था नार्हंति भ्रातरो धनं न चादत्त्वा कनिष्ठेभ्यो ज्येष्ठः
कुर्वीत यौतकं २१४ सर्व एवेति अपतिता अपि ये भ्रातरो द्यूतवेश्यासेवादिविकर्मासक्तास्ते सर्वे धनं नार्हंति न च कनिष्ठेभ्योऽप्रदाय ज्येष्ठः साधारणधनमौदनादात्मार्थं साधारण
भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्सह न पुत्रभागं विषमं पिता दद्यात्कथंचन २१५ ॥ धनं कुर्यात् २१४
भ्रातॄणामिति भ्रातॄणां पित्रा सहावस्थितानां अविभक्तानां यदि सहैव धनार्थं उत्थानं भवेत्तदा विभागकाले न कस्यचित्पुत्रस्याधिकं पिता कदाचिद्दद्यात् २१५ ॥
ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं संसृष्टास्तेन ये वा ये विभजेत सहैः सह २१६ ॥
ऊर्ध्वमिति यदा जीवतैव पित्रा पुत्राणामिच्छया विभागः कृतः तदा विभागादूर्ध्वं जातः पुत्रः पितरि मृते पितरि मृते पित्र्यमेव धनं गृह्णीयात् ये कृतविभागाः पित्रा सह पुनर्मिश्रीकृतधनास्तैः सहासौ
अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् मातर्यपि च वृत्तायां पितुर्माता हरेद्धनं २१७ ॥ पितरि मृते विभजेत २१६ ॥
अनपत्यस्येति अनपत्यस्य पुत्रस्य धनं माता गृह्णीयात् पूर्वं पिता हरेदपुत्रस्य स्वं कस्य मिशुकत्वात् इह माता हरेदित्यनेन याज्ञवल्क्येन पितरावित्येकशेषकरणात् इह माता हरेदित्यनेन या
ज्ञवल्क्येन पितरावित्येकशेषकरणाद्विस्तनाच्च अपुत्रस्य धनं प्रथमं भगामितदभावे दुहितृगामि तदभावे पितृगामीत्येकशेषस्यैव कृतत्वान्मातापितरौ विभज्य गृह्णीयातां मातरि मृतायां पा
ऋणे धने च सर्वस्मिन्प्रविभक्ते यथाविधि पश्चाद्दृश्येत यत्किंचित्तत्सर्वं समतां नयेत् २१८ वीपितृमातृजाभावे पितृमाता धनं गृह्णीयात् २१७
ऋण इति ऋणेऽपि धनेऽपि पुत्रादिभ्यो यथा भागेन च नदी
येऽसवर्णेन यथाशास्त्रं हि विभक्ते सति पश्चाद्यत्किंचिदृणं धनं वा विभागकालेऽज्ञातमुपलभ्येत तत्सर्वं समं कृत्वा विभजनीयं न तत्र ज्येष्ठस्योद्धारो देयः २१८ ॥
वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते २१९ वस्त्रमिति वस्त्रं वाहनमाभरणं च विभागकाले यद्या
नीयमुक्तं तत्सैव न विभाज्यं तच्च नातिमूल्याधिकमल्पविषयं यत्तु बहुमूल्यविषयमाभरणादिकं तु विभागमेव तद्विषयमेव विक्रीय दद्यादाभरणमिति बृहस्पतिविभागवचनेन कृतान्नं मोदकमा
कादि तन्न विभजनीयं तत्तुल्यमूल्यस्य कायिकादेर्न्याय्यमूल्यं तेन कृतान्नं वाकृतान्नमपरिवृत्तं विभज्य इति बृहस्पतिवचनात् विभजनीयं स्त्रियो दास्यादयो यास्त्वल्पभागा न भवंति तान
विभाज्याः किंतु तत्सकमकार्ययेनव्याप्या योगक्षेमं च पुरोहितादि योगक्षेमतात् प्रचारो गवादीनां प्रचारमार्गः एतत्सर्वं मन्वादयोऽविभाज्यमाहुः २१९ ॥
अयमुक्तो विभागो वः पुत्राणां च क्रियाविधिः क्रमशः क्षेत्रजादीनां द्यूतधर्मं निबोधत २२० अयमिति एष दायभागः पुत्राणां क्षेत्रजादीनां क्रमेण

विभागकरणप्रकारोपाख्याकृतः इदानीं द्यूतव्यवस्थामाह २२० द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत् राज्यांतकरणावेतौ द्वौ दोषौ पृथिवी-
क्षितां २२१ द्यूतमिति द्यूतसमाह्वयौ वक्ष्यमाणलक्षणौ राजा स्वराष्ट्रान्निवर्तयेत् यस्मादेतौ द्वौ दोषौ राज्ञां राज्यविनाशकारिणौ २२१ ॥
प्रकाशमेतत्तास्कर्यं यद्देवनसमाह्वयौ तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान्भवेत् २२२ प्रकाशमिति प्रकटमेतच्चौर्यं यद्द्यूतसमाह्वयौ तस्मात्तन्निवा-
रणे राजा नित्यं यत्नयुक्तः स्यात् २२२ अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः २२३ ॥
अप्राणिभिरिति अक्षवस्त्रशलाकादिभिरप्राणैर्यत्क्रियते तल्लोके द्यूतं कथ्यते यः पुनः प्राणिभिः मेषकुक्कुटादिभिः पणपूर्वकं क्रियते स समाह्वयो ज्ञेयः लोकप्रसिद्धयोरप्यनयोर्लक्षणकथनं … २२३
द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिंगिनः २२४
द्यूतमिति द्यूतसमाह्वयौ यः कुर्यात् यो वा सभिकः कारयेत्तेषामपराधापेक्षया राजा हस्तच्छेदादिवधं कुर्यात् यज्ञोपवीतादिद्विजचिह्नधारिणः शूद्रान्हन्यात् २२४ ॥
कितवान्कुशीलवान्क्रूरान्पाषंडस्थांश्च मानवान् विकर्मस्थान्शौंडिकांश्च क्षिप्रं निर्वासयेत्पुरात् २२५ ॥
कितवानिति द्यूतादिसेविनो नर्तकगायनान्वेदविद्विषः श्रुतिस्मृतिबाह्यव्रतधारिणः अनापदि परकर्मजीविनः शौंडिकान्मद्यकरान्मनुष्यान्क्षिप्रं राजा राष्ट्रान्निर्वासयेदिति कितवप्रसंगेनाप्येषामभि-
एते राष्ट्रे वर्तमाना राज्ञः प्रच्छन्नतस्कराः विकर्मक्रियया नित्यं बाधंते भद्रिकाः प्रजाः २२६ ॥ धानं २२५
अत्र हेतुमाह एते इति एते कितवादयो गूढचौरा राज्ञो राष्ट्रे वसंतो नित्यं वंचनात्मकक्रियया सज्जनान्पीडयंति २२६ ॥
द्यूतमेतत्पुराकल्पे दृष्टं वैरकरं महत् तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् २२७ ॥
द्यूतमिति सम्प्रतीदानीमेव दृष्टं किं तु पूर्वस्मिन्नपि कल्पे द्यूतमेतद्दति प्राये वैरकरं दृष्टं अतः प्राज्ञः परिहासार्थमपि तन्न सेवेत २२७
प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः तस्य दंडविकल्पः स्याद्यथेष्टं नृपतेस्तथा २२८ प्रच्छन्नमिति यो मनुष्यस्तद्द्यूतं गूढं प्रकटं वा कुर्यात्सेवेत तस्य य-
थानृपतेरिच्छा भवति तथाविधो दंडो भवति २२८ ॥
क्षत्रविट्शूद्रयोनिस्तु दंडं दातुमशक्नुवन् आनृण्यं कर्मणा गच्छेद्विप्रो दद्याच्छनैः शनैः २२९ इदानीं पराजितानां धनाभावे सतीत्याह क्ष-
त्रियविट्शूद्रजातीयो निर्धनो दंडं दातुमसमर्थः पितृर्विनकर्मकरणेन धनशोधनं कुर्यात् ब्राह्मणः पुनः यथालाभक्रमेण दद्यात् न कर्म कारयितव्यः २२९ ॥
स्त्रीबालोन्मत्तवृद्धानां दरिद्राणां च रोगिणां शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्दमं २३० स्त्रीति स्त्रीबालादीनां पुनः शिफावेणुदलप्रहाररज्जु-
ये नियुक्तास्तु कार्येषु हन्युः कार्याणि कार्यिणां धनोष्मणा पच्यमानास्तान्निःस्वान्कारयेन्नृपः २३१ बंधनादिदंडं राजा कुर्यात् २३० ॥
ये नियुक्ता इति ये व्यवहारावीक्षणादिषु कार्येषु राज्ञा नियुक्ता उत्कोचधनतेजसा विकारं भजंतः अर्थ्यादीनां कार्याणि नाशयेयुः तान्गृहीतसर्वस्वान्राजा कारयेत् २३१ ॥
कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान् स्त्रीबालब्राह्मणघ्नांश्च हन्याद्द्विट्सेविनस्तथा २३२ ॥

म॰
उ॰ म॰
१४६
146

कूटेति कूटराजशासनेन प्रकृतीनां भेदकान् अमात्यादींश्च भेदकान् स्त्रीबालब्राह्मणघातिनः शत्रुसेविनश्च राजा हन्यात् २३२ ॥

तीरितं चानुशिष्टं च यत्र क्वचन यद्भवेत् कृतं तद्धर्मतो विद्यान्न तद्भूयो निवर्तयेत् २३३ तीरितमिति यत्र क्वचिद् ऋणादानादिव्यवहारे यत्
कार्यं धर्मेण तीरितं परिसमाप्तं विचिन्त्य दोषादानव्यवस्थानिर्णीतं अनुशिष्टं दण्डपर्यन्तं नीतं स्यात् तत् धर्मेण कृतं ज्ञात्वा पुनर्न निवर्तयेत् एतच्च कारणान्तरं विना कारणे कृते निवर्तयेदेव २३३

अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा तत्स्वयं नृपतिः कुर्यात्तान्सहस्रं च दण्डयेत् २३४ अमात्या इति राजामात्याः प्राड्विवाको वा
व्यवहारदर्शनाधिकृतो यदसम्यग्व्यवहारनिर्णयं कुर्युः तत्स्वयं राजा कुर्यात् तान् सहस्रं च तान् दण्डयेत् दण्डो लोभादिना व्यवहारान्यथाकरणे विषयः उक्तो व्यवहारे येन नियुक्ताः तेषु च तत्र २३४ ॥

ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः एते सर्वे पृथक् ज्ञेया महापातकिनो नराः २३५ ब्रह्महेति यो मनुष्यो ब्राह्मणं हतवान् सुरापश्च
यो द्विजातिः पैष्टीं पाता ब्राह्मणश्च पैष्टीं माध्वीं गौडीं तस्करो ब्राह्मणस्य सुवर्णहारी मनुष्यः यश्च कश्चित् गुरुपत्नीगामी एते सर्वे प्रत्येकं महापातकिनो वाच्या २३५ ॥

चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम् शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् २३६ ॥

चतुर्णामिति चतुर्णामप्येषां महापातकिनां प्रायश्चित्तमकुर्वतां शारीरं धनग्रहणेन वधेन च संबन्धं यथापराधानुसारेण धर्मादनपेतं वक्ष्यमाणं दण्डं कुर्यात् २३६ ॥

गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान् २३७ ॥

गुरुतल्प इति अङ्काः राज्ञा ललाटे स्युः इति वक्ष्यमाणत्वात् ललाटे मेवांकनस्थानमवगम्यते तत्र गुरुपत्नीगमने तप्तवह्निव्यापितमलोहेन ललाटे भगाकृतिः गुरुपत्नीगमन
चिह्नं कार्यं एवं सुरापानेन कृतपातादौ चैष सुराध्वजाकारः सुवर्णापहारे सारमेयपदं ब्रह्महणि कबन्धः पुमान् कर्तव्यः २३७ ॥

असंभोज्या ह्यसंयाज्या असंपाठ्याविवाहिनः चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः २३८ ॥

असंभोज्या इति अन्नादिकं नैतैर्भोजयितव्या न चैते याजनीया नाध्याप्यास्तैः कन्यादानसंबन्धः कर्तव्यः एते च निर्धनत्वात् याचनादिदैन्ययुक्ताः सर्वश्रौतादिकर्मवर्जिताः पृथ्वीं पर्यटेयुः २३८ ॥

ज्ञातिसंबन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः निर्दया निर्नमस्कारास्तन्मनोरनुशासनम् २३९ ॥

ज्ञातीति ज्ञातिभिः संबन्धिभिश्च ललाटे कृतांकास्त्यजनीयाः न चैषां दया कार्या नाप्येते नमस्कार्या इतीयं मनोराज्ञा २३९ ॥

प्रायश्चित्तं तु कुर्वाणाः सर्ववर्णा यथोदितं नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसं २४० ॥

प्रायश्चित्तमिति शास्त्रविहितं प्रायश्चित्तं पुनः कुर्वाणा ब्राह्मणादयश्चत्वारो वर्णा राज्ञा ललाटे अंकनीया न भवेयुः उत्तमसाहसं पुनर्दण्डनीयाः २४० ॥

प्रायश्चित्तमिति ... विवास्यो वा भवेद्राष्ट्रात्सद्रव्यः सपरिच्छदः २४१

आगःसु ब्राह्मणस्यैव कार्यो मध्यमसाहसः विवास्यो वा भवेद्राष्ट्रात्सद्रव्यः सपरिच्छदः २४१ आगःस्विति इतरे कृतवन्तस्तु
रेषां कर्तृत्वमाणः कामत इति ब्राह्मणयोजनीयं तेनाकामत इति पूर्वपराधेषु गुणवतो ब्राह्मणस्य मध्यमसाहसो दण्डः कार्यः पूर्वोक्तस्तूत्तमसाहसो निर्गुणस्य तद्द्रव्यः कामतस्तु सपरिच्छदः धनधान्यादिपरिच्छदसहितो ब्राह्मणो देशान्निर्वास्यः
इतरे कृतवन्तस्तु पापान्येतान्यकामतः सर्वस्वहारमर्हन्ति कामतस्तु प्रवासनं २४२ ॥

146A

इतरइति ब्राह्मणादन्ये पुनः क्षत्रियादयः प्रथमे पापानि कृतवन्तः सर्वस्वहरणमर्हन्तीति इदं च सर्वस्वहरणमर्हन्तीति इदं च सर्वस्वहरणं पूर्वोक्ते ... कमसाहसेन राहहन्तापेक्षया यथा स्थापनीयं इच्छया पुनरेषामेते षष्ठया प्रवासनं वधो हन्ति प्रवासन स्यात्मनेनिःसूदनेन निर्हिंसन मिति वधपर्यायप्रवासन पाहप्रथमाभियानिकः। २४२॥

नाददीतनृपःसाधुर्महापातकिनोधनं आददानस्तुतल्लोभात्तेनदोषेणलिप्यते २४३॥

नाददीतेति धार्मिको राजा महापातकिसंबंधिनं दंडरूपेन गृह्णीयात् लोभात्पुनस्तद्ग्रहणे महापातकदोषेणासंयुज्यते २४३॥

अप्सुप्रवेश्यतंदंडंवरुणायोपपादयेत् श्रुतवृत्तोपपन्नेवाब्राह्मणेप्रतिपादयेत् २४४

कानर्थं हिं दंडधनस्य प्रतिपत्तिरित्येतदर्थमाह अप्स्विति तं दंडधनं नद्यादिजलेप्रदिश्य वरुणाय दद्यात् श्रुतवृत्तसंपन्नब्राह्मणाय दाद्यात् २४४॥

एषोदंडस्यवरुणोराज्ञांदंडधरोहिसः ईशःसर्वस्यजगतोब्राह्मणोवेदपारगः २४५॥

ईशइति महापातकि दंडधनस्य वरुणः स्वामी यस्मात् राज्ञामपि दंडधारित्वात् प्रभुः तथा ब्राह्मणः समस्त वेदाध्यायी सर्वस्य जगतः प्रभुः अतः प्रभुत्वात्तौ दंडधनमर्हतः २४५॥

यत्रवर्जयतेराजापापकृद्भ्योधनागमं तत्रकालेनजायंतेमानवादीर्घजीविनः २४६ निष्पद्यंतेचसस्यानि यथोप्तानिविशांपृथक् बालाश्चनप्रमीयंते विकृतंनचजायते २४७॥ यत्रेति निष्पद्यंत इति यत्र देशे प्रकृतं महापातकि धनं राजा न गृह्णाति तत्र परिपूर्णेन कालेन मनुष्या उत्पद्यंते दीर्घायुषश्च भवंति वैश्यानां च यथैव यथा स्यादि प्रास्यासुतानि तथैव पृथक् पृथक् जायंते अकालेन बाला म्रियंते दीर्घजीविनः स्युः केप्या द्यार्थं बालानां पुनर्वचनत्यागचनकिविकृतं प्रसूयते २४७

ब्राह्मणान्बाधमानंतुकामादवरवर्णजं हन्याच्चित्रैर्वधोपायैरुद्वेजनकरैर्नृपः २४८

ब्राह्मणानिति शरीरपीडाधनग्रहणाभ्यां इच्छातो ब्राह्मणान् बाधमानं हस्तच्छेदादिभिरुद्वेगकरैर्वधोपायैर्नृपो हन्यात् २४८॥

यावानवध्यस्यवधेतावान्वध्यस्यमोक्षणे अधर्मोनृपतेर्दृष्टोधर्मस्तुविनियच्छतः २४९

यावानिति अवध्यवधे यावानधर्मो नृपतेः शास्त्राज्ज्ञातः तावानेव वध्यस्य त्यागेपि यथाशास्त्रं दंडं कुर्वतो धर्मः स्यात् तस्मात्तं कुर्यात् २४९॥

उदितोयंविस्तरशोमिथोविवदमानयोः अष्टादशसुमार्गेषुव्यवहारस्यनिर्णयः २५०

उदितइति अष्टादशसु ऋणादानादिषु व्यवहारपदेषु परस्परं विवदमानयोरर्थिनोः कार्यनिर्णयो विस्तरेणोक्तः। २५०॥

एवंधर्म्याणिकार्याणिसम्यक्कुर्वन्महीपतिः देशानलब्धाल्लिप्सेत लब्धांश्चपरिपालयेत् २५१

एवमिति अनेनोक्तप्रकारेण धर्मादनपेतान् व्यवहारनिर्णयान् राजा जनानुरागात् अलब्धान्देशान् लब्धुमिच्छेत् लब्धांश्च सम्यक्पालयेत् एवं सम्यग्व्यवहारदर्शनस्यालब्धदेशप्राप्तिफलमुक्तम् २५१॥

सम्यङ्निविष्टदेशस्तुकृतदुर्गश्चशास्त्रतः कंटकोद्धरणेनित्यमातिष्ठेद्यत्नमुत्तमम् २५२॥

म॰
तृ॰ से॰
१४७
147

सम्यगिति जंगलशाखसंपन्नेइलतीरा..सम्यगाश्रितदेशास्तत्र समाख्यायो..प्रकोपेण कृतदुर्गेषु वीरैः साहसिकैः ...निराकरणे प्रयत्नं सदा कुर्यात् २५२ ॥

रक्षणादार्यवृत्तानां कंटकानां च शोधनात् नरेन्द्रास्त्रिदिवं याति प्रजापालनतत्पराः २५३ ॥

रक्षणादिति यस्मात्साधावारणां चोरादीनां च शासनात् प्रजापालिनो राजानः स्वर्गं गच्छंति तस्मात्कंटकोद्धरणे यत्नं कुर्यात् २५३ ॥

अशासंस्तस्करान्यस्तु बलिं गृह्णाति पार्थिवः तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते २५४ ॥

अशासन्निति यः पुनर्नृपतिश्चोरादीननिराकुर्वन्षड्भागात्शुल्कं गृह्णातीति तस्मै राष्ट्रवासिनो जनाः कुप्यंति कर्मार्जितात्स्वर्गप्राप्तिरनेन दुष्कृतेन परिहीयते २५४ ॥

निर्भयं तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितं तस्य तद्वर्धते नित्यं सिच्यमान इव द्रुमः २५५ ॥

निर्भयमिति यस्य राज्ञो बहुवीर्याश्रयेण राष्ट्रं चौरादिभयरहितं भवति तस्य नित्यं तद्वृद्धिं गच्छति उदकसेकेनेव वृक्षः २५५ ॥

द्विविधांस्तस्करान्विद्यात्परद्रव्यापहारकान् प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः २५६

द्विविधानिति चार एव चोररत्नेनेक्षणेन यस्य स राजा चौरैरेव प्रकटप्रच्छन्नयादिप्रकाशान्परयेन ग्राहिणो जानीयात् २५६ ॥

प्रकाशवंचकास्तेषां नानापण्योपजीविनः प्रच्छन्नवंचकास्त्वेते ये स्तेनाटविकादयः २५७

ये तुलाप्रतिमानोपचयादिना हिरण्यादिपण्यविक्रयिणः परार्थमनुचितेन गृह्णंतीति प्रकाशवंचकाः स्तेनाः चौराः संधिच्छेदादिना गुप्ताः अटव्याश्रयाश्च परधनं गृह्णंतीति प्रच्छन्नवंचकाः २५७

उत्कोचकाश्चौपधिका वंचकाः कितवास्तथा मंगलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह २५८ असम्यक्कारिणश्चैव

महामात्राश्चिकित्सकाः शिल्पोपचारयुक्ताश्च निपुणाः पण्ययोषितः २५९ एवमादीन्विजानीयात्प्रकाशाँल्लोककंटकान्

निगूढचारिणश्चान्याननार्यानार्यलिंगिनः २६०

किं च उत्कोचका इति असम्यगिति एवमिति उत्कोचकाः कार्यिभ्यो धनं गृहीत्वा कार्यमयुक्तं कुर्वंति औपधिका भयदर्शनात् ये धनमुपजीवंति वंचका ये स्ववर्णादिद्रव्यं गृहीत्वा प्रच्छन्नेषु प्रक्षेपेण वंचयंति कितवाः द्यूतसमाहूयदेविनः धनपुत्रलाभादि मंगलमस्य नमादिशंतः ... तेऽमंगलादेशवृत्ताः भद्राः कल्याणाचाराः प्रच्छन्नपापाः ये धनया हिताः ईक्षणिका हस्तरेखावलोकनेन शुभाशुभफलकथनजीविनः महामात्राश्चिकित्सकाः ... चिकित्साजीविनः असम्यक्कारिण इति महामात्रचिकित्सकविशेषणं शिल्पोपचारयुक्ताश्चित्रलेखाद्युपायजीविनः ... स्वपरवशीकरणकुशला इत्येवमादीन् प्रकाशान् लोकवंचकान् चौरान् जानीयात् अन्यानपि प्रच्छन्नचारीणः शूद्रादीन् ब्राह्मणादिवेशधारिणो धनग्राहिणो जानीयात् २५८ २५९ २६०

तान्विदित्वा सुचरितैर्गूढैस्तत्कर्मकारिभिः चारैश्चानेकसंस्थानैः प्रोत्साद्य वशमानयेत् २६१

तानिति तान्प्रकाशवंचकान्प्रच्छन्नांस्तत्कर्मकारिभिर्विनियोजितैरिति एवमादिभिः पुरुषैरेतत्स्वनिरिक्तैः समाख्यायोपदिष्टकापटिकादिभिश्चारैरनेकस्थानस्थैर्ज्ञात्वा प्रोत्साद्य वशं कुर्यात् २६१ ॥

तेषां दोषानभिख्याप्य स्वे स्वे कर्मणि तत्त्वतः कुर्वीत शासनं राजा सम्यक्सारापराधतः २६२ ॥

तेषामिति येषां प्रकाशप्रकाशतस्कराणां संकर्मणि चौर्यादेः प्रपंचमार्गितकादेषाः संधिच्छेदादयः तान्लोके प्रख्यापनतस्तथ शरीरादिसामर्थ्यापेक्षया अपराधापेक्षया च राजा दंडं कुर्यात् २६२

नहि दंडादृते शक्यः कर्तुं पापविनिग्रहः स्तेनानां पापबुद्धीनां निभृतं चरतां क्षितौ २६३॥

नहीति यस्मात् चौराणां पापाचाराणां बुद्धीनां निभृतं वेषांतरेण स्थित्या च चरतां दंडव्यतिरेकेण पापक्रियायां नियमं कर्तुमशक्यं तस्मात्तत्पापं दंडं कुर्यात् २६३॥

सभाप्रपापूपशालावेशमद्यान्नविक्रयाः चतुष्पथाश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च २६४ जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च शून्यानि चाप्यगाराणि वनान्युपवनानि च २६५ एवंविधान्नृपो देशान्गुल्मैः स्थावरजंगमैः तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारयेत् २६६ सभेति जीर्णेति एवमिति सभा ग्रामनगरादौ नियतं जनसमूहस्थानं प्रपा जलदानगृहं अपूपविक्रयवेश्मपण्यस्त्रीगृहं मद्यान्नविक्रयस्थानानि च तथा चत्वरशाखाद्धताः समाजा जनसमूहस्थानानि जीर्णवाटिका अटव्यः शिल्पिगृहाणि शून्यगृहाणि आरामादि वनानि कृत्रिमोद्यानानि एवंप्रकारान् देशान् सैन्यैः पदातिसमूहैः स्थावरजंगमैः एकस्थानस्थितैः संचारिभिश्चान्यैश्चारैरस्तस्करनिवारणार्थं प्रचारयेत् चौर्योपायैः विविधदेशभ्रमणमसंभोगायत्वषणार्थं तस्कराश्च भवति हृते २६६

तत्सहायैरनुगतैर्नानाकर्मप्रवेदिभिः विद्यादुत्सादयेच्चैव निपुणैः पूर्वतस्करैः २६७॥

तदिति तेषां सहायं प्रतिपादमानैस्तच्चरितमनुहृतिभिः संधिच्छेदादिकर्मानुष्ठानवेदिभिः पूर्वचौरैश्चारूपैश्चोरमायानिपुणैः तस्करान्जानीयादुत्सादयेच्च २६७॥

भक्ष्यभोज्योपदेशैश्च ब्राह्मणानां च दर्शनैः शौर्यकर्मापदेशैश्च कुर्युस्तेषां समागमं २६८॥

भक्ष्येति ते पूर्वचौरास्तस्करैः सह भक्ष्यभोज्यं आगच्छत इति आमोदकपायसादीयः अस्मिन् गृहे भक्ष्यभोज्यं ज्ञातं तस्माकं देयं ब्राह्मणोऽस्ति सोऽभिलषितार्थसिद्धिं जानाति तं पश्यामः इत्येवं ब्राह्मणानां दर्शनैः कश्चिदेकएव बहुभिः सह योत्स्यति तं पश्याम इत्येवं शौर्यकर्मव्याजेन तेषां चौराणां राजो दंडधारकपुरुषाः समागमं कुर्युः घातयेयुश्च २६८॥

ये तत्र नोपसर्पेयुर्मूलप्रणिहिताश्च ये तान्प्रसह्य नृपो हन्यात्समित्रज्ञातिबान्धवान् २६९ य इति ये चौरास्तत्र भक्ष्यभोज्यादिनिमित्तं शंकया नोपसर्पंति ये च मूले राजनियुक्तपुरुषाणां चौरवर्गप्रणिहिताः सावधानभूताः नैतैः सह संगतिं भजंते तांश्चौरान् बलात्प्रसह्य तदेकतापन्नमित्रपित्रादिज्ञातिस्वजनसहितान् बलाद्राजा हन्यात् २६९

न होढेन विना चौरं घातयेद्धार्मिको नृपः सहोढं सोपकरणं घातयेदविचारयन् २७०॥

न होढेनेति धार्मिको राजा होढं अपहृतद्रव्यं संधिच्छेदोपकरणव्यतिरेकेण निश्चितचौरभावं न घातयेत् किंतु हृतद्रव्येण चौर्योपकरणेन च निश्चितचौरभावमविचारयन् घातयेत् २७०

ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायिकाः भांडावकाशदाश्चैव सर्वांस्तानपि घातयेत् २७१॥

ग्रामेष्विति ग्रामादिष्वपि ये केचिच्चौराणां चौरत्वं ज्ञात्वा भक्तदाः चौर्योपयुक्तभांडादिगृहावस्थानं ये ददति तानपि नेरंतर्यमर्यादापराधगौरवापेक्षया घातयेत् २७१॥

राष्ट्रेषु रक्षाधिकृतान्सामंतांश्चैव चोदितान् अभ्याघातेषु मध्यस्थाञ्छिष्याच्चौरानिव द्रुतं २७२

राष्ट्रेष्विति ये राष्ट्रेषु रक्षानियुक्ताः ये च सीमांतवासिनो सामंताः चौर्योपदेशमध्यस्था भवंति चौरवत्तानपि दंडयेत् २७२।

म॰ 148
नु॰ से॰
२४८

यश्चापि धर्मसमयात्प्रच्युतो धर्मजीवनः। दंडेनैव तमप्योषेत्स्वकाद्धर्माद्धि विच्युतं २७३॥

यश्चापीति याजनप्रतिग्रहादिना परस्यागदानादिधर्मभ्रष्टत्वाच्च यो जीवति स च धर्मजीवी नो ब्राह्मणाः सोपि धर्ममर्यादाया च्युतो भवति तमपि स्वधर्ममर्यादाया च्युतो भवति तमपि स्वमात्रनिग्रहदंडेन पतापयेत् २७३

ग्रामघाते हिताभंगे पथि मोषाभिदर्शने। शक्तितो नाभिधावंतो निर्वास्याः सपरिच्छदाः २७४

ग्रामेति ग्रामलुंठने तस्करादिभिः क्रियमाणे हिताभंगे जलसेतुभंगे जाते देशोत्पन्नसस्यनाशाने हृतिभंगे चेति मयातिथिः पथि चौरदर्शने तन्निकटवर्तिनो यथाशक्तितो ये रक्षार्थं न ऊर्ध्वंति ते ग्रामवासादिपरिच्छदसहिताद्ग्रामाद्विवासनीयाः २७४

ह॰ राज्ञः कोशापहर्तॄंश्च प्रतिकूलेषु च स्थितान्। घातयेद्विविधैर्दंडैररीणां चोपजापकान् २७५॥

राज्ञ इति राज्ञो धनस्य हर्तॄन् यथा पक्षारिपुस्थिता तदा सा व्याघातकारिणः प्रधानां च राज्ञा महद्वैरवृद्धिकारिणोपरस्यापेक्षया करचरणजिह्वाच्छेदनादिभिर्नानाप्रकारदंडैर्घातयेत् २७५

संधिं छित्त्वा तु ये चौर्यं रात्रौ कुर्वंति तस्कराः। तेषां छित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत् २७६

संधिमिति ये रात्रौ संधिं छित्त्वा देकं हृत्वा परधनं तस्कराश्चौर्यं कुर्वंति तेषां राजा हस्तद्वयं छित्त्वा तीक्ष्णे शूले ताना रोपयेत् २७६॥

अंगुलीर्ग्रंथिभेदस्य छेदयेत्प्रथमे ग्रहे। द्वितीये हस्तचरणौ तृतीये वधमर्हति २७७

अंगुलीरिति परप्रांतादिस्थितं सुवर्णादिकं ग्रंथिमोक्षणेन यश्चोरयति स ग्रंथिभेदः तस्य प्रथमे ग्रहणे अंगुली छेदयेत् ... द्वितीयग्रहणे हस्तपादौ छेदयेत् तृतीयग्रहणे वधार्हो भवति २७७

अग्निदान्भक्तदांश्चैव तथा शस्त्रावकाशदान्। संनिधातॄंश्च मोषस्य हन्याच्चौरमिवेश्वरः २७८

अग्निदानिति ग्रंथिभेदादिकारिणो विज्ञाय अग्निभक्तशस्त्रावस्थानप्रदान् मुष्यत इति मोषश्चौरधनं तस्यावस्थापकान् चौरा इव राजा निगृह्णीयात् २७८॥

तडागभेदकं हन्यादप्सु शुद्धवधेन वा। यद्वापि प्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसं २७९॥

तडागेति यः स्नानदानादिना जनोपकारकं तडागं सेतुभेदादिना विनाशयति तान् अप्सु मज्जनेन प्रकारांतरेण वा हन्यात् यद्वा यदि तडागं पुनः संस्कारयति तदा उत्तमसाहसं दंड्यः २७९

कोष्ठागारायुधागारदेवतागारभेदकान्। हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन् २८०

कोष्ठेति राज्ञो धनधान्यादि यत्र ... यत्तु मेकमध्यजयष्टिदेवताप्रतिमाभेदिना प्रथमसाहसं दंडं वक्ष्यति सोस्मादेव देवतागारभेदकः ... देवताप्रतिमाविषया द्रष्टव्या २८०॥

यस्तु पूर्वनिविष्टस्य तडागस्योदकं हरेत्। आगमं वाप्यपां भिंद्यात्स दाप्यः पूर्वसाहसं २८१

यस्त्विति यः पुनः प्रजार्थं पूर्वं केनचित्कृतस्य तडागस्योदकमेव गृह्णाति कृत्स्नतडागोदकनाशनेन वधदंडः प्रागुक्तः तथोदकगमनमार्गं सेतुवधादिना यो नाशयति स प्रथमसाहसं दंड्यः २८१

समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि। स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् २८२॥

समुत्सृजेदिति अनार्तः सन् यो राजपथे पुरीषं कुर्यात् स कार्षापणद्वयं दंडं दद्यात् तच्चामेध्यं शीघ्रमेवापसारयेत् २८२॥

148 A

आपद्गतोऽथवा वृद्धो गर्भिणी बाल एव वा परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः ॥ २८३ ॥
आपद्गत इति व्याधितवृद्धगर्भिणीबाला न दंडनीयाः किं तर्हि पुनः किं कृतमिति परिभाषणीयाः तच्चामेध्यं शोधनीया इति शास्त्रमर्यादा २८३ ॥
चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः अमानुषेषु प्रथमो मानुषेषु तु मध्यमः २८४ ॥
चिकित्सकानामिति सर्वेषां कायशल्यादिभिषजां दुश्चिकित्सां कुर्वतां दंडः कर्तव्यः तत्र गवाश्वादिविषये दुश्चिकित्सायां प्रथमसाहसं दंडो मानुषविषये तु मध्यमसाहसः २८४
संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः प्रतिकुर्याच्च तत्सर्वं पंच दद्याच्छतानि च २८५ ॥ संक्रमेति संक्रमो जलोपरि गम-
नार्थं काष्ठशिलादिरूपः ध्वजः चिह्नं राजद्वारादौ यष्टिः पुष्करिण्यादौ प्रतिमा च देवताद्या मृण्मयादयः तेषां विनाशकः पंचशतपणान् दद्यात् तच्च विनाशितं सर्वं पुनर्नवं कुर्यात् २८५ ॥
अदूषितानां द्रव्याणां दूषणे भेदने तथा मणीनामपवेधे च दंडः प्रथमसाहसः २८६
अपद्रव्यप्रक्षेपेण दूषणे भेदने मणीनां च माणिक्यादीनां मध्ये यानि वेधार्हाणि तेषां वेधस्थानमपि मुक्तादीनामनवस्थानवेधने प्रथमसाहसो दंडः कार्यः सर्वत्र परकीयद्रव्ये नापि द्रव्यादानादिना स्वामी तुष्टिः कार्या २८६ ॥ अदूषितानामिति अदुष्टद्रव्या-
समैर्हि विषमं यस्तु चरेद्वै मूल्यतोऽपि वा समाप्नुयात्पूर्वं नरो मध्यममेव वा २८७ ॥
दानेन योऽविषमं व्यवहरति समं मूल्यं द्रव्यं दत्वा यः कंचिद्बहुमूल्यं कंचिदल्पमूल्यमिति विषमं मूल्यं गृह्णाति सोऽवर्द्धं प्रथमसाहसं मध्यमसाहसं वा दंडं प्राप्नुयात् २८७ समैरिति समैः समानमूल्यदातृभिः सह लोकैः
बंधनानि च सर्वाणि राजमार्गे निवेशयेत् दुःखिता यत्र दृश्येरन्विकृताः पापकारिणः २८८ प्राकारस्य च भेत्तारं परिखाणां च पूरकं द्वाराणां चैव भंक्तारं क्षिप्रमेव प्रवासयेत् २८९
अभिभूता दीर्घकाशनखश्मश्रवः कृशाः पापकारिणोऽन्यैरकार्यकारिभिरकार्यनिवृत्यर्थं दृश्यन्ते राजा गृहस्थापितं बंधनं प्राकारस्य भेदकं तदीयामेव परिखां पूरयितारं पुरद्वाराणां बंधनानीति प्रकारस्येति बंधनगृहाणि सर्वजनदृष्टये राजमार्गे कुर्यात् यत्र निगडबंधनादुपेताः दुःखसा- भंजकं शीघ्रमेव देशान्निर्वासयेत् २८९
अभिचारेषु सर्वेषु कर्तव्यो द्विशतो दमः मूलकर्मणि चानाप्तेः कृत्यासु विविधासु च २९० ॥
अभिचारेष्विति अभिचारो होमादिः शास्त्रीयेषु मारणोपायेषु लौकिकेषु च मूलकर्मणि नन पदपांशुग्रहणादिषु कृतेषु अनाप्तस्य मरणफले दुष्टिपातमणिग्रहणादिषु द्विशतपणो दंडः कर्तव्यः मरणे तु मारणमा-
त्रदंडः एवमनाप्तैर्मातापितृभार्यादिव्यतिरिक्तैः अनेकविधास्वपि कृत्यासु वशीकरणादिषु अनाप्तेर्वादिह तर्षु क्रियमाणासु नानाप्रकारासु द्विशतपणो दंडः प्रवर्तितव्यः २९० ॥
अबीजविक्रयी चैव बीजोत्कृष्टं तथैव च मर्यादाभेदकश्चैव विकृतं प्राप्नुयाद्वधम् २९१
तिकृत्वा यो विक्रीणीते तथा अपकृष्टमेव कतिपयोत्कृष्टप्रक्षेपेण सर्वमिदं सोत्कर्षमिति कृत्वा यो विक्रीणीते अपकृष्टमेव यश्च ग्रामनगरादिसीमाविनाशयति स विकृतनासाकर्णच्छेदादिरूपं वधं प्राप्नुयात् २९१ अबीजेति अबीजं यो बीजं समर्थबीजादि सर्वं समर्थमि-
सर्वकंटकपापिष्ठं हेमकारं तु पार्थिवः प्रवर्तमानमन्याये छेदयेल्लवशः क्षुरैः २९२ ॥
सर्वेति सर्वकंटकानां मध्ये अतिपापिष्ठं यतः सुवर्णकारं तत्तत्स्वामिकपरिवर्तापद्रव्यप्रक्षेपादिना हेमादिचौर्ये प्रवर्तमानं अन्याये तं गावियोगेन सर्वं देहं खंडशः छेदयेत् २९२ ॥
सीताद्रव्यापहरणे शस्त्राणामौषधस्य च कालमासाद्य कार्यं च राजा दंडं प्रकल्पयेत् २९३ ॥

म॰
टी॰ मे॰
१५५
149

सीदेतीति कृष्यमाणभूमिष्वर्थाभिकृषलादीनां मापहरणे वज्रादीनां च शस्त्राणां मोषणे यथा चकल्याणकृता देशचौर्यदण्डं कुर्यात् २९३

स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा सप्तप्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते २९४

स्वामीति स्वामी राजा अमात्यो मन्त्र्यादिः पुरं राजधानी कृतदुर्गनिवासनगरं राष्ट्रं देशः कोशो वित्तनिचयः दण्डो हस्त्यश्वरथपादातं मित्रं त्रिविधं समाख्यातो मित्रमेताः सप्त प्रकृतयो ह्यानि सप्ताङ्गमिदं राज्यमित्युच्यते २९४॥

सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम् पूर्वं पूर्वं गुरुतरं जानीयाद्व्यसनं महत् २९५॥

ततः किमित्याह सप्तानामिति आसां राज्यस्य प्रकृतीनां सप्तानां क्रमोक्तानां मध्ये उत्तरस्या विनाशमपेक्ष्य पूर्वस्याः पूर्वस्या विनाशो महद्व्यसनं गरीयो जानीयात् तत्र यद्यपि मित्रव्यसनाद्बल व्यसनं गरीयस्तथापि बलस्य मित्राद्गरीयस्त्वात् एवं बलात्कोशो गरीयान् कोशेन बलस्थापनात् कोशाद्राष्ट्रं गरीयः राष्ट्रेणैव कोशलाभात् एवं राष्ट्रात् दुर्गं नाम पुरं पिहितं दुर्गा देवयवसेयतादिसंपन्नं राज्यरक्षास्ति हि दुर्गात् अमात्यो गरीयान् सर्वाणामात्यनाशे सर्वाङ्गवैकल्यात् अमात्यादपि स्वामी सर्वस्यामात्यपालनात् तस्मादुत्तरापेक्षया पूर्वस्य यत्नतो रक्षा २९५

सप्ताङ्गस्येह राज्यस्य विष्टब्धस्य त्रिदण्डवत् अन्योन्यगुणवैशेष्यान्न किंचिदतिरिच्यते २९६

सप्तेति उक्तसप्ताङ्गवतो लोके राज्यस्य त्रिदण्डवत् परस्परविलग्नस्योपकारान्न किंचिदङ्गमधिकं भवति यद्यपि पूर्वस्मात्पूर्वं पूर्वं गरीयस्त्वाधिक्यमुक्तं तथापि तेषामङ्गानां मध्यात् अन्यस्याङ्गस्य वैगुण्ये नाम कार्यसम्पादकत्वं क्वचिदस्ति तस्मादुत्तरोत्तराङ्गमप्यपेक्षणीयमिति एवपरीयमाधिक्यनिषेधः अत्र प्रसिद्धमिति त्रिदण्डमेव दृष्टान्तः तद्धि यतेर्यथा लग्नो वा लवष्टम्भादन्यापेक्षया न चातन्नैव त्रिदण्डस्य किञ्चिद्दण्डाधिको भवति २९६

तेषु तेषु तु कृत्येषु तत्तदङ्गं विशिष्यते येन यत्साध्यते कार्यं तत्तस्मिञ्छ्रेष्ठमुच्यते २९७॥

तेष्विति तस्मात्तेषु तेषु प्रयोजनेषु कार्येषु तत्तदङ्गं सातिशयं भवति तत्कार्यमनेन न कर्तुं शक्तिः एवं च येनाङ्गेन यत्कार्यं संपद्यते तस्मिन्कार्ये तदेव प्रधानमुच्यते तस्मादन्योन्यगुणविशेषाद्विशेषेण नैवास्त्यनेकस्फुटीकृतम् २९७॥

चारेणोत्साहयोगेन क्रिययैव च कर्मणाम् स्वशक्तिं परशक्तिं च नित्यं विद्यान्महीपतिः

चारेणेति सप्तमाख्याद्योक्तकार्पटिकादिना बलस्योत्साहयोगेन कर्मणां च हस्तिबन्धवणिक्पथादीनामनुष्ठानेन ज्ञातां प्रागुक्तां स्वशक्तिं परशक्तिं राजा सदा जानीयात् २९८॥

पीडनानि च सर्वाणि व्यसनानि तथैव च आरभेत ततः कार्यं संचिन्त्य गुरुलाघवम् २९९

पीडनानीति पीडनानि परचक्रादीनि कामक्रोधोत्थानि व्यसनानि च स्वपरचक्रगतानि तेषां च गुरुलघुभावं पर्यालोच्य सम्यग्विग्रहादिकार्यमारभेत २९९॥

आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ३००

आरभेतेति राजा स्वराजवृद्धिपरापचयनिमित्तानि कार्याणि कथंचिद्विदितं संजातमिति कृत्वा समपि आरभ्यात्मनोऽपि विनः पुनः पुनस्तान्यारभेतैव यस्मात्कर्माण्यारभमाणं पुरुषं श्रीर्नितरां सेवते तथा च नारायणेनाप्युक्तं श्रीरस्तीति प्रीतिहितमपि प्राचभेति न च पुंसां गुरुपणां कर्माणि फलन्तीति राज्ञो दाढ्यं तद्वाक्य ३००॥

कृतं त्रेतायुगं चैव द्वापरं कलिरेव च राज्ञो वृत्तानि सर्वाणि राजा हि युगमुच्यते ३०१॥

यतः कृतमिति कृतत्रेताद्वापरकलयो राज्ञ एव चेष्टितविशेषाः तेरेव सत्यादिविशेषप्रहृतेः तस्माद्राजैव कृतादियुगमभिधीयते ३०१॥

कलिः प्रसुप्तो भवति स जाग्रद्द्वापरं युगम् कर्मस्वभ्युद्यतस्त्रेता विचरंस्तु कृतं युगम् ३०२॥

149 A

कीटकवेष्टितं कृतादियुगमित्युक्तं आह कलिरिति शयानामालस्यादिनायदा निरुद्यमो राजा भवति तदा कलिः स्यात् यदा ज्ञानवानपि नानुतिष्ठति तदा द्वापरः यदा कर्मानुष्ठाने प्रवर्तते तदा त्रेता यदा शास्त्रोक्तपुनः कर्माण्यनुतिष्ठन् विचरति तदा कृतयुगं तस्माद्राज्ञा कर्मानुष्ठानपरेण भाव्यमिति न तत्तात्पर्येण तत्वान्त्सु वकृतयुगाद्युपलक्षणं ३०२॥

इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत् ३०३।

इन्द्रस्येति इन्द्रादिमंत्वष्टिनोवीर्यस्यानुरूपं चरितमजानुतिष्ठेत्तथाच मध्याकंटकोद्धारेण प्रजापालनरागाभ्यां संयुक्तः स्यात् ३०३॥

वार्षिकांश्चतुरो मासान्यथेन्द्रोऽभिप्रवर्षति तथाभिवर्षेत्स्वं राष्ट्रं कामैरिन्द्रव्रतं चरन् ३०४ कथमिन्द्रादिचरितमनुतिष्ठेदित्याह कार्षिकानिति यथा तत्संवत्सरपर्याप्तश्रवणादिष्वत्रोमासानिन्द्रः सस्यादिसिद्धये वर्षति एवमिन्द्रचरितं अनुतिष्ठन् राजा स्वदेशाश्रयान्याभ्यन्तमभिलषितार्थैः पूरयेत् ३०४॥

अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ३०५॥

अष्टाविति यथा सूर्यो मार्गशीर्षाद्यष्टमासान् रश्मिभिः स्तोकं स्तोकमीषत्तापेनादत्ते तथा राज्ञा शास्त्रोक्तरानपीडया सदा राष्ट्रात्करं गृह्णीयात् यस्मादेतदस्यार्कव्रतम् ३०५॥

प्रविश्य सर्वभूतानि यथा चरति मारुतः तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ३०६॥

प्रविश्येति यथा प्राणाख्यो वायुः सर्वजन्तुष्वन्तः प्रविश्य विचरति एवं चारद्वारेण स्वपरमंडलेषु चिकीर्षितार्थज्ञानार्थमन्तः प्रवेष्टव्यं यस्मादेतन्मारुतं चरितम् ३०६॥

यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति तथा राज्ञा नियन्तव्याः प्रजास्तद्धि यमव्रतम् ३०७॥

यथेति यथापि यमस्य शत्रुमित्रे न स्तस्तथापि तन्निदर्शनार्थकयोः शत्रुमित्रव्यपदेशः यथा यमः शत्रुमित्रमरणकाले तत्समवनियच्छति एवं राज्ञाः पराधकाले रागद्वेषपरिहारेण प्रजाः शासनीया यस्मादेतदस्य याम्यव्रतं ३०७

वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणम् ३०८

वरुणेनेति यो वरुणस्य रज्जुभिर्बध्यते स मिथ्यः सत्य यातनाविशंकितः पापी बद्ध एव लक्ष्यते तथा पापकारिणः विशंकितः पवयावत्पापारयं तेतावद्बधाससे यस्मादेतदस्य वारुणं व्रतं ३०८

परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः तथा प्रकृतयो यस्मिन्स चान्द्रव्रतिको नृपः ३०९

परिपूर्णमिति यथा पूर्णोडदर्शनेन मनुष्या हर्षयुक्ताः देयस्य सममात्यादयो यस्मिन्दृष्टे तुष्टिमुपगच्छन्ति स चंद्रव्रतचारी नृपः ३०९॥

प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु दुष्टसामन्तहिंस्रश्च तदाग्नेयं व्रतं स्मृतं ३१०

प्रतापयुक्त इत्यादि पापकारिषु सदा दंडपातनेन प्रचंडो महद्धतः स्यात् तथा प्रतिकूलामात्यहिंसनशीलो भवेत् तदस्याग्निसंबन्धि व्रतं स्मृतम् ३१०॥

यथा सर्वाणि भूतानि धरा धारयते समम् तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतं ३११ यथेति यथा पृथिवी सर्वाणि उच्चावचानि स्थावरजंगमानि उत्कृष्टानि उत्कृष्टापकृष्टानि समं कृत्वा धारयते तत्र न विद्वद्वनिकयणवद्भूतानि तदितराणि च दीनानाथादि सर्वभूतानि रक्षणपतनदानादिना साम्येन धारयतः पृथिवीसंबन्धि व्रतं भवति ३११

एतैरुपायैरन्यैश्च युक्तो नित्यमतन्द्रितः स्तेनान्राजा निगृह्णीयात्स्वराष्ट्रे पर एव च ३१२॥

पतैरिति पतैः कृत्वा पापैः पृथिवीपतिः अपि स्वबुद्धिप्रभवैर्युक्तो राजाऽनुलसः स्वराष्ट्रे ये चौरा वसन्ति ये च परराष्ट्रे ये चौरा वसन्ति ये स्वराष्ट्रं प्रविशन्ति तत्स्वदेशमागत्य संतिष्ठन्तेऽभयप्र
कारोन्निगृह्णीयात् सोऽग्निर्भवति वायुश्चेत्यादिना एवं सिद्धवत्कृत्वं सिद्धवत्कर्म स्यादिह पत्रराजः कृतत्वात्तस्य गुणयोगेन स्फुटीकृतमित्यपुनरुक्तिः ३१२ ॥

परामप्यापदं प्राप्तो ब्राह्मणान्न प्रकोपयेत् ते ह्येनं कुपिता हन्युः सद्यः सबलवाहनम् ३१४।

परामिति कोशक्षयादिना प्रकृष्टामप्यापदं प्राप्तो राजा ब्राह्मणान्न प्रकोपयेत् यस्मात्ते रुष्टाः सबलवाहनं एनं सद्य एव शापाभिचाराभ्यां हन्युः ३१२ ॥

यैः कृतः सर्वभक्ष्योऽग्निरपेयश्च महोदधिः क्षयी चाप्यायितः सोमः को न नश्येत्प्रकोप्य तान् ३१४

तथा हि यैरिति यैर्ब्राह्मणैरपशापेन सर्वभक्ष्योऽग्निः कृतः समुद्रश्चापेयजलश्चन्द्रश्च क्षययुक्तः यश्चाप्यायितः तान्कोपयित्वा को न नश्येत् ३१४ ॥

लोकानन्यान्सृजेयुर्ये लोकपालांश्च कोपिताः देवान्कुर्युरदेवांश्च कः क्षिण्वंस्तान्समृध्नुयात् ३१५

किंच लोकानिति ये स्वर्गादिलोकानपरानन्यांश्च लोकपालान्सृजन्तीति संभाव्यन्ते देवांश्च शापेन मानुषादीन्कुर्वन्ति तान्पीडयन्कः समृद्धिं प्राप्नुयात् ३१५ ॥

यानुपाश्रित्य तिष्ठन्ति लोका देवाश्च सर्वदा ब्रह्म चैव धनं येषां को हिंस्यात्तान्जिजीविषुः ३१६

अपि च यानित्यादियाजनब्राह्मणाः वचनयाजनकर्त्तृकान्नाश्रित्य अग्नौ प्रास्ताहुतिरित्यादिन्यायेन पृथिव्यादिलोकाश्च स्थितिं लभन्ते देवाश्च यज्ञादिना स्थितिं लभन्ते वेदा एव च येषां धनं तेषां हिंसायां नाविनाशनात्मानं पालयितुं तत्तान्जिजीविषुर्न को हिंस्यात् ३१६ ॥

अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ३१७ ॥

एवं तर्हि विद्वांसं ब्राह्मणं सेवेत्यत आह अविद्वानिति यथाहितो नाहितो वाग्निर्महती देवता एवं मूर्खो विद्वांश्च ब्राह्मणः प्रकृष्टा देवतेति ३१७ ॥

श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति हूयमानश्च यज्ञेषु भूय एवाभिवर्धते ३१८ ॥

श्मशानेष्वित्यादि यथाग्निर्महातेजाः श्मशानेषु शवदाहकार्येऽपि नैव दुष्टो भवति किं तु पुनरपि यज्ञेषु हूयमानोऽभिवर्धते ३१८ ॥

एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् ३१९ ॥

एवमिति एवं कुत्सितकर्मस्वपि सर्वेषु यद्यपि ब्राह्मणाः प्रवर्तन्ते तथापि सर्वप्रकारेण पूज्याः यस्मात्तत्प्रकृष्टं दैवतं सामर्थ्यं ब्राह्मणस्य तपसा ज्ञानार्थं विशेष्य शोकनीयाः ३१९

क्षत्रस्यातिप्रवृद्धस्य ब्राह्मणान्प्रति सर्वशः ब्रह्मैव संनियन्तृ स्यात्क्षत्रं हि ब्रह्मसंभवं ३२०

क्षत्रस्येति क्षत्रियस्य ब्राह्मणान्प्रति सर्वथा पीडानुबन्धस्य ब्राह्मण एव शापाभिचारादिना सम्यग्नियन्ता यस्मात्क्षत्रियो ब्राह्मणसंभूतः ब्राह्मणो बाहुः प्रसूतत्वात् ३२० ॥

अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ३२१ तथा चाद्भ्य इति जलब्राह्मणपाषा
णेभ्योऽग्निक्षत्रियशस्त्राणि जातानि तेषां सर्वत्र तेजः सर्वत्र दहनाभावः दहनात्मकं कार्यं करोति स्वकारणेषु जलब्राह्मणपाषाणेषु दहनाभिभवश्छेदनरूपं कार्यं न करोति ३२१ ॥

नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते ब्रह्म क्षत्रं च संपृक्तमिह चामुत्र वर्धते ३२२ ॥

150 A

नेति ब्राह्मणरहितं क्षत्रियो वृद्धिं न याति शान्तिकपौष्टिकाद्यवृद्धेरेणादिधर्मविरहात् एवं क्षत्रियरहितोपि ब्राह्मणो न वर्ततेरक्षाविनाशाद्यागादिकर्माननुष्ठानात् कृतब्राह्मणः क्षत्रियश्चैव
संसृष्टं वृद्धिमेवेह च लोके परत्र च आत्मीयकामृष्मीं दत्तावाप्ताभिवृद्धिमिति दण्डप्रकरणे चेयं ब्राह्मणस्तुतिः ब्राह्मणानामपराधिनामपि लघुदण्डप्रयोगे नियमार्था ३२२ ॥

दत्त्वा धनं तु विप्रेभ्यः सर्वदंडसमुत्थितं पुत्रे राज्यं समासृज्य कुर्वीत प्रायणं रणे ३२३ यदा तु निष्ठुरदर्शनाद्विकित्स्यव्याधिना वा ग्रस्तमात्म
सूर्यं बुध्येत तदा दत्तेति महापातकिधनवर्जितं प्रायश्चित्तविनियुक्तावशिष्टसर्वदंडधनं ब्राह्मणेभ्यो दत्त्वा पुत्रे राज्यं समर्प्य संग्रामे मृत्युः फलातिशयप्राप्त्यर्थं संग्रामे प्राणत्यागं कुर्यात् संग्रामासंभवे तु
अनशनादिनापि ३२३ ॥

एवं चरन्सदा युक्तो राजधर्मेषु पार्थिवः हितेषु चैव लोकस्य सर्वान्भृत्यान्नियोजयेत् ३२४ ॥
एवमिति एवमस्मिन्नध्यायोक्तराजधर्मेषु व्यवहारमार्गेण राजा सर्वदा यत्नवान् प्रजाहितेषु सर्वान् भृत्यान् विनियोजयेत् ३२४ ॥

एषोऽखिलः कर्मविधिरुक्तो राज्ञः सनातनः इमं कर्मविधिं विद्यात्क्रमशो वैश्यशूद्रयोः ३२५ ॥
एष इति एतद्राज्ञः कर्मानुष्ठानं पारंपर्यागतत्वात् नित्यं समस्तमुक्तं इदानीं वैश्यशूद्रयोः क्रमेणावक्ष्यमाणमिदं कर्मानुष्ठानं जानीयात् ३२५ ॥

वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहं वार्तायां नित्ययुक्तः स्यात्पशूनां चैव रक्षणे ३२६ वैश्य इति वैश्यः कृतो
पनयनपर्यंतसंस्कारः विवाहादिकं कृत्वा जीविकार्थं वक्ष्यमाणायां कृष्यादिकायां पशुपालने च सर्वदा युक्तः स्यात् पशुरक्षणमपि वार्तान्तःपातित्वात् पृथगुपादानं पशुरक्षायां नितरां चादरसिद्ध्य
कामपि अत्यादरं दर्शयति ३२६ ॥

प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः ३२७ ॥
प्रजापतिरिति यस्मात् ब्रह्मा पशून् सृष्ट्वा रक्षणार्थं वैश्याय दत्तवान् प्रजाश्च सर्वाः सृष्ट्वा ब्राह्मणाय राज्ञे च रक्षणार्थं दत्तवानिति प्रसंगादेतदुक्तम् ३२७ ॥

न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति वैश्ये चेच्छति नान्येन रक्षितव्याः कथंचन ३२८ ॥
न चेति पशुरक्षणं न करोमीति वैश्येन इच्छा न कार्या अतः कृष्यादिवृत्तिसंभवेपि वैश्येन पशुरक्षणमवश्यं करणीयं वैश्ये च पशुरक्षणं कुर्वत्यन्यः ३२८ ॥

मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च गन्धानां च रसानां च विद्यादर्घबलाबलं ३२९ ॥
किं चेति मणिमुक्ताविद्रुमलोहवस्त्राणां गन्धानां कर्पूरादीनां रसानां लवणादीनां उत्तममध्यमानां देशकालापेक्षयां मूल्योत्कर्षापकर्षं वैश्यो जानीयात् ३२९ ॥

बीजानामुप्तिविच्च स्यात्क्षेत्रदोषगुणस्य च मानयोगं च जानीयात्तुलायोगांश्च सर्वशः ३३० ॥
बीजानामिति बीजानां सर्वेषां वपनविधिज्ञः स्यात् इदं बीजमस्मिन्काले उप्तं प्ररोहत्यस्मिन्नेवं तथेदं सूषरमिदं प्रशस्यमित्यादि क्षेत्रदोषगुणज्ञश्च स्यात् मानोपायांश्च प्रस्थद्रोणादीन् जानीयात् तुलापायांश्च सर्वांस्तुलामानीयायथा मानं च यथा
वि ३३० ॥

सारासारं च भाण्डानां देशानां च गुणागुणान् लाभालाभं च पण्यानां पशूनां परिवर्द्धनं ३३१ ॥
सारेति इदमुत्कृष्टमेतदपकृष्टमित्येकजातीयानामपि द्रव्याणां विशेषं जानीयात् तथा देशानां प्राक्पश्चिमादीनां क्व किमल्पमूल्यं किं बहुमूल्यं वेत्यादि दोषगुणं दोषोऽस्य तद्विक्रेयद्रव्या
णां चेयता कालेन यथा न पचयो वेति विद्यात् तथास्मिन् देशे काले चानेन चतुष्पादकयवादिना पशवो वर्द्धन्ते नेत्येतदपि जानीयात् ३३१ ॥

भृत्यानांचभृतिंविद्याद्भाषाश्चविविधान्नृणां द्रव्याणांस्थानयोगांश्च क्रयविक्रयमेवच ३३२ ॥

भृतानामिति गोपालमनुष्याणांवेतनंजानीयात् गौडदाक्षिणात्यादीनांचमनुष्याणांनानाप्रकाराभाषाविक्रयार्थंविद्यात् यादृशंद्रव्यमेवंस्थाप्यतेअनेनचसंयुक्तंचिरं तिष्ठतितिष्ठत्यनन्यथेदंद्रव्यमस्मिन् देशेकालेचैयताविक्रीयत इत्येतदपिजानीयात् ३३२ ॥

धर्मेणचद्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमं दद्याच्चसर्वभूतानामन्नमेवप्रयत्नतः ३३३

धर्मेणेति धर्मेणहिंसकपातादिनाउक्तप्रकारेणयत्नंवृद्धौप्रकृष्टंयत्नंकुर्यात् हिरण्यादिदानमपेक्ष्यान्नमेवप्राणिभ्योविशेषेणदद्यात् ३३३ ॥

विप्राणांवेदविदुषांगृहस्थानांयशस्विनां शुश्रूषैवतुशूद्रस्यधर्मोनैःश्रेयसःपरः ३३४

विप्राणामिति शूद्रस्यपुनर्वेदविदांगृहस्थानांस्वधर्मानुष्ठानेनयशोयुक्तानांब्राह्मणानांयापरिचर्यासैवप्रकृष्टःस्वर्गादिश्रेयोहेतुर्धर्मः ३३४ ॥

शुचिरुत्कृष्टशुश्रूषुर्मृदुवागनहंकृतः ब्राह्मणाद्याश्रयोनित्य
मुत्कृष्टांजातिमश्नुते ३३५ ॥

शुचिरिति बाह्याभ्यंतरशौचोपेतःस्वजात्यपेक्षयाउत्कृष्टद्विजातिपरिचरणशीलःपरुषभाषणनिरहंकारःप्रायोणब्राह्मणाश्रयःतदभावेक्षत्रियवैश्याश्रयोपि स्वजातितःउत्कृष्टांजातिंप्राप्नोति ३३५ ॥

एषोनापदिवर्णानामुक्तःकर्मविधिःशुभः आपद्यपिहियस्तेषां
क्रमशस्तन्निबोधत ३३६ ॥ इतिमानवेधर्मशास्त्रेभृगुप्रोक्ता
यांसंहितायांनवमोध्यायः ९ ॥

एषइति एषवर्णानामनापदि चतुर्णामपिकर्मविधिर्धर्मः उक्तःआपद्यपियस्तेषाम् धर्मस्तंसंकीर्णश्चवर्णाःइदंक्रमेणशृणुत ३३६ ॥

इतिश्रीकुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांनवमोऽध्यायः ९ ॥

151 A

अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः प्रब्रूयाद्ब्राह्मणस्त्वेषां नेतराविति निश्चयः १ वैश्यशूद्रधर्मानन्तरं संकी
र्णानां तु चरमं मवमिति प्रतिज्ञातत्वात् तस्मिन्नाद्येवर्णाश्रमधर्मे कीर्णानामुक्तेः वर्णानां तु वादार्थं वर्णिकस्य प्रधानधर्मम् अध्ययनं ब्राह्मणस्य त्वध्यापनमनुवदति।
अधीयीरन्निति ब्राह्मणादयस्त्रयो वर्णाः अध्ययनानुभूतस्वकर्मानुष्ठाननिरता वेदमधीयीरन् एषां पुनर्मध्ये ब्राह्मण एवाध्यापनं कुर्यात् न क्षत्रियवैश्याविति यदि च
यः प्रब्रूयाद्ब्राह्मणस्त्वेषामित्यनेनैव क्षत्रियवैश्ययोरध्यापननिषेधसिद्धौ नेतराविति पुनर्निषेधवचनं प्रायश्चित्तगौरवार्थम् १॥

सर्वेषां ब्राह्मणो विद्याद्वृत्त्युपायान्यथाविधि प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत् २॥
किं च सर्वेषामिति सर्वेषां वर्णानां जीवनोपायम् यथाशास्त्रं ब्राह्मणो जानीयात् तेभ्यश्चोपदिशेत् स्वयं च यथोक्तव्यनियममनुतिष्ठेत् अत्रानुवादः २॥

वैशेष्यात्प्रकृतिश्रैष्ठ्यान्नियमस्य च धारणात् संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ३ वैशेष्यादिति जात्युत्कर्षात्प्रकृतिः
कारणं हिरण्यगर्भोत्तमाङ्गरूपकारणोत्कर्षान्नियमस्य चेत्येवं नियमो वेदस्याध्ययनाध्यापनव्याख्यानोपयुक्तानि शास्त्राध्यायधारणात् अत एव ब्राह्मणश्चैव धारणादिति
नातिशयवत्स्वाधारणेनैव ब्राह्मणोत्कर्षः गार्हस्थ्यराजसूयादिकं तनाधारणादिति यथावेदाध्यायनं क्षत्रियादिभ्यो धारणोत्कर्षात् संस्कारस्थापनयनादेर्विशेषात् क्षत्रियाद्यपेक्षयाधिक्यात्
विधानेन विशेषात् वर्णानां स्वाध्यायनमुपदेशयोर्ब्राह्मणः प्रभुः ३॥

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ४॥
ब्राह्मण इति ब्राह्मणादयस्त्रयो वर्णा द्विजातयस्तेषामुपनयनविधानात् शूद्रः पुनश्चतुर्थो वर्ण एकजातिरुपनयनाभावात् पञ्चमः पुनर्वर्णो नास्ति संकी
र्णजातीनां तु अश्वतरवत् मातापितृजातिव्यतिरिक्तजात्यन्तरत्वात् न वर्णत्वम् अयं च जात्यन्तरोपदेशः शास्त्रे व्यवहारार्थः ४॥

सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते ५॥ सर्वेति ब्राह्मणादिषु वर्णेषु तत्तत्स
पिसमानजातीयासु यथाशास्त्रपरिणीतासु अक्षतयोनिषु आनुलोम्येन ब्राह्मणेन ब्राह्मण्यां क्षत्रियेण क्षत्रियायामित्यनेनानुक्रमेण ये जातास्ते मातापित्रोर्जात्या
जातीया एव ज्ञातव्याः आनुलोम्यग्रहणं चात्र स्वदेशपुगमुक्तम् ... गवाश्वादिवदत्रापि विशेषः ब्राह्मणादिजात्यन्तरजनकत्वाभावादत्र
...ब्राह्मणादिजातिरेव तथा च देवलः द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते ...
... सवर्णाभ्यः सवर्णास्तु जायन्ते हि सजातयः इत्यभिधाय ... इति ... याज्ञवल्क्यः
... द्विजातिरिति ... ५॥

स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्सुतान् सदृशानेव तानाहुर्मातृदोषविगर्हितान् ६॥

152

म॰
मु॰ से॰
१५२

स्त्रीष्विति आनुलोम्येनाव्यवहितवर्णजातीयासु भार्यासु द्विजातिभिर्ये उत्पादिताः पुत्राः यथा ब्राह्मणेन क्षत्रियायां क्षत्रियेण वैश्यायां वैश्येन शूद्रायां तान् मातृहीन-
जातीयत्वदोषगर्हितान् पितृसदृशान् न तु पितृसजातीयान् मन्वादय आहुः पितृसदृशग्रहणान्मातृजातेरुत्कृष्टाः पितृजातितो निकृष्टास्तेषां एतेषां च नामा-
नि मूर्द्धावसिक्तमाहिष्यकरणाख्यानि याज्ञवल्क्यादिभिरुक्तानि वृत्तयश्चोशनसा प्रोक्ताः हस्त्यश्वरथशिक्षा अस्त्रधारणं च मूर्द्धावसिक्तानाम् नृत्यगीतन-
क्षत्रजीवनम् सस्यरक्षा च माहिष्याणाम् द्विजातिशुश्रूषा धनधान्याध्यक्षता राजसेवा दुर्गान्तःपुररक्षा च पारशवोग्रकरणानामिति ६ ॥

अनन्तरासु जातानां विधिरेष सनातनः द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिं ७ ॥ अनन्तरास्विति एष पारंपर्यागततया नि-
त्यो विधिरनन्तरजातिभार्यासु जातानामुक्तः एकेन द्वाभ्यां च वर्णाभ्यां व्यवहितासु जातानां यथा ब्राह्मणेन वैश्यायां क्षत्रियेण शूद्रायां ब्राह्मणेन शूद्रायामिमं वक्ष्यमा-

ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते निषादः शूद्रकन्यायां यः पारशव उच्यते ८ ॥ णं धर्मादनपेतं विधिं जानीयात् ७ ॥

ब्राह्मणादिति कन्याग्रहणमत्र ऊढायामित्यध्याहार्यं विवाहविधिः स्मृतत्वात् याज्ञवल्क्येन स्फुटीकृतत्वाच्च ब्राह्मणाद्वैश्यकन्यायामूढायामम्बष्ठाख्यो जायते शूद्र-

क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान् क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ९ ॥ कन्यायामूढायां निषाद उत्पद्यते यः संज्ञान्तरे-
ण पारशवश्चोच्यते ८

क्षत्रियादिति क्षत्रियाच्छूद्रकन्यायामूढायां क्रूरचेष्टः क्रूरकर्मरतिः क्षत्रशूद्रस्वभाव उग्राख्यः पुत्रो जायते ९ ॥

विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः १० ॥

विप्रस्येति ब्राह्मणस्य क्षत्रियादिषु त्रिषु क्षत्रियस्य वैश्यादिद्वयोः वैश्यस्य च शूद्रायां वर्णत्रयाणामेते षट् पुत्राः सवर्णपुत्रकार्यापेतत्वादपसदा निकृष्टाः स्मृताः १०

क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ११ ॥

एवमनुलोमा उक्ताः प्रतिलोमानाह क्षत्रियादिति अत्र विवाहासंभवात् कन्याग्रहणं स्त्रीमात्रप्रदर्शनार्थम् अत एव श्लोके राजविप्राङ्गनासुताविति दर्शनात् ब्रा-
ह्मण्यां क्षत्रियाज्जातः सूतनामा जायते यथा वैश्याद्यथाक्रमं क्षत्रियाब्राह्मण्योर्मागधवैदेहाख्यौ पुत्रौ भवतः एषां च वृत्तयो मनुनैवाभिधास्यन्ते ११ ॥

शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणां वैश्यराजन्यविप्रासु जायन्ते वर्णसंकराः १२ ॥

शूद्रादिति शूद्राद्वैश्याक्षत्रियाब्राह्मणीषु क्रमेणायोगवः क्षत्ता नृणामधमश्चण्डालश्च वर्णानां संकरेण पुत्रा जायन्ते तेषु वर्णसंकरा जायन्ते १२ ॥

एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ क्षत्तृवैदेहकौ तद्वत्प्रातिलोम्येऽपि जन्मनि १३ एकान्तरे इति एकान्तरेऽपि वर्णे ब्राह्मणा-
द्वैश्यकन्यायामम्बष्ठः क्षत्रियाच्छूद्रकन्यायामुग्रः एतावानुलोम्येन यथा स्पर्शयोग्यौ तद्वदेकान्तरे प्रतिलोमजावपि शूद्रात्क्षत्रियायां क्षत्ता वैश्याद्ब्राह्मण्यां वैदेहः एता-
वपि स्पर्शादियोग्यौ विज्ञेयौ एकान्तरे पञ्चयोः स्पर्शादियोग्यत्वाभिधानादनन्तरजातानां सूतमागधायोगवानां स्पर्शादियोग्यत्वं सिद्धं भवति अतश्चण्डाल एवैकः प्रतिलोमजः

152A

सवर्णाद्वेति निरूप्यते १३ पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनां ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते १४ ॥
पुत्रा इति मातृदोषादिति हेतूपन्यासात् अनंतरशब्देनाप्यनंतरैकांतरद्व्यंतरस्त्रीषु द्विजातीनामनंतरैकांतरद्व्यंतरजातिस्त्रीपुत्रा अनुलोम्येनोत्पन्ना मातृ-
वेषुक्ताः पुत्रास्तानहीनजातिमातृदोषान्मातृदोषाद्यपदेशानाचक्षते मातापितृव्यतिरिक्तसंकीर्णजातित्वेपि पुत्राणां मातृजातिव्यपदेशकथनं मातृजातिसंस्कारादि
ब्राह्मणादुग्रकन्यायामावृतो नाम जायते आभीरोऽम्बष्ठकन्यायामायोगव्यां तु धिग्वणः १५ ॥ धर्मशास्त्रार्थः १४
ब्राह्मणादिति क्षत्रियाच्छूद्रायामुत्पन्ना उग्रा उग्रा या सा कन्या चेति उग्रकन्या तस्यां ब्राह्मणादावृतो नाम जायते ब्राह्मणेन वैश्यायामुत्पन्ना अम्बष्ठा तस्यां ब्राह्म-
णादाभीराख्यो जायते शूद्रेण वैश्यायामुत्पन्ना आयोगवी तस्यां ब्राह्मणाद्धिग्वणो जायते १५ ॥
आयोगवश्च क्षत्ता च चाण्डालश्चाधमो नृणां प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः १६ आयोगव इति आयोगवः क्षत्ता चांडालश्च
मनुष्याणामधमा इत्यनेन यथाक्रमेण वैश्या क्षत्रिया ब्राह्मणी पुत्रकार्यादपगतास्त्रयः शूद्राज्जायते पुत्रकार्यात्मनः प्रतिपादनार्थं प्रकृतानामप्यपानं वचनमेतत्
वैश्यान्मागधवैदेहौ क्षत्रियात्सूत एव तु प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः १७ ॥ मनसांकेतकृतानामपि १६ ॥
वैश्यादिति क्षत्रियाब्राह्मण्यो मागधवैदेहौ क्षत्रियात् ब्राह्मण्यां सूत इत्येवं प्रातिलोम्येनापरेपि त्रयः पुत्रकार्यादपगता जायंते १७ ॥
जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः शूद्राज्जातो निषाद्यां स वै कुक्कुटकः स्मृतः १८
जात इति निषादाच्छूद्रायां जातो जात्या पुक्कसो भवति निषाद्यां पुनः शूद्राद्यो जातः स कुक्कुटकनामा स्मृतः १८॥
क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते १९ ॥
क्षत्तुरिति शूद्रेण वैश्यायां जातः क्षत्ता क्षत्रियेण शूद्रायां जाता उग्रा तेन तस्यां जातः श्वपाक इत्युच्यते वैदेहकेन त्वम्बष्ठायां ब्राह्मणेन वैश्यायां जातायां वेण इति क-
द्विजातयः सवर्णासु जनयंत्यव्रतांस्तु यान् तान्सावित्रीपरिभ्रष्टान्व्रात्यानिति विनिर्दिशेत् २० थ्यते १९ ॥
द्विजातय इति द्विजातयः सवर्णासु स्त्रीषु यान् पुत्रानुत्पादयंति ते चेदुपनयनाख्यव्रतहीना भवंति तदा तानुक्तानेव तान् व्रात्यानिति
न अनंतरजे यथा पश्चात्युक्तमपि व्रात्यलक्षणम् प्रतिलोमजपुत्रवदस्यापि उपकाराद्यभावप्रदर्शनाय अस्मिन् संकीर्णप्रकरणे अन्वादितम् २० ॥
व्रात्यात्तु जायते विप्रात्पापात्मा भूर्जकण्टकः आवन्त्यवाटधानौ च पुष्पधः शैख एव च २१ व्रात्यादिति व्रात्यात् ब्राह्मणा-
त् सवर्णास्त्रियामुत्पन्नः ब्राह्मणात्पापस्वभावो भूर्जकंटको जायते तथा आवन्त्यवाटधानपुष्पधशैखाख्या जायंते एकस्यैव नानादेशभेदप्रसिद्धानि नामानि २१
झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च नटश्च करणश्चैव खसो द्रविड एव च २२ ॥
झल्लो मल्ल इति क्षत्रियात् व्रात्यात् सवर्णायां झल्लमल्ललिच्छिवि नटकरणखसद्रविडाख्या जायंते एतान्यप्येकस्यैव नामानि २२ ॥
वैश्यात्तु जायते व्रात्यात्सुधन्वाचार्य एव च कारुषश्च विजन्मा च मैत्रः सात्वत एव च २३ ॥

म० ३० से०
१५३

153

वैश्यादिति वैश्यान्तु क्षत्रियायां तद्वर्णायां सुधन्वाचार्यकारूषविजन्ममैत्रसात्वताख्या जायंते एकस्यैव तान्यपि नामानि २३ ॥

व्यभिचारेण वर्णानामवेद्यावेदनेन च स्वकर्मणां च त्यागेन जायन्ते वर्णसंकराः २४ व्यभिचारेणेति ब्राह्मणादिवर्णानामन्योन्यस्त्रीगमनेन सगोत्रादिविवाह्याविवाहेन उपनयनरूपस्वकर्मत्यागेन च वर्णसंकरो नाम जायते अतोऽत्र क्रमः अस्मिन् प्रकरणे व्रात्यानामभिधानम् २४ ॥

संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः अन्योन्यव्यतिषक्ताश्च तान्प्रवक्ष्याम्यशेषतः २५ ॥

संकीर्णेति ये संकीर्णयोनयः प्रतिलोमैरनुलोमैश्च परस्परसंबंधात् जायंते तान् विशेषेण वक्ष्यामि २५ ॥

सूतो वैदेहकश्चैव चंडालश्च नराधमः मागधः क्षत्तृजातिश्च तथायोगव एव च २६ सूत इति एते षट् कुलदूषणाः सूतादयः उत्पद्यन्ते २६

एते षट् सदृशान्वर्णाञ्जनयन्ति स्वयोनिषु मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु २७ ॥

एत इति एते पूर्वोक्ताः षट् प्रतिलोमजाः स्वयोनिषु सजातिं कुर्वन्ति यथा शूद्रेण वैश्यायां जात आयोगव उच्यते आयोगव्यामेव मातृजातौ वैश्यायां प्रवरासु क्षत्रियाब्राह्मणीयोनिषु चकारात् स्वस्मादपि शूद्रजातौ सवर्णसदृशान् वर्णान् जनयन्ति सदृशानेव नत्वपि यथा कित्वमातृजात्या वा हेवैश्यायां स्त्रीष्वपि नत्वोऽधिकगर्हितश्चोत्पन्नः वर्णत्वगुणत्वात् तत्सदृशानपि ततोऽधिकगर्हितान् स्वजातावपि जनयन्ती त्येतावदेवात्र मनुना ग्रन्थेन न विधीयते किन्तु जन्म सवर्णानामसवर्णास्त्रीषु जनितत्वात् क्रियादृष्टश्च आयोगवादयः प्रतिलोमजाः क्रियादृष्टाभ्यां समाना पितृभ्यां तत्स्याभ्यामपि जनितत्वात् आयोगवादिषु आत्मज हेत्वन्तरं जनकत्वात् ब्राह्मणतमाता पितृजनितत्वात् अधिकदुष्टत्वं न्यायः शूद्रब्राह्मणादिजातीयतः शूद्रब्राह्मण्यादिजातीयायां जनितः पितृतुल्यमुपैति

यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते आनन्तर्यात्स्वयोन्यां तु तथा बाह्येष्वपि क्रमात् नः ननु क्रियादृष्टाभ्यां जनितोऽपि २७

यथेति यथा त्रयाणां वर्णानां क्षत्रियवैश्यशूद्राणां मध्यात् द्वयोर्वर्णयोः क्षत्रियवैश्ययोर्गमने ब्राह्मणस्यानुलोम्यात् द्विज उत्पद्यते सजातीयायां च द्विजो जायते एवं बाह्येष्वपि वैश्यक्षत्रियाभ्याम् क्षत्रियाब्राह्मण्यां जाते द्विजकर्मोपक्रमो भवति शूद्रजातिः प्रतिलोमा पतया द्विजाः प्रतिलोमप्राप्ताः तस्यापि इदं मेधातिथिस्तु द्विजत्वप्रतिपादकमेतत् एवं वचनमुपनयनार्थमित्याह तत्र प्रतिलोमजास्तु धर्महीना इति गौतमेन संस्कारनिषेधात् २८ ॥

ते चापि बाह्यान्सुबहूंस्ततोऽप्यधिकदूषितान् परस्परस्य दारेषु जनयन्ति विगर्हितान् २९

ते चापीति ते चायोगवादयः षट् परस्परजातीयासु भार्यासु सुबहून् आनुलोम्यादधिकदुष्टान् सत्क्रियात् बहिर्भूतान् जनयन्ति तद्यथा आयोगवः क्षत्तृजायायामात्मनो हीनतरं जनयति तथा क्षत्ता आयोगव्यामात्मनो हीनतरमुत्पादयति एवमन्येष्वपि प्रतिलोमषट्कं दृष्टम् २९ ॥

यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते ३० ॥

यथैवेति यथा ब्राह्मण्यां शूद्रः प्रकृष्टं चंडालाख्यं प्राणिनं प्रसूयते जनयति एवं बाह्यश्चंडालादिर्वर्णचतुष्टये चांडालादिभ्योऽप्युत्कृष्टं प्रसूयते ३० ॥

प्रतिकूलं वर्तमाना बाह्या बाह्यतरान्पुनः हीना हीनान्प्रसूयन्ते वर्णान्पञ्चदशैव तु ३१ ॥

153A

प्रतिकूलमिति प्रथमे धातिथिगोविंदराजयोर्व्याख्याने पतेदेव विमला इति चातुर्वर्ण्यवाह्याश्चंडालक्षत्रयोगवाः शूद्रप्रभवास्त्रयः ... र्णपं गच्छंत आत्मनो हीन
तरान् परस्परापत्यापकृष्टोत्कृष्टवर्णप्रभवत्वात् पंचदशवर्णान् संपादयंति तद्यथा चंडालः शूद्राया मात्मनो हीनतरं वैश्याक्षत्रियाब्राह्मणीभ्यो जातं उत्कृष्ट
जनयति एवं वैश्यायां शूद्राज्जातं प्रथमं क्षत्रियाब्राह्मणीजाताभ्यामुत्कृष्टं जनयति ततोऽपि सदक्षत्रियायां ब्राह्मणीजातादुत्कृष्टं ततोऽपि हीने ब्राह्मण्यां जन
यति एवं क्षत्रायोगवावपि चातुर्वर्ण्यं चत्वार उत्कृष्टान् जनयंत इत्येते शूद्रप्रभवं चंडालक्षत्रायोगवेभ्यः चातुर्वर्ण्यं द्वादश प्रभेदा उत्पद्यंते आत्मना च चंडालक्ष
त्रायोगवास्त्रय इत्येवं शूद्रप्रभवाः पंचदश संपद्यंते एवं वैश्यक्षत्रियब्राह्मणप्रभवा अप्येकैकं पंचदश संभवंति एवं षष्टिश्चातुर्वर्ण्येन सह चतुःषष्टिप्रभेदा
भवंति हेतुपरस्परगमनेन नानावर्णान् जनयंतीति तेनैतन्मनोहरं एवं श्लोके यस्मात् प्रतिलोमजानां प्रकृतत्वान्महिमासारकथनार्थं ब्राह्मण्यत्रापि श्लोके
प्रतिकूलवर्तमाना इत्युपादानात् प्रतिलोमजमात्रविषयोऽयं श्लोको नानुलोमजविषयः तथा चैवं वैश्यक्षत्रियब्राह्मणप्रभवा अप्येकैकं पंचदश संभवंत्ये
वं षष्टिरिति न संगच्छते न च संभवमात्रेणैव इयं षष्टिरुक्तानुष्ठत्वात् शूद्रप्रभवा योगवक्षत्तृचंडाला एव चातुर्वर्ण्यसंततोऽपत्ताः पंचदश गर्हिता इति
वाच्यं यतो वैश्यक्षत्रियाभ्यामपि प्रतिलोमत उत्पादितानां त्रयाणां हीनत्वात्ते रपि चातुर्वर्ण्ये जनितानामपि गर्हितत्वसंभवात् यथावा सप्तेरवाहाश्च
तुर्वर्ण्ये प्रसूयंत इति मनुनैवांतरसंकटमुक्तत्वात् शुद्वाभ्यामपि तथैव व्याख्यातत्वाच्च चातुर्वर्ण्येन सह चतुःषष्टिरिति सर्वैश्च वाच्यत्वतम् नहि संकीर्ण
प्रकरणेषु हि चातुर्वर्ण्यगणनोचिता किंच वर्णान् पंचदश प्रसूयंते इति श्रूयमाणत्वाद्दशजननमुक्तं तेचात्मना चंडालक्षत्रायोगवास्त्रय इत्येवं शूद्रप्रभवाः
पंचदशेति न युक्तम् अपि चात्मना सह पंचदश संपादयंतीति न संगच्छते असंपाद्यत्वादात्मनः पंचदश संपद्यंत इति व्याख्याने ऽप्याहारपूर्वदोषः तस्मा
देवं व्याख्यायते प्रतिकूलवर्तमानाः प्रतिलोमजा वाह्याद्द्विजप्रतिलोमजेभ्योऽतिनिकृष्टत्वात् शूद्रप्रभवा योगवक्षत्तृचंडालास्त्रयः पूर्वश्लोकादनुवर्त
माने चातुर्वर्ण्यसमजातो च पते षट्संख्यानि पंचसु जातास्वस्वकश्यापि परतो गर्हितत्वाभिधानात् आत्मापेक्षया वाह्यतरान् प्रत्येकं पंचदश पुत्रान्
जनयंतीति यथा आयोगवश्चातुर्वर्ण्यस्त्रीषु आयोगव्यां चात्मनो निकृष्टान् पंच पुत्रान् जनयंत इत्यवाह्यास्त्रयः पंचदश पुत्रान् जनयंति तथानुलो
मजेभ्यो हीना वैश्यक्षत्रियप्रभवा मागधवैदेहसूताश्चात्मापेक्षया हीनान् पूर्ववच्चातुर्वर्ण्यस्त्रीषु सजातौ च प्रत्येकं पंच पुत्रान् जनयंतो हीनाश्चपि त्रयः
पंचदशैव पुत्रान् जनयंतीति एवं त्रिंशद्भेदा भवंति अथवा वाह्यशब्दो हीनपर्यायः एवं प्रतिलोमजानां त्रयो वाह्याश्चंडालक्षत्रायोगववैदेहमागधसू
ताः षट्पर्यायसंकरापकर्षात् प्रतिलोम्येन स्त्रीषु वर्तमाना वाह्यतरान् पंचदशैव पुत्रान् जनयंतीति यथा चंडालः क्षत्रादिषु पंचसु स्त्रीषु क्षत्ता आयोगव्यां
दिषु चतसृष्वायोगवो वैदेह्यादिषु तिसृषु वैदेहो मागधीसूत्योः मागधः सूत्यां सूतस्तु प्रतिलोमाभावात् प्रातिलोम्येन जनयत्येवं पंचसु प्रातिलोम्येन
पंचदशैव पुत्रान् जनयंति पुत्रांतरनिर्देशात् हीनाः सूतादयश्चंडालांताः षट्पर्यायसंकरापकर्षात् अनुलोम्येनापि प्रतिलोमा क्रूरीत्या स्वापेक्षया हीनान्
पंचदशैव पुत्रान् जनयंति एवं त्रिंशद्भेदा भवंति ३१॥

प्रसाधनोपचारज्ञमदासं दासजीवनं सैरिंध्रं वागुरावृत्तिं सूते दस्युरयोगवे ३२ प्रसाधनेति केशरचनादिः प्रसाधनं तत्स्थोप
चारज्ञश्च दासं उच्छिष्टभक्षणादिदासकर्मरहितं शुश्रूषमेवाहनादिदासकर्मजीवनं पाशावंधनेन मृगादिव्यापादनेन तज्जीवनं सैरिंध्रं नामानं सुलवा
हुरूपजानामिति श्लोके वक्ष्यमाणो दस्युरायोगवस्त्रीजातो शूद्रेणैव श्वपायां मुत्पन्नायां जनयति तच्चास्य मृगादिमारणादेदपि श्रोषया यथं वदितव्यम् ३२

मैत्रेयकं तु वैदेहो माधूकं संप्रसूयते नॄन् प्रशंसत्यजस्रं यो घंटाताडोऽरुणोदये ३३॥

म॰
नु॰ से॰
१५४

मैत्रेयकमिति वैश्या... जातो वैदेहः पूर्वोक्तायामयोगव्यां मैत्रेयाख्यं मधुरभाषिणं जनयति यः प्रातर्घंटामाहत्य राजप्रभृतीन्स्तवनेन प्रत्यूषे स्तौति ३३ ॥
निषादो मार्गवं सूते दाशं नौकर्मजीविनं कैवर्तमिति यं प्राहुरार्यावर्तनिवासिनः ३४ निषाद इति ब्राह्मणेन शूद्रा-
यां जातो निषादः प्रागुक्तः पूर्वोक्तायामायोगव्यां मार्गवं दाशापरनामानं नौव्यवहारजीविनं जनयति आर्यावर्तदेशवासिनः कैवर्तं प्राहुरन्ये कोतेयमिति ३४ ॥
मृतवस्त्रभृत्स्वनार्यासु गर्हितान्नाशनासु च भवन्त्यायोगवीष्वेते जातिहीनाः पृथक्त्रयः ३५ ॥
मृतेति सैरिंध्रमैत्रेयमार्गवा हीनजातीयास्त्रयः मृतवस्त्रपरिधाना स्वरूपास्वच्छिष्टभक्षणास्वयोगवीषु पितृभेदाद्भिन्ना भवन्ति ३५ ॥
कारावरो निषादात्तु चर्मकारः प्रसूयते वैदेहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ३६ कारावर इति वैदेह्यामेव जायत इति वक्ष्यमाणत्वा-
णादन्ध्याप्यकोदायामैवमेवयन्ते निषादाद्वैदेह्यां जातः कारावराख्यश्चर्मच्छेदनकारी जायते अतएव शोषणसेकारावराणां चर्मच्छेदनाचरणमेव वृत्तिरेनोक्ता।
वैदेहकसैरिंध्रभेदाख्या ग्रामबहिर्वासिनो भ्रातरा निर्देशाद्वैदेहकेन वैदेह्यां जातस्यगर्हितवैदेहकस्यापुत्रितत्वात् कारावरनिषादजात्योश्चर्मस्त्रीकमनिषा-
चण्डालात्पाण्डुसोपाकस्त्वक्सारव्यवहारवान् आहिण्डिको निषादेन वैदेह्यामेव जायते ३७ नात्कारावरनिषादस्त्रयो भवकस्यामाजायते ३६
चंडालादिति वैदेह्यां चंडालात्पाण्डुसोपाकाख्यो वेणुव्यवहारजीवी जायते निषादेन च वैदेह्यामेवाहिंडिकाख्यो जायते ... बन्धनस्थाने पुरुषाणां संरक्षणादाहिंडि-
कानामित्यपशनसम्वृत्तिरित्युक्तो समानमातृत्वेपि पितृकत्वेपि कारावराहिण्डिकयोर्वृत्तिभेदसंश्रवणात् व्यपदेशभेदः ३७ ॥
चंडालेन तु सोपाको मूलव्यसनवृत्तिमान् पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ३८ चंडालेनेति शूद्रायां निषादेन जातायां
पुक्कस्यां चंडालेन जनितः सोपाकाख्यः पापात्मा सर्वदा साधुभिर्निंदितो मरणार्हविनापराधानां वध्यानां वधसेवनेन राजादेशोपरणेन वृत्तिर्यस्य जायते ३८ ॥
निषादस्त्री तु चंडालात्पुत्रमन्त्यावसायिनं श्मशानगोचरं सूते बाह्यानामपि गर्हितं ३९ ॥
निषादस्त्रीति निषादी चंडालात् अन्त्यावसायिसंज्ञं चंडालादिभ्योऽपि दुष्टतमं श्मशानवासिनं तद्वृत्तिं च जनयति ३९ ॥
संकरे जातयस्त्वेताः पितृमातृप्रदर्शिताः प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः ४० संकर इति वर्णसंकरविषये एता जा-
तयो यस्यां यो जनयिता यश्च जनकः स एवं जातीयो जात इत्येवं पितृमातृकथनपूर्वकं दर्शिताः तथा गूढाः प्रकटा वा तज्जातिविदितकर्मानुष्ठानेन ज्ञातव्याः ४०
स्वजातिजानन्तरजाः षट्सुता द्विजधर्मिणः शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ४१ स्वजातिजेति द्विजातीनां स-
मानजातीयासु जाताः तथानुलोम्येनानन्तराः ब्राह्मणेन क्षत्रियावैश्ययोः क्षत्रियेण वैश्यायामेव षट्पुत्रा द्विजधर्मिणः उपनेयाः अनन्तरनामस्विति ... कृतेना-
ज्ञातिव्यपदेशार्थं न संस्कारार्थमिति कस्यचिद्भ्रमः स्यात् अतः पृथग्द्विजातिसंस्कारार्थमिदं वचनं ये पुनरमी द्विजातयस्तेभ्योऽपि सूतादयः प्रतिलोमजास्ते शूद्रध-
र्माणो नैषामुपनयनमस्ति ४१ ॥
तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ४२ ॥
तप इति स्वजातिजानन्तरजातास्तपःप्रभावेण विश्वामित्रवद्बीजप्रभावेण च ऋष्यशृङ्गादिवत् कृतत्रेतादौ मनुष्येषु यस्यां जातावुत्कर्षं गच्छन्ति अपकर्षं च पूर्वमातृवंशेनायोनि-
४२

154A

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ४३ ॥
शनकैरिति इमा वक्ष्यमाणाः क्षत्रियजातयः उपनयनादिक्रियालोपेन ब्राह्मणानां च याजनाध्यापनप्रायश्चित्ताद्यर्थं दर्शनाभावेन शनैः शनैर्लोके शूद्रतां प्राप्ताः ४३
पौंड्रकाश्चौड्रद्रविडाः कांबोजा जवनाः शकाः पारदापह्लवाश्चीनाः किराता दरदाः खशाः ४४
पौंड्रका इति पौंड्रादिदेशोद्भवाः क्षत्रियाः संतः क्रियालोपादिना शूद्रत्वमापन्नाः ४४
मुखबाहूरुपज्जानां या लोके जातयो वहिः म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ४५ ॥
मुखेति ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रियालोपादिना या जातयो बाह्या जाता म्लेच्छभाषायुक्ता आर्यभाषायुक्ता वा ते दस्यवः सर्वे स्मृताः ४५ ॥
ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः ते निंदितैर्वर्तयेयुर्द्विजानामेव कर्मभिः ४६ ये इति ये द्विजानामानुलोम्येन उत्पन्नाः
षडेते ऽपसदाः स्मृताः इति तेषामपि पितृजात्यपेक्षयापसदत्वेन प्रागभिधानात् ये चापध्वंसजाः प्रतिलोमजास्ते द्विजात्युपकारकैरेव निंदितैर्वक्ष्यमाणैः कर्मभि-
सूतानामश्वसारथ्यमंबष्ठानां चिकित्सितं वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ४७ ॥ र्जीवेयुः ४६ ॥
सूतानामिति सूतानामश्वदमनयोजनादि रथसारथ्यं जीवनार्थं अंबष्ठानां रोगशांत्यादि चिकित्सा वैदेहकानामंतःपुररक्षणं मागधानां स्थलपथवाणिज्या ४७
मत्स्यघातो निषादानां त्वष्टिस्त्वायोगवस्य च मेदांध्रचुंचुमद्गूनामारण्यपशुहिंसनं ४८ मत्स्येति निषादानामुक्तानां मत्स्यवधः
आयोगवस्य काष्ठतक्षणं मेदांध्रचुंचुमद्गूनां आरण्यपशुमारणं चुंचुमद्गू च वैदेहकयोर्द्विस्त्रियोर्ब्राह्मणेन जातौ बोद्धव्यौ येनान्यौ वाद्दयौ बदिहो च क्षत्रियेण शूद्रायां जा-
क्षत्तुग्रपुक्कसानां तु विलौकोवधबंधनं धिग्वणानां चर्मकार्यं वेणानां भांडवादनं ४९ ॥ तानां तडकैव ग्राह्या ४८
क्षत्त्विति क्षत्त्रादीनां विलनिवासिगोधादिवधबंधनं धिग्वणानां चर्मकरणं तद्विक्रयश्च चर्मकरणं तद्विक्रयश्च जीवनं धिग्वणानामित्येषामनुपदर्शनात् सूतव-
चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च वसेयुरेते विज्ञाता वर्तयंतः स्वकर्मभिः ५० ॥ कारादेरपि भ्यः पश्चाद्बाह्य इति भेदः वेणानां कां-
चैत्येति ग्रामादिसमीपे ख्यातो वृक्षश्चैत्यद्रुमः तत्र मूले श्मशाने पर्वते वनसमीपे च वामी प्रकाशकाः स्वकर्मभिर्जीवंतो वसेयुः ५० ॥ स्यमुरजादिवाद्यभांडवादनं ४९
चंडालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभं ५१ वासांसि मृतचैलानि भिन्नभांडे-
षु भोजनं कार्ष्णायसमलंकारः परिव्रज्या च नित्यशः ५२ ॥
चंडालेति वासांसीति प्रतिश्रयो निवासः चंडालश्वपाकानां तु ग्रामाद्बहिर्निवासः स्यात् पात्ररहिताः कर्तव्याः यल्लोहादिपात्रैस्तैर्भुक्तं तत्संस्कृत्यापि न
व्यवहर्तव्यं धनं चैषां कुक्कुरखरं न वृषभादि वासांसि च शववस्त्राणि भिन्नशरावादिषु च भोजनं लौहवलयादिवालंकरणं सर्वदा च भ्रमणशीलत्वं ५२
न तैः समयमन्विच्छेत्पुरुषो धर्ममाचरन् व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ५३ ॥

तैरिति धर्ममनुष्ठानं समये … श्वपाकैः सह दर्शनादिव्यवहारं न कुर्यात् तेषां च ऋणादानग्रहणादिव्यवहारो विवाहश्च समानजातीयैः सहान्योन्यं स्यात् ५३

अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ५४॥

अन्नमेषामिति अन्नमेषां पराधीनं कार्यं साक्षाद्देयं न देयं किंतु प्रेष्यैर्भिन्नपात्रे दातव्यं ते च रात्रौ ग्रामनगरयोर्न पर्यटेयुः ५४॥

दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः ५५॥

दिवेति दिवा च क्रयविक्रयादिकार्यार्थं राजाज्ञया विज्ञाकिताः संतः पर्यटेयुः अनाथं च शवं ग्रामान्निर्हरेयुरिति शास्त्रमर्यादा ५५॥

वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ५६॥

वध्यांश्चेति वध्यांश्च शास्त्रानतिक्रमेण शूलारोपणादिना सर्वदा राजाज्ञया हन्युः तद्वस्त्रशय्यालंकारांश्च गृह्णीयुः ५६॥

वर्णापेतमविज्ञातं नरं कलुषयोनिजं आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत् ५७

वर्णेति वर्णात्त्वादपेतमनुष्यं संकरजातं येऽलोके स्तथावेनाविज्ञातमतएवार्यसदृशं वृत्ततः अनार्यं निंदितया तद्रूपाभिश्चेष्टाभिर्वेदसमाख्याभिर्निश्चिनुयात् ५७॥

अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजं ५८

अनार्यतेति निष्ठुरतपरुषभाषित्वं हिंसावृत्तिता … अनुष्ठानतानि संकरजातिं नरं अस्मिन् लोके प्रकटं कुर्वन्ति ५८॥

पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा न कथंचन दुर्योनिः प्रकृतिं स्वां नियच्छति ५९

यस्मात्पित्र्यं वेति … संकरजातो दुष्टयोनिः पितृसंबन्धि दुष्टस्वभावमनुवर्तते मातृसंबन्धि वा उभयसंबन्धि वा न कदाचित्स्वात्मकारणं गोपयितुं शक्नोति ५९

कुले मुख्येऽपि जातस्य यस्य स्याद्योनिसंकरः संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ६०

कुले इति महाकुलप्रसूतस्यापि यस्य योनिसंकरः प्रच्छन्नो भवति स मनुष्यो जनकस्वभावं लोकप्रवृत्त्यामेव तत्पव ६०

यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ६१॥

यत्रेति यस्मिन् राष्ट्रे एते वर्णसंकरा वर्णानां दूषका जायन्ते तद्राष्ट्रं राष्ट्रवासिजनैः सह शीघ्रमेव नाशमेति तस्माद्राज्ञा वर्णानां संकरो निरसनीयः ६१

ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः स्त्रीबालाभ्युपपत्तौ वा बाह्यानां सिद्धिकारणं ६२

ब्राह्मणार्थे इति गोब्राह्मणस्त्रीबालानामन्यतमस्यापि परित्राणार्थं इति गोब्राह्मणस्त्रीबालानामन्यतमस्यापि परित्राणार्थं दृष्टप्रयोजनानपेक्षः प्राणत्यागः प्रतिलोमजातानां स्वर्गप्राप्तिकारणम् ६२॥

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ६३

अहिंसेत्यादि हिंसात्यागो यथार्थाभिधानं अन्यायेन परधनस्याग्रहणं मृज्जलादिना विशुद्धिरिन्द्रियसंयमः इत्येवंभूतं संक्षेपतः सर्ववर्णानामपि धर्मं मनुराह चतुर्णामपि वर्णानां साधारणं धर्मं यथार्थमावेदितवान् ६३॥

शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत्प्रजायते अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात् ६४
इदानीं सवर्णापुत्रस्य मिश्रस्य कुलक्षणव्यतिरेकेणापि ब्राह्मण्यादि दर्शयितुमाह शूद्रायामिति शूद्रायां ब्राह्मणाज्जातः पारशवाख्यो यः जायते इति सामर्थ्यात्
सोऽपि स्यात् यदि द्विती ब्राह्मणेनोढा सती दुहिता तस्मै ब्राह्मणाय दत्ता दुहितरमेव जनयति साप्यन्येन ब्राह्मणेनोढा सती दुहितरमेव जनयति साप्येवमेव सप्तमयुगज
न्मनि सप्तम पारशवाख्या वर्णा बीजप्राधान्यात् ब्राह्मणत्वमाप्नोति ब्राह्मणसप्तमयुगादित्यभिप्रायात् सप्तमे जन्मनि ब्राह्मणः संपद्यत इत्यर्थः ६४॥

शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम् क्षत्रियाज्जातमेवं तु विद्याद्वैश्यात्तथैव च ६५॥
शूद्र इति एवं शूद्रो ब्राह्मणसमीपाच्छूद्रो ब्राह्मणतामिति ब्राह्मणश्च शूद्रतामिति ब्राह्मणोऽन्यब्राह्मणात् शूद्रायामुत्पन्नः पारशवो ज्ञेयः स यदि शूद्रामात् केवलशू
द्रो दुहितरं तस्याः पुत्रमाससमेव जनयति सोऽपि केवलशूद्रो दुहितरं तथा पुत्रमाससमेव जनयति सोऽप्येवं सप्तमे जन्मनि शूद्रः केवलशूद्रतां वीजतिकर्षात् क्रमेण ब्राह्म
ति एवं क्षत्रियाद्वैश्याच्च शूद्रायां जातस्य क्रमेणोत्कर्षः शेयः सप्तमे पञ्चमे पि वा इति याज्ञवल्क्यदर्शनाच्च क्षत्रियाज्जातस्य पञ्चमे जन्मनि उत्कर्षापकर्षो वा द्रष्टव्यौ
वैश्याज्जातस्य पुनः कर्षात् याज्ञवल्क्येनापि शाहनपदात् सप्तमे पञ्चमे गृहीतत्वात् द्रष्टव्यात्मतुरीयात् तृतीये जन्मनि उत्कर्षापकर्षो वा द्रष्टव्यो
ब्राह्मणेन वैश्याया जातस्य पञ्चमे जन्मनि उत्कर्षापकर्षो क्षत्रियायां जातस्य तृतीये क्षत्रियेण वैश्यायां जातस्य तृतीय एव बोद्धव्यो

अनार्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया ब्राह्मण्यामप्यनार्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत् ६६
अनार्यायामिति प्रकः शूद्रायां यदृच्छया अन्यायामपि ब्राह्मणाद् उत्पन्नोऽन्य ब्राह्मण्यां शूद्राज्जातः तयोर्मध्ये कतरो जातः श्रेयानिति चेत् संशयः कथं निर्ण
त सप्रायवीजस्य यथावीजोत्कर्षात् ब्राह्मणात् शूद्रायां जातः साधुः शूद्रः एवं देशोत्कर्षात् ब्राह्मण्यामपि शूद्राज्जातः किमिति साधुः शूद्रान्न स्यात् ६६

जातो नार्यामनार्यायामार्यादार्यो भवेद्गुणैः जातोऽप्यनार्यादार्यायामनार्य इति निश्चयः ६७॥
तत्र निर्णयमाह जात इति शूद्रायां स्त्रियां ब्राह्मणाज्जातः स गुणैः पाकयज्ञादिभिर्गुणैरनुष्ठीयमानैर्युक्तः प्रशस्यो भवति शूद्रेण पुनर्ब्राह्मण्यां जाता
प्रतिलोमत उत्पन्नः तयोर्मध्ये प्रथमपुत्रः पिकाराद प्रशस्य इति निश्चयः स्यायप्राप्तौ पथ्यावचनप्रामाण्याद्व्यवस्थितं ६७॥

तावुभावप्यसंस्कार्याविति धर्मो व्यवस्थितः वैगुण्याज्जन्मनः पूर्व उत्तरः प्रतिलोमतः ६८ तावुभाविति पारशवचण्डालौ द्वाव
प्युपनयनाविति व्यवस्थितत्वात् मर्यादा पूर्वः पारशवः शूद्राज्जातत्वेन जातिवैगुण्यादनुपनेयः प्रतिलोम्येन शूद्रेण ब्राह्मण्यां जातत्वात् चण्डालोऽनुपने
यः ६८

सुबीजं चैव सुक्षेत्रे जातं संपद्यते यथा तथार्याज्जात आर्यायां सर्वं संस्कारमर्हति ६९ सुबीजमिति यथा शोभनं बीजं शोभने क्षेत्रे जातं सम
द्धं भवति एवं द्विजातेर्द्विजातिस्त्रियां सवर्णायामनुलोम्येन क्षत्रियावैश्ययोर्जातः सर्वसंस्कारं क्षत्रियवैश्ययोः संस्कारं च सर्वं प्राप्नोति

बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः बीजक्षेत्रे तथैवान्ये तत्रेयं तु व्यवस्थितिः ७० चण्डालाविति स्वीकदाचिदर्थमेतत् द्वय
प्रदर्शनार्थं तत्र प्रयुक्तस्यैवार्थस्य स्थैर्यार्थमाह बीजमिति केचिद् ब्रह्मविदो बीजं श्रेष्ठं वदन्ति हारीताद्युत्पन्नव्यासऋष्यशृङ्गादेर्बीजस्य प्रतिष्ठादर्शनात् अपरे पुनः क्षेत्रं श्रेष्ठं वदन्ति

156

म॰ टी॰ १५८

क्षेत्रस्वामिनश्च दर्शनात् अक्षेत्रे नतु बीजलेऽरुभेऽप्यपिष्टं वीतिबीजस्य तदेते प्रमृद्धिदर्शनात् एतस्मिन्मते भेदे वक्ष्यमाणोऽयं व्यवस्था ज्ञेया ७०

अक्षेत्रे बीजमुत्सृष्टमन्तरैव विनश्यति अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ७१ अक्षेत्र इति ऊषरक्षेत्रे प्रोप्तं बीजमुत्पत्तिफलमददन्तरा

लएव विनश्यति शोभनमपि क्षेत्रं बीजरहितं स्थण्डिलमेव केवलं स्यात् ततश्चोभयप्रधानतयैतत्साम्यपक्षे केनिदयाद्बीजे चवस्त्रदबमिति प्राशक्तउभयप्राधान्यमेवाभि मतं ७१

यस्माद्बीजप्रभावेन तिर्यग्जा ऋषयोऽभवन् पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते ७२

इदानीं बीजप्राधान्यपक्षे दृष्टान्तमाह यस्मादिति यस्माद्बीजमाहात्म्येन तिर्यग्जाति हरिण्यादिजाता अपि ऋष्यशृङ्गादयो मुनित्वं प्राप्ताः पूजिताश्च अभिवादनादि

नावेदज्ञानादिना प्रशस्ता वाचा स्तुताः तस्माद्बीजं प्रशस्यते एवं च बीजप्राधान्यनिगमने बीजप्राधान्यमभ्युपेत्य बीजोत्कृष्टजातिः प्रधानमिति व्यवस्थया बोद्धव्यं ७२

अनार्यमार्यकर्माणमार्यं चानार्यकर्मिणं संप्रधार्याब्रवीद्धाता न समौ नासमाविति ७३ अनार्यमिति शूद्रं द्विजातिकर्मकारि

णं द्विजातिं च शूद्रकर्मकारिणं ब्रह्मा विचार्योक्तवान् न समौ नासमाविति यतः शूद्रो द्विजातिकर्मापि न द्विजातिसमः तस्यानधिकारित्वात् द्विजातिकर्मा च

णोपि तस्मात्स्वाभावात् एवं शूद्रकर्मापि द्विजातिः न शूद्रसमः निषिद्धसेवनेन जात्युत्कर्षस्यानपायात् नाप्यसमो निषिद्धाचरणेनोभयोः साम्यात् तस्मादुभयमपि

गर्हितं तत्तेन न कर्तव्यमिति मन्वर्थतत्वार्थोपदेशः ७३ ॥

ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः ते सम्यगुपजीवेयुः षट्कर्माणि यथाक्रमं ७४ इदानीं ब्राह्मणानामाप

द्धर्मं प्रतिपादयिष्यन्निदमाह ब्राह्मणा इति ये ब्राह्मणा ब्रह्मप्राप्तिकारणब्रह्मध्याननिष्ठाः स्वकर्मावस्थाने निरताश्च ते षट्कर्माणि वक्ष्यमाणान्यध्यापनादी

अध्यापनमध्ययनं यजनं याजनं तथा दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ७५ नि कर्माणि सम्यगनुतिष्ठेयुः ७४ ॥

तानि कर्माण्याह अध्यापनमिति अध्यापनाध्ययने साङ्गस्य वेदस्य तथा यजनयाजने दानप्रतिग्रहौ चेति एतानि षट्कर्माणि ब्राह्मणस्य वेदितव्यानि ७५

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ७६ षण्णामिति अस्य ब्राह्मणस्याध्य

यापनादीनां षण्णां कर्मणां मध्ये याजनाध्यापने विशुद्धप्रतिग्रहश्चेत्येतैः [illegible] द्विजातेः प्रतिग्रहश्चेत्येतानि त्रीणि कर्माणि जीवनार्था

नि ज्ञेयानि ७६ ॥

त्रयो धर्मा निवर्तन्ते ब्राह्मणात्क्षत्रियं प्रति अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः ७७ ॥

त्रयो धर्मा इति ब्राह्मणापेक्षया क्षत्रियस्याध्यापनयाजनप्रतिग्रहाख्यानि वृत्त्यर्थानि त्रीणि कर्माणि निवर्तन्ते अध्यापनयागदानानि तु तस्यापि भवन्ति ७७

वैश्यं प्रति तथैवैते निवर्तेरन्निति स्थितिः न तौ प्रति हि तान्धर्मान्मनुराह प्रजापतिः ७८ वैश्यं प्रतीति क्षत्रियवद्वैश्यस्याप्यध्यापनयाजन

प्रतिग्रहा निवर्तन्ते तथाविधस्यापीति यस्मात्तयोर्वैश्यक्षत्रिययोः प्रजापतिर्मनुः क्षत्रियवैश्ययोः प्रति तान्निवृत्त्यर्थानि कर्माणि नोक्तवान् [illegible] आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः ७९ ॥ नयागदानानि भवन्ति ७८ ॥

शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषिर्विशः [illegible] प्रजारक्षणाय क्षत्रियस्य सर्ववाणिज्यपशुरक्षणकृषिकर्माणि वैश्यस्य जीवनार्थानि धर्मार्थाः पुनस्तयोर्दानाध्य

शस्त्रास्त्रेति शस्त्रं खड्गादि अस्त्रं [illegible]

156A यतयागा भवंति ७९ वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य च रक्षणम् । वार्ताकर्मैव वैश्यस्य विशिष्टानि स्वकर्मसु ८० वेदेति वेदाभ्या
सो वेदाध्यापनं रक्षा वार्ताभ्यां वृत्त्यर्थाभ्यां महोपदेशादितद् ब्राह्मणस्य प्रजारक्षणं क्षत्रियस्य वाणिज्यं पशुपालं वैश्यस्य प्रयत्नेनैतेषां स्वस्वार्थकर्मसु श्रेष्ठानि ८० ॥
अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा । जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ॥ ८१ अधुना आपद्धर्मानाह अजीवंस्ति।
तियथोक्तेनाध्यापनादिस्वकर्मणा ब्राह्मणो नित्यकर्मानुष्ठानकुटुंबसंवर्द्धनपूर्वकमजीवन् क्षत्रियकर्मणा ग्रामनगररक्षादिना जीवेत् यस्मात् क्षत्रियधर्मोऽ
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् । कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविका ८२ स्य समनिकृष्टो हितः ८१ ॥
उभाभ्यामिति ब्राह्मणउभाभ्यां स्ववृत्तिक्षत्रियवृत्तिभ्यामप्यजीवन् कथं कार्यमेवं तेनेति यदि प्रश्नः स्यात्तदा कृषिपशुरक्षणे आश्रित्य वैश्यस्य वृत्तिमनुतिष्ठेत
कृषिगोरक्षयहणं वाणिज्यस्यापि प्रदर्शनार्थं तथा च विक्रेयाणि वक्ष्यति स्वयंकृते वेदकृष्यादि ब्राह्मणस्य वृत्तिः स्वयंकृतस्य कृतामृताभ्यां जीवेत इत्यना पद्यव विहितत्वात् ८२
वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्रियोऽपि वा । हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ८३ ॥
वैश्यवृत्त्यापि जीवन् भूमिष्ठजंतुहिंसाबहुलां बलीवर्दादिपराधीनां कृषिं यत्नतस्त्यजेत् स्व
यं प्रतिकृष्यादेर्बलाबलमाह वैश्यवृत्ति ब्राह्मणः क्षत्रियो वा वैश्यवृत्त्यापि जीवन् भूमिष्ठजंतुहिंसा... क्षत्रियस्यापि तु अन्यत्र वैश्यवृत्तिः स्वीयवगम्यते ८३ ॥
तः पशुपालवाणिज्याभावे कृष्यः कार्यः निकृष्टं क्षत्रियोऽपि वैश्यपादानां तत्क्षत्रियस्यापि अन्यत्र ...
कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता । भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ८४
कृषिमिति साध्विदं जीवनमिति कृषिं केचिन्मन्यन्ते सा पुनर्जीविका साधुभिर्निंदिता यस्माद्धलकुद्दालादि लोहप्रांतं काष्ठं भूमिं भूमिष्ठजंतूंश्च हंति ८४
इदं तु वृत्तिवैकल्यात्त्यजतो धर्मनैपुणम् । विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम् ८५ ॥
इदंत्विति ब्राह्मणस्य क्षत्रियस्य वा स्वीयवृत्तिरसंभवे धर्मप्रतिनिष्ठतां त्यजतो वैश्यपण्यविक्रेतव्यद्रव्यजातं तद्वक्ष्यमाणवर्जनीयवर्जितं धनवृद्धिकरं विक्रेयं ८५
सर्वान् रसानपोहेत कृतान्नं च तिलैः सह । अश्मनो लवणं चैव पशवो ये च मानवाः ८६ तानि वर्जनीयान्याह सर्वानिति सर्वान् गुडमा
दीन् रसान् तथा सिद्धान्नं तिलपाषाणलवणान् पशून् मनुष्यांश्च न विक्रीणीत सर्वतो लवणस्य निषेधसिद्धौ विशेषेण निर्देशः सैंधवादिसामुद्रलवणनिषेधार्थं तत्र च
सर्वं च तान्तवं रक्तं शाणक्षौमाविकानि च । अपि चेत्स्युररक्तानि फलमूले तथौषधीः ८७ गौरवार्थं सर्वमन्यस्यापि स्पष्टं स्पर्शो वा
सर्वमिति सर्वं तंतुनिर्मितं वस्त्रं कुसुंभादिना रक्तं वर्जयेत् शाणक्षौमानि उर्णमाविकलोमभवानि वस्त्राणि लोहितान्यपि भवेयुः तथापि न विक्रीणीत तथा फल मूलगुडूच्यादीनि वर्जयेत् ८७ ॥ औषधयः ८८
अपः शस्त्रं विषं मांसं सोमं गंधांश्च सर्वशः । क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ८८ ॥
अपइति जलं लोहं विषं मांसं सोमं क्षीरं दधि घृतं तैलं गुडं दर्भान् तथा गंधवंति सर्वाणि कर्पूरादीनि क्षौद्रं माक्षिकं मधु मधूच्छिष्टं सारासवं मधूच्छिष्टेति याज्ञवल्क्ये
आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च । मद्यं नीलिं च लाक्षां च सर्वांश्चैकशफांस्तथा ॥ ८९ ॥ न पठितं वर्जयेत् ८८ ॥

म० तृ० मे० १५७

157

-आरण्यानिति आरण्यान् सर्वान् पशून् हस्त्यादीन् दंष्ट्रिणः सिंहादीन् तथा पक्षिमत्स्यान् एकशफांश्चाश्वादीन् न विक्रीणीत ८९ ॥

काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः । विक्रीणीत तिलाञ्छुद्धान्धर्मार्थमचिरस्थितान् ९० कामामिति कर्षकः स्वय
मेव कर्षणेन तिलानुत्पाद्य द्रव्यान्तरेणामिश्रानुत्पत्त्यनन्तरमेव न तु लाभार्थं कालान्तरं धृतान् धर्मनिमित्तमिच्छातो विक्रीणीत निषिद्धस्यापि तिलविक्रयस्य धर्मा

भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः । कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ९१ र्थमयं प्रतिप्रसवः ९०
भोजनेति भोजनाभ्यङ्गदानव्यतिरिक्तं यदन्यन्निषिद्धं विक्रयादि तिलानां कुरुते तेन पापेन पितृभिः सह कृमिर्भूत्वा श्वपुरीषे मज्जति ९१ ॥

सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात् ९२ सद्य इति मांसलाक्षालवणानि विक्रीय ब्रा
ह्मणस्तत्क्षणादेव पतनीयदोषगौरवख्यापनार्थमेतत् पञ्चानामेव सद्यः पातकानां स्मृतिहेतुत्वं वक्ष्यमाणत्वात् त्र्यहेण शूद्रो ब्राह्मणो भवति तदपि दोषगौरवज्ञापनार्थ

इतरेषां तु पण्यानां विक्रयादिह कामतः । ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ९३ नगौरवख्यापनार्थम् ९२ ॥
इतरेषामिति ब्राह्मण उक्तेभ्यो मांसादिभ्योऽन्येषां प्रतिषिद्धानां पण्यानां इच्छातो न तु प्रमादात् इह लोके सप्तरात्रविक्रयेणैव वैश्यत्वं गच्छति ९३

रसा रसैर्निमातव्या न त्वेव लवणं रसैः । कृतान्नं चाकृतान्नेन तिला धान्येन तत्समाः ९४ रसा इति रसा गुडादयो रसैर्घृतादिभिः
परिवर्तनीयाः लवणं पुनः रसान्तरेण न परिवर्तनीयं सिद्धान्नमामान्नेन परिवर्तनीयं तिला धान्येन प्रस्थः प्रस्थेनेत्येवं तत्समाः परिवर्तनीयाः ९४

जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः । न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् ९५ जीवेदिति क्षत्रियः आपदं प्राप्तः एतेन
मिथायमर्वेणात्यमियानात् ब्राह्मणाचरतयाति निषिद्धेनापि रसादिविक्रयेणैव वैश्यवज्जीवेन्न पुनः कदाचिद्ब्राह्मणजीविकामाश्रयेत् केवलं क्षत्रियः वैश्यवद् याऽऽपि ९५

यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः । तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ९६ ॥
तं राजा गृहीतसर्वस्वं कृत्वा तदानीमेव देशान्निःसारयेत् ९६ ॥
यो लोभादिति योऽपकृष्टजातिः सन् लोभादुत्कृष्टजातिविहितकर्मभिर्जीवेत् परधर्मेण जीवन्हि सद्यः पतति जातितः ९७ ॥

वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः । यस्माज्जात्यन्तरविहितकर्मणा जीवंस्तत्क्षणादेव स्वजातितः पततीति दोषावर्जनार्थः ९७
वरमिति विगुणमपि स्वकर्म कर्तुं श्रेयो न परकीयं सम्पूर्णमपि अनाचरन्नकार्याणि निवर्तेत च शक्तिमान् ९८ ॥

वैश्योऽजीवन्स्वधर्मेण शूद्रवृत्त्यापि वर्तयेत् उच्छिष्टभोजनादीन्यकुर्वन् तद्वर्तनं निर्लीनापत्तिसमाप्तौ शूद्रवृत्तितो निवर्तेत ९८ ॥
वैश्य इति वैश्यः स्वधर्मेणाजीवितुमशक्नुवन् शूद्रधर्मेणापि द्विजातिशुश्रूषया पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः ९९ ॥

अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम् सूपकारादीनां कर्मभिर्जीवेत् ९९ ॥
अशक्नुवन्निति शूद्रो द्विजातिशुश्रूषां कर्तुमसमर्थः क्षुदवसन्नपुत्रकलत्रः

157A

यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः तानि कारुककर्माणि शिल्पानि विविधानि च १०० यैरिति पूर्वोक्तकारुककर्मेति
शेषाभिधानार्थं यैरिति यैः कर्मभिः कृतैर्द्विजातयः परिचर्यन्ते तानि कारुककर्माणि तक्षणादीनि शिल्पानि च चित्रलिखितादीनि नानाप्रकाराणि कुर्यात् १००॥
वैश्यवृत्तिमनातिष्ठन्ब्राह्मणः स्वे पथि स्थितः अवृत्तिकर्षितः सीदन्निमं धर्मं समाचरेत् १०१ वैश्यपतिब्राह्मणो वृत्त्यभावपीडितोऽ
वसादं गच्छन्क्षत्रियवैश्यवृत्तिमनातिष्ठन् स्वधर्मे एव विशुद्धस्तिष्ठेत् । सद्वृत्तावेव वर्तमान इमं वक्ष्यमाणं वृत्तिमन्त्रितिष्ठेत् शूद्रविशुद्धप्रतिग्रहादिरूपं
सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यते १०२॥ सर्वमेवापद्गतमापद्यते स्वयं १०२।
सर्वत इति ब्राह्मण आपद्ग्रस्तः सर्वेभ्योऽपि निन्दितेभ्यः क्रमेण प्रतिग्रहं कुर्यात् यस्मात्पवित्रं गङ्गादिकं रथ्योदकादिना दुष्यतीत्येतद्धर्मत
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् दोषो भवति विप्राणां ज्वलनाम्बुसमा हि ते १०३॥ स्मृतिसिद्धान्तो नोपपद्यते १०२॥
यस्मात्तेऽध्यापनादिति ब्राह्मणानामापदि गर्हिताध्यापनयाजनप्रतिग्रहैरधर्मो न भवति यस्मात्स्वभावतः पवित्रत्वेनाग्न्युदकतुल्यास्ते १०३॥
जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः आकाशमिव पङ्केन न स पापेन लिप्यते १०४॥
जीवितेति यः प्राणात्ययं प्राप्तः प्रतिलोमजादन्नमश्नाति सोऽन्तरिक्षमिव कर्दमेन पापेन न संबध्यते १०४॥
अजीगर्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन् १०५ अत्र परकृतिरूपार्थवादमाह अजीगर्त इति ऋषि
रजीगर्ताख्यो बुभुक्षितः सन्स्वपुत्रं शुनःशेफनामानं स्वयं विक्रीतवान् यज्ञे गोशतलाभाय यूपे बद्ध्वा विशसिता भूत्वा हन्तुं प्रवृत्तः स न च लिप्तः क्षुत्प्रतीकारार्थत्वात्तथा ऋग्वेदे पा
श्वमांसमिच्छन्नार्तोऽत्तुं धर्माधर्मविचक्षणः प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् पेनालिप्तः पतत्त्वं बहुचब्राह्मणे शुनःशेफाख्यान
श्वमांसमिति वामदेवाख्य ऋषिर्धर्माधर्मज्ञः क्षुधार्तः प्राणत्राणार्थं श्वमांसं खादितुमिच्छन्न दोषेण लिप्तवान् १०६॥ प्रपञ्चितं १०५
भरद्वाजः क्षुधार्तस्तु सपुत्रो विजने वने बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः १०७॥
भरद्वाज इति भरद्वाजाख्यो मुनिः महातपस्वी पुत्रसहितो निर्जने वने क्षुधापीडितो वृधनाम्नस्तक्ष्णो बह्वीर्गाः प्रतिगृहीतवान् १०७॥
क्षुधार्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीं चण्डालहस्तादादाय धर्माधर्मविचक्षणः १०८॥
क्षुधार्त इति ऋषिर्विश्वामित्रो धर्माधर्मज्ञः क्षुत्पीडितः चण्डालहस्तात्गृहीत्वा कुक्कुरजघनमांसं भक्षितुमभ्यवसितवान् १०८॥
प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः १०९ प्रतिग्रहादिति गर्हितानामप्यध्यापनयाजनप्रतिग्रहा
णां मध्यात् ब्राह्मणस्यासत्प्रतिग्रहो निकृष्टः परलोके नरकहेतुः तस्मादापदि प्रथमं निन्दितेभ्यः याजनाध्यापनयोः प्रवर्तितव्यं तदसंभवे असत्प्रतिग्रहः स एव परमे
याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनां प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ११०॥ वत १०९
अत्र हेतुमाह याजनेति याजनाध्यापने आपद्यनापदि च उपनयनसंस्कृतानां द्विजातीनामेव क्रियेते प्रतिग्रहः प्रवर्तितः कृष्टजातेः शूद्रादपि क्रियते तस्मादसौ ताभ्यां गर्हितः

158

मि॰
पु॰ स्मृ॰
१५८

जपहोमैरपैत्येनो याजनाध्यापनैः कृतं प्रतिग्रहनिमित्तं तु त्यागेन तपसैव च १११ जपेति यदेनो ग्रहणादसत्प्रतिग्रहयाजना
ध्यापनैर्यदुत्पन्नं पापं तत्प्रायश्चित्तप्रकरणोक्तहोमाणां कर्मेण जपहोमैर्न प्रतिग्रहस्य प्रतिग्रहनिमित्तं तु नः प्रतिग्रहीतद्रव्यत्यागेन मासं गोष्ठपयः पीत्वैवमादितपसा वा
शिलोञ्छमप्याददीत विप्रोऽजीवन्यतस्ततः प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ११२ ॥ तपसा वा दिगच्छति १११
शिलोञ्छमिति ब्राह्मणः सद्गृहाज्जीवन् इतस्ततः सुधयानकादिभ्योऽपि शिलोञ्छं गृह्णीयात् तत्र ततमेव सत्प्रतिग्रहं कुर्यात् यस्मादसत्प्रतिग्रहात् शिलः श्रेयान् अञ्जर्या
त्मकानेकधान्योन्नयनं शिलस्ततोऽप्युञ्छः श्रेष्ठः एकैकधान्यादिगुडकोच्चयनमुञ्छः ११२ ॥
सीदद्भिः कुप्यमिच्छद्भिर्धनं वा पृथिवीपतिः याच्यः स्यात्स्नातकैर्विप्रैरदित्संस्त्यागमर्हति ११३ सीदद्भिरिति स्नातकैर्विप्रैः स्वार्थं
ताभावात् धर्मार्थं कुड्यहार्थं वा वस्त्रादेः कुप्यमिच्छद्भिः सुवर्णं रजतव्यतिरिक्तं धान्यं वस्त्रादिकं धनं वा तेषां गोभूप्रधानं हिरण्यादि अपि याचनीयः क्षत्रियोऽपि स्याल्लब्धा यदि तेन याच्ना
कृता न दद्यात् तदा यथायोग्यमिच्छन्ति क्षत्रियस्तेनात्यजितः सप्ताज्ज्यास्त्यागयोग्यः इत्यर्थः मेधातिथिराज्ञा विक्रीय राज्यं त्यागार्हतेति तस्यादेशेनवत्सर्वम् इति याचनीयेति ११३ ॥
अकृतं च कृतात्क्षेत्राद्गौरजाविकमेव च हिरण्यं धान्यमन्नं च पूर्वं पूर्वमदोषवत् ११४ ॥
अकृतं चेति अकृतमनुपहतभूमिसंदेशे कृतात् कुमशास्त्रप्रतिग्रहे दोषरहितं तथा गोच्छागमेषाहिरण्यधान्यमिष्टान्नानामध्यानर्हं वेदत्रिदशस्त्रेष्वेषां पूर्वं पूर्वमसमवेयरः
सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ११५ ॥ परोजयः ११४
सप्तेति द्रव्यागमाः सप्त धनागमाः धर्म्या न तापिकारः धर्मार्थं धनयुक्ताः तत्र दायोऽन्वयागतं धनं लाभो निध्यादेः मैत्र्यादिलब्धं सर्वक्रयः प्रसिद्धः एते त्रयः सर्ववर्णानामपि वर्णा
नां धर्म्याः जयः धनं विजयनेन लब्धं क्षत्रियस्य धर्म्यः प्रयोगो वृद्ध्यादियन्त्रस्य कर्मयोगश्च कृषिवाणिज्यं पशुपालं प्रयोगो वैश्यस्य धर्मः सत्प्रतिग्रहो ब्राह्मणस्य धर्म्यः एवम
वेतेषां धर्मत्ववचनात् तदभावे प्रतिषेधः नापहितेषु हानिकर्मसु प्रवर्तितव्यं तदभावे चापहितेषु प्रकृतेषु स्थितेन दिहारवर्तेत ११५
विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः ११६ विद्येति आपत्प्रकरणाज्जीवनहेतवः प्रति
निर्दिष्टान् एषामध्ये यथाहं व्यापत्सु नापदि जीवनं निषिद्धं तथा तत्सापेक्षप्रकृतं याचते यथा ब्राह्मणस्य भृतिसेवयादि यं वैश्यस्यादावपि तेषु विद्यावदिवसाद्यतिरिक्ता
वेदतत्त्वविद्यापनं यन्ता दिविद्यासेवा मापदि जीवनार्थं न दृष्यति शिल्पं सलिलवन्नादिकम् भृतिः प्रेष्यभावेन वेतनग्रहणं सेवा परानुसम्पादनं गोरक्षं पशुपालनं
विपणिर्वाणिज्यं कृषिः स्वयं कृता धृतिः संतोषः तस्मिन्सति स्वल्पकेनापि जीव्यते भैक्षं भिक्षासमूहः कुसीदं धनवृद्धिप्रयोगः स्वयं कृतान्येतत्स्वभिः दशाभिरापदि जीवेती
ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत् कामं तु धर्मकार्यार्थं दद्यात्पापीयसेऽल्पिकाम् ११७ यत् ११६ ॥
ब्राह्मण इति ब्राह्मणः क्षत्रियो वापि वृद्ध्यादिधनं स्वयं प्रयुञ्जीत किं तु तिकृष्टकर्मणि धर्मार्थमल्पिकया वृद्ध्या प्रयुञ्जीत ११७ ॥
चतुर्थमाददानोऽपि क्षत्रियो भागमापदि प्रजा रक्षन्परं शक्त्या किल्बिषात्प्रतिमुच्यते ११८ इदानीं राज्ञामापद्धर्ममाह चतुर्थमिति
राज्ञो धान्यानामष्टमं द्वादशं षष्ठं वा कुर्वन् सम्यगापदि धान्यादेश्चतुर्थमपि भागं करार्थं गृह्णानः परया शक्त्या प्रजा रक्षन् तत्पापकरग्रहणपापेन न संबध्यते ११८ ॥
स्वधर्मो विजयस्तस्य नाहवे स्यात्पराङ्मुखः शस्त्रेण वैश्यान्रक्षित्वा धर्म्यमाहारयेद्बलिं ११९ क्षत्रियस्यापि राज्ञो रक्षणाश्रुत्येन यस्मा

158A

तस्य धर्म इति राज्ञः शत्रुविजयः स्वधर्मो विजयफलं युद्धमित्यर्थः प्रजारक्षणं श्रुतक्रमस्य यत्तत्कृतं श्रेष्ठं स्यात्तदा न युद्धपराङ्मुखो भवेत् एवं च शस्त्रेणैव वैश्यान् दस्युभ्यो

धान्येऽष्टमं विशां शुल्कं विंशं कार्षापणावरं कर्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा १२० रक्षित्वा तेभ्यो धर्मादनपेतमाष्टमं षष्ठं वा बलि-
माहारयेत् ११९

कोसौ बलिस्तमाह धान्यामरक्षितायाम् विषये उपचये वैश्यानामष्टमं भागं शुल्कमाहारयेत् धान्यानां द्वादशोऽपि भाग उक्तः आपद्ययमष्टम उच्यते अनंतरापदि शत्रुक्षया
तथा वेदितव्यः तथा हिरण्यादीनां कार्षापणान्तानां विंशतितमं भागं शुल्कं गृह्णीयात् तत्रापि पंचाशद्भाग आहेयो राज्ञा पशुहिरण्ययोरित्यादिना पंचाश-
द्भाग उक्तः आपद्ययं विंश उच्यते तथा शूद्राः कारवः सूपकारादयः शिल्पिनः तक्षादयः कर्मणोपकुर्वीत न तेभ्य आपद्यपि करो ग्राह्यः १२०

शूद्रस्तु वृत्तिमाकांक्षन्क्षत्रमाराधयेद्यदि धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् १२१ ॥

शूद्रस्त्विति शूद्रो ब्राह्मणशुश्रूषया जीवन् यदि वृत्तिमाकांक्षेत्तदा क्षत्रियं परिचरेत् तदभावे धनिनं वैश्यं परिचर्य जीवितुमिच्छेत् न हि जातिशुश्रूषणासामर्थ्येन
शास्त्रोक्तानि कर्माणि कुर्यात्

स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता १२२

स्वर्गार्थमिति स्वर्गप्राप्त्यर्थं स्वर्गसवृत्तिलिप्सार्थं वा ब्राह्मणानेव शूद्रः परिचरेत् यस्माज्जातो ब्राह्मणाश्रित इत्येवमितिशब्दो यस्य याजकपार्थिवादिनाम समासः सास्य शूद्रस्य कृ-
तकृत्यता तद्व्यपदेशतया श्रेयो कृतकृत्यो भवति
१२२

विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलं १२३

यत एवमतः विप्रेति ब्राह्मणपरिचर्यैव शूद्रस्य कर्मान्तरेभ्यः प्रकृष्टं कर्म शास्त्रेऽभिधीयते यस्मादेतद्व्यतिरिक्तं यदसौ कर्म कुरुते तदस्य निष्फलं भवतीति पूर्वस्तुत्य

प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद्यथार्हतः शक्तिं चावेक्ष्य दाक्ष्यं च भृत्यानां च परिग्रहं १२४ र्थं न तस्यान्यनिवृत्तये पाकयज्ञादीनामपि तस्य विहित-
त्वात् १२३

प्रकल्प्येति तस्य परिचारकशूद्रस्य परिचर्यासामर्थ्यं कर्मोत्साहं पुत्रदारादिभर्तव्यपरिमाणं चावेक्ष्य तैर्ब्राह्मणैः स्वगृहादनुरूपाजीविका कल्पनीया १२४ ॥

उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः १२५ उच्छिष्टमिति तस्मै शुश्रूषाश्रितशूद्राय

भुक्तावशिष्टमन्नं ब्राह्मणैर्देयं एवं च न शूद्राय मतिं दद्यात् नोच्छिष्टमित्यनाश्रितशूद्रविषयं भवति शिष्टेन तेषां जीर्णवस्त्राणि असाराणि धान्यानि जीर्णशय्यापरिच्छदाश्च तस्मै देयाः १२५

न शूद्रे पातकं किंचिन्न च संस्कारमर्हति नास्याधिकारो धर्मेऽस्ति न धर्मात्प्रतिषेधनं १२६

न शूद्र इति लशुनादिभक्षणेन शूद्रेण किंचित्पातकं भवति न तत्र ब्रह्मवधादावपि अहिंसा सत्यमित्यादेश्चातुर्वर्ण्यसाधारणत्वेन विहितत्वात् न चाप्युपनयनादिसं-
स्कारमर्हति नास्याग्निहोत्रादिधर्मे अधिकारोऽस्ति अविहितत्वात् न च शूद्रविहितात्पाकयज्ञादिधर्मादस्य निषेधः एवं चास्य सर्वस्यासिद्धार्थत्वात् अयं श्लोक उक्तस्यानुवा-
दः १२६

मा॰
१५९

धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तिमनुष्ठिताः मंत्रवर्ज्यं न दुष्यंति प्रशंसां प्राप्नुवंति च १२७

प्रिकाः मा सै वर्णिका माचारमनिषिद्धमाश्रिताः ते नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति याज्ञवल्क्यवचनात् नमस्कारमंत्रेण मंत्रांतररहितं पंचयज्ञादिधर्मं कु धर्मेप्सवेति ये पुनः शूद्राः स्वधर्मवेदिनो धर्ममप्रा

यथा यथा हि सद्वृत्तमातिष्ठत्यनसूयकः तथा तथेमं चामुं च लोकं र्वाणा न दुष्यंति प्रशंसां च ख्यातिं च लोके लभ

यथेति परगुणानिंदकः शूद्रो यथा यथा हि प्राप्नोति निंदितः १२८ शिष्टाचारमनिषिद्धमनुतिष्ठति तथा तथा जनैरनिंदित इहलोके उत्कृष्टः स्वर्गादिलोकं च प्रा ते १२७

शक्तेनापि हि शूद्रेण न कार्यो धनसंचयः शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते १२९ प्नोति १२८

णपोष्यवर्गसंवर्द्धनपंचयज्ञाद्युचितादधिकधनसंचयो न कर्तव्यः यस्मात् शूद्रो धनं प्राप्य शास्त्रानभिज्ञतया धनमदात् शुश्रूषाद्यकरणात् ब्राह्मणाने शक्तेनापीति धनार्जनसमर्थेनापि शूद्रे

एते चतुर्णां वर्णानामापद्धर्माः प्रकीर्तिताः यान्सम्यगनुतिष्ठंतो व्रजंति परमां गतिं १३० व पीडयति लघुत्वं स्यादनुवादः १२९

एत इति अमी चतुर्णां वर्णानामापत्सु धर्माः उक्ता यान् सम्यगाचरंतो विहितानुष्ठानात् निषिद्धाचरणाच्च निष्पापतया ब्रह्मज्ञानलाभेन परमां गतिं मोक्षलक्ष

एष धर्मविधिः कृत्स्नश्चातुर्वर्ण्यस्य कीर्तितः अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभं १३१॥ णां लभंते १३०॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां दशमोऽध्यायः १०॥

एष इति अयं चतुर्णां वर्णानामाचारः समग्रः कथितः अतः परं प्रायश्चित्तानुष्ठानं शुभमभिधास्यामि १३१ इति श्रीकुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यां दशमोऽध्यायः। १०॥

सांतानिकं यक्ष्यमाणमध्वगं सर्ववेदसं गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः १ नवैतान्स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान् निःस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः २॥

सांतानिकमिति नवैतानिति नन्वतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभमिति प्रायश्चित्तस्य वक्तव्यतया प्रतिज्ञातत्वात् सांतानिकादिभ्यो देयमित्यादेः कः प्रस्तावः उच्यते दानेनाकार्यकृतिः प्राणुक्तत्वात् दानेन वधनिर्णेकमपोहि नाम पापकं भवतीत्यादेश्च वक्ष्यमाणत्वात् प्रकृष्टप्रायश्चित्तात्मकदानपात्रोपन्यासः प्रकृतोपयुक्त एव व णाश्रमधर्मादि यतिरिक्तं प्रायश्चित्तादिनैमित्तिकधर्मकथनार्थं तावत् स्वाध्यायस्य प्रस्तावस्यापि नैमित्तिकधर्मस्यावोपन्यासोयुक्तः संतानप्रयोजनतया विवाहस्य संता निकं विवाहार्थिनं यक्ष्यमाणः ज्योतिष्टोमादियागचिकीर्षुः अध्वगः पांथः सर्ववेदसः कृतसर्वस्वदक्षिणाविश्वजिद्यागः विद्यागुरोर्ग्रासाच्छादनादिः अर्थः प याजने यस्य मनसर्वस्यः एवं पितृमात्रर्थं वा विद्यार्थी स्वाध्यायाध्ययनकाले नाच्छादनार्थी ब्रह्मचारी उपतापी रोगी एतान् नव ब्राह्मणान् धर्मभिक्षुकान् स्ना तकान् जानीयात् एतेभ्यो निःस्वेभ्यो गोहिरण्यादि इति दानं विद्याविशेषानुरूपेण दद्यात् २॥

159 A

एतेभ्यो हि द्विजाग्र्येभ्यो देयमन्नं सदक्षिणं इतरेभ्यो बहिर्वेदिकृतान्नं देयमुच्यते २ ॥

एतेभ्य इति एतेभ्यो नवभ्यो ब्राह्मणश्रेष्ठेभ्यो अंतर्वेदि सदक्षिणमन्नं दातव्यम् एतद्व्यतिरिक्तेभ्यः पुनः सिद्धान्नं बहिर्वेदि देयमनेनोपदिश्यते धनदाने न नियमः ३ ॥

सर्वरत्नानि राजा तु यथार्हं प्रतिपादयेत् ब्राह्मणान्वेदविदुषो यज्ञार्थं चैव दक्षिणां ४ ॥

सर्वेति राजा पुनः सर्वरत्नानि मुक्तादीनि यागोपयोगी वदक्षिणार्थं धनं विद्यानुरूपेण वेदविदो ब्राह्मणान् स्वीकारयेत् ४ ॥

कृतदारोऽपरान्दारान्भिक्षित्वा योऽधिगच्छति रतिमात्रं फलं तस्य द्रव्यदातुस्तु संततिः ५ कृतेति यः सभार्यः सन्नन्यस्यां स्त्रियां रतिमात्रं

तेषामपरान्दारान्भिक्षित्वा करोति तस्य रतिमात्रं फलं धनदातुः पुनस्तदुत्पन्नापत्यं संततिर्भवतीति विद्वानित्यायं तेनैव धनं याचित्वा न्स्त्रीविवाहः कर्तव्यः नान्येन विधा

धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत् वेदवित्सु विविक्तेषु प्रेत्य स्वर्गं समश्नुते ६ धनियमतो धनं देयमित्येवमस्यार्थः ५ ॥

धनानीति धनानि गोभूहिरण्यादीनि शक्त्यनतिक्रमेण ब्राह्मणेषु वेदज्ञेषु विविक्तेषु कलत्रादिष्वसक्तेषु प्रतिपादयेत् दृष्टा स्वर्गप्राप्तिर्भवतीति ६ ॥

यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये अधिकं वापि विद्येत स सोमं पातुमर्हति ७ यस्येति यस्य पोष्यवर्गपोषणार्थं वर्षत्रयपर्याप्तं

दधिकं वा भक्तादि स्यात् स काम्यसोमयागकर्तुमर्हति नित्यस्य पुनरधर्यस्य कथं विदस्यकर्तव्यत्वात् नायं निषेधः अतएव समानेन सोमयुके भवेति नित्यविषयमुक्तं

अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः सपीतसोमपूर्वोऽपि न तस्याप्नोति तत्फलं ८ ॥ अत इति त्रैवार्षिकधनादल्पतरे सति यः सोमयागं करोति तस्य प्रथमसोमयागो नित्योऽपि न संपन्नो भवति सुतरां द्वितीययागः काम्यः ८ ॥

शक्तः परजने दाता स्वजने दुःखजीविनि मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ९ शक्त इति यो बहुधनत्वाद्दानशक्तः सन्नवश्यम्भ

रणीयेषु मातापित्रादिज्ञातिजने दौर्गत्यात् दुःखेनैव जीवति यशोऽर्थमन्येभ्यो ददाति स तस्य दानविशेषो धर्मप्रतिरूपको न तु धर्म एव मध्वापातः सुखोपक्रमः अधर्मयापकत्वात्

भृत्यानामुपरोधेन यत्करोत्यौर्ध्वदेहिकं तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च १० ॥ विषास्वादश्चान्ते नरकफलत्वात् स्यादेतत् कुर्यै

भृत्यानामिति पुत्रदारादीनवश्यभर्तव्यान् पीडनेन यत्पारलौकिकधर्मं वृथा दानादिकं करोति तस्य दातुर्जीवतो मृतस्य च तद्दानं दुःखफलं भवति पूर्वं कीर्त्यादि दृष्टार्थं दानप्रतिषे

यज्ञश्चेत्प्रतिरुद्धः स्यादेकेनाङ्गेन यज्वनः ब्राह्मणस्य विशेषेण धार्मिके सति राजनि धः अकृदादानीमदृष्टार्थदानप्रतिषेधः १० ॥

यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः कुटुंबात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये ११ ॥

यज्ञश्चेति यो वैश्य इति त्रिभ्यादी यजमानस्य विशेषतो ब्राह्मणस्य यदि यज्ञ इतरांगसंपन्नो मध्यमेकेनांगेनासंपूर्णः स्यात् तदा गो बहुपशोर्बहुपश्चादिधनः पाकयज्ञादि

म॰ 160
अ॰ मे॰
१६०

यष्टृतो सोम यागे तस्य गृहादेतद्वित्तं द्रव्यं बलेन चौर्येण वाहरेत् एतच्च धर्मं श्रयाने सति राजनि कार्यं सहि धर्मस्यार्थमनुतिष्ठन्तं न निगृह्णाति ११ १२ ॥

आहरेत्त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः न हि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः १३ आहरेदिति यज्ञस्य द्वितयं गवैकस्य सति ता

नि त्रीणि चांगानि द्वे वांगे वैश्यादलाभे सति निर्विशंकं शूद्रस्य गृहात् बलेन चौर्येण वाहरेत् यस्माच्छूद्रस्य कश्चिदपि यज्ञसंबंधो नास्ति यज्ञार्थं च न शूद्राद्द्विजाभिर्देशेति व

योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः तयोरपि कुटुंबाभ्यामाहरेदविचारयन् १४ चनाण इति शेषः शूद्राद्याचनेन स्वेन बलेन गृहणादः
१३

यइति योऽनाहिताग्निः गोशतपरिमाणधनः आहिताग्निर्वा सोमयागी गोसहस्रपरिमितधनः द्वयोरपि गृहाभ्याम् प्रकृतमंगद्वयम् त्रयं वा पशौ छेमं पादयितुम् ब्राह्मणो

न द्वाभ्यामाहरणीयं ब्राह्मणक्षत्रियाभ्यामपि ब्राह्मणो ग्राहरेत् क्षत्रियस्य तु स्वदस्युक्रियावद्ब्राह्मणस्वहरणं निषेधयिष्यति १४ ॥

आदाननित्याच्चादातुराहरेदप्रयच्छतः तथा यशोऽस्य प्रथते धर्मश्चैव प्रवर्द्धते १५ आदानेति प्रतिग्रहादिना आदाने यत्न तस्य ब्राह्मणेति

संयस्मात्सो आदाननित्यः ब्राह्मणः तस्माद्विशिष्टदानरहितात् यज्ञांगद्रव्यं याचमानाय याचनायां कृतायां अददतो बलेन चौर्येण वाहरेत् तथा कृते अपहर्तुः ख्यातिः प्र
काशते धर्मश्च वृद्धिमेति १५ ॥

तथैव सप्तमे भक्ते भक्तानि षडनश्नता अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः १६ ॥

तथैवेति सायंप्रातर्भोजनोपदेशात् त्रिरात्रोपवासेन ततर्षेः हनिशातः सप्तमे भक्ते प्राप्ते यथानादिधर्मरहितादेकदिनपर्याप्तमर्थं चौर्यादिनाहर्तव्यम् १६ ॥

खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते आख्यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छति १७ खलादिति धान्यमर्दनस्थाना

त्क्षेत्राद्वा गृहाद्वा यतो ग्रस्यमस्मात्स्वदेशाद्धाधान्यं हीनकर्मसंबंधि लभ्यते ततो हर्तव्यं यदि चासौ धनस्वामी पृच्छति किं निमित्तं कृतमिति तत्तस्मै पृच्छते सति निमित्तं चौर्यादिकं
वाच्यम् १७

ब्राह्मणस्वं न हर्तव्यं क्षत्रियेण कदाचन दस्युनिष्क्रिययोस्तु स्वमजीवन्हर्तुमर्हति १८ ब्राह्मणेति उक्तेष्वपि निमित्तेषु क्षत्रियेण

ब्राह्मणस्य धनं ततोऽपकृष्टत्वात् न हर्तव्यं समानन्यायतया वैश्यशूद्राभ्याम् उत्कृष्टजातितो न हर्तव्यं इति त्रिरुद्धविहितानन्तुष्ठापिनोः पुनर्ब्राह्मणक्षत्रिययोः स्वमनाप
दि क्षत्रियो हर्तुमर्हति १८ ॥

योऽसाधुभ्योऽर्थमादाय साधुभ्यः संप्रयच्छति स कृत्वा प्लवमात्मानं संतारयति तावुभौ १९ ॥

योऽसाधुभ्य इति यो हीनकर्मादिभ्य उत्कृष्टेभ्यो विहितेष्वपि निमित्तेषु उक्तावरूपं यज्ञांगादिसिद्धयेऽर्थं गृहीत्वा साधुभ्य उत्कृष्टेभ्यो यज्ञनिष्ठादिभ्यो ददाति स पापस्यापहर्ता

तितत्तउभितेनाप्यायतियस्सचददाति तेदोषा गत्याभिघातादिभ्यो वहावप्लात्मा तमुद्धृत्यं कृत्वाडावुभावपि तारयति १९ ॥

यद्धनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः अयज्वनां तु यद्वित्तमासुरस्वं तदुच्यते २० यद्धनमिति यज्ञशीलानां यद्धनं तेन यागादेर्विनि

योगात् देवस्वं विद्वांसो मन्यंते यागादिशून्यानां तु यद्द्रव्यं तद्धर्मविनियोगाभावादासुरस्वमुच्यते अतस्तदपहर्तव्यं यागसम्पादनाद्देवस्वं कर्तव्यम् २० ॥

न तस्मिन्धारयेद्दण्डं धार्मिकः पृथिवीपतिः क्षत्रियस्य हि बालिश्याद्ब्राह्मणः सीदति क्षुधा २१ ॥

16DA

ननस्मिन्निति तस्मिन्नकृतिनिमित्ते चौर्यं वलात्कारं कुर्याणं धर्मप्रधानो राजा दंडेन कुर्यात् यस्माद्राज्ञो मूढत्वात् ब्राह्मणः क्षुधावसादं प्राप्नोति २१॥

तस्य भृत्यजनं ज्ञात्वा स्वकुटुंबान्महीपतिः श्रुतशीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत् २२॥

तस्य भृत्येति तस्य ब्राह्मणस्यावश्यभरणीयपुत्रादिवर्गं ज्ञात्वा श्रुत्वा चारौ च तदनुरूपां वृत्तिं स्वगृहात् राजा कल्पयेत् २२॥

कल्पयित्वास्य वृत्तिं च रक्षेदेनं समंततः राजा हि धर्मषट्भागं तस्मात्प्राप्नोति रक्षितात् २३॥

कल्पयित्वेति अस्य ब्राह्मणस्य जीविकां विधाय प्रभु चौरादेः सर्वतो रक्षेत् यस्मात् ब्राह्मणात् रक्षितात् तस्य धर्मषड्भागं प्राप्नोति २३॥

न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत कर्हिचित् यजमानो हि भिक्षित्वा चंडालः प्रेत्य जायते २४

ब्राह्मणः कदाचित् न शूद्रं याचेत् यस्मात् शूद्रं याचित्वा यज्ञं कुर्वाणो मृतश्चांडालो भवति श्रुतो याचनं निषेधात् शूद्रादयाचितोपस्थितं यज्ञार्थमिति यज्ञसिद्ध्यर्थं धनं ग्राह्यमविरुद्धम् २४

यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति स याति भासतां विप्रः काकतां वा शतं समाः २५

यज्ञार्थमिति यज्ञसिद्ध्यर्थं धनं याचित्वा यो यज्ञे सर्वं न नियुंक्ते स प्रापतं वर्षाणि भासत्वं काकत्वं वा प्राप्नोति २५॥

देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति २६

देवस्वमिति प्रतिमादिदेवतार्थं उत्सृष्टं धनं देवस्वं ब्राह्मणस्वं च यो लोभादपहरति स पापस्वभावो जन्मांतरे गृध्रोच्छिष्टेन जीवति २६॥

इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये कॢप्तानां पशुसोमानां निष्कृत्यर्थमसंभवे २७

रब्दपर्यये वर्षे पशुसोमादिश्रवणेषु तस्य वर्षांते वैश्वानरीं विहितामिष्टिं विहितपशुसोमयागासंभवे तदकरणदोषनिर्हरणार्थं इष्टिमिति समाप्ते वर्षे द्वितीयवर्षप्रवृत्ति मेवैश्वानरादिन उक्तं पञ्चग्रहणं रूपामिष्टिं कुर्यात् २७॥

आपत्कल्पेन यो धर्मं कुरुते नापदि द्विजः स नाप्नोति फलं तस्य परत्रेति विचारितं २८

आपदिति आपद्विहितेन विधिना यो नापदि धर्मानुष्ठानं द्विजः कुरुते तस्य तत्परलोके निष्फलं भवतीति मन्वादिभिर्विचारितम् २८॥

विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः आपत्सु मरणाद्भीतैर्विधेः प्रतिनिधिः कृतः २९

येश्च तथा महर्षिभिर्ब्राह्मणैर्मरणाद्भीतैरापत्सु मुख्यस्य विधेः सोमादेर्द्रव्यानर्यादिः प्रतिनिधिः सोमाद्यभावे कार्यः विश्वैरिति विश्वेदेवाख्यैर्देवैः सा नवश्यासंभवे २९॥

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते न सांपरायिकं तस्य दुर्मतेर्विद्यते फलं ३०

161

मं॰ श्रा॰ टी॰ १६१

प्रभुरिति यो मुख्ये ऽनुष्ठाने समर्थः सन् आपद्विहितेन प्रतिनिधिना अनुष्ठानं करोति तस्य दुर्बुद्धेः पारलौकिकं श्रेयः दयहृपं प्रत्यवायपरिहारफलं च न भवति आपत्कल्पेनेत्या
धर्ममभिप्रेत्य नैतत् क्रमप्राप्ततत् प्रासादृश्यार्थं पुनरुच्यते ३०॥

न ब्राह्मणो वेदयेत किंचिद्राजनि धर्मवित् स्ववीर्येणैव तान् शिष्यान्मानवानपकारिणः ३१

नेति धर्मज्ञो ब्राह्मणः किंचिदुपपन्नं तेन राज्ञः कथयेत् अपितु स्ववीर्येणैव वक्ष्यमाणाभिचारादिनापकारिणो मनुष्यान्निगृह्णीयात् तत्रापि कीयधर्मविरोधादिशक्तस्याप
राधकरणे स्वभिचारादिनदोषाय ऐव परमेतत् ते नाभिचारो विधीयते राजनि वेदनं वा निषिध्यते ३१॥

स्ववीर्याद्राजवीर्याच्च स्ववीर्यं बलवत्तरं तस्मात्स्वेनैव वीर्येण निगृह्णीयादरीन्द्विजः ३२

स्ववीर्यादिति यस्मात्स्वसामर्थ्याद्राजसामर्थ्याच्च पराधीनराजसामर्थ्यापेक्षया स्वसामर्थ्यमेव स्वाधीनत्वाद्बलीयः तस्मात्स्वेनैव वीर्येणैव शत्रून्ब्राह्मणो निगृह्णीयात्
३२

श्रुतीरथर्वाङ्गिरसीः कुर्यादित्यविचारयन् वाक्शस्त्रं वै ब्राह्मणस्य तेन हन्यादरीन्द्विजः ३३

तर्हि किं स्ववीर्यमित्याह श्रुतीरि
तिअथर्ववेदे अङ्गिरसी दृष्टाभिचारश्रुतीरविचारयन् कुर्यात् तदर्थमभिचारमनुतिष्ठेत् इत्यर्थः यस्मादभिचारमन्त्रोच्चारणात्मिका ब्राह्मणस्य वागेव शस्त्रं कार्यकरणात्
तेन ब्राह्मणः शत्रून्हन्यात् अत एव यानुनियमा
क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः ३४
मरासाध्याः ३३॥

क्षत्रिय इति क्षत्रियः स्वपौरुषेणायुधतः परिभवलक्षणामात्मनश्चापदं विस्तारयेत् वैश्यशूद्रौ पुनः प्रतिकर्तृधनदानेन ब्राह्मणस्त्वभिचारात्मकैर्जपहोमैः ३४॥

विधाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते तस्मै नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् ३५

विधानेति विहितकर्मणामनुष्ठा
ताप्रशिष्यादीनां शास्ता प्रायश्चित्तादिधर्माणां वक्ता सर्वभूतमैत्रीप्रधानो ब्राह्मण उच्यते तस्मै निगृह्यतामित्येवं प्रतिष्ठं न ब्रूयात् नापि परुषभावार्थे वाग्दण्डादिग्दण्ड
रूपां तस्योच्चारयेत् ३५

नैव कन्या न युवती नाल्पविद्यो न बालिशः होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा ३६

नैव इति कन्या अनूढा ऊढापि तरुणी तथा अल्पाध्यायी मूर्खो व्याध्यादिपीडिता अनुपनीताः श्रौतान्स्मार्तं वा तद्धोमानर्हुः होतव्य इति प्रसक्तावयं कन्यादीनां प्रतिषेधः ३६

नरके हि पतन्त्येते जुह्वतः स च यस्य तत् तस्माद्वैतानकुशलो होता स्याद्वेदपारगः ३७॥

नरक इति एते कन्यादयो
होमं कुर्वाणा नरकं गच्छन्ति यस्य तदग्निहोत्रं प्रतिनिधिरूपेण कुर्वन्ति सोपि नरकं गच्छति तस्मात् श्रौतकर्मप्रवीणः समस्तवेदाध्यायी होता कार्यः ३७॥

प्राजापत्यमदत्वाश्वमग्न्याधेयस्य दक्षिणां अनाहिताग्निर्भवति ब्राह्मणो विभवे सति ३८॥

161A

प्राजापत्यमिति आधाने प्रजापत्यमश्वं प्रजापतिदेवताकमश्वं यजमानेभ्यो ब्राह्मणो दक्षिणामदत्वा कृतेप्याधाने श्रद्धाहीनाग्निर्भवति श्राद्धानफलेन न युज्यते तस्मात्तथा नेच्छन्दक्षिणां दद्यात् ३९॥

पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथंचन ३९॥

पुण्यानीति श्रद्धावान्सञ्जितेन्द्रियः यज्ञव्यतिरिक्तानि तीर्थयात्रादीनि कर्माणि पुण्यानि कुर्वीत न तु यज्ञे स्वल्पदक्षिणानो स्वल्पदक्षिणैर्यजेत परोपकारार्थं नाल्पदक्षिणां यः स्वल्पेनाशक्तिमाविनाप्यसिद्धा विदेवच वै जेत ४०

इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून् हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो यजेत्।

इन्द्रियाणीति चक्षुरादीनीन्द्रियाणि जीवनः ख्यातिस्वयंयशः स्वर्गायुषी मृतस्य ख्याति रूपां कीर्तिं मपत्यानि पशूंश्चाल्पदक्षिणो यज्ञो नाशयति तस्मादल्पदक्षिणादानेन यागेन कुर्यात् ४१

अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत् ४२

अग्निहोत्रीति अग्निहोत्री ब्राह्मणः स्वेच्छातोऽग्नित्रयं प्रातर्होमानकृत्वा मासं चान्द्रायणं चरेत् यस्माद्वीरः पुत्रः तस्य हत्या हननं तत्तुल्यमेतत् तथा च श्रुतिः वीरहा वा एष देवानां भवति योऽग्निमुद्वासयते पुत्रमेव मासमपविध्यति समर्थयति ४२॥

ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः ४२ ये शूद्रादिति ये शूद्रादधिगम्यार्थं प्राप्य

मासमात्यभिधानेन याचनेन वा अर्थं ससीकृत्य वृषलाग्न्युपसेविनामिति वक्ष्यमाणलिङ्गादाधानपूर्वकमग्निहोत्रमनुतिष्ठन्ति ते शूद्राणामेव याजकाः न तु तेषां तत्फलं भवति यतस्ते वेदवादिषु निन्दिताः ४२

तेषां सततमज्ञानां वृषलाग्न्युपसेविनां पदा मस्तकमाक्रम्य दाता दुर्गाणि संतरेत् ४२॥

तेषामिति तेषां शूद्रधनाहिताग्निपरिचारिणां मूर्खाणां मूर्ध्नि पादं दत्वा दाता शूद्रः तेन दानेन सततं परलोके दुःखेभ्यो निस्तरति न तु यजमानानां फलं भवति ४२॥

अकुर्वन्विहितं कर्म निन्दितं च समाचरन् प्रसज्जंश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ४४॥

अकुर्वन्निति नित्यं यद्विहितं संध्योपासनादि नैमित्तिकं च श्रावणसर्पादौ स्नानादि तदकुर्वन् तथा प्रतिषिद्धं हिंसाद्यनुतिष्ठन् श्रुवद्विहितनिषिद्धेषु प्रसक्तिं कुर्वन् नरो मनुष्यजातिमात्रं प्रायश्चित्तमर्हति न विन्द्रियार्थेषु सेवेत प्रसज्येत कामत इति निषेधात् निन्दितपदेनैव प्रसक्तेन्द्रियार्थेष्वपि संगृहीते पुनः पृथक्करणं च कर्तव्य अत्यन्तातकत्वपाठानन्तरं तानीमानि धारणीयादिसत्कर्मामाय प्रतिषेधः किं तु व्रतविधिः तस्य कुर्वन् विहितकर्मसमानेनैव प्राप्तमन्त्रादि पृथक्करणं च कर्तव्यमिति च

अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ४५ सुस्नातकेन तद्विषये वाऽस्य सविषयत्वात् ४४

कामइति अबुद्धिकृते पापे प्रायश्चित्तं भवतीत्याहुः पण्डिताः एके पुनराचार्याः कामतः कृतेपापे प्रायश्चित्तं भवतीत्याहुः एतद्दृष्टयक कृत्याभिधाने प्रायश्चित्तस्यो रवार्थे प्रतिनिदर्शनादिति इन्द्रो यतीन् शालावृकेभ्यः प्रायच्छत् तमश्लीला वागभ्यवदत् स प्रजापतिमुपाधावत्तस्मा एतमुपहव्यं प्रायच्छदिति अस्यार्थः इन्द्रो यतीन् बुद्धिपूर्वं शालावृकेभ्यः श्वादिभ्यो दत्तवान् स प्रायश्चित्तार्थं प्रजापतिं समीपगमत् तस्मै प्रजापतिरुपहव्याख्यं कर्म प्रायश्चित्तं दत्तवान् अतः कामकारकृतेऽप्यस्ति प्रायश्चित्तम् ४५

म:
पु. म.
१६२

162

अकामतः कृतं पापं वेदाभ्यासेन शुध्यति कामतस्तु कृतं पापात्प्रायश्चित्तैः पृथग्विधैः ४६ अकामत इति अनिच्छाव-
कृतं पापं वेदाभ्यासेन शुध्यतीति मन्यन्ते वेदाभ्यासेनेति कामकृतविषयप्रायश्चित्तानां प्रदर्शनार्थं लघुप्रायश्चित्तोपलक्षणार्थं प्रायश्चित्तानां तु शानामपि विधानात् रागद्वे-
षादिव्याप्तेन तथापि बुद्धिपूर्वात्कृते नानाप्रकारैः प्रायश्चित्तैः विधायकत्वपाभिः शुध्यतीति शुद्धप्रायश्चित्तपरः श्रुतः सर्वोऽप्यस्य वाक्याकारः यद्यपि श्रुत्यकाः
विनिरूपणात्प्रकृतेप्रायश्चित्तनिमित्तं बहुधाऽतिनिपातज्ञानानां लघुप्रायश्चित्ताधिकारिणां गुरुप्रायश्चित्तेनाप्यधिक्रियन्त इति श्रुत्यधिकारिनिरूपणमेव

प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा न संसर्गं व्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः ४७ प्रायश्चित्तीयतामिति दैवात्प्रमादा-
देतज्जन्मनि कृतेन पूर्वजन्मार्जितदुष्कृतेन वा क्षयरोगादिभिः सूचितेन प्रायश्चित्तीयतां प्राप्य अकृते प्रायश्चित्ते साधुभिः सह यावज्जन्मासंसर्गं न गच्छेत् ४७॥

इह दुश्चरितैः केचित्केचित्पूर्वकृतैस्तथा प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम् ४८॥
इहेति इह जन्मनि निषिद्धाचरणैः केचित्पूर्वजन्मकृतैः दुष्कर्मभिरमनुष्याः कौनख्यादिकं रूपविपर्ययं प्राप्नुवन्तीति ४८॥

सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम् ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ४९ पिशुनः पौतिनासिक्यं सू-
चकः पूतिवक्त्रताम् धान्यचौरोऽङ्गहीनत्वमातिरैक्यं तु मिश्रकः ५० अन्नहर्तामयावित्वं मौक्यं वागपहारकः
वस्त्रापहारकः श्वैत्र्यं पङ्गुतामश्वहारकः एवं कर्मविशेषेण जायन्ते सद्विगर्हिताः जडमूकान्धबधिरा विकृताकृ-
तयस्तथा ५२॥

सुवर्णेति पिशुन इति अन्नहर्तेति एवं कर्मेति ब्राह्मणसुवर्णचौरः कुनखित्वं प्राप्नोतिनिषिद्धसुरापः श्यावदन्ततां ब्रह्महा क्षयरोगित्वं गुरुतल्पगो दुश्चर्मत्वं प्राप्नोति वि-
कारमूलहर्ता पिशुनो विद्यमानदोषाभिधायी दुर्गन्धनासत्वं अविद्यमानदोषाभिधायी दुर्गन्धमुखत्वं धान्यचौरोऽङ्गहीनत्वं प्राप्नोति मिश्रकः
नितिरिक्ताङ्गत्वं अन्नचौरो रोमदानलत्वं नत्रतानत्वाध्यायी मूकत्वं वस्त्रचौरः श्वित्रत्वं प्राप्नोति एवं दुहिवाक्कृत्यश्च विकलाविकृतरूपाः साधुविगर्हिताश्च प्राग्जन्मा-
र्जितापभुक्तदुष्कृतशेषेण जायन्ते ४९ ५० ५२

चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये निन्द्यैर्हि लक्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः ५३
चरितव्यमिति यस्मादनिष्कृतमनापितमेनो येषां निष्कृतैनसः अकृतप्रायश्चित्ताः परलोके पूर्वकृतदुष्कृतशेषेण निन्द्यैर्लक्षणैः कुनखित्वादिभिर्युक्ता जायन्ते तेन
स्मादिशुद्धये पापक्षयार्थं प्रायश्चित्तं सदा कर्तव्यं एवं च भिन्नेऽप्यहानीति वाक्ये निमित्तकमिव प्रायश्चित्तं विहितं तेन कृतेन नरकदुःखपरिहारो नान्यथा विशुद्धये च विनि-
ष्क्रमिश्रुपदेशात् पापक्षयार्थं नपुंसकाधिकारान् तथाहि प्रायश्चित्तं चरितव्यमिति विधावधिकारापेक्षायां फलाकाङ्क्षायां निर्देशात् रात्रिसत्रन्यायेन श्रुतमाणमे-
व विशुद्धये इति फलमधिकारिविशेषणं श्रुतमेवार्थं स्मरन्ति याज्ञवल्क्यः विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् अनिग्रहाच्चेन्द्रियाणां नरः पतन-
मृच्छति तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये एवमस्यात्मा याति प्रसन्नोऽन्तरात्मा विशुद्धये पापविनाशाय वहून्यधिगतानि नो यान्ति तत्काल प्राप्तानन्तरयातनः सं-

मायानप्रतिपद्यंतेमहापातकेनस्तिमानित्यादिनामहापातकादीनांनरकादिप्राप्तिंवदन्तिनतेननैमित्तिकमात्रेणप्रायश्चित्तानांसंबध्यतेतेनस्माद्वासवशाद्विनिर्णय

ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमः महांतिपातकान्याहुःसंसर्गश्चापितैःसह पद्यार्थिनप्रायश्चित्तविधिकारइतिनेय ५४
५४

ब्रह्महत्येति ब्राह्मणप्राणवियोगफलकोव्यापारोब्रह्महत्यासाक्षात्प्रत्यंवानियोज्यतथाहिशब्दएवमोग्रहणादितिमित्तकार्यकस्यापितद्देशेनब्राह्मणम्रा
णंब्रह्महत्यावलंबिकारस्यपीडनादनहारेणतथावध्यस्यापिहंतव्यप्रतीयतेनमपएवब्रह्महंतात्रतएवप्राणान्तपशोभूहिंशएवग्रहणेसीमबंधेकृतेऽपिवा
वमुद्दिश्यत्यजेत्प्राणान्समाहुर्ब्रह्मघातकम् एवंवाम्यान्यपिप्राप्तीयाएवंब्रह्मवधनिमित्तानिज्ञेयानितथापागतदेशात्सुमात्यहास्तनःपरतएववाब्रा
ह्मणंचानयेद्यस्तुतमाहुर्ब्रह्मघातकम् इतिप्रयोजकस्यापिहंतृत्वेप्राप्तीयंतथातथानिषिद्धसुरायाःपानेवाब्राह्मणसुवर्णहरणंगुरुभार्यागमनंगुरुरपि
तानिषेकादीनिकर्माणिसादिनातस्यगुरुत्वेनविधानात्पतेषुसहसंसर्गःसंवत्सरेणपततीतिवक्ष्यमाणप्रकारेणइत्येतानिमहापातकान्याहुः महापातकसं

अनृतंचसमुत्कर्षेराजगामिचपैशुनं गुरोश्चालीकनिर्बंधःसमानिब्रह्महत्यया ५५ तुल्यावसमानोपपातकादिसंतावलाघवा
र्थं ५५

अनृतमिति जात्युत्कर्षनिमित्तंउत्कर्षभाषणंयथाब्राह्मणोहमिति अब्राह्मणोब्रवीति राजनिवासेनादीनाम् परेषांक्षमा[illegible]लकंदोषाभिधानंगुरो
श्चानृताभिशंसनम् तथाचगौतमः गुरोरनृताभिशंसनमिति महापातकसमानीति एतानिब्रह्महत्यासमानीति ५५॥

ब्रह्मोज्झतावेदनिंदाकौटसाक्ष्यंसुहृद्वधः गर्हितानाद्ययोर्जग्धिःसुरापानसमानिषट् ५६

ब्रह्मोज्झतेति ब्राह्मणोऽधीतवेदस्यानभ्यासेनविस्मरणंब्रह्मोज्झतानास्तिक्येननवेदकुत्सनंसाक्षीमृषाभिधानंमित्रस्याब्राह्मणस्यवधःनिषिद्धस्यलशुनादे
र्भक्षणम् अन्नाद्यस्यपुरीषादेर्यदनं मेधातिथिस्तु नभोज्यंभोज्यंतदित्येकस्यपयदुच्यतेतदनाद्यमित्याचष्टे एतानिसुरापानसमानि ५६॥

निक्षेपस्यापहरणंनराश्वरजतस्यच भूमिवज्रमणीनांचरुक्मस्तेयसमंस्मृतं ५७॥

निक्षेपस्येति ब्राह्मणसुवर्णव्यतिरिक्तनिःक्षेपस्यहरणं तथामनुष्यतुरगरूप्यभूमिहीरकमणीनां हरणंसुवर्णस्तेयतुल्यम् ५७॥

रेतःसेकःस्वयोनीषुकुमारीष्वंत्यजासुच सख्युःपुत्रस्यचस्त्रीषुगुरुतल्पसमंविदुः ५८॥ रेतःसेकइति सोदर्याभगिनी
कुमारीअंत्यजाचंडालीसखिपुत्रभार्यासुयोरेतःसेकस्तंगुरुभार्यागमनसमानमाहुः एतेषांचैतेनसमीकरणंयेनयेनसमीकृतंतत्तस्यतदीयप्रायश्चित्तंपर्यन्तंकोऽस्मात्
सहृदयोःसुरापानसमीकृतयोर्ब्रह्महत्याप्रायश्चित्तमवइयति तद्धिकल्प्याप्यस्तुगुरोरलीककथनस्यब्रह्महत्यासमीकृतस्यपुनर्हत्यापरिहार
त्यप्रायश्चित्तनिर्देशःसमीकृतानांन्यूनप्रायश्चित्तंभवतीतिज्ञापनार्थंतथाचलोकेराजसमःसचिवइत्युक्तेसचिवस्यन्यूनतैवगम्यते अत्रोपदेशोक ब्रह्महा
प्रायश्चित्तेभ्यःप्राप्तिदेशिकप्रायश्चित्तानांन्यूनतंप्रायश्चित्तंसमीकृतानांच ५८॥

163 A

मा॰
मा॰ से॰
१६६

गोवधोऽयाज्यसंयाज्यपारदार्यात्मविक्रयाः गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च ५९ परिवित्तिता
नुजेऽनूढे परिवेदनमेव च तयोर्दानं च कन्यायास्तयोरेव च याजनं ६० कन्याया दूषणं चैव वार्द्धुष्यं व्रतलोप
नं तडागारामदाराणामपत्यस्य च विक्रयः ६१ व्रात्यता बांधवत्यागो भृताध्यापनमेव च भृताच्चाध्ययना
दानमपण्यानां च विक्रयः ६२ सर्वाकरेष्वधीकारो महायंत्रप्रवर्तनं हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूल
कर्म च ६३ इंधनार्थमशुष्काणां द्रुमाणामवपातनं आत्मार्थं च क्रियारंभो निंदितान्नादनं तथा ६४ अ
नाहिताग्निता स्तेयमृणानामनपक्रिया असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया ६५ धान्यकुप्य
पशुस्तेयं मद्यपस्त्रीनिषेवणं स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकं ६६ ॥

इदानीमुपपातकान्याह गोवधेत्यादि परिवित्तितेति कन्याया इति व्रात्यतेति सर्वेति इंधनार्थमिति अनाहितेति धान्येति गोहननं जातिकर्मदुष्टानां याजनं
परपत्नीगमनं आत्मविक्रयः मातृपितृगुरूणां च शुश्रूषाऽकरणं वेदाग्न्योर्यस्त्यागः न वेदविस्मरणं ब्रह्मोज्झितेत्यनेनोक्तत्वात् सुतस्य च स्मार्ताग्नेस्त्यागः
श्रौतानामग्निहोत्रापविद्धाग्नीत्युक्तत्वात् सुतस्य च संस्काराभरणाद्यकरणं कनीयसा भ्रात्रा दारविवाहे कृते ज्येष्ठस्य परिवित्तिता दाराग्निहोत्रसंयोग इत्यादि
नाभिहितकनिष्ठस्य परिवेदनं तयोश्च कन्यायादानं तयोरेव विवाहहोमादियागेष्वार्त्विज्यं कन्याया मैथुनवर्जमंगुलीप्रक्षेपादिना दूषणं रेतःसेकपर्यं
तमैथुने तु रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च इत्युक्तत्वात् प्रतिषिद्धवृद्धिजीवित्वं ब्रह्मचारिणो मैथुनं तडागोद्यानभार्यापत्यानां विक्रयः यथाका
लमनुपनयनेन व्रात्यता तथा चोक्तम् अत ऊर्ध्वं त्रयोप्येते यथाकालमसंस्कृता इति बांधवानां पितृव्यादीनामननुवृत्तिः प्रतिनियतवेतनग्रहणपूर्व
कमध्यापनम् प्रतिनियतवेतनप्रदानपूर्वकमध्यापनेन च अविक्रय्यादीनां तिलादीनां विक्रयः स्ववर्णोत्पत्तिस्थानेषु राजाज्ञयाधिकारः सेतुजल
प्रवाहप्रतिबंधहेतूनां सेतुबंधादीनां प्रवर्तनं औषधीनां जातिमाषादीनां हिंसनं पतितत्वात् सर्वकाभ्यासहिंसायाः प्रायश्चित्तगौरवात् यत्र स्त्रीभृत्वा जा
तौषधीनामभिं इत्यादिना वदति तन्मतेन हिंसायाः प्रायश्चित्तलाघवात् भार्यादिस्त्रीणां वेश्यात्वं कृत्वा तदुपजीवनं श्येनेनाभियज्ञेनानपराधस्य मारणम
मंत्रौषध्यादिना वशीकरणं पाकादि दृष्टप्रयोजनार्थमात्रमेव वृक्षच्छेदने अन्नानारंभस्य देवपित्राद्युद्देशमंतरेण पाकाद्युद्यमे निंदितान्नस्य लशुनादेः भक्षणं
निच्छया मद्यानां इच्छापूर्वकाभ्यासवदनानां पुनर्गर्हितानाद्ययोजिगीषितत्युक्तत्वात् सत्यधिकारे अग्न्यनादानं स्ववर्णादन्यस्य सारद्रव्यस्यापहरणं ऋणानां
देवत्रिभिः ऋणैः ऋणवान् जायते इति श्रुतेः ऋणानामनपकरणं श्रुतिस्मृतिविरुद्धशास्त्राधिगमनं नृत्यगीतवादित्राद्युपसेवनं तथान्यस्य ताम्रलोहादेः पशूनां चैवा
पहरणं स्त्रीशूद्रवैश्यक्षत्रियहनने परलोकाद्यर्थकर्माभावबुद्धिः तस्मादेकमुपपातकं बांधवत्याग इत्यनेनैव मातापित्रादीनां त्याग
यैर्द्विजातीनामपीतमद्यायाः स्त्रिया गमने प्रायश्चित्तं भवति किंतु माषादिना प्रायश्चित्तान्तरमेव भवति ५९ ६० ६१ ६२ ६३ ६४ ६६
ग्रामाभ्याश्रयवचनेन निंदार्थमपि तत्त्वाधिवाय वत्पागेनावधूपमेव प्रायश्चित्तं भवति

ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः जैह्म्यं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतं ६७ ब्राह्मणस्येति ब्राह्मणस्य दंडादेः

163A

न्त्रादिना पीडोत्पादनमघ्रेयस्य दुर्गन्धतया लशुनपुरीषादेस्तस्य मद्यस्य घ्राणं कुटिलत्वं वक्रता पुंसि वगुदादौ च मैथुनं इत्येतत्प्रत्येकं जातिभ्रंश...न्ते ६७

खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च ६८ ॥

खरेति गर्दभतुरगोष्ट्रमृगहस्तिछागमेषमत्स्यसर्पमहिषाणां प्रत्येकं वधः संकरीकरणं ज्ञेयम् ६८

निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं ६९ ॥

निंदितेभ्य इति अप्रतिग्राह्येभ्यः प्रतिग्रहो वाणिज्यं शूद्रस्य परिचर्या अनृताभिधानं इत्येतत्प्रत्येकमपात्रीकरणं ज्ञेयम् ६९ ॥

कृमिकीटवयोहत्या मद्यानुगतभोजनं फलैधःकुसुमस्तेयमधैर्यं च मलावहं ७०

कृमीति कृमयः क्षुद्रजन्तवः तेभ्य ईषत्स्थूलाः कीटाः तेषां वयः पक्षिणां च वधः मद्यानुगतं यद्द्रव्यमपि पात्राद्येकपेटकादौ कृतं मद्येन सहानीतं तस्य भोजनं मद्यानुगतमद्यस्पृष्टमाह तन्नत्वप्रायश्चित्तगौरवात् फलकाष्ठपुष्पाणां चौर्यं स्वल्पेऽपि च धैर्याभावः इत्येतत्सर्वं प्रत्येकं मलिनीकरणं ७०

एतान्येनांसि सर्वाणि यथोक्तानि पृथक्पृथक् यैर्यैर्व्रतैरपोह्यन्ते तानि सम्यङ्निबोधत ७१ ॥

एतानीति एतानि ब्रह्महत्यादीनि सर्वाणि पापानि भेदेन यथोक्तानि यैर्यैर्व्रतैः प्रायश्चित्तरूपैर्नश्यन्ते तानि यथावत् शृणुत ७१ ॥

ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत् भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरो ध्वजं ७२ ॥

ब्रह्महेति चौब्राह्मणं हत्वा वने कुटीं कृत्वा हतस्य शिरःकपालं तदभावेऽन्यस्यापि शिरःकपालं ध्वजं कृत्वा भैक्षाशी आत्मनः पापनिर्हरणाय द्वादश वर्षाणि वसेत्। अत्रेदं ध्येयं यद्यपि कृत्वा वने इति वसेदिति वदति शुमतमस्य अपि विशेषा ग्रामान्ते तथा च यमः सप्तागाराणि पूर्वाणि याचेत् अकल्पितानि च सविशेषानि। स्नानके विधि मेधकृतवने भ्रूणघ्ने देहि मभिदामनो विद्याण्यं संचरेत् एककालं चरेद्भैक्षं तद्दूलब्धोदकं पिबेत् अयं च द्वादशवार्षिक विधिः ब्राह्मणस्याज्ञानतः ब्रह्मणवधे इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजमिति वक्ष्यमाणत्वात् क्षत्रियवैश्यशूद्राणां तु कामतो द्वादशवार्षिकं द्विगुणं त्रिगुणं चतुर्गुणं वक्ष्यति यथोक्तं भविष्यपुराणे द्विगुणं क्षत्रियाणां तु वैश्यानां त्रिगुणं स्मृतं चतुर्गुणं तु शूद्राणां पर्षदुक्तं महात्मना पर्षदुक्तं व्रतं प्रोक्तं शुद्धये पापकर्मणां यावद्विप्रो ब्राह्मणानां समभावतो द्विगुणः क्षत्रियः क्षत्रियाणां ब्रह्मवधादर्शनात् यथा समभावेन त्रिगुणो वैश्यः वैश्यानां वत्रिभिः शूद्रः शूद्राणामिति समभावात् क्षत्रियादीनां स्वजात्यां वधमपि द्विगुणत्रिगुणचतुर्गुणमिति यः एतानि च मनूक्तवधप्रायश्चित्तवचनानि गुणवत्कृतनिर्गुणब्राह्मणहनन विषयत्वेन भविष्यपुराणव्याख्यातानि हन्तुश्च तत्तु गुणवान् अन्यथा मारितगुणहतः कर्तव्यानि मनूक्तानि नैवैश्वा सामर्थिके ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेदिति देवभूषणा विप्रकामानिर्गुणो हते जातिशक्ति गुणापेक्षं सकृदुहिकृतं तथा च वधादि विज्ञाय प्रायश्चित्तं प्रकल्पयेदिति विषामि च वचनात् प्रायश्चित्तानि कल्प्यमूहनीयं कामं।

म॰
शु॰ मे॰
१६४

हत्वे[...]ब्राह्मणं वधेद्विगुणं ब्रह्मवधप्रायश्चित्तं चरेद्विंशतिवर्षं तदाह गिराः अकामतः कृते पापे प्रायश्चित्तं न कामतः स्यात्कामकृतेयन्नद्विगुणं वृद्धिपूर्वं

लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः १३ के॰ १२

लक्ष्यमिति यत्रः शस्त्रधारा यथा शिरः गोप्तुमानानो ब्रह्मवधपापक्षयार्थमयं लक्ष्मीभूतः स्वेच्छया ताडितो वा लक्ष्मीभूतो वा वतिष्ठेत यावन्मृतोऽमृतक स्वा विशुद्धेन दाद्य वल्क्यः मृत्यो वा हतः लक्ष्मीभूतः शुद्धिमवाप्नुयात् मृतकल्पः प्रहारार्त्तो जीवन्नपि विशुद्ध्यति अग्नौ प्रदीप्ते वा अधोमुख न वाराष्ट्र प्ररक्षिपेत् तथा प्राप्तेनप्राप्निये तस्यापि स्तव वचनात् एवं प्रक्षिपेत् एतत्प्रायश्चित्तत्रयमनन्तरं वक्ष्यमाणं च यजेत वाश्वमेधेनेति प्रायश्चित्तत्रयमिदं कामतः क्षत्रियस्य ब्राह्मणवधविषयं मन्वङ्गाकमेव लिखितान्तथा व्याख्यातं भविष्यपुराणे लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः यजेत वाश्वमेधेन क्षत्रियो विश्वजित्कः प्रायश्चित्तत्रयमेतत्क्षत्रियस्य प्रकीर्तितं क्षत्रियो विदुषो वीरः ब्राह्मणं वेदपारगं निहत्य कामतो वीर लक्ष्यः शस्त्रभृतो भवेत् चतुर्वेदविदश्चैव ब्राह्मणं चाग्निहोत्रिकं निहत्य कामादात्मानं दीप्ये दग्नाववाक्छिरः निर्गुणं ब्राह्मणं हत्वा कामतो गुणवान्नृपः यजेत वाश्वमेधेन क्षत्रियो यो महीपतिः १३

यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा १४ ॥

यजेतेति यजेत वाश्वमेधेनेति एवं तेषां व्याख्यातं स्वर्जिता यागविशेषेण गोसवेन वा अभिजिता वा विश्वजिता वा त्रिवृता अग्निष्टुता वा एषु यजेत [...] वा ज्ञाने तीव्रस्य वधे प्रायश्चित्तानि त्रैवर्णिकस्य विकल्पितानि तदुक्तं भविष्यपुराणे स्वर्जितादिक्रियहीरकर्मणा तत्रापि [...] स्रष्टा नेद्विजातीनां वयस्समति पूर्वके १४ ॥

जपन्वान्यतमं वेदं योजनानां शतं व्रजेत् ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रियः १५

जपन्निति वेदानां मध्यादेकं वेदं जपन्स्वल्पाहारः संयतेन्द्रियो ब्रह्महत्यापापनिर्हरणाय योजनानां शतं गच्छेत् एतदप्यत्रानकृते जातिमात्रब्राह्मणवधे त्रैवर्णिकस्य प्रायश्चित्तं तथा च भविष्यपुराणे अयमेव श्लोकः पठितो व्याख्यातश्च जातिमात्रं यदा विप्रं हन्यादमतिपूर्वकम् वेदविद्वाग्निहोत्री च तदा तस्य भवेदिदम् १५ ॥

सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत् धनं वा जीवनायालं गृहं वा सपरिच्छदं १६ ॥

सर्वस्वमिति सर्वस्वं वा वेदविदे ब्राह्मणाय दद्यात् यावद्धनं जीवनाय समर्थं गृहं वा गृहोपयोगि यत्तया स्यादित्युक्तं अतः सर्वस्वं वा गृहं सपरिच्छदं दद्यात् जीवनायालमिति वचनात् जीवनपर्याप्तं सर्वं स गृहं वा दद्यात् न ततोऽल्पमेतच्चाज्ञानतो जातिमात्रब्राह्मणवधे ब्राह्मणस्य प्रायश्चित्तं तथा च भविष्यपुराणे जातिमात्रं यदा हन्यात्तं ब्राह्मणं ब्राह्मणो गृह वदाभ्यामविहीनोऽस्येनवा नाग्निवर्जितः प्रायश्चित्तं तदा [...] दद्यात् धनं वा जीवनायालं गृहं वा सपरिच्छदम् १६

हविष्यभुग्वानुसरेत्प्रतिस्रोतः सरस्वतीं जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम् ११ ॥

हविष्येति नियताहारो हविष्यान्नभोजी विद्वान्[...]सरस्वत्याः प्रतिस्रोतः प्रतिसरस्वतीं यायात् एतच्च जातिमात्रब्राह्मणवधे ज्ञानपूर्वके ब्राह्मण

164A

यत्तथा च भविष्यपुराणे ज्ञातिमात्रे हते विप्रे देवे द्रुमवि पूर्वके हन्ता यदा वेददृष्टीनाधनेन च भवेदह तदेतत् कस्य एव म स्य प्रायश्चित्तं निबोध मे इति विष्णुरुक्तवेदा विशुद्धिः शातः सर्वश्चेतां शृणु वा परिमिताहारः स्त्रीनु वासनेन वेष्टु महितानजे पुनः सहितायहाप्रान्ते पटक्रमसुदासः अत्रापि भविष्यपुराणीयो विशेषो ज्ञातिमात्रे तत्र पो हन्यात विप्रस्य मति पूर्वकं ब्राह्मणान्तगुणवान्तं देहपरिकल्पयेत् जपहाविद्यताहारा। निर्वेदस्य महिता सन्दोयज्ञं विषमानिर्वे विषात्र्यसि नम् ७७

कृतवापनो निवसेद् ग्रामान्ते गोव्रजेऽपि वा आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः ७८ कृतेति इदानीं समाप्ते द्वादशे वर्षे इह पस्थाना तद्वादशवार्षिकस्य विशेषो माह लूनकेशानां वा स्मश्रु गोब्राह्मणहिते रतः गोब्राह्मणोपकारान्तं कुर्वन् ग्रामसमीपे गोष्ठ पुण्यदेशा वृक्षमूलाश्रमे निवसेद् इति अनेन ऊर्ध्वीकृतेनास्य विकल्पार्थम् इद ७८

ब्राह्मणार्थे गवार्थे वा सम्यक् प्राणान् परित्यजन् मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च ७९

ब्राह्मणार्थ इति प्रोक्तं तद्वादशवार्षिकेऽन्तराऽप्युदकेऽग्निसकाशात् ब्राह्मणस्य गोर्वा परित्राणार्थं प्राणान् परित्यजन् ब्रह्महत्याया मुच्यते गोब्राह्मणं वा ततः परित्रायामतोऽपि असमाप्ते द्वादशवर्षेऽपि मुच्यते ७९॥

त्रिवारं प्रतिरोद्धा वा सर्वस्वमवजित्य वा विप्रस्य तन्निमित्ते वा प्राणालाभे विमुच्यते ८०॥

त्रिवारमिति स्तेनादिभिर्ब्राह्मणसर्वस्वे अपह्रियमाणे न दानुयनार्थेति वीजं यथाशक्ति प्रयत्नं कुर्वन् तत्र त्रिवारान् युद्धे प्रवर्तमानो स्मानीतेऽपि सर्वस्वे ब्रह्महत्या पापान्मुच्यते त्रयवा प्रथमवारेऽपि विप्रसर्वस्वे सहवापहते विजित्वा प्रत्यर्पयति तथापि मुच्यते यद्वा धनापहारक स्तेनान्निर्ब्राह्मणो युद्धेन मरणे प्रवर्तितेन तदाय क्षपणे न मरणे तेन जीवयति तदापि निमित्तेनाप्राणलाभे ब्रह्महत्यापापान्मुच्यते एतदितरप्रकारान्तरेणान्तरदानेन गोमागोब्राह्मणस्य वेतस्य मध्ये न हि किं

एवं दृढव्रतो नित्यं ब्रह्मचारी समाहितः समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति ८१॥ एवमिति एवमुक्तप्रकारेण सर्वदा नियमपूर्वहितः स्त्रीसंयोगादिशून्यो मेयतमनाः समाप्ते द्वादशे वर्षे ब्रह्महत्यापापं नाशयति एवं ब्राह्मणार्थं इत्यादिभिः प्रकारान्तरं द्वादशवार्षिकस्य वोहव्य ८१

शिष्ट्वा वा भूमिदेवानां नरदेवसमागमे स्वमेनोऽवभृथस्नातो हयमेधे विमुच्यते ८२ शिष्ट्वेति अश्वमेधे ब्राह्मणानां भूमिजा क्षत्रियस्य यजमानस्य समागमे ब्रह्महत्यापापं शिष्ट्वा निवेद्य अवभृथस्नातो ब्रह्महत्यापापान्मुच्यते द्वादशवार्षिकस्यापवादः तत्तत्र एतेनमेवेदं प्रायश्चित्तं तथा भविष्यपुराणे यदा तु गुणवान् विप्रो हन्यात् विप्रं तु निर्गुणम् अकामतस्तदा गच्छेत् स्नानं चैवाश्वमेधिकम् सोऽविदग्राजसत्तुश्चमेधविवा जितसकलप्रायश्चित्तशोषणार्थस्य प्रकीन्तद्वादशवार्षिकप्रायश्चित्तस्यान्तराऽवभृथस्नानेनैव शुद्धिरिमाह तत्र शक्तभविष्यपुराणवचनविरोधात् ८२

धर्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते तस्मात्समागमे तेषामेनो विख्याप्य शुद्ध्यति ८३॥

धर्मेति यतः ब्राह्मणो धर्मस्य कारणं ब्राह्मणेन धर्मोपदेशो कृते धर्मानुष्ठानात् राजस्थानस्याग्रमग्रं तं मन्वादिभिरुच्यते तस्माद् ब्राह्मणक्षत्रियाभ्याम्

165

मा। ध। से। १६५

निवेद्यावश्यं तस्मात्ताः शुध्यन्तीति ग्र–थमेव दोषः ८३॥

सम्मूलार्थमेतत्कृतनिष्कृतेः तस्मात्तेषां समागमेऽवश्यमेवेयापम्

ब्राह्मणः सम्भवेनैव देवानामपि दैवतं प्रमाणं चैव लोकस्य ब्रह्मात्रैव हि कारणम् ८४

ब्राह्मण इति ब्राह्मण उत्पत्तिमात्रेणैव देवानामपि पूज्यः मनुष्याणां लोकस्य च सत्यत्वे प्रमाणं तदुपदेशस्य प्रामाण्यात् यस्मात्तत्र वेद एव कारणं वेदमूलकत्वादुपदेशस्य किं पुनः श्रुतादिभिर्देवानामपि पूज्यास्तत्र

तेषां वेदविदो ब्रूयुस्त्रयोऽप्येनः सुनिष्कृतिं सा तेषां पावनाय स्यात्पवित्रा विदुषां हि वाक् ८५

यत्पापनिर्हरणाय प्रायश्चित्तं ब्रूयुः तत्पापिनां विशुद्धये भवति यस्मात् यत एवमतः तेषामिति तेषां विदुषां ब्राह्मणानां मध्ये वेदज्ञास्त्रयोऽपि किमुताधिकाः यत्पापनिर्हरणाय प्रायश्चित्तं ब्रूयुः तत्पापिनां विशुद्धये भवति यस्मात् विदुषां वाक् पवित्रा अर्थविदुषामपि परिषदवश्यं कार्या रहस्यप्रायश्चित्तेषु नेत्याम्नायविरोधात् ८५॥

अतोऽन्यतममास्थाय विधिं विप्रः समाहितः ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवत्तया ८६

अत इति अस्मात्प्रायश्चित्तगणादन्यतमं प्रायश्चित्तविधानमनुष्ठाय कृतब्रह्महत्यादिप्रायश्चित्तविधानेन ब्रह्महत्याकृतं पापं व्यपोहति आत्मवत्तया समाहितः प्रायश्चित्तं ब्राह्मणादिः संयतमना आश्रित्य प्रशस्तया ब्रह्महत्याकृतं पापमपनुदति ... प्रायश्चित्तं बहुमाहात्म्यं ... ब्राह्मणहन्तुः ... विषयः ब्राह्मणवर्तनीयं ... गृहस्थाश्रमे ... ब्राह्मणाद्यपेक्षया ... कामतो ब्राह्मणवधे ... धर्मिकाद्यस्मादिति ... विधायकं वेदवचनं वा हत्वा ८६॥

ब्राह्मणीं वा ब्राह्मणत्वावहमनुगुणमस्य गर्भहीरपके प्राणातिकं चरेत् ... विधिः प्राथमिकाद्यस्मादिति ... विधायकं वेदवचनं वाहत्वाम ८८॥

हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् राजन्यवैश्यौ चेजानावात्रेयीमेव च स्त्रियं ८७

हत्वेति प्रकृतत्वाद्ब्राह्मणगर्भविषयं स्त्रीपुंनपुंसकत्वेनाविज्ञातं ... इत्यात्रेयीं च ... ब्राह्मणीमिति यमस्मरणात् ... प्रायश्चित्तं कुर्यात् ... आत्रेयीं च ब्राह्मणीमितियमस्मरणात् ... विधेयं ... आत्रेयी ... ब्राह्मणी ... वसिष्ठस्मरणात् ... ब्राह्मणस्य हत्वा पत्नीमनिन्दितां ब्रह्महत्याव्रतं कुर्यात् आत्रेयीं ... भार्यां विषये तथा ... ब्रह्मघ्नवच ८७॥

उक्त्वा चैवानृतं साक्ष्ये प्रतिरुध्य गुरुं तथा अपहृत्य च निःक्षेपं कृत्वा च स्त्रीसुहृद्वधं ८८॥

उक्त्वेति ... साक्ष्ये ... निक्षेपं ... ब्राह्मणस्वर्णादन्यत् ... स्त्रियाः सुहृदश्च वधं कृत्वा ... प्रायश्चित्तं कुर्यात् ८८

इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजं कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ८९॥

ब्राह्मणवधे ... अभिहितं कामतस्तु ब्राह्मणवधे निष्कृतिः नेतत्प्रायश्चित्तं किं त्वतो द्विगुणम् इति ... विरोधात् ८९॥

इयमिति एतत्प्रायश्चित्तं विशेषोपदेशाभावे रणकामतो ... कामतस्तु कृतमहापातकप्रायश्चित्तं ... प्रायश्चित्ताभावार्थं ... दिकरणात्मकं ... प्रायश्चित्तगौरवार्थं ...

165 P

सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः ९०

सुरामिति सुराशब्दः पैष्टीमात्रे मुख्यो न तु गौडीमाध्व्योः पैष्ट्यामुचितत्वात् गौणे क्लृप्त्यभावात् एतेन पक्षशक्तिकल्पेन प्राक्तिरयकसत्तागोरवप्रसंगात् गौण्यादिसदि सगुणा त्वत्पापस्य तथा वृषवो सोपपन्नः यतएव भविष्यपुराणे सुरा वै पैष्टीमुख्योक्ता न तु सामस्तिते समे पैष्ट्याः पानेन तद्वेता प्रायश्चित्तं तद्विषयमेव तेनास्य सम्बन्धः सामास्यास्ययोमतः एतां मामिति निर्देशेन पैष्टी एतां मां गौडीमाध्वीपैष्टीनां प्रकृतानां मध्ये पैष्टीपानमत्रकं प्रायश्चित्तं सुरां पीत्वा द्विजो मोहादिति सत्यं मुख्यांसुरा पैष्टी तां मोहादज्ञानाद् ब्राह्मणः क्षत्रियो वैश्यश्च पीत्वा अग्निवर्णां सुरां पिबेत्तया सुरया शरीरे निर्दग्धे मृत्यौ ततः पापान्मुच्यते एतच्च गुरुत्वात्का मकारकृतसुरापानविषयं तथा च बृहस्पतिः सुरापाने कामकृते ज्वलन्तीं तां विनिक्षिपेत् मुखे तया स निर्दग्धो मृतः शुद्धिमवाप्नुयात् ९० ॥

गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा पयो घृतं वा मरणाद्गोशकृद्रसमेव वा ९१ ॥

गोमूत्रमिति गोमूत्रजलगोक्षीरगवाज्यगोमयरसानामन्यतमम् अग्निस्पर्शं कृत्वा यावत् मरणं पिबेत् ९२ ॥

कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजी ९३ कणानिति सुराध्वजो रोमादि कृतवासा जटावान् सुरा‸पानचिह्नध्वजवान् तण्डुलावयवान् शाकपिण्याकं तिलकल्कं वा रात्रावेकवारं संवत्सरं यावत् सुरापानपापनाशार्थं भक्षयेत् एतच्च बुद्धिपूर्वकं सुरापानविषयं अन्यथा तत्र मरणान्तिकं लघुत्वात् ९३

सुरा वै मलमन्नानां पाप्मा च मलमुच्यते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ९३

सुरेति यस्मात्तण्डुलपिष्टसाध्यत्वात् सुरा अन्नमलं मलशब्देन च पापमुच्यते तस्मात् ब्राह्मणक्षत्रियवैश्याः पैष्टीं सुरां न पिबेयुः इत्येतेन प्रतिषेधेन पतनादि कामसुरापीनां प्रायश्चित्तविधानात् अन्नमलार्थवादाच्च पैष्टीनिषेधपरमस्फुटं त्रैवर्णिकस्य मनुनेवोक्तः ९३ ॥

गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ९४

गौडीति गुडेन कृता गौडी पूर्वं पिष्टेन कृता पैष्टी मधुकपुष्पैर्मधुः तत्सम्बन्धिकृता माध्वी एवं त्रिः प्रकारा सुरा ज्ञातव्येति सुरा इति समाम्नायते एतेषु पेय याब्राह्मणस्य गौडीमाध्वीप्रायश्चित्तं गौरवार्थं यथैवैका पैष्टी मुख्या सुरा सर्वा वाक्यनिषिद्धा न त्रैवर्णिकस्य पेया तथा सर्वा गौडीमाध्वी च द्विजोत्तमेन न पातव्या ९४

यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम् तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः ९५ ॥

यक्षेति मद्यं नवविधं पैष्टीगौडीमाध्वीव्यतिरिक्तं नवविधं बोद्धव्यं तदाह पुलस्त्यः पानसद्राक्षमाधूकं खार्जूरं तालमैक्षवम् माध्वीकं टाङ्कमाध्वीकमैरेयं नारि केलजं सामान्यानि द्विजातीनां मद्यान्येकादशैव च द्वादशं तु सुरा मद्यं सर्वेषामधमं स्मृतं मांसं च प्रतिषिद्धं सुरा च पिष्टकारा शर्करा आसूयत इति आसवो मद्या नामवस्थाविशेषः सद्यः कृतसमायतः अस्वातमद्यभावः यस्मिन् कृते सद्यः पुलस्त्योक्तप्रायश्चित्तम् द्राक्षातट्‌क‸वर्जयन्सादेश्चयोरसः सद्योजातकपीता तस्माद्ब्राह्मणो द्विजोत्तमः एवं मद्यादिवर्जनीयं यक्षरक्षःपिशाचभक्ष्यत्वात् ब्राह्मणेन देवानां हविर्भक्षयता नाशितव्यं निषिद्धायाः सुरायाः ‸ नादानम् यक्ष

166

मा॰
तु॰ से॰
१६६

रतः शुक्लं चोन्नतयानिं द्वार्यम् अत्र केचित् देवानामप्युक्ता हविरिति पुंलिंगनिर्देशात् ब्राह्मणस्य पुंस एव मद्यप्रतिषेधो न स्त्रिया इत्याहुः तदसत् पतिलोकं न सा
याति ब्राह्मणी या सुरां पिबेत् इहैव सा शुनी गृध्री सूकरी चोपजायते इति याज्ञवल्क्यादिस्मृतिविरोधात् ९५ ॥

अमेध्ये वा पतेन्मत्तो वैदिकं वाप्युदाहरेत् अकार्यमन्यत्कुर्याद्वा ब्राह्मणो मदमोहितः ९६

अमेध्य इति ब्राह्मणो मद्यपानमदमत्तबुद्धिः सन् अशुचौ वा पतेत् वेदवाक्यं वाप्युच्चारयेत् ब्रह्महत्यादि कार्यं वा कुर्यात् अत तस्मान्मद्यपानं न कार्यमिति पूर्वस्यैवानुवादः ९६

यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत् तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं च स गच्छति ९७ यस्येति यस्य ब्राह्मणस्य कायगतं ब्रह्म वेदः संस्काररूपेणावस्थितः एकदेहत्वात् एकवारमपि मद्येनाप्लाव्यते तथा एकवारमपि यो ब्राह्मणो मद्यं पिबति तस्य ब्राह्मण्यं व्यपैति शूद्रतां च प्राप्नोति तस्मान्मद्यो सुर्वथैव न पातव्य इत्ययमपि पूर्वानुवादः ९७

एषा विचित्राभिहिता सुरापानस्य निष्कृतिः अत ऊर्ध्वं प्रवक्ष्यामि सुवर्णस्तेयनिष्कृतिम् ९८
एषेति इयं सुरापानजनितपापस्य नानाप्रकारं प्रायश्चित्तमभिहितं तस्मात् परं ब्राह्मणसुवर्णहरणपापस्य निष्कृतिं वक्ष्यामि ९८ ॥

सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति ९९
सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य ब्राह्मणसुवर्णापहर्ता स्वीयं कर्म कथयन्
सुवर्णेति अपहृतस्य सुवर्णस्य ब्राह्मणस्य यतः स्वयमिति ख्यातात् अपहरणात् ब्राह्मसुवर्णचौरो ब्राह्मणो राजानं गत्वा स्वकर्म कथयन् मामनुशास्तु भवानिति ब्रूयात् ब्राह्मणग्रहणमनुवादमात्रं प्रदर्शनार्थं प्रायश्चित्तेनाय तेन इति पूर्वेण क्षत्रियादीनां च प्रायश्चित्तान्तरानभिधानात् ९९ ॥

गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयं वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव वा १०० गृहीत्वेति स्कन्धेनादाय मुसलं
मुसलाभिघातेन हतो मुक्तोऽपि वा शुद्धिरिति याज्ञवल्क्य
गृहीत्वेति तं सुवर्णस्तेयकारिणं मनुष्यमेकवारं राजा स्वयं हन्यात् ब्राह्मणस्य ब्रह्महत्या न स्यादिति मत्वा ब्राह्मणं ब्राह्मणवधे दोषाभावस्मृते
मिश्रादेः सकृत्त्वात् तेनार्पितमुसलादिकं गृहीत्वा स्तेयकारिणं मनुष्यमेकवारं ब्राह्मणः पुनस्तपसैव शुध्येत् तपसा सेवकाः ब्राह्मणस्य तपसैव शुद्धिः तत्रैव कारणमाह अथ तपसैव तेन हन्तव्यो वधयोग्यस्य वा ब्राह्मण्यस्य
मरणात् मृतो वा मृतकल्पो वा जीवन्नस्मात् पापान्मुच्यते ब्राह्मणः पुनस्तपसैव तथा भविष्यपुराणे इतरेषामपि विभीतकेन तपः शक्तितः प्रायश्चित्तं तस्येति १००॥
मेवमुक्तमिति अत एवमत्र व्याख्यानं भविष्यपुराणे यदेतद्वचनं वीरब्राह्मणस्य तपसैव वा ब्राह्मणस्यैव तपः अत एव भविष्यपुराणोक्तमिति नियमान्न ब्राह्मणस्यैव तपः
क्षत्रादीनामपि तपो विकल्पार्थं ब्राह्मणस्य तु तपः एवेति

तपसापनुनुत्सुस्तु सुवर्णस्तेयजं मलं चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतम् १०१ ॥

तदेव तप आह तपसेति तपसा सुवर्णस्तेयजं पापं द्विजो हर्तुमिच्छन् अरण्ये ब्रह्महत्यायां च ब्रह्महत्याव्रतं कुर्यात् एतच्च द्वादशवार्षिकं सकामतो गोरवात् तत्
त्रियादीनां मरणेन विकल्पितं ब्राह्मणस्य तु व्रतमेव सुवर्णापहरणे पञ्चकृष्णलको माषः सुवर्णस्य षोडशमाषपरिमाणं द्रष्टव्यं ततो न्यूनस्य परिमाणे प्रदाय
मन्त्रकं गृहीत्वा न्याय्यत्वात् यत्र थिक परिमाणमविष्यपुराणोक्तं विधानं प्रायश्चित्तं विषयमेवं तथा च भविष्यपुराणे क्षत्रियाद्या
स्त्रयो वर्णा निर्दिष्टाः सवर्णपराः पुराणोक्तं निष्कादिहरणे ब्राह्मणा वीरचरेत् ब्रह्मणाम शुद्धये १०१ ॥

166A

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः गुरुस्त्रीगमनीयं तु व्रतैरेभिरपानुदेत् १०२॥ एतैरिति ब्राह्मणसुवर्णहरणजनितपापमे
भिर्व्रतैर्द्विजो निर्हरेत् व्रतत्रयमोर्द्ध्वं यो न कृतवान् एतैरिति बहुवचनं सर्वभावापेक्षया मनुष्कृतमपि प्रायश्चित्तं कल्पनीयमिति ज्ञापनार्थं गुरुस्त्रीगमनं निमित्तं पापमेभिर्वक्ष्य
माणैः प्रायश्चित्तैर्निर्हरेत् १०२

गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये सूर्मीं ज्वलन्तीं स्वाश्लिष्येन्मृत्युना स विशुध्यति १०३॥
गुर्विति निषेकादीनि कर्माणि यः कृत्वा तं गुरुः पिता तस्य भार्या तद्गामी गुरुभार्यागमनपापं विख्याप्य लोहमये तप्तशयने स्वप्यात् लोहमयीं स्त्रीप्रतिकृतिं ज्वलन्तीमालिंगयन् मृतः
स विशुद्धो भवति १०३

स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ नैरृतीं दिशमातिष्ठेदानिपातादजिह्मगः १०४॥ स्वयं वेति आत्मनैव वा लिंगवृष
णौ छित्वा अञ्जलौ गृहीत्वा यावत् शरीरपातं तावत् अवक्रगतिः सन् दक्षिणपश्चिमां दिशं गच्छेत् एतत् उक्तप्रायश्चित्तद्वयं गुरुं तुल्यवर्णगुरुभार्यायां ज्ञानतो रेतो विसर्गपर्यन्ते मैथुनवि
षयम् १०४

खट्वाङ्गी चीरवासा वा श्मश्रुलो विजने वने प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः १०५ खट्वांगेति खट्वांगभृत् सखण्डांकमो छि
न्नकेशनखलोम श्मश्रुधारी संयतमना निर्जने वने वर्षमेकं प्राजापत्यव्रतं चरेत् एतत्पुनर्वक्ष्यमाणप्रायश्चित्तं तुल्यजातिभार्यायां विश्रमेण ज्ञानविषयं बोद्धव्यम् १०५॥

चान्द्रायणं वा त्रीन्मासानभ्यस्येन्नियतेन्द्रियः हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये १०६ चान्द्रायणमित्यादि यद्वा गुरुभार्यागमनपा
पनिर्हरणाय संयतेन्द्रियः फलमूलादिना हविष्येणान्नीवारादिना कृतयवाग्वा वा त्रीन्मासान् चान्द्रायणं वा चरेत् एतच्च पूर्वोक्तात्स्वल्पत्वात् अधमाधीमसवर्णां वा गु
रुभार्यां गच्छतो द्रष्टव्यम् १०६।

एतैर्व्रतैरपोहेयुर्महापातकिनो मलं उपपातकिनस्त्वेवमेभिर्नानाविधैर्व्रतैः १०७॥
एतैरित्यादि एभिः कृच्छ्रैर्व्रतैर्ब्रह्महत्यादिमहापातककारिणः पुनर्वक्ष्यमाणप्रकारेणानेकरूपव्रतैः पापानि हरेयुः १०७॥

उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत् कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः १०८ चतुर्थकालमश्नीयादक्षा
रलवणं मितं गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः १०९ दिवानुगच्छेद्गास्तास्तु तिष्ठन्नूर्ध्वं रजः पिबेत् शुश्रूषि
त्वा नमस्कृत्य रात्रौ वीरासनं वसेत् ११० तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वपि न व्रजेत् आसीनासु तथासीनो नियतो वी
तमत्सरः १११ आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः पतितां पंकलग्नां वा सर्वोपायैर्विमोचयेत् ११२ उष्णे व
र्षति शीते वा मारुते वाति वा भृशं न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः आत्मनो यदि वान्येषां गृहे क्षेत्रे
थवा खले भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकं ११४ अनेन विधिना यस्तु गोघ्नो गामनुगच्छति स गोहत्याकृ
तं पापं त्रिभिर्मासैर्व्यपोहति ११५ ॥

उपेति अनेन विधिना यस्त्रिस्तिस्रो यावत् कुलकं उपपातकयुक्तो गोघ्नो शिथिलयवागूरूपेण प्रथममासं यवान् पिबेत् सशिखं मुण्डितशिरास्सन् सश्मश्रुः तेन हतो गोचर्म
णाच्छादितदेहो मासत्रयमेव गोष्ठे वसेत् गोमूत्रेणाचरेत्स्नानं संयतेन्द्रियः कृत्रिमलवणवर्जितं हविष्यमन्नमेकाहं भक्त्वा द्वितीयेऽह्नि सायं लोकं द्वितीयतृतीयमासा
वश्नीयात् मासत्रयमेव दिवा शान्तस्ता गा अनुगच्छेत् तासां च गवां खुरप्रहारादुद्धूतमुत्थितं रजः पिबेत् आसादयेत् कण्डूहननादिना ताः परिचर्यं प्रणम्य च रात्रौ अभिवा
दिकमन्त्रेण उपविष्ट आसीनत आसां विविंशत्कोऽयः उत्थितासु गोषु पश्चादुत्तिष्ठेत् वने च परिभ्रमतीषु पश्चात् परिभ्रमेत् उपविष्टासु गोषूपविशेत् व्याधितासु वा
व्याघ्रादिभयहेतुभिराक्रान्ताः पतिताः कर्दमलग्ना वा यथाशक्ति मोचयेत् तथा उष्णे आदित्ये तपति मेघे च वर्षति शीते वा उपस्थिते मारुते वा न्यत्वे वाति गोर्यथा
शक्ति रक्षामकृत्वा आत्मनस्त्राणं न कुर्यात् तथा आत्मनोऽन्येषां वा गृहे क्षेत्रे खले च शस्यादि भक्षयन्तीं वत्सं च पिबन्तीं न कथयेत् अनेनोक्तवि
धानेन यो गोघ्नो गाः परिचरति स गोवधजनितपापं त्रिभिर्मासैरपनुदति १०८ १०९ ११० १११ ११२ ११३ ११४ ११५ ॥

वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् ११६

वृषभेति वृषभैकादशा यासां ताः सम्यगनुष्ठितप्रायश्चित्तो दद्यात् अविद्यमाने तावति धने सर्वस्वं वेदज्ञेभ्यो ब्राह्मणेभ्यो दद्यात् ११६॥

एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः अवकीर्णिवर्ज्यं शुद्ध्यर्थं चान्द्रायणमथापि वा ११७

एतदेवेति अपरेऽप्युपपातकिनो वक्ष्यमाणावकीर्णिवर्जिताः पापनिर्हरणार्थमेतदेव गोवधप्रायश्चित्तं चान्द्रायणं वा कुर्युः चान्द्रायणं तु लघुत्वात् लघुषूपपातकेषु जातिशक्तिगुणापेक्षया व्यवस्थापनीयं ११७

अवकीर्णी तु काणेन गर्दभेन चतुष्पथे पाकयज्ञविधानेन यजेत निर्ऋतिं निशि ११८॥

अवकीर्णीति अवकीर्णी वक्ष्यमाणः काणेन गर्दभेन रात्रौ चतुष्पथे पाकयज्ञेन कल्पेन निर्ऋतिनाम देवतां यजेत ११८॥

हुत्वाग्नौ विधिवद्धोमानन्ततश्च समेत्यृचा वातेन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाहुतीः ११९

हुत्वेति ततो निर्ऋत्यै गर्दभपश्वादिहोमान् यथाविधि चतुष्पथे हुत्वा तदन्ते समासिञ्चन्तु मारुत इत्येतया ऋचा मारुतेन्द्रबृहस्पत्यग्नीनां होमेनाहुतीर्जुहुयात् ११९॥

कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः १२०

अप्रसिद्धत्वादवकीर्णिलक्षणमाह कामत इति इच्छातो द्विजः अवकीर्णिलक्षणमाह कामत इति इच्छातो द्विजः अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितमिति वचनात् स्त्रीयोनौ शुक्रोत्सर्गं ब्रह्मचर्यस्यातिक्रममवकीर्णित्वं वदन्ति वेदविदः प्राहुः १२०

मारुतं पुरुहूतं च गुरुं पावकमेव च चतुरो व्रतिनोऽभ्येति ब्राह्मं तेजोऽवकीर्णिनः १२१॥

मारुतमिति ब्रह्मचारिणो वेदाध्ययननियमानुष्ठानजं तेजः तदवकीर्णिनः सतो मरुदिन्द्रबृहस्पतिपावकाश्चत्वारः संक्रामति अतस्तेभ्य आज्याहुतीर्जुहुयात् इत्याज्याहुतेरयमनुवादः १२१

एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनं सप्तागारांश्चरेद्भैक्षं स्वकर्म परिकीर्तयन् १२२

एतस्मिन्निति एतस्मिन्नवकीर्णित्वपाप

167A

उत्पन्ने सर्वोत्कं गर्दभचर्मादिकं नागमेव चर्म परिधायेति हारीतस्मरणात् गर्दभसंबन्धि चर्म प्रावृत्य अवकीर्णी अहमिति स्वकर्म ख्यापनं कुर्वन् सप्त गृहाणि भैक्षं चरेत् तेभ्यो ल-

तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकं उपस्पृशंस्त्रिषवणं त्वब्देन स विशुद्ध्यति १२३॥ ब्धेन भैक्षेण वर्तयन्नेककालिकमिति १२२

तेभ्य इति तेभ्यः सप्तगृहेभ्यो लब्धेन भैक्षेणैककालमाहारं कुर्वन् स्नायंस्त्रिषवणं प्रातर्मध्यंदिनेषु स्नानमाचरन् अवकीर्णी संवत्सरेणैव विशुद्ध्यति १२३॥

जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया १२४ जातीति ब्राह्मणस्य रुजः कृत्येषु

द्विजातिभ्रंशकरकर्मोक्तं तन्मध्यादन्यतमं कर्मविशेषमिच्छातः कृत्वा वक्ष्यमाणं सांतपने सप्ताहसाध्यं कुर्यात् अनिच्छातः पुनः कृत्वा प्राजापत्यं वक्ष्यमाणं चरेत् १२४

संकरापात्रकृत्यासु मासं शोधनमैन्दवं मलिनीकरणीयेषु तप्तः स्याद्यावकैस्त्र्यहं १२५॥

संकरेति खराश्वोष्ट्रेत्यादिना संकरीकरणान्युक्तानि निंदितेभ्यो धनादानमित्यादिना चापात्रीकरणान्युक्तानि तेषां मध्यादन्यतममिच्छातः कृत्वा चान्द्रायणं मासमशुद्धये कुर्यात् कृमिकीटवयोहत्येत्यादिना मलिनीकरणान्युक्तानि तन्मध्यादेकमिच्छातः कृत्वा त्रिरात्रं यवागूं क्वथितामश्नीयात् १२५॥

तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः १२६

तुरीय इति ब्रह्महत्यातुरीयो भागः त्रैवार्षिकरूपः द्वादशवार्षिकस्य चतुर्थो भागः एतत्प्रायश्चित्तं क्षत्रियवधे इति उपपातकत्वेनोपदिष्टे त्रैमासिकोपदेशात् कृत्वा वृत्तस्थक्षत्रियस्याकामतो वधे द्रष्टव्यं वैश्यस्य सार्धवार्षिकं कामतो हतेऽष्टमो भागः सार्धवार्षिकं व्रतं शूद्रे वृत्तस्याकामतो हते षोडशो भागो नवममासिकं द्रष्टव्यं १२६

अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः वृषभैकसहस्रा गा दद्यात्सुचरितव्रतः १२७॥

अकामत इति अबुद्धिपूर्वकं पुनः क्षत्रियं निहत्य वृषभेनैकेनाधिकं सहस्रं वा सा गावीं तान्नात्मशुद्ध्यर्थं ब्राह्मणेभ्यो दद्यात् १२७॥

त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतं वसन्दूरतरे ग्रामाद्वृक्षमूलनिकेतनः १२८ त्र्यब्दमिति यद्वा संयतो जटावानश्वा-

मादिषु कृष्टद्रुममूलकृतनिवासो ब्रह्महणि यदुक्तं व्रतं ब्रह्महा द्वादश समा इत्यादि तद्वर्षत्रयं कुर्यात् तत्तुरीयो ब्रह्महत्याया इत्यनेन पुनरुक्तिर्वाच्याजटी

ग्रामदूरतरे ग्रामात् वृक्षमूलनिकेतन इत्येतद्वचनोक्तं व्यतिरिक्तं पावशिरोध्वजधारणादिसकलयमनिवृत्त्यर्थं तादृश्यकामादिकारात्वेदकामतः अत एवा-

एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः प्रमाप्य वैश्यं वृत्तस्थं दद्याच्चैकशतं गवां १२९ गलायवाद्युदितम् १२८॥

एतदिति एतदेव द्वादशवार्षिकव्रतमकामतः साधाचारं वैश्यं निहत्य वर्षमेकं ब्राह्मणादिः कुर्यात् एकाधिकं वा गोशतमृषभं दद्यात् १२९॥

168.1

मा॰ नु॰ सं॰ १६८

एतदेव व्रतं कृत्स्नं षण्मासान् शूद्रहा चरेत् वृषभैकादशा वापि दद्याद्विप्राय गाः सिताः १३० ॥

एतदिति एतदप्यकामतः इदमेव व्रतं शूद्रहा षण्मासं चरेत् वृषभएकादशो यासां गावस्ताः शुक्लवर्णा दद्याद्ब्राह्मणाय दद्यात् १३० ॥

मार्जारनकुलौ हत्वा चाषं मंडूकमेव च श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् १३१ मार्जारेति बिडालनकुलचाषभेककुक्कुरगोधा

उलूककाकानामेकैकं हत्वा शूद्रहत्याव्रतं शूद्रविदत्तं … गोवधव्रतं … प्रायश्चित्ते पापस्य लघुत्वं वा ज्ञाय एतमध्येतकामतो ऽभ्यासादिविषयं द्रष्टव्यं १३१

पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत् उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाब्दैवतं जपेत् १३२

पयइति अबुद्धिपूर्वकं मार्जारादीनां वधे त्रिरात्रं क्षीरं पिबेत् अथ मंदानलत्वादिना न समर्थः त्रिरात्रमयोजनमध्वनो व्रजेत् अत्राशक्तिस्त्रिरात्रं … नद्यां … नवैकस्मिकः १३२

अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः पलालभारकं षंढे सैसकं चैकमाषकं १३३

अभ्रिमिति सर्पं हत्वा ब्राह्मणाय तीक्ष्णाग्रं लोहदंडं दद्यात् नपुंसकं हत्वा पलालभारं सीसकं च माषकं ब्राह्मणाय दद्यात् १३३ ॥

घृतकुंभं वराहे तु तिलद्रोणं तु तित्तिरौ शुके द्विहायनं वत्सं क्रौंचं हत्वा त्रिहायनं १३४ ॥

घृतेति शूकरे हते घृतपूर्णं घटं ब्राह्मणाय दद्यात् तित्तिरिसंज्ञिनि पक्षिणि हते चतुराढकपरिमाणं तिलं दद्यात् शुके हते द्विवर्षं वत्सं क्रौंचाख्यपक्षिणं हत्वा त्रिवर्षं वत्सं ब्राह्मणाय दद्यात् १३४ वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गां १३५ ॥

हत्वा हंसं बलाकां च बकं बर्हिणमेव च वानरश्येनभासाख्यानां पक्षिणामन्यतमं हत्वा ब्राह्मणाय गां दद्यात् १३५

हत्वेति हंसबलाकाबकमयूर … अजमेषावनड्वाहं खरं हत्वैकहायनम् १३६ ॥

वासो दद्याद्धयं हत्वा पंच नीलान्वृषान्गजे अजमेषौ हत्वा वृषभं दद्यात् गर्दभं हत्वा एकवर्षं वत्सं दद्यात् १३६ ॥

हस्तिनं हत्वा पंचनीलान्वृषभान्दद्यात् … अक्रव्यादान्वत्सतरीमुष्ट्रं हत्वा तु कृष्णलं १३७ ॥

वास इति अश्वं हत्वा वस्त्रं दद्यात् … धेनुं दद्यात्पयस्विनीं … उष्ट्रं हत्वा सुवर्णरक्तिकां दद्यात् १३७

क्रव्यादांस्तु मृगान्हत्वा … अमांसभक्षकान् हरिणादीन् … नारीर्हत्वानवस्थिताः १३८

क्रव्यादानिति … व्याघ्रादीन् … पृथग्दद्याद्विशुद्धये चतुर्णामपि वर्णानां … छागमेषान् शुद्ध्यर्थं दद्यात् १३८ ॥

जीनकार्मुकबस्तावीन् … ब्राह्मणादिक्रमेण …

जीवेति ब्राह्मणादिवर्णस्त्रियो …

दानेन वधनिर्णेकं सर्पादीनामशक्नुवन् एकैकशश्चरेत्कृच्छ्रं द्विजः पापापनुत्तये १३९ दानेनेति अस्थिशून्यतेनाशेभावाद्दानेन सर्वपापनिर्हरणं कर्तुमसमर्थो वा सर्पादीनां प्रत्येकं वधे कृच्छ्रं प्राजापत्यं चरेत् द्विजः पापापनोदनार्थं सर्पादयश्चादिशब्दकर्णाया यस्मादप्यादिपवमधश्मेन सर्पेण तु गृहीत १३९॥

अस्थिमतां तु सत्त्वानां सहस्रस्य प्रमापणे पूर्णे चानस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत् १४० अस्थिमतामिति अनस्थिसाहचर्यादस्थिमतां प्राणिनां कृकलासादीनां सहस्रस्य वधे शूद्रवधप्रायश्चित्तमायदेशिकं कुर्यात् अस्थिरहितानां च मत्कुणादीनां शकटपरिमितानां वधे तदेव प्रायश्चित्तं कुर्यात् १४०

किंचिदेव तु विप्राय दद्यादस्थिमतां वधे अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति १४१ किंचिदिति अस्थिमतां तु क्षुद्रजन्तूनां कृकलासादीनां प्रत्येकं वधे किंचिदेव दद्यात् अस्थिमतां वधे पणो देय इति अस्मत्स्मरणात् किंचिदेवेति पणो बोद्धव्यः अनस्थिमतां च एकमत्कुणादीनां प्रत्येकं वधे प्राणायामेन शुद्धो भवति प्राणायामस्य स्वव्याहृतिकां सप्रणवां सावित्रीं शिरसा सह त्रिः पठेदायतप्राणः प्राणायामः स उच्यते इति वशिष्ठप्रोक्तलक्षणो ग्राह्यः १४१

फलदानां तु वृक्षाणां छेदने जप्यमृक्शतम् गुल्मवल्लीलतानां च पुष्पितानां च वीरुधाम् १४२॥

फलदानामाम्रादीनां वृक्षाणां गुल्मानां कुब्जकादीनां वल्लीनां गुडूच्यादीनां लतानां दीर्घशाखानां पुष्पितानां च वीरुधां कूष्माण्डादीनां प्रत्येकं छेदने लघुप्रायश्चित्तप्रसङ्गात् ऋचां शतं जपेत् सावित्र्यादि ... प्रायश्चित्ताभिधानात् इदं वृक्षच्छेदने लघुप्रायश्चित्तं सकृद् बुद्धिपूर्वकविषयं वेदितव्यं १४२

अन्नाद्यजानां सत्त्वानां रसजानां च सर्वशः फलपुष्पोद्भवानां च घृतप्राशो विशोधनम् १४३॥

अन्नाद्येति अन्नादिषु जातानां गुडादिरसजातानां च उडुम्बरादिफलसंभवानां मधूकादिपुष्पोद्भवानां च सर्वप्राणिनां वधे घृतप्राशनं पापशोधनम् १४३

कृष्टजानामोषधीनां जातानां च स्वयं वने वृथालम्भेऽनुगच्छेद्गां दिनमेकं पयोव्रतः १४४॥

कृष्टेति सर्वकृष्टजातानामोषधीनां षष्टिकादीनां वने च स्वयमुत्पन्नानां नीवारादीनां निष्प्रयोजनच्छेदने क्षीराहारः एकमहो गोरनुगमनं कुर्यात् १४४॥

एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवं ज्ञानाज्ञानकृतं कृत्स्नं शृणुतानाद्यभक्षणे १४५॥

एतैरिति एभिः कृतप्रायश्चित्तैर्हिंसाजनितपापं ज्ञानाज्ञानकृतं निर्हरणीयं इदानीमभक्ष्यभक्षणे प्रायश्चित्तं वक्ष्यमाणं शृणुत १४५॥

अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः १४६।

अज्ञानादिति मद्यपानकृतस्य करणाद्वयानेनास्यामानात् नेदं सुरापानविषयं किन्तु तदितरविषयं तत्र यथा गौडी माध्वी ...

169

म॰
कु॰ मे॰
१६९

सुरासाम्येवाथ नमितरमद्यापेदपावा ब्राह्मणस्य प्रायश्चित्तं गोमूत्रयावकमिति उक्तं तेनाबुद्धिपूर्वकं गौडीमाध्वीपीतायां गोतमोक्तं तप्तकृच्छ्रं कृत्वा पुनः संस्कारः एवं स्मृत्यन्तरयाच गोत
मः अमत्यायसयपानेययोद्वत्तमुदकं वा घृतं प्रतिषिद्धं तप्तकृच्छ्रं ततः संस्कारः स्मृत्यन्तरमेव व्याख्यातं विष्णुपुराणे अज्ञानतः कृतपाने गौडीमाध्वीने वा पिबेत् तप्तकृच्छ्रं
विद्यात्तस्याज्ञानेनयथोदितम् बुद्धिपूर्वकं तत्पैष्टीतरमद्यपाने प्रायश्चित्तिकमतिदेशमितिप्रायश्चित्तं यादात्तस्या गौडीमाध्वीनां पाने मरणान्तिकं यावत्तरमद्यापद
यादृच्छ्यात्रमानवमेवकरणानवामतयेदह्मितिप्रायश्चित्तमुक्तम् अतएव गौडीमाध्व्योः कामतःपानात्तु हतो भविष्यपुराणे यद्वाऽस्मिन्नेव विषये मानवीयं प्रव
येत् कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि सुरापानापनुत्यर्थं वालवासा जटी ध्वजी तिपैष्टी गौडी माध्वी वा तिक्तफलस्य कृपानमानदिनवविषयस्य प्रदेश
कणान्वेतिल्वावालसंस्कारमेवकेवलममद्यालतुप्रायश्चित्तं ब्राह्मणस्योक्तं बुद्धिपूर्वपानमानमद्यपानेनमतिपूर्वेसपापानेकृतवेवानतातुहकृच्छ्राति कृच्छ्रं भवतः पुनः संस्कारएवहोतिभविष्यपुराणीयमस्य ह्याववि यमन्वन्तरोक्तमुक्तः १४६

अपः सुराभाजनस्था मद्यभाण्डस्थितास्तथा पञ्चरात्रं पिबेत्पीत्वा शङ्खपुष्पीशृतं पयः १४७

अप इति पैष्टीसुराभाण्डे तदितरमद्यभाण्डे वावस्थिता अपः सुरारसागन्धवर्जिताः पीत्वा शङ्खपुष्प्योषधिप्रक्षेपेण पक्वं क्षीरं तदुदकं पञ्चरात्रं शङ्खपुष्पी विपक्वेन तस्य हन्तीरा।
णान्येयदितिवेयायनस्मरणात् पञ्चरात्रं पिबेत्सुरामद्ययोः सवर्णवर्गफलत्वप्रायश्चित्तमिथ्यानानत्वहापित्वानस्वनादिप्रकारभेदन विषयसमीकरणसमाधेयमाच तिकमेवप्रायश्चित्तं सामान्यमिति मेधातिथिराह १४७

स्पृष्ट्वा दत्त्वा च मदिरां विधिवत्प्रतिगृह्य च शूद्रोच्छिष्टाश्च पीत्वापः कुशवारि पिबेत्त्र्यहम् १४८

स्पृष्ट्वेति सुरां स्पृष्ट्वा दत्त्वा च स्वस्तिवचनपूर्वकं च प्रतिगृह्य शूद्रोच्छिष्टाश्चापः पीत्वा प्रतिगृह्येत्युपादानात् कुशाग्रोदकं दर्भक्वथितमुदकं त्र्यहं पिबेत् १४८ ॥

ब्राह्मणस्तु सुरापस्य गन्धमाघ्राय सोमपः प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्यति १४९

ब्राह्मणस्तु सुरापस्य गन्धमाघ्राय सोमयागसम्पन्नस्तु एवं विधि गन्धं ज्ञात्वा जलमध्ये प्राणायामत्रयं घृतं प्राश्य विशुद्धो भवति १४९ ॥

ब्राह्मणः क्षत्रियाद्याः ब्राह्मणाः पुनः कृतसोमयागसम्पन्नस्तु

अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः १५०

अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टं वा मद्यादिसंसर्गीभूतं वा प्राश्य सुरासंस्पृष्टं वा भक्षादिसंवा प्राश्य द्विजातयस्त्रयो वर्णाः पुनरुपनयनमर्हन्ति १५०

अज्ञानादिति विट्संहादीनां वक्ष्यमाणात् अबुद्धिपूर्वकं मनुसंवभिसंसर्गीभूतं वा प्राश्य सुरासंस्पृष्टं वा भक्षादिसंवा

वपनं मेखला दण्डो भैक्षचर्या व्रतानि च निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि १५१ ॥

वपनमिति शिरोमुण्डनं मेखलाधारणं दण्डधारणं भैक्षाचरणं व्रतानि च मधुमांसस्त्रीवर्जनादीनि प्रायश्चित्तार्थं पुनरुपनयने द्विजातीनां न भवन्ति १५१ ॥

अभोज्यानां तु भुक्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव च जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान्पिबेत् १५२ ॥

अभोज्यानामिति अभोज्यान्ना येषां निषिद्धात् तेषामन्नं भुक्त्वा जलमिश्रितपाकरूपेण यवागूरूपेण यवापानं योग्यान् सप्तरात्रं पिबेत् अबुद्धिपूर्वे
तदभुक्त्वा स्त्रीशूद्रोच्छिष्टं वा भुक्त्वा एतदेव कृ [illegible] यात् १५२ ॥

अभोज्यानामिति अभोज्यान्नानां यो निषिद्धमन्नं तस्य प्रायश्चित्तमुक्तं तेन सह वेकल्पितं विकल्पस्य [illegible] मांसभक्षणादमेव कुर्यात्
वविषयेमत्या भुक्त्वा चेत्कृच्छ्रमिति चतुर्थाध्याये प्रायश्चित्तमुक्तं तेन सह विकल्पितं [illegible]
र्यात्तथा क्रव्यादसूकरोष्ट्राणामित्यादिना यदि प्रायश्चित्तं

169 A

शुक्तानि च कषायांश्च पीत्वा मेध्यान्यपि द्विजः। तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः १५३॥ शुक्तानीति यानि स्वभावतो मधुरा

दीनि कालयोगेनोदकनासादिनाम्लभावं व्रजन्ति तानि शुक्तानि कषायान् विभीतकादीन् कथितानि शुद्धप्रतिषिद्धान्यपि पीत्वा यावन्न जीर्णानि भवन्ति तावद शुचिः स भवति ॥

विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः। प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत् १५४॥ विड्वराहेति ग्रामसूकरखरोष्ट्र

शृगालवानराणां मूत्रं पुरीषं वा द्विजातिर्भुक्त्वा चान्द्रायणं कुर्यात् । तत्र मार्कं विड्वराहस्वेन विड्वराहग्रामकुक्कुटयोर्बुद्धिपूर्वकभक्षणे पंचवत्सर प्रायश्चित्तमुक्तं तद्भ्या सविषयेत्याख्यातं इदं तु मूत्रविषयेऽ सविषयः

शुष्काणि भुक्त्वा मांसानि भौमानि कवकानि च। अज्ञातं चैव सूनास्थमेतदेव व्रतं चरेत् १५५॥ इमेन तु

शुष्काणीति व्याघ्रादिनाशोषितानि मांसानि भुक्त्वा भूम्यादिप्रभावानि भुक्त्वा भूमिजं वा कृत्स्नं वा छत्राकं भक्षयित्वेति यत्र सूनायां ज्ञातं विजातीयादि इमेन तु

दन्तस्यापि निषेधात् हरिणमांसं तत्र सूनामांसमिति भक्ष्याभक्ष्यतया यत्र न चात्र तथा हिंसा स्यान्नेत्यत्र तत्तो इदानीं तन्भुक्त्वा चान्द्रायणमेव कुर्यात् १५५॥

क्रव्यादसूकरोष्ट्राणां कुक्कुटानां च भक्षणे। नरकाकखराणां च तप्तकृच्छ्रं विशोधनं १५६॥

क्रव्यादेति ग्राममांसभक्षिणां ग्राम्यसूकरोष्ट्रग्राम्यकुक्कुटानां तथा मानुषकाकगर्दभानां प्रत्येकं बुद्धिपूर्वकं मांसभक्षणे वक्ष्यमाणं तप्तकृच्छ्रं प्रायश्चित्तम् ग्राम्य

सूकरकुक्कुटयोर्बुद्धिपूर्वकभक्षणे पंचमाध्याये पातित्यमुक्तम् तदभ्यासविषयेत्याख्यातम् इदं त्वनभ्यासविषयेऽत तप्तकृच्छ्रमिति विरोधः १५६॥

मासिकान्नं तु योऽश्नीयादसमावर्तको द्विजः। स त्रीण्यहान्युपवसेदेकाहं चोदके वसेत् १५७॥

मासिकान्नमिति यो ब्रह्मचारी ब्राह्मणो मासिकश्राद्धमेवं यं तं मासानि यत्र सपिण्डीकरणात्पूर्वं एकोद्दिष्टश्राद्धान्नोपलक्षणं स त्रिरात्रमुपवसेत् त्रिरात्रमध्ये एकस्मिन्नह्नि जलमावसेत् १५७॥

ब्रह्मचारी तु योऽश्नीयान्मधु मांसं कथंचन। स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत् १५८

ब्रह्मचारीति यो ब्रह्मचारी कामं मांसं वा श्वनिच्छया आपदि वा खादेत् स प्राजापत्यं कृत्वा प्रारब्धं ब्रह्मचर्यव्रतशेषं समापयेत् १५८॥

विडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च। केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलां १५९॥

विडालेति विडालकमूषककाककुक्करनकुलानामुच्छिष्टं केशकीटदूषितं संसर्गदुष्टं वा अभुक्त्वा न तत्र तेषां विशुद्धिकं तत्र तामभुक्त्वा ब्रह्मसुवर्चलां क्वथितं उदकं पिबेत् १५९

अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता। अज्ञानभुक्तं तूत्तार्यं शोध्यं वाप्याशु शोधनैः १६०॥ अभोज्यमिति श्राद्धान्नं शुद्धिका

मेन प्रतिषिद्धमन्नं नादनीयं प्रमादात् भुक्तं वमित्यं तदसंभवे प्रायश्चित्तैः विशोधनीयं वमनपक्षेऽल्पं प्रायश्चित्तं भवत्येव ज्ञानतः पुनः पूर्वोक्तं प्रायश्चित्तम् १६०

एषोऽनाद्यादनस्योक्तो व्रतानां विविधो विधिः। स्तेयदोषापहर्तॄणां व्रतानां श्रूयतां विधिः १६१॥

170

म॰ शा॰ मे॰ १७०

…इति प्रभवमद्दोयानि प्रायश्चित्तानि तेषां मेन नानाप्रकारविधानपूर्वकं स्तेयपापहारिणां द्विजेन मयुनाश्रूयताम् १६१ ॥

धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः स्वजातीयगृहादेव कृच्छ्राब्देन विशुध्यति १६२

धान्येति ब्राह्मणो ब्राह्मणगृहाद्धान्यान्नधनचौर्याणि कृत्वा नः कृत्वानवात्मीयभां मानो नास संवत्सरं प्राजापत्यव्रताचरणेन शुध्यति पतन्नेदेशकालद्रव्यपरिमाणस्वामिगुणापेक्षया महतानाविवोद्धव्यं एवमनन्तरत्रापि १६२

मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतं १६३ ॥

मनुष्याणामिति पुरुषस्त्रीक्षेत्रगृहाणामन्यतमस्य हरणे कूपजलस्य वापीजलस्य वासमस्तस्य हरणे चान्द्रायणं प्रायश्चित्तं मन्वादिभिः स्मृतम् १६३ ॥

द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मतः चरेत्सान्तपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धये १६४

द्रव्याणामिति द्रव्याणामल्पसाराणामल्पप्रयोजनानां त्रपुकप्रायश्चित्तविशेषाणां त्रपुसीसकादीनां परगृहाच्चौर्यं कृत्वा तदपहृतं द्रव्यं स्वामिने दत्वा सांतपनं कृच्छ्रं प्रायश्चित्तं चरेत् स्वमात्मशुद्धये कृत्वा त्वान्विनेपहृतद्रव्यनिर्यातनिति सर्वस्तेयप्रायश्चित्तशेषः १६४

भक्ष्यभोज्यापहरणे यानशय्यासनस्य च पुष्पमूलफलानां च पञ्चगव्यं विशोधनं १६५

भक्ष्येति भक्ष्यस्य मोदकादेः भोज्यस्य पायसादेः यानस्य शकटादेः शय्यायाश्चासनस्य च पुष्पमूलफलानां च प्रत्येकमपहरणे पंचगव्यं विशोधनम् १६५ ॥

तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च चेलचर्मामिषाणां च त्रिरात्रं स्यादभोजनं १६६

तृणेति तृणकाष्ठवृक्षाणां शुष्कान्नस्य च तंडुलादेः गुडवस्त्रचर्ममांसानामन्यतमस्यापहरणे त्रिरात्रमुपवासं चरेत् १६६ ॥

मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च अयःकांस्योपलानां च द्वादशाहं कणान्नता १६७

मणीति मणिमुक्ताविद्रुमताम्ररजतलोहकांस्योपलानां प्रत्येकमपहरणे द्वादशाहं तंडुलकणभक्षणं कुर्यात् सर्वं च महद्दर्भ्यासदेशकालद्रव्यस्वामिगुणादौर्गम्यापेक्षया उत्कृष्टापकृष्टद्रव्यापहारादि पद्म [illegible] माधय १६७

कार्पासकीटजोर्णानां द्विशफैकशफस्य च पक्षिगन्धौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः १६८

कार्पासेति कार्पासकृमिकोषजोर्णानां द्विशफैकशफस्य गवाश्वादेः पक्षिणां शुकादीनां गन्धानां च चंदनप्रभृतीनां रज्ज्वाश्च प्रत्येकं हरणे त्र्यहं क्षीराहारः स्यात् अत्रापि पूर्ववद्विषयसमीकरणं परिहार्यः स्वामिन श्रोत्कृष्टापकृष्टद्रव्यसमपेक्षणात् पिवेद्वा नादेकप्रायश्चित्तानां विरोधः १६८

एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः अगम्यागमनीयं तु व्रतैरेभिरपानुदेत् १६९ ॥

एतैरिति एतैरुक्तैः प्रायश्चित्तैः स्तेयजनितं पापं द्विजो ह्यपनुदेत् अगम्यागमननिमित्तं पुनः एभिर्वक्ष्यमाणैर्व्रतैर्निर्हरेत् १६९ ॥

गुरुतल्पव्रतं कुर्याद्रेतः सिक्त्वा स्वयोनिषु सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च १७० ॥

गुरुतल्पेति स्वयोनिषु सोदर्यभगिनीषु तथा मित्रभार्यासु पुत्रपत्नीषु वा बालीषु प्रत्येकं रेतः सिक्त्वा गुरुदारगमनप्रायश्चित्तं कुर्यात् अत्रापि ज्ञानाभ्यासाभ्यां तत्र वा आपेक्षयाम

णांतिकं चरेत्। एवं ततः सेक्ता कुमारीषु चांडालीषु अन्त्यजासु सपिंडासु स्नुषासु च शूद्राणां गोविधीयते इति यमेन मरणांतिकं प्रायश्चित्तं अज्ञानाद्व्रतम् १७० ॥

पैतृष्वस्रेयीं भगिनीं स्वस्रीयां मातुरेव च मातुश्च भ्रातुस्तनयां गत्वा चांद्रायणं चरेत् १७१ ॥

पैतृष्वस्रेयीमिति पितृष्वसुः सुतां तथा मातृष्वसुर्दुहितरं भगिनीं मातुः स्वसा सोदर्यं भ्रातुर्दुहितरं सोदर्यां भगिनीमित्यन्ये विरुद्धगमनेनागत्वा चांद्रायणं कुर्यात् तत्स्त्रक्तदमित्ता नुयपि ... व
पुपुत्रदर्शनात् १७२

एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् ज्ञातित्वेनानुपेयास्ताः पतति ह्युपयन्नधः १७२ एता इति तिस्रः पूर्वोक्ताः पैतृष्वस्रेयीप्रभृतयः

भार्यार्थं प्राज्ञो नोद्वहेत् ज्ञातित्वेन ता अनुपगंतव्याः यस्मादेता उपयच्छन् उपगच्छन् नरकं याति अपि च सपिंडा च या मातुरित्यनेन निषेधः सिद्ध एव दक्षिणात्याचारदर्शनानुमतत्वनिषेधार्थं
पुनर्वचनं १७२

अमानुषीषु पुरुष उदक्यायामयोनिषु रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेत् १७३ ॥ अमानुषीष्विति अमानुषीषु वडवादिषु

नगविगोवर्ज्जितासु मैथुने प्राजापत्यं चरेत् इति गोवर्ज्जिताभिधानात् तथा रजस्वलायां योनितश्चान्यासु स्त्रियां जले च रेतःसेकं कृत्वा कृच्छ्रं सांत
पनं कुर्यात् १७३

मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत् १७४

मैथुनमिति यत्र क्वापि देशे पुरुषे मैथुनं सेवित्वा स्त्रियां वा गोयाने अप्सु जलेभ्यः क्वापि देशे पुरुषे मैथुने सेविते सवस्त्रः स्नायात् १७४ ॥

चांडालांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति १७५ चांडालेति चंडालस्त्रियमन्त्यजानां वेच्छ

श्वपचादीनामज्ञानतो ब्राह्मणः स्त्रियो गत्वा तेषां वान्नं भुक्त्वा तेभ्यः प्रतिगृह्य पतति पतितस्य प्रायश्चित्तं कुर्यात् एतच्च गुरुत्वाद्भ्यासतो भोजनप्रतिगृहविषयं ज्ञानात्तेषां स्त्री
गमने कृते समानतां गच्छति एतच्च प्रायश्चित्तगौरवार्थम् १७५ ॥

विप्रदुष्टां स्त्रियं भर्ता निरुंध्यादेकवेश्मनि यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम् १७६ विप्रदुष्टामिति विशेषेण प्रदुष्टामिच्छया व्यभिचारिणीमि

त्यर्थः। तां निरुंध्यात् सती कार्येभ्यो निवर्त्य निवर्त्य निगडवद्धामिव एकगृहे धारयेत् यच्च पुरुषस्य सजातीयपरदारगमने प्रायश्चित्तं तदेवैनां कारयेत् तत्स्त्रीणामर्द्धं प्रदातव्य
मिति यदपि प्राग्विभिरुक्तं तदनिच्छया व्यभिचारि
णीकविषयं १७६

सा चेत्पुनः प्रदुष्येत्तु सदृशेनोपमंत्रिता कृच्छ्रं चांद्रायणं चैव तदस्याः पावनं स्मृतं १७७

सा चेदिति सा स्त्री सजातीयगमनेन सकृद्दुष्टा कृतप्रायश्चित्ता यदि पुनः सजातीयेनाभ्यर्थिता सती तद्गमनं कुर्यात्तदास्याः प्रायश्चित्तं प्राजापत्यं कृच्छ्रं चांद्रायणं च प्रायश्चित्तमत्र
विधीयते १७७

यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः तद्भैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति १७८ यदिति वृषल्यत्र चांडाली प्राच्यश्चित्तगौरवात् चां

डालीगमने यदेकरात्रेण ब्राह्मणः पापमर्जयति तद्भैक्षाशी नित्यं सावित्र्यादिकं जपन् त्रिभिर्वर्षैरपनुदति तथा चापस्तंबः यदेकरात्रेण करोति पापं कृष्णवर्णं ब्राह्मणः सेवमानः
चतुर्थकाल उदकाभ्यवायी ब्रह्मचारी त्रिभिर्वर्षैस्तदपोहति पापमेवं यातीत्यस्त इत्यमेवव्याख्यानवान् गोविंदराजस्तु शूद्रस्यापि हीनमृतः शूद्रागमने प्रायश्चित्तमिदमाह १७८

171

एषा पापकृतामुक्ता चतुर्णामपि निष्कृतिः पतितैः संप्रयुक्तानामिमाः शृणुत निष्कृतीः १७९

एषा ब्रह्महिंसासुरापस्तेयगुरुगमनकारिणां चतुर्णामपि पापकृतां विशुद्धिरुक्ता इदानीं महापातकिसंसर्गिणामिमा वक्ष्यमाणाः संशुद्धीः शृणुत १७९

संवत्सरेण पतति पतितेन समाचरन् याजनाध्यापनाद्यौनान्न तु यानासनाशनात् १८०

संवत्सरेण पतति पतितेन सह संसर्गमाचरन् एकयानगमनैकासनोपवेशनैकपङ्क्तिभोजनरूपाणां संसर्गाणां च त्रयाणां संवत्सरेण पतति न तु याजनाध्यापनयौनानां संवत्सरेण पतति किं तु सद्य एव तथाच

ब्रह्मयाजनमध्यापनं यौनं पूर्वकं सावित्रीश्रावणं याजनादीनां च सद्यः पातित्यमाह देवलः याजनयोनिसंबन्धस्वाध्यायसहभोजनं कृत्वा सद्यः पतत्येव पतितेन न संशयः

विष्णुश्च संवत्सरेण पतति पतितेन सहाचरन् सह यानासनाभ्यासाद्योनात्तु सद्य एवेति बौधायनः संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनान्न तु यान

शयनासनादिति यो विद्वान् स्वयाजनादीनां यानासनादिवत्संसर्गेण पातित्यमाह तत्तु महापातकिनामल्पज्ञानादावसंसर्गेणाकिंचित्करं तस्माद्देहमिति ज्ञात्वा बुद्धिपूर्वदोषमत्र व्याख्यातं

मार्गेणैतेनाग्नो विद्वान्याजनाध्यापकस्तनामनुरूपं व्याख्येयं १८०

यो येन पतितेनैषां संसर्गं याति मानवः स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये १८१ ॥

एषां मध्ये यो येन पापकारिणा महापातकिना संसर्गं करोति स तस्यैव व्रतं तत्पापप्रायश्चित्तं कुर्यात्

यो येनेति पुनः शब्दो यः पापकारिवचनः सकलपापिनामविशेषप्राप्त्यर्थं तत्पापपतितानां मध्ये यो येन पापकारिणा सह संसर्गं करोति स तेन कृतं तस्य व्रतं द्वादशसमादिकं पादहीनं कर्तव्यं न यावद्वासः यो येन संसृजेद्वर्षं सोऽपि तत्समतामियात् पादन्यू

नं तत्र समाचरेत् किमित्यभिहितं तदपि व्रते संसर्गिणां क्रियमाणे पादन्यूनं कर्तव्यमिति स्मृत्यन्तरेभ्यो ज्ञेयः १८१

पतितस्योदकं कार्यं सपिण्डैर्बान्धवैर्बहिः निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसंनिधौ १८२

पतितस्य सोदकं क्रियावदमावस्यायां सपिण्डैः समानोदकैर्यामाद्बहिर्गत्वा रिक्तादितिथौ सायाह्ने ज्ञातिऋत्विग्गुरुसंनिधाने रिक्तायां नवम्यां तिथ्यादिना ज्ञातिकैर्वा १८२

पतितस्य जीवत एव प्रेतस्योदकक्रियावदमावास्यायां सपिण्डैः समानोदकैः

दासी घटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा अहोरात्रमुपासीरन्नशौचं बान्धवैः सह १८३

दासीति सपिण्डसमानोदकप्रयुक्ता दासी उदकपूर्णं घटं प्रेतवद्दक्षिणाभिमुखी भूत्वा पादेन क्षिपेत् यथा सा निरुदको भवति तदनन्तरं सपिण्डाः समानोदकैः सहाहोरात्रमशौचं चरेयुः १८३ ॥

निवर्तेरंश्च तस्मात्तु संभाषणसहासने दायाद्यस्य प्रदानं च यात्रा चैव हि लौकिकी १८४

निवर्तेरन्निति तस्मात्पतितात्सपिण्डादीनां संभाषणमेकासनोपवेशनं च तत्संसर्गः क्स्य च धनं सांवत्सरिकादीनि मङ्गलादिरूपो लोकव्यवहारश्च तानि निवर्तेरन् १८४

ज्येष्ठता च निवर्तेत ज्येष्ठावाप्यं च यद्धनं ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान्गुणतोऽधिकः १८५

ज्येष्ठत्वेति ज्येष्ठस्य यत्सम्यक्त्वनादि प्रत्युत्थानादिकं कार्यं न तत्समुचितं कार्यं लभ्यं च न तस्य विशेषसहायादिकं यद्धनं तदेव यद्यपि सकष्टस्थानेऽभिषिच्यादेवामुष्मादिति ऋषि: पिङ्गः तथापि पञ्चत्व्यस्य सम्यगज्ञस्याप्यश्च मनः यत्तेन तस्य ज्येष्ठस्य कार्यमवैषयिकत्वेन साधारणीकृतं स्वर्णांशेनाधिकं ज्येष्ठांशेनाधिकं गुणादिको लभ्यते १८५

प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवं तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये १८६

प्रायश्चित्तनिवृत्ते कृते पुनः पतितेन प्रायश्चित्ते सपिण्डसमानोदकाले नैव कृतप्रायश्चित्तेन सह पवित्रे जलाधारे स्नात्वा जलपूर्णं नवं घटं प्रक्षिपेयुः इहैव च घटस्य स्थाने

171A

सामीवदमिसवकृतेन गवदाप्नोतीयते १८६

स त्वप्सु तं घटं प्रास्य प्रविश्य भवनं स्वकं सर्वाणि ज्ञातिकार्याणि यथापूर्वं समाचरेत् १८७

स इति सकृतप्रायश्चित्तः तत्पूर्वोक्तं घटं जले क्षिप्त्वा ज्ञातिभिः ततः स्वकीयं भवनं प्रविश्य यथापूर्वं सर्वाणि ज्ञातिकर्माणि कुर्यात् १८७ ॥

एतदेव विधिं कुर्याद्योषित्सु पतितास्वपि वस्त्रान्नपानं देयं तु वसेयुश्च गृहान्तिके १८८

एतदिति स्त्रीष्वपि पतितासु एवमेव पतितस्योदकं कार्यमित्यादि विधिं भर्त्रादिः सपिण्डसमानोदकवर्गः कुर्यात् ग्रासाच्छादनानि चैताभ्यो देयानि गृहसमीपे वासो वासार्थं कुटी देया १८८॥

एनस्विभिरनिर्णिक्तैर्नार्थं किंचित्सहाचरेत् कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित् १८९

एनस्विभिरिति पापकारिभिरकृतप्रायश्चित्तैः सह दानप्रतिग्रहादिकमर्थं किंचिन्नानुतिष्ठेत् कृतप्रायश्चित्तांश्च कदाचिदपि पूर्वकृतपापेन न निन्देत् किं तर्हि पूर्ववद्व्यवहरेत् १८९ ॥

बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत् १९०

अस्यापवादमाह बालघ्नानिति बालं योऽहन् बालघ्नः येनोपकारस्तस्योपकारं यो विनाशितवान् स्त्रियं च यो व्यापादितवान् एतान् यथावत्कृतप्रायश्चित्तानपि संसर्गितया न परिवसेत् १९० ॥

येषां द्विजानां सावित्री नानूच्येत यथाविधि तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत् १९१

येषामिति येषां ब्राह्मणादीनां विधिवत् गौणकालेष्वपि उपनयनं न कृतं तान् त्रीन् प्राजापत्यान् कारयित्वा यथाशास्त्रमुपनयेत् याज्ञवल्क्यादिभिर्व्रात्यस्तोमादिप्रायश्चित्तमुक्तं तेन सह … लाघवगौरवमपेक्ष्य … विकल्पः … १९१

प्रायश्चित्तं चिकीर्षन्ति विकर्मस्थास्तु ये द्विजाः ब्रह्मणा च परित्यक्तास्तेषामप्येतदादिशेत् १९२

प्रायश्चित्तमिति ये प्रतिषिद्धशूद्रसेवादिना द्विजास्तथा चोपनीता अपि वेदत्यागेन … प्रायश्चित्तं कर्तुमिच्छन्ति तेषामप्येतत्त्रीन्प्राजापत्यानुपदिशेत् १९२ ॥

यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनं तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च १९३ ॥

यदिति गर्हितेन कर्मणा निषिद्धेनासत्प्रतिग्रहादिना ब्राह्मणा यद्धनमर्जयन्ति तस्य धनस्य त्यागेन जप्येन तपसा वक्ष्यमाणाभ्यां शुध्यन्ति धनत्यागे च प्रायश्चित्तविधानात् … प्रायश्चित्तं … विक्रयविक्रययादावपि १९३ ॥

जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् १९४

जपित्वेति त्रीणि सावित्रीसहस्राणि … मासं गोष्ठे … प्रायश्चित्तं … दोषेण … प्रतिग्रह … विशेषादिसंबन्धः १९४

उपवासकृशं तं तु गोव्रजात्पुनरागतं प्रणतं प्रति पृच्छेयुः साम्यं सौम्येच्छसीति किं १९५ ॥

उपवासेति केवलक्षीराहारेण … गोष्ठात्पुनरागतं प्रणतं … किमस्माभिः सह साम्यं … करिष्यसि … ब्राह्मणाः परिपृच्छेयुः १९५ ॥

172

सत्यमुक्त्वा तु विप्रेषु विकिरेद्यवसं गवां ॥ सत्यमिति सत्यमेतदुक्तं न पुनरेवं करिष्याम इति ब्राह्मणेषु कथयित्वा गवां यवसं दद्यात् तस्मिन् यत्र तत्र ... देशे गोभिः पवित्रीकृते ...स्ते ... संव्यवहार्यो भवतीति ... १९६ ॥

व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति १९७ व्रात्यानामिति व्रात्यानां ... प्रतिलोमादियाजनं कृत्वा ... दहनाहीदि कृत्वा अभिचारं श्येनादिकं ... अभिचारणीयस्याहीने ... अहीनयागविशेषः अहीनयजनमशुचिकरमिति क्रमः त्रिरात्रादिनस्य याजनं कृत्वा त्रिभिः कृच्छ्रैर्विशुध्यति १९७ ॥

शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः संवत्सरं यवाहारस्तत्पापमपसेधति १९८

शरणागतमिति शरणागतं परित्राणार्थमुपगतं ... अनध्याप्यं च वेदमध्याप्य ... तत्पापं संवत्सरं यवाहारोऽपनुदति १९८ ॥

श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति १९९ ॥

श्वशृगालेति कुक्कुरशृगालगर्दभनराश्ववराहैश्च ग्राम्यैश्च मांसादैर्मार्जारादिभिर्दष्टः प्राणायामेन शुध्यति १९९ ॥

षष्ठान्नकालता मासं संहिताजप एव वा होमाश्च शाकला नित्यमपाङ्क्त्यानां विशोधनं २०० ... अपाङ्क्त्यानां ... स्तेनपतिताः क्लीबादि ... षष्ठान्नकालता ... संहिताजपो वेदसंहिता ... तथा ... होमा ...

... अपाङ्क्त्यानां विशोधनं ... प्रायश्चित्तं ... मासं ... कालान्तरे ... भोजनं वेदसंहिताजपो ... २०० ॥

उष्ट्रयानं समारुह्य खरयानं च कामतः स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति २०१

उष्ट्रयानमिति उष्ट्रप्रयुक्तं यानं ... खरयानं ... कामतः आरुह्य ... नग्नः स्नात्वा प्राणायामेन शुध्यति २०१

विनाद्भिरप्सु वाप्यार्तः शारीरं संनिवेश्य च सचैलो बहिराप्लुत्य गामालभ्य विशुध्यति २०२

विनेति ... जले जलमध्ये वा वेगार्तो मूत्रपुरीषं वा कृत्वा सवासा बहिर्ग्रामात् नद्यादौ स्नात्वा गां च स्पृष्ट्वा विशुद्धो भवति २०२ ॥

वेदोदितानां नित्यानां कर्मणां समतिक्रमे स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं २०३ ॥

वेदेति वेदविहितानां कर्मणामग्निहोत्रादीनां ... प्रायश्चित्तविशेषाणां ... लोपे स्नातकव्रतानां च ... समतिक्रमे ... अहोपवासः प्रायश्चित्तं कर्तव्यं २०३

हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं च गरीयसः स्नात्वानश्नन्नहःशेषमभिवाद्य प्रसादयेत् २०४ ॥ हुंकारमिति हुंकारं ... तूष्णीं ... त्वंकारं च विद्यादिकं ... अहःशेषं ... अभोजनं ... पादोपसंग्रहणेन ... कोपं ... २०४

ताडयित्वा तृणेनापि कण्ठे वाबध्य वाससा विवादे वा विनिर्जित्य प्रणिपत्य प्रसादयेत् २०५

172 A

ताडयित्वेति ब्राह्मणं तृणेनापि ताडयित्वा कण्ठे वा वाससा बद्ध्वा विवादे च जित्वा प्रणिपातेन प्रसादयेत् २०५॥

अवगूर्य त्वब्दशतं सहस्रमभिहत्य च । जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते २०६॥

अवगूर्येति ब्राह्मणस्य हननेच्छया दण्डमुद्यम्य वर्षशतं नरकं प्राप्नोति दण्डादिना प्रहृत्य वर्षसहस्रं नरकं प्राप्नोति २०६॥

शोणितं यावतः पांसून्संगृह्णाति महीतले । तावन्त्यब्दसहस्राणि तत्कर्ता नरके वसेत् २०७॥

शोणितमिति प्रहृतस्य ब्राह्मणस्य रुधिरं यावत्संख्याकान् रजःकणान् भूमौ पिण्डीकरोति यावत्संख्याकानि वर्षसहस्राणि तच्छोणितोत्पादको नरके वसेत् २०७

अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने । कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितम् २०८

अवेति ब्राह्मणस्य हननेच्छया दण्डाद्युद्यमने कृच्छ्रं कुर्यात् दण्डादिप्रहारे दत्ते अतिकृच्छ्रं ब्राह्मणं प्रहृत्य रुधिरमुत्पाद्य कृच्छ्रातिकृच्छ्रौ कुर्वीत २०८॥

अनुक्तनिष्कृतीनां तु पापानामपनुत्तये । शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् २०९

अनुक्तेति अनुक्तप्रायश्चित्तानां पापानां निर्हरणार्थं कर्तुः शरीरधनादिसामर्थ्यमवेक्ष्य पापं च ज्ञानाज्ञानकृतं ब्राह्मणादिहेतोर्गुरुलघुभावादि हेतोः प्रायश्चित्तं प्रकल्पयेत् २०९

यैरभ्युपायैरेनांसि मानवो व्यपकर्षति । तान्वोऽभ्युपायान्वक्ष्यामि देवर्षिपितृसेवितान् २१०॥

यैरिति यैर्हेतुभिरुपायैः पापान्यपनुदति तान् पापनाशहेतून् देवर्षिपितृभिरनुष्ठितान् युष्माकं वक्ष्यामि २१०॥

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः २११॥

त्र्यहमिति प्राजापत्यं कृच्छ्रमाचरन् द्विजातिस्त्रीणि दिनानि प्रातर्भुञ्जीत प्रातःप्राह्णे भोजनाभावो विशेषाद्दिवाकालपरः अतएव वशिष्ठः त्र्यहं दिवा भुक्ते नक्तम् त्र्यहमद्यादयाचितं त्र्यहं न भुङ्क्त इति कृच्छ्रः आपस्तम्बेनाप्युक्तं त्र्यहमनक्ताश्यदिवाशी च ततस्त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किंचनेति कृच्छ्रद्वादशरात्रस्य विधिः अतएव दिनत्रयं सायं मध्याह्नातीते भुञ्जीत अन्यानि दिनत्रयमयाचितं तावदन्नं भुञ्जीत परं च दिनत्रयं न किंचिदश्नीयात् अत्र ग्रासपरिमाणमापस्तम्बेनोक्तं सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिस्तथा चतुर्विंशतिरयाचिते परं निरशनं स्मृतं कुक्कुटाण्डप्रमाणं च यथा वा सुप्रविशेन्मुखे एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनं हविष्यान्नमश्नीयात् ग्रासा ये तन्यादिवा चीर्णे एष हानिर्निशायां हीयानां ग्रामान्ते ... नायथा अयथा विज्ञेयो वायोऽपवा साप्ताहमवेत २११॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् २१२

गोमूत्रमिति गोमूत्रादिषट्कीकृतस्य कस्मिन्नहनि मिलितेन तन्मात्रं किंचिदश्नीयात् अपरदिने चोपवासः इत्येतत्सान्तपनं कृच्छ्रं स्मृतं यदा तु गोमूत्रादि षट्प्रत्येकं यद्दिनानुपूर्व्यं सप्तमदिने चोपवासः तदा महासान्तपनं भवति तथा च याज्ञवल्क्यः कुशोदकं च गोक्षीरं दधि मूत्रं शकृद्घृतम् जग्ध्वा परेऽह्न्युपवसेत् कृच्छ्रं सान्तपनं चरन् पृथक् सान्तपनद्रव्यैः षडहः सोपवासकः सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनः स्मृतः २१२

एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत् । त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः २१३

173.

एकैकमिति अतिकृच्छ्रे द्विजातिरनुतिष्ठन् स्नातः सायमयाचितादिरूपेण एकैकं ग्रासं त्रीणि त्र्यहाणि पूर्ववत् भुंजीत अन्त्यं त्र्यहं न किंचिद्भुञ्जीत २१३॥

तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान् प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः २१४

ति... उष्णोदकोष्णक्षीरोष्णघृतोष्णवायुं एकवारं स्नानं कुर्वन् संयतवान् पिबेत् अत्र पराशरोक्तो विशेषः षट्पलं तु पिबेदंभस्त्रिफलं तु पयः पिबेत् पलमेकं पिबेत्सर्पिस्त[प्तकृच्छ्रे विधीयते] तप्तमिति तप्तकृच्छ्रं चरन्द्विजा ... प्तकृच्छ्रे विधीयते २१४॥

यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनं पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः २१५

यतात्मन इति विगतात्मवतो अप्रमत्तस्य संयतेंद्रियस्य द्वादशाहमभोजनमेव पराकाख्यः कृच्छ्रः महदादिमहापातकेतरसमस्तगुरुलघुपापापनोदनः २१५॥

एकैकं ह्रासयेत्पिंडं कृष्णे शुक्ले च वर्द्धयेत् उपस्पृशंस्त्रिषवणमेतच्चांद्रायणं स्मृतं २१६ एकैकमिति सायं प्रातर्मध्याह्नेषु स्नानं कुर्वी[त]

पौर्णमास्यां पंचदशग्रासानश्नीयात् ततः कृष्णप्रतिपत्प्रभृति एकैकं ग्रासं ह्रासयेत् यथा चतुर्दश्यामेको ग्रासः संपद्यते ततोऽमावस्यायामुपोष्य शुक्लप्रतिपत्प्रभृति एकैकं ग्रासं वर्द्धयेत् यथा पौर्णमास्यां पंचदशग्रासाः संपद्यंते एतत्पिपीलिकामध्यं संपद्यते एतत्पिपीलिकाख्यं चांद्रायणं स्मृतं २१६॥

एवमेव विधिं कृत्स्नमाचरेद्यवमध्यमे शुक्लपक्षादिनियतश्चरंश्चांद्रायणं व्रतं २१७॥

एवमिति एवमेव पिंडह्रासवृद्धिरूपं कृत्स्नमात्मकं विधानं यवमध्याख्ये चांद्रायणे शुक्लपक्षमादितः कृत्वा संयतेंद्रियश्चांद्रायणमनुतिष्ठेत् अत्र विशेषः तत्र च शुक्लप्रतिपदमारभ्य एकैकं पिंडं वर्द्धयेत् यथा पौर्णमास्यां पंचदशग्रासाः संपद्यंते ततः कृष्णप्रतिपदमारभ्य एकैकं पिंडं ह्रासयेत् यथा अमावस्यायामुपवासो भवति २१७

अष्टावष्टौ समश्नीयात्पिंडान्मध्यंदिने स्थिते नियतात्मा हविष्याशी यतिचांद्रायणं चरन् २१८।

अष्टाविति यतिचांद्रायणमनुतिष्ठन् शुक्लपक्षात्कृष्णाद्वा आरभ्य मासमेकं संयतेंद्रियः सन् अष्टावष्टौ ग्रासान्मध्यंदिने भुंजीत मध्यंदिन इति हविष्यद्रव्याशितया मांसभोजनं निषि[द्धं] ... २१८

चतुरः प्रातरश्नीयात्पिंडान्विप्रः समाहितः चतुरोऽस्तमिते सूर्ये शिशुचांद्रायणं स्मृतं २१९॥

चतुर इति प्रातश्चतुरो ग्रासानश्नीयात् अस्तमिते च सूर्ये चतुरो ग्रासान् भुंजीत एतत् शिशुचांद्रायणं स्मृतम् २२०॥

यथाकथंचित्पिंडानां तिस्रोऽशीतीः समाहितः मासेनाश्नन्हविष्यस्य चंद्रस्यैति सलोकतां २२० यथेति तिस्रो अशीतीर्हविष्यस्य ...

तिसृणामशीतीनां पिंडानां चत्वारिंशदधिकशतद्वयं यथाकथंचित् कदाचिद्द्व्यहं कदाचित् षोडश कदाचिद्विंशति एवं मासेन नियमेन कथंचित् पिंडान् मासेन संयतात्मा भुंजानः चंद्रसलोकतां याति

एवं पापक्षयार्थमभ्युदयार्थं च स्वशक्त्यपेक्षया याज्ञवल्क्यः यथाकथंचित्पिंडैश्चंद्रस्यैति सलोकतां कृच्छ्रकृच्छ्रमेकाग्रमनसः ... प्रियमाप्नुयात् अतः प्राजापत्यादिकृच्छ्रमपि

एतद्रुद्रास्तथादित्या वसवश्चाचरन्व्रतं सर्वाकुशलमोक्षाय मरुतश्च महर्षिभिः २२१॥ अभ्युदयफलमिति वासवश्चान्ते ...

एतदिति एतच्चांद्रायणाख्यं व्रतं रुद्रादित्यवसुमरुतां महर्षिभिः सह सर्वपापनाशाय गुरुलघुपापापनोदाय सकृदाहुतिप्रकारेणाचरितवंतः २२१॥

महाव्याहृतिभिर्होमः कर्तव्यः स्वयमन्वहं अहिंसा सत्यमक्रोधमार्जवं च समाचरेत् २२२ महेति महाव्याहृतिभिर्भूर्भुवः स्वरेताभिः

173 A

अत्यंतं द्विरनो दे दुष्कृतो निवृत्तीयेन पापिष्टव वनात् अज्ञेय न[illegible] अक्रयीत अहिंसा सत्याक्रोधा कौटिला नि[illegible]वृत्तिश्चेत यथोक्ता नित्य पार्श्वेतपा विहिता नितपापि

त्रिरह्नस्त्रिर्निशायां च सवासा जलमाविशेत् । स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित् २२३ ॥ व्रतामतेषायषपदेशः २२२

कृत्वा नार्थं मवेल्पेन यादिजलं प्रविशेत्स्पत्त्वपि पीलिकामध्ये यवमध्ये यवमध्ये चांद्रायणे त[illegible] चांद्रायणा विषयं न योरूपम्येषं स्त्रिषु वाणिसूक्त [illegible] शूद्रपतित [illegible] त्रिरिति त्रिरहतिरात्रा वातिमध्यान्हे

स्थानासनाभ्यां विहरेदशक्तोऽधः शयीत वा । ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः २२४ ॥ इतेकदा वितसंभाषा [illegible] २२३

स्थानेति अहनि रात्रौ च उत्थितश्रामीतस्तुपस्यानतत् शयीत अशक्ते स्थंडिलेशयीत तनावद्वादौ ब्रह्मचारी स्त्रीसंयोगरहितव्रते मौंजीदंडादियुक्तः पालाजे[illegible] गुरुदेवब्राह्मणानां चपूजक

सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः । सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृतः २२५ ॥ भवेत् २२४

सावित्रीमिति सावित्रीं च सदा जपेत् पवित्राणि चाघमर्षणादीनि यथाशक्ति जपेत् एतच्च यथा चांद्रायणे तथा प्राजापत्यादिकृच्छ्रेष्वपि यत्नवान् प्रायश्चित्तार्थमनुतिष्ठेत् २२५ ॥

एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः । अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत् २२६ ॥

एतैरिति लोकविदितपापान् द्विजातय एभिः कृच्छ्रप्रायश्चित्तैर्वेदसमाप्यपरिषदा शोधनीयाः अप्रकाशितपापांस्तु मानवान्मंत्रैर्होमैश्च परिषदेव शोधयेत् नयपपपरिषदिति रहस्यत्यनाशः तपाप्यकश्चकपापके नापि कृतं लोकाविदितं किं प्रायश्चित्तं स्यादिति सामान्यप्रश्ने न विरोधः २२६ ॥

ख्यापनेनानुतापेन तपसाऽध्ययनेन च । पापकृन्मुच्यते पापात्तथा दानेन चापदि २२७ ॥ ख्यापनेनेति पापकारी नरो लोके

पुनःजपापकथनेन निन्द्यामति पापकारिणामिति पश्चात्तापेन शुद्धाति तपसा चोग्ररूपेण सावित्रीजपादिना च पापान्मुक्तो भवति ख्यापनं चेदं प्रकाशप्रायश्चित्ताग[illegible] प्रायश्चित्तागमे रहस्यतहानि [illegible] [illegible] रहस्या गमे वदनेन निप्राजापत्य व्रतपक्षे च विद्यान्नान् एवञ्चपञ्चपुराणी यावति[illegible] नवन्नस्यहत्यानिमित्त

केद्वादशवार्षिकव्रतेमासि साईदय प्राजापत्यान् वत्सरे विशद्धेनेवा भवति द्वादशाभिर्वर्षैः षष्ट्याधिकशतत्रयं तेनेवा भवंतीति २२७ ॥

यथा यथा नरोऽधर्मं स्वयं कृत्वाऽनुभाषते । तथा तथा त्वचेवाहिस्तेनाधर्मेण मुच्यते २२८ ॥

यथेति यथा यथा स्वयं पापं कृत्वा नरो भाषते लोके ख्यापयति तथा तथा तेन पापेन सर्प इव जीर्णात्त्वचा मुच्यत इति ख्यापनविधेरनुवादः २२८ ॥

यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति । तथा तथा शरीरं तत्तेनाधर्मेण मुच्यते २२९ ॥

यथेति तस्य पापकारिणो मनो यथा यथा दुष्कृतं कर्म निंदति तेन तथा तथा शरीरं जीवात्मा तेनाधर्मेण मुक्तो भवति अयमनुतापानुवादः [illegible] २२९ ॥

कृत्वा पापं हि संतप्य तस्मात्पापात्प्रमुच्यते । नैवं कुर्यां पुनरिति निवृत्त्या पूयते तु सः २३० ॥ कृत्वेति पापं कृत्वा पश्चात्संतप्यते पापात्प्रमु

च्यते इत्युक्तमपि नैवं कुर्यां पुनरित्येतदर्थमिदं तदर्थं मन्वादिनं यदा तपश्चात्तापेनैवं पुनः करिष्यामीत्येवं निवृत्तिरूपसंकल्पफलकः स्यात्तदा[illegible] तेन सन्तापात्पूतो भवतीति

एवं संचिन्त्य मनसा प्रेत्य कर्मफलोदयम् । मनोवाङ्मूर्तिभिर्नित्यं शुभं कर्म समाचरेत् २३१ ॥ नचैनिःशेषि [illegible] प्रकाशप्रायश्चित्ता

गविधानार्थम् २३०

174

एवमिति पूर्वं शुभाशुभानां कर्मणां परलोके इष्टानिष्टफलं मनसा विचार्य मनोवाक्कायैः शुभमेव कर्म कुर्यात् इष्टफलत्वात् शुभं नराकादिदुःखहेतुत्वात् २३१ ॥

अज्ञानाद्यदि वा ज्ञानात्कृत्वा कर्म विगर्हितं तस्माद्विमुक्तिमन्विच्छन्द्वितीयं न समाचरेत् २३२ अज्ञानादिति अज्ञानाद्यदि ज्ञानतो वा निषिद्धं कर्म कृत्वा तस्मात्पापान्मुक्तिमिच्छन् पुनस्तन्न कुर्यात् तत्पुनर्न कुर्यां इत्येवं संकल्प्य प्रायश्चित्ते गौरवार्थं मन्तव्यं एवं देवलः विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेदिति २३२

यस्मिन्कर्मण्यस्य कृते मनसः स्यादलाघवं तस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टिकरं भवेत् २३३ ॥

यस्मिन्निति यस्य पापकारिणो यस्मिन्प्रायश्चित्ताख्ये कर्मण्यनुष्ठिते न चित्तस्य संतोषः स्यात् तस्मिन्तदेव प्रायश्चित्तं तावदावर्तयेत् यावन्मनसः संतोषः प्रसादश्च स्यात् २३३ ॥

तपोमूलमिदं सर्वं दैवमानुषकं सुखं तपोमध्यं बुधैः प्रोक्तं तपोन्तं वेददर्शिभिः २३४ तप इति यदेतत्सर्वं देवानां मनुष्याणां च सुखं तस्य तपः कारणं तपसैव च तस्य स्थितिः तपोन्तः प्रतिनियतावधिरेव दिव्यादिसुखस्य तपसा प्रजानादिभिर्वेदार्थज्ञैरुक्तं प्रजापत्यादिप्रायश्चित्तात्मकतपः प्रसंगेन वेदवदस्मार्तं च सर्वं तपो माहात्म्यकथनं

ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणं वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनं २३५ ब्राह्मणस्येति ब्राह्मणस्य ब्रह्मचर्यात्मक २३५ वेदान्तावबोधनं तपो राजन्यस्य रक्षणं तपः वैश्यस्य कृषिवाणिज्यपाल्यादिकं तपः शूद्रस्य ब्राह्मणपरिचर्या तपः इति वर्णविशेषेणोत्कर्षं वक्तुम् २३५ ॥

ऋषयः संयतात्मानः फलमूलानिलाशनाः तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरं २३६ ऋषय इति ऋषयो वाङ्मनःकायनियतात्मानः फलमूलवायुभक्षाः तपसैव जंगमस्थावरसहितं पृथिव्यंतरीक्षस्वर्गात्मकं लोकत्रयमेकदेशस्थाः संतो निष्पापांतःकरणाः प्रत्यक्षेण पश्यन्ति २३६ ॥

औषधान्यगदो विद्या दैवी च विविधा स्थितिः तपसैव प्रसिध्यन्ति तपस्तेषां हि साधनं २३७ औषधानीति औषधानि व्याध्युपशमनहेतुकानि अगदो गदाभावो नैरुज्यमिति यावत् विद्या ब्रह्मकर्मात्मकवेदार्थज्ञानं देवमंत्रविभिनी चनानारूपा स्वर्गादावस्थितिः इत्येतानि तपसैव प्राप्यन्ते यस्मात्तपस्तत्प्राप्तिनिमित्तं २३७

यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करं सर्वं तत्तपसा साध्यं तपो हि दुरतिक्रमं २३८ ॥

यदिति यत् दुःखेन तीर्यते ग्रहदोषमातंगादि यद् दुःखेन प्राप्यते क्षत्रियादिना यथा विश्वामित्रेण तेनैव शरीरेण ब्राह्मण्यादि यद् दुःखेन गम्यते मेरुपृष्ठादि यद् दुःखेन क्रियते गोप्रकुरदानादि तत् सर्वं तपसा साध्यते शक्यते यस्मादतिदुष्करकार्यकारणं तपो दुर्लंघनशक्ति २३८ ॥

महापातकिनश्चैव शेषाश्चाकार्यकारिणः तपसैव सुतप्तेन मुच्यन्ते किल्बिषात्ततः २३९

महेति ब्रह्महत्यादिमहापातककारिणः शेषा उपपातकाद्यकार्यकारिणश्च तपसैव उक्तरूपेणानुष्ठितेन तस्मात्पापान्मुच्यन्ते उक्तस्यापि पुनर्वचनं प्रायश्चित्तस्तुत्यर्थं २३९

कीटाश्चाहिपतंगाश्च पशवश्च वयांसि च स्थावराणि च भूतानि दिवं यान्ति तपोबलात् २४० कीटा इति कीटसर्पशलभपशुपक्षिणः स्थावराणि च वृक्षगुल्मादीनि भूतानि तपोमाहात्म्येन स्वर्गं यान्ति इति हासादौ कपोतोपाख्यानादिषु पक्षिणामपि श्रूयते शरणागतकपोतपालनादिकं तपः [illegible] श्रूयते की

174A

दानं यज्ञाति सहस्रे [illegible] तेनैषचैन कल्मषाश्रवि [illegible] न्यांतरकृतेन सकृतेन दिवं याति २४०॥

यत्किंचिदेनः कुर्वंति मनोवाङ्मूर्तिभिर्जनाः तत्सर्वं निर्दहंत्याशु तपसैव तपोधनाः २४१॥

यत्किंचिदिति यत्किंचित्पापं मनोवाग्देहैर्मानवाः कुर्वंति तत्सर्वं पापं तपसैव निर्दहंति तपोधनाः इति [illegible] तपोधनाः २४१॥

तपसैव विशुद्धस्य ब्राह्मणस्य दिवौकसः इज्याश्च प्रतिगृह्णंति कामान्संवर्द्धयंति च २४२॥

तपसैवेति प्रायश्चित्ततपसा क्षीणपापस्य ब्राह्मणस्य यागे हवींषि देवाः प्रतिगृह्णंति अभिलषितार्थांश्च प्रयच्छंति २४२॥

प्रजापतिरिदं शास्त्रं तपसैवासृजत्प्रभुः तथैव वेदानृषयः तपसा प्रतिपेदिरे २४३॥

प्रजापतिरिति हिरण्यगर्भः सकललोकोत्पत्तिस्थितिप्रलयप्रभुः तपः कृत्वा सर्वकर्मेदं ग्रंथमकरोत् तथैव ऋषयो वशिष्ठादयस्तपसैव मंत्रब्राह्मणात्मकान्वेदान्प्राप्तवंतः २४३

इत्येतत्तपसो देवा महाभाग्यं प्रचक्षते सर्वस्यास्य प्रपश्यंतस्तपसः पुण्यमुत्तमम् २४४

इत्येतदिति सर्वस्य जंतोर्यत्फलं भवति तत्तपसः सकाशात् इत्येवं देवाः प्रपश्यंतः तपोमूलमिदं सर्वमित्यादि तपोमाहात्म्यं प्रवदंति २४४॥

वेदाभ्यासोन्वहं शक्त्या महायज्ञक्रियाक्षमाः नाशयंत्याशु पापानि महापातकजान्यपि २४५

वेदेति यथाशक्ति प्रत्यहं वेदाध्ययनं पंचमहायज्ञानुष्ठानं [illegible] महापातकजनितान्यपि पापानि शीघ्रं नाशयंति किं पुनरन्यानि २४५॥

यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात् तथा ज्ञानाग्निना पापं सर्वं दहति वेदवित् २४६

यथैधिति यथाग्निः काष्ठान्यासन्नानि क्षणेनैव तेजसा निःशेषं करोति तथा ज्ञानाग्निना पापं सर्वं वेदार्थज्ञो ब्राह्मणो नाशयति परमात्मज्ञानस्यैतत्पापक्षयोत्कर्षज्ञापनार्थमेतत् २४६

इत्येतदेनसामुक्तं प्रायश्चित्तं यथाविधि अत ऊर्ध्वं रहस्यानां प्रायश्चित्तं निबोधत २४७॥

इत्येतदिति इत्येतद्ब्रह्महत्यादीनां प्रकाशपापानां प्रायश्चित्तं यथाविध्यभिहितं अत ऊर्ध्वमप्रकाशानां पापानां प्रायश्चित्तं शृणुत अयं श्लोको गोविंदराजेन लिखितः मेधातिथिना न लिखित एव २४७

सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश अपि भ्रूणहनं मासात्पुनंत्यहरहः कृताः २४८

सव्याहृतीति सव्याहृति सप्रणवकाः सप्रणवकाः सकलभ्रूकादिविधिना प्रत्यहं षोडश प्राणायामाः कृता मासाद्ब्रह्महनमपि निष्पापं कुर्वंति अपिशब्दादतिदेशिकब्रह्महत्याप्रायश्चित्ताधिकृतमपि तच्च प्रायश्चित्तं [illegible] नामी [illegible] ब्राह्मणादेर्ज्ञानेन कृतं २४८

कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च प्रतीत्यृचम् माहित्रं शुद्धवत्यश्च सुरापोपि विशुध्यति २४९

कौत्समिति कौत्सेन ऋषिणा दृष्टं अपनः शोशुचदघमित्येतत्सूक्तं वसिष्ठेन ऋषिणा दृष्टं प्रतिस्तोमेभिरुषसं वसिष्ठा इत्येवं ऋचं माहित्रं महित्रीणामवोस्त्वित्येतत्सूक्तं शुद्धवत्य एतानि [illegible] प्रत्यहं [illegible] सुरापोपि विशुध्यति अपिशब्दादतिदेशिकसुरापानप्रायश्चित्ताधिकृतोपि २४९॥

175

म. १७५

सकृज्जप्त्वास्य वामीयं शिवसंकल्पमेव च अपहृत्य सुवर्णं तु क्षणाद्भवति निर्मलः २५० सकृदिति ब्राह्मणसुवर्णमपहृत्यास्य वामीयमस्य वामस्य पलितस्य होतुरिति सूक्तं वा मासमेकं प्रत्यहमेकवारं जपित्वा शिवसंकल्पं च यज्जाग्रतो दूरमित्यादि मन्त्रषट्कं जप्त्वा सुवर्णमपहृत्यापि शुद्धो भवति २५०

हविष्यन्तीयमभ्यस्य नतमंह इतीति च जपित्वा पौरुषं सूक्तं मुच्यते गुरुतल्पगः २५१ हवीति हविष्यान्तमजरं स्वर्विदमेकोनविंशतिर्ऋचः नतमंहो दुरितमित्यष्टौ हविष्यान्त इति वा इति मे मनः शिवसंकल्प इति वा सूक्तं सहस्रशीर्षा पुरुष इत्येतत्षोडशर्चं सूक्तं मासमेकं प्रत्यहमभ्यस्येति अब्राह्मणस्य कृतान्तान्तशोधशास्त्रे न जपित्वा गुरुदारगः तस्मात्पापान्मुच्यते २५१

एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनं अवेत्यृचं जपेदब्दं यत्किंचिदमितीति वा २५२ एनसामिति स्थूलानां पापानां महापातकानां सूक्ष्माणां च उपपातकादीनां निर्हरणं कर्तुमिच्छन्नव ते हेलो वरुणेति ऋचं यत्किंचेदं वरुण दैव्ये जन इत्येतां वा ऋचं वर्षं जपेत् इति। समन इत्येतत्सूक्तं संवत्सरमेकं प्रत्यहं जपेत् २५२

प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितं जपंस्तरत्समन्दीयं पूयते मानवस्त्र्यहात् २५३ प्रतिग्रहेति ब्रह्महत्यादिमहापातकिधनं तत्ताद्दिवा वाऽप्रतिग्राह्यं प्रतिगृह्य तथैव अभक्ष्यकालप्रतिग्रहसंसर्गदुष्टं भुक्त्वा तरत्समन्दीधावतीत्येतां चतस्र ऋचः त्र्यहं जपित्वा त्र्यहं तस्मात्पापान्मुच्यते इति भक्षितेति २५३॥

सोमारौद्रं तु बह्वेना मासमभ्यस्य शुध्यति स्रवन्त्यामाचरन्स्नानमर्यम्णामिति च तृचे २५४ सोमेति सोमारुद्रा धारयेथामसुर्यमित्याद्यस्तृचः अर्यमणं वरुणं मित्रं चेति त्र्यृचं नद्यां स्नात्वा तत्कृत्वा मासमेकं प्रत्येकमभ्यस्य बहुपापो विशुध्यति बहुपापिनां पेशुन्यं तत्तेषां कं प्रायश्चित्तकार्यमिति ज्ञापकमिदं २५४

अब्दार्धमिन्द्रमित्येतदेनस्वी सप्तकं जपेत् अप्रशस्तं तु कृत्वाप्सु मासमासीत भैक्षभुक् २५५ अब्दार्धमिति इन्द्रमित्यादिवर्गसप्तकं सर्वपापेषु इन्द्रं मित्रं वरुणमग्निमित्येता ऋचः षण्मासं जपेत् अप्रशस्तं मूत्रपुरीषोत्सर्गादिकं जले कृत्वा मासं भैक्षभोजी भवेत् २५५

मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः सुगुर्वप्यपहन्त्येनो जप्त्वा वा नम इत्यृचं २५६ मन्त्रैरिति देवकृतस्यैनसोऽवयजनमसीत्यादिभिः शाकलहोममन्त्रैः संवत्सरं घृतहोमं कृत्वा नम इन्द्रश्च इत्येतां वा ऋचं संवत्सरं जपित्वा महापातकजमपि पापं द्विजातिरपहन्ति २५६॥

महापातकसंयुक्तोऽनुगच्छेद्गाः समाहितः अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुध्यति २५७ महापातकी ब्रह्महत्यादिमहापातकयुक्तोऽभितः भैक्ष्याहारो वर्षमेकं संयतेन्द्रियो गवामनुगमनं कुर्वन्पावमानीरित्यृचोऽहरहरभ्यासेन जपित्वा तस्मात्पापाद्विशुद्धो भवति २५७

अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिः २५८॥ अरण्ये इति त्रिभिः पराकैः पूतो मन्त्रब्राह्मणात्मिकां वेदसंहितामरण्ये वा त्रयं अभ्यस्य वा प्रयतो वा हाभ्यन्तरशौचयुक्तः सर्वैर्महापातकैर्मुच्यते २५८॥

त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः मुच्यते पातकैः सर्वैस्त्रिर्जपित्वाऽघमर्षणं २५९॥

175A

ऋतमित्यृचं त्रिरावर्तयन्नप्स्वन्तर्जले निमग्नः सायंकालेषु स्नानं कृत्वा ... त्रिषवणस्नानकाले जले निमज्ज्य ऋतं च सत्यं चेत्यघमर्षणं त्रिरावर्तयेन्न पिता सर्वैः पापैर्मुच्यते तेन ऋग्सूक्तं

यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः। तथाघमर्षणं सूक्तं सर्वपापापनोदनम् २६०॥ उपायापेक्षया ... कायाचारतं

यथेति यथाऽश्वमेधयागः सर्वश्रेष्ठः सर्वपापक्षयहेतुस्तथाऽघमर्षणसूक्तमपि सर्वपापक्षयहेतुरित्यघमर्षणसूक्तोत्कर्षः २६०॥

हत्वा लोकानपीमांस्त्रीनश्नन्नपि यतस्ततः। ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किंचन २६१ हत्वेति भूरादिलोकत्रयमपि हत्वा यस्य

पातकादीनामश्नन्नपि यतस्ततो ऋग्वेदं धारयन्विप्रादिः न किंचित्पापं प्राप्नोति ऋग्वेदधारणं तद्रहस्यप्रायश्चित्तार्थमुक्तं तत्र रहस्यपापेषु ... संहितामन्त्रब्राह्मणात्मिकाम्भ्यसेत् २६१

ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः। साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते २६२ तदाह ऋगिति ऋक्संहितां मन्त्रब्राह्मणात्मिकां

तत्संमतमात्मिकां ब्राह्मणेत्तरं वेदत्रिवृत्तां त्रिः प्रणवमर्षणं तथा यजुषां मन्त्रब्राह्मणानां संहितां साम्नां वा ब्राह्मणोपनिषत्संहितां वा त्रयमभ्यस्य सर्वपापैः प्रमुक्तो भवति २६२॥

यथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति। तथा दुश्चरितं सर्वं वेदे त्रिवृति मज्जति २६३॥

यथेति त्रिभिर्गायत्र्यात्मना त्रिरावर्तनं त्रिवृत् यथा महाह्रदं प्रक्षिप्तलोष्टं विशीर्यते तथा सर्वं दुश्चरितं त्रिवृति वेदे विनश्यति २६३॥

ऋचो यजूंषि चान्यानि सामानि विविधानि च। एष ज्ञेयस्त्रिवृद्वेदो यो वेदैनं स वेदवित् २६४॥

त्रिवृतमेवाह ऋचः ऋग्वेदमन्त्राः यजूंषि यजुर्मन्त्राः सामानि रथन्तरादीनि नानाप्रकाराणि ब्राह्मणानि पृथक्पृथक् मन्त्रब्राह्मणानि एष त्रिवृद्वेदो ज्ञातव्यो य एनं वेद स वेदवित् २६४

आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता। स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् २६५॥ वेदवित् भवति २६५

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायामेकादशोऽध्यायः ११॥

आद्यमिति सर्ववेदानामाद्यं यद्ब्रह्म त्र्यक्षरमकारोकारमकारात्मकं तेन प्रणवं यत्र त्रयो वेदाः स्थिताः सोऽन्यस्त्रिवृद्वेदः प्रणवाख्यो गुह्यो गोपनीयः वेदमन्त्रश्रेष्ठः ज्ञातव्यः परमार्थाभिधाय

कत्वात् परमात्मप्रकाशकत्वेन तथा ... य एवं ज्ञात्वा तं वेद स वेदवित् ... अनुसृत्य तालोचनाय ... तद्व्याख्यातवान् ... गोविन्दराजनेता

... २६५ इति श्रीकुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यां मनुवृत्तावेकादशोऽध्यायः ११॥

चातुर्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्मस्त्वयानघ। कर्मणां फलनिर्वृत्तिं शंस नस्तत्त्वतः पराम् १ चातुर्वर्ण्यस्येति हे अनघ परहितब्राह्म

णादिवर्णचतुष्टयस्य सान्तरप्रभवस्यायं धर्मस्त्वयोक्तः इदानीं कर्मणां शुभाशुभफलप्राप्तिं परां जन्मान्तरप्रभवां परमार्थरूपामस्माकं ब्रूहीति महर्षयो भृगुमवोचन् १॥

स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः। अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयम् २॥

स तानिति स धर्मप्रधानो मनोरपत्यं भृगुः रहस्यकर्मसंबन्धस्य फलनिश्चयं शृणुतेति तान्महर्षीनब्रवीत् २॥ ॥

176

मा
नु मे
१७६

शुभाशुभफलं कर्म मनोवाग्देहसंभवं । कर्मजा गतयो नृणां उत्तमाधममध्यमाः ३

शुभेतिमनोवाग्देहहेतुकं कर्म विहितनिषिद्धरूपं तद्वशात्फलं तज्जन्यापत्र मनुष्यतिर्यगादिभावेनोत्कृष्टमध्यमाधमयोन्यां मनुष्याणां गतयो जन्मान्तरप्राप्तयो भवन्ति कर्मशब्देन कायचेष्टया मनःकर्मणः अतिसंक्षेपमिदं लक्षणयोगादिध्यानाचरणादावपि क्रियमाणं भवति ३

तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः । दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकं ४ ॥

तस्येति तस्य देहिसंबन्धिनः कर्मणः उत्कृष्टमध्यमाधमत्वेन त्रिविधस्यापि मनोवाक्कायाश्रितत्वात् त्र्यधिष्ठानस्य दशलक्षणोपेतस्य मनः प्रवर्तकं जानीयात् मनसा हि संकल्पितं वाचा वदति क्रियया च करोति तस्मात्तत्प्रवर्तकं मनः भिगच्छति तद्वाचा वदति तत्कर्मणा करोतीति ४ ॥

परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनं । वितथाभिनिवेशश्च त्रिविधं कर्म मानसं ५ ॥

तानि दशलक्षणानि कर्माणि दर्शयितुमाह परद्रव्येष्विति कथं परधनमन्यायेन गृह्णामीति चिन्तनं मनसा ब्रह्मवधादिनिषिद्धाकाङ्क्षा नास्ति परलोकः देह एवात्मेत्येवं त्रिप्रकारमशुभफलं मानसं कर्म एतद्विपरीतं तु त्रिविधं शुभफलं मानसं कर्म शुभाशुभफलं कर्म तु भयं सर्वप्रकारत्वात् ५ ॥

पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः । असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं ६

पारुष्यमिति अप्रियाभिधानमसत्यभाषणं परोक्षे परदोषकथनं असंबद्धाभिधानं राजदेशपौरवार्तादेर्निष्प्रयोजनं वर्णनं इत्येवं चतुःप्रकारमशुभफलं वाचिकं कर्म भवेत् एतद्विपरीतं प्रियसत्यपरगुणाभिधानं श्रुतिपुराणादौ च राजादिचरितकथनं शुभफलं ६

अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च शारीरं त्रिविधं स्मृतं ७ ॥

अदत्तानामिति अन्यायेन परस्वग्रहणमशास्त्रीयहिंसा परदारगमनमित्येवं त्रिप्रकारमशुभफलं शारीरं कर्म एतद्विपरीतं त्रयं शुभफलं ७ ॥

मानसं मनसैवायमुपभुङ्क्ते शुभाशुभं । वाचा वाचा कृतं कर्म कायेनैव च कायिकं ८

मानसमिति मनसा यत्कृतं तत्कृतं वाक्कर्मकृतं तत्फलं सुखदुःखरूपमिह जन्मनि जन्मान्तरे वा मनसैवायमुपभुङ्क्ते एवं वाचाकृतं शुभाशुभं वाग्व्यापारेण मधुरगद्गदभाषितादिना शारीरं शुभाशुभं शरीरव्यापारेण स्रक्चन्दनादिप्रियोपयोगव्याध्यादिनानुभवति तस्मात्प्रयत्नेन शारीरमानसवाचिकाविधर्मरक्षिता मनियमरहितजनकानि च वर्जयेत् कुर्यात्तु ८ ॥

शरीरजैः कर्मदोषैर्याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां मानसैरन्त्यजातितां ९ ॥

शारीरजैरिति यद्यपि प्रायिकानां शारीरवाचिकमानसिकानां त्रयाणामपि पापानि संभवन्ति तथापि स यदि प्रायशो धर्ममेव सेवते धर्ममल्पमिति वाहुल्याभिप्रायेणोक्तं बाहुल्येन शारीरकर्मणां पापेष्वेकः स्थावरत्वमाप्नोति वाहुल्येन वाक्कृतैः पक्षिमृगत्वं वाहुल्येन मनसाकृतैश्चाण्डालादित्वमाप्नोति ९ ॥

वाग्दंडोऽथ मनोदंडः कायदंडस्तथैव च । यस्यैते निहिता बुद्धौ त्रिदंडीति स उच्यते १०

वागितिदमनं दण्डः यस्य वाङ्मनःकायानां दंडाः निषिद्धाभिधानसंकल्पप्रतिषिद्धव्यापारत्यागेन बुद्धौ व्यवस्थिताः स त्रिदंडी उच्यते न तु दंडत्रयधारणमात्रेण १० ॥

त्रिदंडमेतन्निक्षिप्य सर्वभूतेषु मानवः । कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति ११

त्रिदंडमिति एतत्त्रिविधं वागादीनां सर्वभूतगोचरत्वाद्दमनं कृत्वा एतद्दमनार्थमेव कामक्रोधौ च नियम्य ततो मोक्षरूपामिलक्षणां सिद्धिं मनुष्यो लभते ११ ॥

176 A

योस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः १२ कोसौ क्षेत्रज्ञ इत्याह यः अस्य शरीरस्य इति स्वस्वलोकसिद्ध
आत्मोपकारकत्वात् आत्मनः शरीरस्यास्य यः कर्मसु प्रवर्तयिता तं क्षेत्रज्ञं पंडिता वदंति यः पुनः स्वयं व्यापारान् करोति शरीराख्यः स पृथिव्यादिभूतारब्धत्वात् भूतात्मेति पंडितैरुच्यते १२॥

जीवसंज्ञोंतरात्मान्यः सहजः सर्वदेहिनां येन वेदयते सर्वं सुखं दुःखं च जन्मसु १३॥
जीवेति जीवसंज्ञोयं महत्त्वरूपः येनेति करणविभक्तिनिर्देशात् तदुक्तो केवलौ उभौ भूतसंपृक्तौ महान् क्षेत्रज्ञ एव चेति महच्छब्देन प्रत्यगर्थात् शरीरक्षेत्रज्ञातिरिक्तोंऽतः शरीरस्य
आत्मत्वात् आत्मजीवाख्यः सर्वदेहिनां सहजः स्वात्मा यत्र शरीरे तत्र सर्वत्र विनियोगात् येनाहंकारेंद्रियरूपतया परिणतेन कारणभूतेन क्षेत्रज्ञः प्रतिजन्म सुखं दुःखं चानुभवति १३

तावुभौ भूतसंपृक्तौ महान् क्षेत्रज्ञ एव च उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः १४॥
ताविति तौ द्वौ महत्क्षेत्रज्ञौ पृथिव्यादिपंचभूतसंपृक्तौ वक्ष्यमाणं सर्वलोकवेदस्मृतिपुराणादिप्रसिद्धतया तमिति निर्दिष्टं परमात्मानमुत्कृष्टापकृष्टसर्वभूतेषु व्यवस्थितमाश्रित्य तिष्ठतः १४

असंख्या मूर्तयस्तस्य निष्पतंति शरीरतः उच्चावचानि भूतानि सततं चेष्टयंति याः १५ असंख्या इति तस्य परमात्मनः शरीरादसंख्या मूर्तयो
यो जीवाः क्षेत्रज्ञशब्देनावगंतव्याः लिंगशरीरवच्छिन्ना वेदांतानुक्रमेण अग्नेर्विस्फुलिंगा इव निःसरंति या मूर्तय उत्कृष्टापकृष्टभूतानि देहरूपतया परिणतानि सर्वदा कर्मसु चेष्टयंति
१५

पंचभ्य एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणां शरीरं यातनार्थीयमन्यदुत्पद्यते ध्रुवं १६॥
पंचभ्य इति पंचभ्य एव पृथिव्यादिभूतभागेभ्यो दुष्कृतकारिणां मनुष्याणां पीडानुभवप्रयोजकं जरायुजादिदेहव्यतिरिक्तं दुःखमहिम्नः शरीरं परलोके जायते १६॥

तेनानुभूय ता यामीः शरीरेणेह यातनाः तास्वेव भूतमात्रासु प्रलीयंते विभागशः १७॥
तेनेति तेन निर्गतेन शरीरेण तां यमकारितां यातनां दुष्कृतिनो जीवाः स्वकर्मानुभूय स्थूलशरीरनाशे ते शरीरारंभकभूतभागेषु यथा संप्रलीयंते तत्त्वं योगिनो भवंति इत्यर्थः
१७

सोनुभूयासुखोदर्कान्दोषान्विषयसंगजान् व्यपेतकल्मषोभ्येति तावेवोभौ महौजसौ १८ सोनुभूयेति स शरीरी भूतसूक्ष्मादिलिं
गशरीरावच्छिन्नो निषिद्धशास्त्रस्पर्शादिहपरसंगभाजो विषयोपभोगजनितयमलोकदुःखान्यनुभूयानंतरं भोगादपहतपाप्मा तावेव महत्परमात्मानौ महावीर्यौ हावाश्रयति १८॥

तौ धर्मं पश्यतस्तस्य पापं चातंद्रितौ सह याभ्यां प्राप्नोति संपृक्तः प्रेत्येह च सुखासुखं १९
ताविति तौ महत्परमात्मानौ अनलसौ तस्य धर्मस्य जीवस्य धर्ममधर्मं पापं च पापं सहद्विचारयतः पापाभ्यां धर्माधर्माभ्यां युक्तो जीवः परलोके इहलोकयोः सुखदुःखं प्राप्नोति १९॥

यद्याचरति धर्मं स प्रायशोऽधर्ममल्पशः तैरेव चावृतो भूतैः स्वर्गे सुखमुपाश्नुते २०॥
यदीति स यदि जीवो मानुषदशायां बाहुल्येन धर्मं सेवतिस्तु तिष्ठल्पं चानादौ तैरेव पृथिव्यादिभूतैः स्थूलशरीररूपतया परिणतैर्युक्तः स्वर्गे सुखमनुभवति २०॥

यदि तु प्रायशोऽधर्मं सेवते धर्ममल्पशः तैर्भूतैः स परित्यक्तो यामीः प्राप्नोति यातनाः २१ यदीति यदि पुनः स जीवो मानुषदशायां बाहुल्ये

177

मा॰ सु॰ टी॰ २०

नपापमनुतिष्ठति अयं च गुणः तदा तैरेव भूतैर्मानुषदेहरूपतया परिणतैः सह क्रोमृतः समनंतरं पंच... महाभूतैः सह ... यातनामनुभवोचितमज्ञानकठिनदेहोमीः पीडा अनुभवति २१

यामीस्ता यातनाः प्राप्य स जीवो वीतकल्मषः तान्येव पंचभूतानि पुनरप्येति भागशः २२

क्ष्मीरिति स जीवो यमकारिता यातनाः पीडास्तेन कठिनदेहेनानुभूय तद्भोगेनापहतपापः ततः जरागजादिशरीरारंभकानि पृथिव्यादिभूतभागानपि तिष्ठति मानुषादिशरीरोत्पत्तये २२

एता दृष्ट्वास्य जीवस्य गतीः स्वेनैव चेतसा धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनः २३॥

एता इति अस्य जीवस्य धर्माधर्महेतुकाः स्वर्गनरकाद्युपभोगोचितप्रियाप्रियदेहप्राप्तीः अतः कारणाज्ज्ञात्वा धर्मानुष्ठाने मनः सदा संगतं कुर्यात् २३॥

सत्वं रजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान् यैर्व्याप्येमान्स्थितो भावान्महान्सर्वानशेषतः २४

सत्वमिति सत्वं रजस्तमः इति त्रीणि वक्ष्यमाणलक्षणानि आत्मोपकारकत्वादात्मनो महतो गुणान् जानीयात् यैर्व्याप्तो महान् इमान् स्थावरजंगमरूपान् सर्वान् पदार्थान् निःशेषेण व्याप्य स्थितः २४

यो यदैषां गुणो देहे साकल्येनातिरिच्यते स तदा तद्गुणप्रायं तं करोति शरीरिणं २५॥

यो इति यद्यपि सर्वमेवेदं त्रिगुणं तथापि यत्र देहे येषां गुणानां मध्ये यो गुणो यदा साकल्येनाधिको भवति तदा तद्गुणलक्षणबहुलं तं देहिनं करोति २५॥

सत्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतं एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः २६ सत्वमिति सत्वादीनां ...णामाह सत्वमिति यथार्थावभासो
ज्ञानं तत्सत्वस्य लक्षणं एतद्विपरीतमज्ञानं तत्तमोलक्षणं विषयाभिलाषमात्मनः कार्यं रजोलक्षणं स्वरूपं सत्वरजस्तमसां शरीरमविद्यादात्मकतया च पठति स्त्रीति विद्यादात्मका प्रकाश नि...
माया ... ... एतच्चैषां स्वरूपं मनसो ... सत्वादिगुणानां मेतज्ज्ञानादि सर्वप्राणिव्यापकं लक्षणम् २६॥

तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् प्रशान्तमिव शुद्धाभं सत्वं तदुपधारयेत् २७

तत्रेति तस्मिन्नात्मनि संयतं संवेदनं प्रीतियुक्तं प्रतिस्तमितक्लेशं प्रकाशरूपमनुभवेत् तत्सत्वं जानीयात् २७॥

यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः तद्रजोऽप्रतिपं विद्यात्सततं हारि देहिनां २८

यत्विति यत्पुनः संवेदनं दुःखान्वितमेव मम ... आत्मप्रीतिजनकं सर्वदा च शरीरिणां विषयस्पृहाकारकं तदनिवार्यतया प्रतिपं रजो जानीयात् २८॥

यत्तु स्यान्मोहसंयुक्तमव्यक्तं विषयात्मकं अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् २९॥

यत्विति यत्पुनः सदिवेकं सूक्ष्मं अस्फुटविषयाकारस्वभावमतर्कणीयस्वरूपं मतः करणबहिःकरणाभ्यां दुर्ज्ञानं ततो जानीयात् एतच्च गुणानां स्वरूपकथनं मनसहनवस्थितो यत्नवता भवितव्यमित्येतत्प्रयोजनकम् २९॥

त्रयाणामपि चैतेषां गुणानां यः फलोदयः अग्र्यो मध्यो जघन्यश्च तं प्रवक्ष्याम्यशेषतः ३०

त्रयाणामिति एतेषां सत्वादीनां त्रयाणामपि गुणानां यथाक्रमं उत्तममध्यमाधमरूपो यः फलोत्पादकस्तं निःशेषेण वक्ष्यामि ३०॥

वेदाभ्यासस्तपो ज्ञानं शौचमिंद्रियनिग्रहः धर्मक्रियात्मचिंता च सात्विकं गुणलक्षणं ३१

177A

वेदेति वेदाभ्यासः आत्मज्ञानं प्रायश्चित्तानुष्ठानं शास्त्रार्थावबोधः क्षमा दयादि शौचमिन्द्रियसंयमो दानादिधर्मानुष्ठानमात्मध्यानपरता एतत्सत्त्वाख्यगुणस्य कार्यम् ३१॥

आरंभरुचिताऽधैर्यमसत्कार्यपरिग्रहः विषयोपसेवा चाजस्रं राजसं गुणलक्षणं ३२॥

आरंभेति फलार्थकर्मानुष्ठानशीलता अल्पेप्यर्थे वैक्लव्यं निषिद्धकर्माचरणं अजस्रं शब्दादिविषयोपभोग इत्येद्रजोभिधानगुणस्य कार्यम् ३२॥

लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता याचिष्णुता प्रमादश्च तामसं गुणलक्षणं ३३

लोभ इत्यादि प्रथितकायिकथनं स्पृहा निद्रा पुनः नास्तिक्यं पैशुन्यं परलोकाभाव शुद्धाचारपरिलोपः याचनशीलत्वं सर्वविधधर्मादिषु न वधानं इत्येतत्तामसाभिधानस्य लक्षणम् ३३॥

त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठतां इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणं ३४॥

त्रयाणामपीति एषां सत्त्वादीनां त्रयाणामपि गुणानां त्रिषु कालेषु भूतभविष्यद्वर्तमानेषु विद्यमानानामिदं वक्ष्यमाणं संक्षेपिकं क्रमेण लक्षणं ज्ञातव्यम् ३४॥

यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जति तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणं ३५॥

यदिति यत्कर्म कृत्वा कुर्वन्करिष्यंश्च लज्जावान् भवति कालत्रयेऽपि यस्मिन्नेव विवदितं तत्सर्वं तमःकार्यं तामसाभिधानगुणलक्षणम् शास्त्रविद्या वोद्धव्यम् ३५॥

येनास्मिन्कर्मणा लोके ख्यातिमिच्छति पुष्कलां न च शोचत्यसंपत्तौ तद्विज्ञेयं तु राजसं ३६॥

येनेति इह लोके महतीं ख्यातिं प्राप्नुयामित्येतदर्थमेव यो यत्कर्म करोति न परलोकार्थं न च तत्कर्मफलासंपत्तौ दुःखी भवति तद्राजसःकार्यं राजोगुणानां विज्ञेयम् ३६॥

यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन् येन तुष्यति चात्मास्य तत्सत्त्वगुणलक्षणं ३७॥

यदिति यत्कर्म वेदार्थं सर्वात्मना ज्ञातुमिच्छति यच्च कर्माचरन् कालत्रयेऽपि न लज्जति येन येन कर्मणा स्वात्मतुष्टिर्जायते तत्सत्त्वाख्यगुणस्य लक्षणं ज्ञेयम् ३७॥

तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरं ३८॥

तमस इति कामप्रधानता तमसो लक्षणमर्थनिष्ठता रजसः धर्मप्रधानता सत्त्वस्य एषां च कामादीनां उत्तरोत्तरस्य श्रेष्ठत्वं कामादर्थः प्रधान अर्थं मूलत्वात् कामस्य ताभ्यां धर्मः तन्मूलता नयोः ३८

येन यस्तु गुणेनैषां संसारान्प्रतिपद्यते तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमं ३९॥

येनेत्यादि एषां सत्त्वादीनां गुणानां मध्ये येन गुणेन सह कार्येण यां यां गतिं जीवः प्राप्नोति तान् सर्वस्यास्य जगतः संक्षेपतः क्रमेण वक्ष्यामि ३९॥

देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ४०॥

देवत्वमिति ये सत्त्वगुणावस्थितास्ते देवत्वं यान्ति ये रजोगुणावस्थितास्ते मनुष्यत्वं ये तमोगुणावस्थितास्ते तिर्यक्त्वं इत्येषा त्रिविधा जन्मप्राप्तिः ४०॥

त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः अधमा मध्यमाग्र्या च कर्मविद्याविशेषतः ४१

विविधेति या सत्त्वादिगुणत्रयनिमित्ता त्रिविधा जन्मान्तरप्राप्तिरुक्ता सा देशकालादिभेदेन संसारहेतुभूतकर्मभेदात्तद्भेदाच्चाधममध्यमोत्तमभेदेन पुनस्त्रिविधा बोद्धव्या ४१ ॥

स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः पशवश्च मृगाश्चैव जघन्या तामसी गतिः ४२ ॥

स्थावरा इति स्थावरा वृक्षादयः कृमयः सूक्ष्मप्राणिनः तेभ्य ईषत्स्थूलाः कीटाः तथा मत्स्यसर्पकूर्मपशुमृगा जघन्या इत्येषा तमोनिमित्ता जघन्या गतिः ४२ ॥

हस्तिनश्च तुरंगाश्च शूद्रा म्लेच्छाश्च गर्हिताः सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः ४३ ॥

हस्तिनश्चेति हस्तिअश्वशूद्रम्लेच्छशूद्रा म्लेच्छसिंहव्याघ्रशूकराः तमोगुणनिमित्ता मध्यमा गतिः गर्हिता इति म्लेच्छानां स्वरूपानुवादः ४३ ॥

चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः ४४ ॥

चारणाश्चेति चारणा नटादयः सुपर्णाः पक्षिणः कृत्रिमधर्मकारिणः पुरुषा राक्षसाः पिशाचाश्चेत्येषा तामसीषूत्तमा गतिः ४४ ॥

झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ४५ ॥

झल्ला इति झल्ला मल्लाः क्षत्रियात् व्रात्यात्सवर्णायामुत्पन्ना दशमाध्यायोक्ता ते याः तत्र यष्टिप्रहरणाः मल्ला बाहुयोधिनः रंगावतारका नटाः शस्त्रजीविनः द्यूतपानप्रसक्ताश्च पुरुषा जघन्या राजसी गतिः तथा ४५

राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ४६ ॥

राजान इति राजानोऽभिषिक्ता जनपदेश्वराः तथा क्षत्रिया राजपुरोहिताः शास्त्रार्थकलहप्रियाः सर्वे राजसी गतिर्मध्यमा बोद्धव्या ४६ ॥

गन्धर्वा गुह्यका यक्षा विबुधानुचराश्च ये तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः ४७ ॥

गन्धर्वा इति गन्धर्वगुह्यकयक्षा जातिविशेषाः पुराणादिप्रसिद्धाः ये च देवानुयायिनो विद्याधरादयः अप्सरसश्च देवगणिकाः सर्वा एषा राजसीमध्य उत्तमा गतिः ४७ ॥

तापसा यतयो विप्रा ये च वैमानिका गणाः नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ४८ ॥

तापसा इति वानप्रस्थाभिक्षवो ब्राह्मणाः ये च अप्सरसो व्यतिरिक्ताः पुष्पकादिविमानचारिणो नक्षत्राणि दैत्याश्चेत्येषा सत्त्वनिमित्ता अधमा गतिः ४८ ॥

यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ४९

यज्वान इति यागशीलाः तपस्विनो ऋषयो देवा वेदाभिमानिन्यश्च देवता विग्रहवत्य इतिहासप्रसिद्धाः ज्योतींषि ध्रुवादीनि वत्सरा इतिहासप्रसिद्धविग्रहवन्तः पितरः सोमपादयः साध्याश्च देवयोनिविशेषा इत्येषा सत्त्वनिमित्ता मध्यमा गतिः ४९

ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ५०

ब्रह्मेति चतुर्वदनो विश्वसृजो मरीच्यादयः धर्मो विग्रहवान् महदव्यक्तं च सांख्यप्रसिद्धं तत्त्वद्वयं तदधिष्ठात्री देवताद्वयमिह विवक्षितं तेन गुणत्रयमात्रस्य सात्त्विकगतित्वानुपपत्तेः एतावत्सर्वं सात्त्विकी सत्त्वनिमित्ता उत्तमा गतिः पण्डिता वदन्ति ५०

एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः ५१ ॥

178 A.

पद्य इति प्रथमनो वाक्‌कायस्य प्रत्यंनत्रयभेदेन त्रिः प्रकारस्यैकैकम् । सत्वरजस्तमोभेदेन त्रिविधः पुनः प्रथममध्यमोत्तमभेदेन त्रिविधाः सर्वशरीरगतः सत्वयोगानि विशेषः कार्ये
नोक्तः सर्वभौतिक इत्यभिधीयते । शुक्रप्रसूत्यागतयोद्रष्टव्याः उक्ता गतयः स्वशदपा नाम्नः ५२॥

इंद्रियाणां प्रसंगेन धर्मस्यासेवनेन च पापान्संयांति संसारानविद्वांसो नराधमाः ५२॥

इंद्रियाणामिति इंद्रियाणां विषयेषु प्रसंगेन निषिद्धाचरणेन वेदप्रायश्चित्तादिधर्मानुष्ठानेन च मूलामनुष्यापसदाः कुत्सिता गतीः प्राप्नुवंति ५२॥

यां यां योनिं तु जीवोयं येन येनेह कर्मणा क्रमशो याति लोकेस्मिंस्तत्तत्सर्वं निबोधत ५३॥

यां यामिति अयं जीवो येन येन पापेन कर्मणा इह लोके कृतेन यत्र यत्र जन्म प्राप्नोति तत्तत्सर्वं क्रमेण शृणुत ५३॥

बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षयात् संसारान्प्रतिपद्यंते महापातकिनस्त्विमान् ५४॥

बहूनिति ब्रह्महत्यादिमहापातककारिणो बहून्वर्षसमूहान्भयंकरान्नरकान्प्राप्य तदुपभोगक्षयात्तदुक्तपापशेषेण वक्ष्यमाणान्जन्मविशेषान्प्राप्नुवंति ५४॥

श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणां चंडालपुक्कसानां च ब्रह्महा योनिमृच्छति ५५ श्वेति कुक्कुरशूकरगर्दभउष्ट्रगोछागमेष
मृगपक्षि चंडालानां पुक्कसानां च निषादेन शूद्रायां जातानां संबंधिनीं जातिं ब्रह्महा प्राप्नोति अत्र पापगौरवलाघवापेक्षया क्रमेण सर्वयोनिप्राप्तिर्वाप्यथवा पृथगुत्तरत्रापि ५५

कृमिकीटपतंगानां विड्भुजां चैव पक्षिणां हिंस्राणां चैव सत्वानां सुरापो ब्राह्मणो व्रजेत् ५६

कृमीति कृमिकीटशलभानां पुरीषभक्षाणां पक्षिणां च तिरश्चां कुंभीरादीनां पिशाचादीनां हिंसनशीलानां च व्याघ्रादीनां प्राणिनां जातिं सुरापो ब्राह्मणो गच्छति ५६॥

लूताहिसरटानां च तिरश्चां चांबुचारिणां हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः ५७॥

लूताहीति ऊर्णनाभसर्पकृकलासानां जलचराणां च तिरश्चां कुंभीरादीनां पिशाचादीनां हिंसनशीलानां च योनिं स्वर्णहारी ब्राह्मणः सहस्रवारान्प्राप्नोति ५७॥

तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि क्रूरकर्मकृतां चैव शतशो गुरुतल्पगः ५८ तृणेति तृणानां दूर्वादीनां गुल्मलतानामपक्को
डानां लतानां गुडूच्यादीनां आममांसभक्षिणां गृध्रादीनां दंष्ट्रिणां सिंहादीनां क्रूरकर्मशालिनां वधशीलानां व्याघ्रादीनां जातिं शतवारान्प्राप्नोति गुरुदारगामी ५८॥

हिंस्रा भवंति क्रव्यादाः कृमयोमेध्यभक्षिणः परस्परादिनः स्तेनाः प्रेतांत्यस्त्रीनिषेविणः ५९

हिंस्रा इति ये प्राणिवधशीलास्ते आममांसाशिनो मार्जारादयो भवंति अभक्ष्यभक्षिणो ये ते कृमयो जायंते ये महापातकि व्यतिरिक्तं चौरास्ते परस्परं मांसास्वादिनो भवंति ये चांडालादि
स्त्रीगामिनः ते प्रेताख्याः प्राणिविशेषा जायंते प्रेतांत्यस्त्रीनिषेविण इतिच्छेदः समानत्वात्स्मृतीनामेवं विषयच्छत्रमिविकल्पते इति विषये लोपे च पद्म्यायेलक्ष्विसवर्णे दीर्घः ५९॥

संयोगं पतितैर्गत्वा परस्यैव च योषितं अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ६०

संयोगमिति यावंतं कालं पतितसंयोगे
न पतितो भवति तावंतं कालं ब्रह्मादिभिश्चतुर्भिः सह संसर्गं कृत्वा परेषां च स्त्रियं हृत्वा ब्राह्मणस्वर्णादयद्रव्यं हृत्वा प्रत्येकेन पापकारणेन ब्रह्मराक्षसो भूतविशेषो भवति ६०॥

179

म॰
नु॰ टी॰
१७५

मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः विविधानि च रत्नानि जायते हेमकर्तृषु ६१॥
मणीति मणीन् माणिक्यादीन् मुक्ता विद्रुमांश्च नानाविधानि रत्नानि वैडूर्यहीरकादीनि लोभेन हृत्वा स्वीयमभुद्दिश्य स्वर्णकारयोनौ जायते केचित् हेमकारपक्षिणमाचक्षते ६१॥
धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः मधु दंशः पयः काको रसं श्वा नकुलो घृतं ६२॥
धान्यमिति धान्यमपहृत्य मूषिको भवति कांस्यं हृत्वा हंसः जलं हृत्वा दंशः क्षीरं हृत्वा काकः विशेषेण गुडलवणादि रसं हृत्वा श्वा भवति घृतं हृत्वा नकुलो भवति ६२
मांसं गृध्रो वपां मद्गुस्तैल .... यकः खगः चीरीवाकस्तु लवणं बलाका शकुनिर्दधि ६३॥
मांसमिति मांसं हृत्वा गृध्रश्च भवति वपां हृत्वा मद्गुनामा जलचरः पक्षी भवति तैलं हृत्वा तैलपायिकाख्यः पक्षी लवणं हृत्वा चीरीवाकाख्यः उच्चैःस्वरः कीटः दधि हृत्वा बलाकाख्यः पक्षी जायते ६३
कौशेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडं ६४॥
कौशेयमिति कीटकोषनिर्मितं वस्त्रं हृत्वा तित्तिरिनामा पक्षी भवति क्षौमकृतं वस्त्रं हृत्वा मण्डूकः कार्पासमयं पटं हृत्वा क्रौञ्चाख्यः प्राणी गां हृत्वा गोधा गुडं हृत्वा वाग्गुदनामा हृत्वा प्राणी भवति ६४
छुच्छुन्दरिः शुभान्गन्धान्पत्रशाकं तु बर्हिणः श्वावित्कृतान्नं विविधमकृतान्नं तु शल्यकः ६५ छुच्छुन्दरिरिति शुभगन्धद्रव्याणि कस्तू-
रीादीनि हृत्वा छुच्छुन्दरिरिति वास्तुकादिपत्रशाकं हृत्वा मयूरः सिद्धान्नमोदनमुद्गादिनानाप्रकारकं हृत्वा श्वाविधाख्यः प्राणी अकृतान्नं तु व्रीहियवादिकं हृत्वा शल्यसंज्ञो जायते ६५॥
बको भवति हृत्वाग्निं गृहकारी ह्युपस्करं रक्तानि हृत्वा वासांसि जायते जीवजीवकः ६६॥
बक इति अग्निं हृत्वा बकाख्यः पक्षी जायते गृहोपस्करं मुसलादि हृत्वा भित्त्यादिषु मृत्तिकादिगृहकारी सपक्षः कीटो भवति कुसुम्भादिरक्तानि वासांसि हृत्वा चकोराख्यः पक्षी जायते ६६॥
वृको मृगेभं व्याघ्रोऽश्वं फलमूलं तु मर्कटः स्त्रीमृगः कोककोवारि यानान्युष्ट्रः पशूनजः ६७ वृक इति मृगं हस्तिनं वा हृत्वा वृकाख्यो
हिंस्रपशुर्भवति गोटकं हृत्वा व्याघ्रो भवति स्त्रियं हृत्वा भल्लूको भवति पानार्थमुदकं हृत्वा चातकाख्यः पक्षी यानानि शकटादीनि हृत्वा उष्ट्रो भवति पशून् अजः तेषां गान् हृत्वा छागो भवति ६७॥
यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ६८॥
यद्वेति यत्किंचिदसारमपि परद्रव्यमिच्छतो मानुषो पहृत्य पुरोडाशादिकं तद् हविरहुतं भक्षयित्वा निश्चितं तिर्यक्त्वं प्राप्नोति ६८॥
स्त्रियोऽप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः ६९
स्त्रियोपीति स्त्रियोऽप्येतेन प्रकारेण इच्छातः स्वमपहृत्य पापं प्राप्नुवन्ति तेन पापेन उक्तानां जन्तूनां भार्यात्वं प्रतिपद्यन्ते ६९॥
स्वेभ्यः स्वेभ्यस्तु कर्मभ्यश्च्युता वर्णा ह्यनापदि पापान्संसृत्य संसारान्प्रेष्यतां यान्ति शत्रुषु ७० एवं निषिद्धाचरणफलमभिधाय स्वधर्मत्या-
गक्रियाकरणफलविपाकमाह स्वेभ्य इति ब्राह्मणादयश्चत्वारो वर्णा आपदं विना पञ्चयज्ञादिकर्मत्यागिनो वर्णसमानाः कुत्सितां योनिं प्राप्य ततो जन्मान्तरे शत्रुदासत्वं प्राप्नुवन्ति ७०॥
वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्च्युतः अमेध्यकुणपाशी च क्षत्रियः कटपूतनः ७१॥

वांताशीति ब्राह्मणः स्वकर्मभ्रष्टः उद्गीर्णभुक् ज्वालामुखः प्रेतविशेषो जायते वैश्यः पुनर्नष्टः पृथक् कर्मा पुरीषशवभोजी कटपूतनाख्यः प्रेतविशेषो भवति ७२॥

मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक्। चैलाशकश्च भवति शूद्रो धर्मात्स्वकाच्युतः॥ ७२ मैत्रेति वैश्यो भ्रष्टकर्मा मैत्राक्षज्योतिकना

मा पूयभक्ष्यः प्रेतो जन्मान्तरे भवति मित्रदेवताकत्वान्मैत्रं पायुस्तद्वचनं कर्मेन्द्रियं तत्र ज्योतिर्यस्य स मैत्राक्षज्योतिकः उष्ट्रादयाजिलाज्योतिषः षकारलोपः शूद्रः पुनर्भ्रष्टकर्मा चैलाशकाख्यः

प्रेतो भवति चैलं वस्त्रं तत्स्थं च भिन्नीयूकामश्नातीति चैलाशकः गोविंदस्तु जलचैलाशकाख्यः कीटचेलाशकः प्रेतेत्रत्रदेतच्च भवति साहस्रदशकं प्रेतास्ताख्याणि विशेषप्रकरणात् ७२

यथा यथा निषेवन्ते विषयान्विषयात्मकाः। तथा तथा कुशलता तेषां तेषूपजायते ७३॥

यथेति यथा यथा शब्दादिविषयान्विषयलोलुपा नितांतं सेवंते तथा तथा विषयेषु तेषां प्रावीण्यं भवतीति ७३॥

तेभ्यासात्कर्मणां तेषां पापानामल्पबुद्धयः। संप्राप्नुवंति दुःखानि तासु तास्विह योनिषु ७४॥

तत इति तेल्पधियस्तेषां निवृद्धविषयोपभोगानामभ्यासात्तारतम्येन तास्तासु गर्हितगर्हिततर गर्हिततमासु तिर्यग्गादियोनिषु दुःखमनुभवंति ७४॥

तामिस्रादिषु चोग्रेषु नरकेषु विवर्तनं। असिपत्रवनादीनि बन्धनच्छेदनानि च ७५॥

तामिस्रादिष्विति संप्राप्नुवंतीति सर्वश्लोकस्तमिह तत्र चानुवर्तते तामिस्रादिषु चरत्र्याथ्यायोक्तेषु चोरेषु नरकेषु दुःखानुभवं प्राप्नुवंति तथा असिपत्रवनादीनि बन्धनच्छेदनात्मकानि प्राप्नुवंति ७५॥

विविधाश्चैव संपीडाः काकोलूकैश्च भक्षणं। करंभवालुकातापान्कुंभीपाकांश्च दारुणान् ७६ विविधा इति विविधपीडनं काकादिभिर्भक्ष

णं तप्तवालुकादौ कुंभीपाकादौ च नरकान्दारुणान्प्राप्नुवंति ७६

संभवांश्च वियोनीषु दुःखप्रायासु नित्यशः। शीतातपाभिघातांश्च विविधानि भयानि च ७७

संभवांश्चेति संभवान्तिर्यगादिषु नित्यं दुःखबहुलासूत्पत्तिं प्राप्नुवंति तत्र शीतातपादिपीडनादिनानाप्रकाराणि च प्राप्नुवंति ७७॥

मुहुर्गर्भे वासं जन्म च दारुणं। बन्धनानि च कष्टानि परप्रेष्यत्वमेव च ७८॥

मुहुरिति पुनः पुनर्गर्भस्थाने च वासः समुत्पत्तिं चयोनियन्त्रादिभिर्दुःखावहाउत्पत्तिं वन्ध्यादिभिर्बन्धनादिपीडामनुभवंति परदासत्वं च प्राप्नुवंति ७८॥

बन्धुप्रियवियोगांश्च संवासं चैव दुर्जनैः। द्रव्यार्जनं च नाशं च मित्रामित्रस्य चार्जनं ७९॥

बन्धुप्रियेति बांधवैः सुहृद्भिः सह वियोगान् दुर्जनैश्च सह योगं कष्टावस्थानं धनार्जनप्रयासं धनविनाशं कष्टेन मित्रार्जनं शत्रुप्राडुर्भावं प्राप्नुवंति ७९॥

जरां चैवाप्रतीकारां व्याधिभिश्चोपपीडनं। क्लेशांश्च विविधांस्तांस्तान्मृत्युमेव च दुर्जयं ८०॥

जरामिति जरां चाविद्यमानप्रतीकारां व्याधिभिश्चोपपीडनं क्षुत्पिपासादिनानाप्रकारान् क्लेशान्मृत्युं च दुर्वारं प्राप्नुवंति ८०॥

यादृशेन तु भावेन यद्यत्कर्म निषेवते। तादृशेन शरीरेण तत्तत्फलमुपाश्नुते ८१॥

यादृशेनेति यादृशा चित्तेन सात्विकेन राजसेन तामसेन वा चेतसा यद्यत्कर्म स्नानदानयोगादि अनुतिष्ठते तादृशेनैव शरीरेण सात्विकेन वा ततस्नानादानादि फलमुपभुंक्ते ८१

180

मा. मु. टी. १८०

एष सर्वः समुद्दिष्टः कर्मणां वः फलोदयः नैःश्रेयसकरं कर्म विप्रस्येदं निबोधत ८२॥

एष इति एष युष्माकं विहितप्रतिषिद्धानां कर्मणां सर्वः फलोदय उक्त इदानीं ब्राह्मणस्य नैःश्रेयसाय मोक्षाय हितं कर्म शृणुत ८२॥

वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ८३॥

वेदाभ्यास इति उपनिषदादेर्वेदस्य ग्रन्थतोऽर्थतश्चावर्तनं तपः कृच्छ्रादि ज्ञानं ब्रह्मविषयं इन्द्रियसंयमो हिंसावर्जनं गुरुशुश्रूषेत्येतत्प्रकृष्टं मोक्षसाधनम् ८३॥

सर्वेषामपि चैतेषां शुभानामिह कर्मणाम् किंचिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति ८४॥

सर्वेषामिति सर्वेषामप्येतेषां वेदाभ्यासादीनां शुभकर्मणां मध्ये किंचित्कर्मातिशयेन मोक्षसाधनमिति वितर्के महर्षीणां जिज्ञासाविशेषाद् उत्तरश्लोकेन निर्णयमाह ८४॥

सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ८५

सर्वेषामिति एषां वेदाभ्यासादीनां सर्वेषां मध्य उपनिषदुक्तपरमात्मज्ञानं प्रकृष्टं स्मृतं यस्मात्सर्वविद्यानां प्रधानं यस्मात्ततो मोक्षः प्राप्यते ८५॥

षण्णामेषां तु सर्वेषां कर्मणां प्रेत्य चेह च श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम् ८६॥

षण्णामिति एषां पुनः पूर्वोक्तानां वेदाभ्यासादीनां कर्मणां मध्ये वैदिकं कर्म परमात्मज्ञानं ऐहिकामुष्मिकश्रेयस्करतरं ज्ञातव्यं पूर्वश्लोके मोक्षहेतुत्वेनात्मज्ञानस्योत्कर्ष ऐहिकामुष्मिकश्रेयोहेतुत्वमुच्यते इत्यपौनरुक्त्यं तथा हि प्रतीकोपासनानां समग्रापि नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवतीत्यादिराजसप्रपञ्चः श्रूयते कथं नाम वेदाभ्यासादीनामन्यकर्मणां मध्यात्तस्मात्कर्मोपनिषद्याद्वैदिकं कर्म सर्वदेहलोके परलोके चातिशयेन कीर्तिस्वर्गादिश्रेयःसाधनं ज्ञेयमिति व्याख्यातवान् तदयुक्तम् वेदाभ्यासादीनां षण्णामपि प्रत्यक्षश्रुतिविहितत्वात्तेषां मध्ये स्मार्तापेक्षया किं विश्रुतिनेन सम्भवति तत्तु कथं निवारणीयं तस्मात् यथोक्तैव व्याख्या ८६॥

वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ८७ इदानीमैहिकामुष्मिकश्रेयःसाधनतया सर्वात्मज्ञानस्योत्कर्ष इति वैदिकत्वं कथमित्यत आह वैदिके पुनः कर्मयोगे परमात्मोपासनारूपे सर्वाण्येतानि पूर्वश्लोकोक्तानि ऐहिकामुष्मिकश्रेयांसि तस्मिंस्तस्मिन्नुपासनाविधौ क्रमशः समवतिष्ठन्ते अथवा सर्वाण्येतानि वेदाभ्यासादीन्यत्र परमात्मज्ञानं वेदाभ्यासादीनि तमेतं वेदानुवचनेन विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतिविहितानि अङ्गत्वेनान्तर्भवन्ति ८७॥

सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ८८ सुखेति वैदिकं कर्म ज्योतिष्टोमादि प्रतीकोपासनादि च सुखस्वर्गादिप्रवर्तकमाभ्युदयिकं संसारप्रवृत्तिहेतुत्वात्प्रवृत्ताख्यं वैदिकं कर्म तथा निःश्रेयसं मोक्षस्तदर्थं कर्म नैःश्रेयसिकं संसारनिवृत्तिहेतुत्वान्निवृत्ताख्यमित्येवं वैदिकं कर्म द्विप्रकारकं वेदितव्यं ८८

इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ८९ एतदेव स्पष्टयति इहेति इह काम्यं साधनं वृष्टिहेतुकारीर्यादि अमुत्र स्वर्गादिफलसाधनं ज्योतिष्टोमादि यत्कामनया क्रियते तत्संसारप्रवृत्तिहेतुत्वात्प्रवृत्तमित्युच्यते दृष्टादृष्टफलकामनारहितं पुनर्ब्रह्मज्ञानाभ्यासपूर्वकं संसारनिवृत्तिहेतुत्वान्निवृत्तमित्युच्यते ८९

प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ९० प्रवृत्तमिति प्रवृत्तकर्माभ्यासेन देवसमानगतिर्भवति तत्फलकर्मणा प्राप्नोति पतत्त्वप्रदर्शनार्थं समफलकेन कर्मणा प्रवृत्तेन फलान्तरमपि प्राप्नोतीति निवृत्तकर्माभ्यासेन पुनः शरीरकारणानि पञ्चभूतान्यतिक्रामति मोक्षं प्राप्नोतीत्यर्थः ९०॥

180 A

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ९१ सर्वेति सर्वभूतेषु स्थावरजंगमात्मकेषु देहे
ष्वात्मरूपेणास्थितं सर्वाणि भूतानि परमात्मन्यवस्थितानि समसिद्धानि समं परमात्मनैकत्वेन तद्विस्तारामात्मयेन ज्ञानेनात्मयाजी ब्रह्मार्पणं न्यायेन ज्योतिष्टोमादिकं वर्त्तन् स न राजते प्रकाशते इति स्वराट् ब्रह्म
तस्य भावः स्वाराज्यं ब्रह्मत्वं लभते मोक्षमाप्नोतीत्यर्थः तथा च श्रुतिः सर्वाणि भूतानि आत्मन्येवानुपश्यति सर्वभूतेषु चात्मानं ततो न विजुगुप्सत इति शातातपामीतत्तथा च यजुर्वेदमन्त्रः यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु चात्मानं ततो न विजुगुप्सत ९१॥
यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ९२॥ यथेति शास्त्रचोदितान्यपि अग्निहोत्रादी
नि कर्माणि परित्यज्य ब्रह्मेन्द्रियजयप्रणवोपनिषदादिवेदाभ्यासेषु ब्राह्मणो यत्नं कुर्यात् एतच्च संन्यासे दोषाभावार्थं तत्र अग्निहोत्रादित्यागपरं नैतेषु क्रम ९२॥
एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः। प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा ९३॥
एतदिति यदात्मज्ञानवेदाभ्यासादि द्विजातेर्जन्मसाफल्यापादकत्वात् जन्मनः साफल्यं विशेषेण ब्राह्मणस्य यस्मादेवं तत्प्राप्य द्विजातिः कृतकृत्यो भवति न प्रकारान्तरेण ९३॥
पितृदेवमनुष्याणां वेदश्चक्षुः सनातनं अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ९४ इदानीं देहात्स्वचक्षुर्ज्ञानवामिति प्रदर्शयि
तुं वेदप्रशंसामाह पितृदेवेति पितृदेवमनुष्याणां हव्यकव्यान्नदानेषु वेद एव चक्षुरिव चक्षुः सनातनं नित्यं प्रमाणान्तरानधिगम्यफलकस्यादानादौ प्रमाणं न शक्यं कर्तुं वेदशास्त्रं मनुष्य
कृत्येन नापौरुषेयत्वात् अप्रमेयं च मीमांसादिन्यायनिरपेक्षतया अनवगम्यमानप्रमेयमेवं व्यवस्था तत्र मीमांसया यावत् करणाद्यंगेषु कर्म ब्रह्मात्मकं वेदार्थं जानीयादिति विवक्षित ९४
या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ९५ या वेदबाह्या इति याः स्मृतयो वेदमूला
न भवंति दृष्टार्थं वाक्यानि चैत्यवंदनात् स्वर्गो भवतीत्यादिनियतानि या सर्वकर्मूला देवताप्रवृत्तिनिराकरणात्मकानि वेदविरुद्धानि चार्वाकदर्शनानि सर्वाणि परलोके निष्फलानि यस्मात् तमःफलानि मन्वादिभिः स्मृतानि ९५
उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ९६
एतेभ्यो वेदेभ्यः पृथक् उत्पद्यन्ते इति यान्यतो वेदादन्यमूलानि कानिचित् शास्त्राणि पौरुषेयत्वादुत्पद्यन्ते एव माशु विनश्यन्ति तानि च इदानीन्तनत्वान्निष्फलानि अनृतरूपाणि च स्मृत्यन्तं वेदमूलत्वादेव प्रामाण्य ९६
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति ९७॥ चातुर्वर्ण्यमिति ब्राह्मणाद्यश्चत्वारो वर्णा सीदितादिवेदे
दवान्तर्वर्णा एव प्रसिध्यंति ब्राह्मणो भूतमात्रापित्रजनित्वमपि तद्यजेऽदित्याः स्वर्गादिलोका अपि वेदादेव प्रसिध्यंति किं बहुना यत्किंचिद्वर्त्तते वर्त्तमानं भविष्यच्च तत्सर्वं मन्त्रो प्रस्ताहुतिः सम्यगादित्यमि त्यनेन वेदादेव प्रसिध्यति ९७॥
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पंचमः वेदादेव प्रसूयन्ते प्रसूतिर्गुणकर्मतः ९८॥
शब्द इति इह लोके परलोके च शब्दादयो विषयाः उपभुज्यन्ते प्रसूयन्ते उत्पद्यन्ते इति प्रसूतयः प्रसूतत्वे गुणाश्चेति सत्वरजस्तमोरूपास्तन्निबद्धं वैदिककर्महेतुत्वाद्वेदादेव प्रसिध्यंति ९८॥
बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनं तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनं ९९॥
बिभर्तीति वेदशास्त्रं नित्यं सर्वभूतानि धारयति तथा च ह्यग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति अन्नाद्भूतानामुत्पत्तिः स्थितिश्चेति हवि
र्जायत इति ब्राह्मणं तस्मात् वेदशास्त्रमस्य जन्तोर्वैदिककर्माधिकारिपुरुषस्य प्रकृष्टपुरुषार्थसाधनं जानेति ९९॥
सेनापत्यं च राज्यं च दंडनेतृत्वमेव च सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति १००॥

181

म.

सेनापत्यमिति सेनापत्यं राज्यं दण्डप्रणेतृत्वं सर्वभूम्याधिपत्यं चेत्येतत् सर्वं उक्तप्रयोजनं वेदात्मकशास्त्रज्ञ एवार्हति १००॥

यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् तथा दहति वेदज्ञः कर्मजं दोषमात्मनः १०१॥

यथेति यथा प्रवृद्धोऽग्निरार्द्रानपि द्रुमान् दहति एवं वेदार्थतत्त्वज्ञो वेदज्ञः प्रतिषिद्धाचरणादिकर्मजनितं पापमात्मनो नाशयतीति वचनं केवलं वेदः स्वर्गापवर्गादिहेतुः किं तु दुरितनिवृत्तिहेतुरपि निदर्शितम् १०१

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते १०२॥

वेदशास्त्रार्थेति यस्तत्त्वतो वेदार्थं वक्ति स ब्रह्मात्मकं जानाति स नित्यनैमित्तिककर्मानुष्ठानेन ब्रह्मज्ञानेन च यत्र यत्राश्रमे वसन् स्थितोऽस्मिन्नेव लोके तिष्ठन् ब्रह्मत्वाय कल्पते १०२॥

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः १०३

अज्ञेभ्य इति अज्ञेभ्यः स्वल्पाध्ययनेभ्यः सति समस्ताध्यायिनः श्रेष्ठाः ग्रन्थिभ्यो धारिणः ते समग्रं धारयन्ति ततः श्रेष्ठाः तेभ्योऽर्थज्ञाः तेभ्यो व्यवसायिनः अनुष्ठातारः श्रेष्ठाः

तपो विद्या च विप्रस्य निःश्रेयसकरं परम् तपसा किल्बिषं हन्ति विद्ययामृतमश्नुते १०४

तप इति तपः स्वधर्मवर्तित्वमिति भारतदर्शनात् आश्रमविहितं धर्ममाचरन् ब्राह्मणस्य मोक्षसाधनं तपसा पापं हन्ति ब्रह्मज्ञानेन मोक्षं प्राप्नोति तथा श्रुतिः विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति १०४॥

प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम् त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता १०५॥

प्रत्यक्षमिति धर्मतत्त्वावबोधमिच्छता प्रत्यक्षमनुमानं च पूर्वमीमांसाधर्ममूलं शास्त्रं च वेदमूलं स्मृत्यादिरूपं नानाप्रकारं धर्मस्वरूपविज्ञानाय सुविदितं कर्तव्यं तदेव च प्रमाणत्रयं प्रत्यक्षानुमानाभावः १०५॥

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः १०६

आर्षमिति ऋषिप्रणीतं वेदं धर्मोपदेशं च स्मृत्यादि वेदशास्त्राविरोधिना तर्केण मीमांसादिन्यायेन विचारयति स धर्मं जानाति नत्वमीमांसाचेतनः ... आगमीमांसापर... १०६॥

नैःश्रेयसमिदं कर्म यथोदितमशेषतः मानवस्यास्य शास्त्रस्य रहस्यमुपदिश्यते १०७॥

नैःश्रेयसमिति ... निःश्रेयससाधनं कर्म निःशेषेण यथावदुदितम् ऊर्ध्वं मानवशास्त्रस्य रहस्यं गोपनीयमिदं वक्ष्यमाणं शृणुत १०७॥

अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः १०८

अनाम्नातेष्विति अस्य शास्त्रस्य विशेषतो ... प्रोक्ता धर्मोपदेशाः ... विशेषा अनुपदिष्टाः ... तत्र निश्चितो धर्मः स्यात् १०८॥

धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः १०९॥

धर्मेणेति ब्रह्मचर्यादियुक्तधर्मेण ... सपुराणादिपरिबृंहितो वेदोऽधिगतः ते ब्राह्मणाः श्रुतेः प्रत्यक्षहेतवः श्रुतिं पठित्वा तदर्थप्रदर्शिनस्ते शिष्टा विज्ञेयाः १०९॥

181A

दशावरा वा परिषद्यं धर्मं परि[illegible]कल्पयेत् । त्र्यवरा वापि वृत्तस्था तं धर्मं न विचालयेत् ॥ ११०

तावभवंतितदादशवराश्चवराश्चेतिवदसाणाल्लदमानयस्याः सापरि[illegible]भावेनयोवरायस्याः सावासद्वाचारायंधर्ममनिश्चित्ययावत्तंधर्मंतेनमर्जीकुर्यात्नविसंवदेत् ११० ॥ दशेतियदिवहवःसंनिहि

त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपा[illegible]कः । त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा ॥ १११ ॥

त्रैविद्यइतिवेदत्रयसंवंधिशास्त्रत्रयाध्येताश्रुतिस्मृतिविरुद्धन्यायशा[illegible]मीमांसात्मकतर्कवित् निरुक्तोमानवादिधर्मशास्त्रवेदीब्रह्मचारिगृहस्थवानप्रस्थाइत्येषादशावरापरिष

ऋग्वेदविद्यजुर्विच्च सामवेदवि[illegible]च । त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये ॥ ११२ ॥ तस्मात् १११ ॥

ऋग्वेदविदिति ऋग्यजुःसामवेदशास्त्रानोयेश्चेतारःतदर्थज्ञाश्चत्रयःसाधर्मसंदेहनिरासार्थंत्र्यवरापरिषद्बोद्धव्या ११२ ॥

एकोऽपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः । स विज्ञेयः परो धर्मो नाज्ञानामुदितोऽयुतैः ॥ ११३ ॥

तदभावेप्युक्तोपीतिएकोपिवेदार्थधर्मज्ञोयंधर्मंनिश्चिनुयात्सत्कृष्टोधर्मःसवोद्धव्योनवेदानभिज्ञानादशाभिःसहस्रैरप्युक्तःवेदविच्छब्दोयंवेदार्थधर्मज्ञपरःएतच्चउपलक्षणंस्मृति पुराणमीमांसान्यायशास्त्रज्ञोपिगुरूपरंपरोपदेशविच्च्ज्ञेयःतथाकेवलशास्त्रमात्रसिनकर्तव्योविनिर्णायःयुक्तिहीनविचारेतुधर्महानिःप्रजायतेतेनवृहस्पतिस्तोपियदिसम्यक्श यधितादिधर्मंजानातितदातेनाप्येकेनधर्मउक्तःप्रकृष्टोधर्मोज्ञेयःअतएवयमःसकोद्वावात्रयोवापियद्ब्रूयुर्धर्मपाठकाःसधर्मवितिविज्ञेयोनेतरेषांसहस्रशः ११३ ॥

अव्रतानाममन्त्राणां जातिमात्रोपजीविनां सहस्रशः समेतानां परिषत्त्वं न विद्यते ११४

अव्रतानामितिसावित्र्यादिब्रह्मचारिव्रतरहितानांमंत्रवेदाध्ययनरहितानांब्राह्मजातिमात्रधारिणांवहूनामपिसहस्राणांमिलितानांपरिषत्त्वंनास्तिधर्मनिर्णयसामर्थ्याभावात् ११४

यं वदन्ति तमोभूता मूर्खा धर्ममतद्विदः तत्पापं शतधा भूत्वा तद्वक्तॄननुगच्छति ११५ ॥

यंवदंतीतितमोगुणावहुला मूर्खाः धर्मप्रमाणवेदार्थानभिज्ञाअतएवप्रश्नविषयधर्माविदः प्रायश्चित्तादिधर्मंयंप्रत्यक्षस्तत्पदिर्शंति तदीयंपापंशतगुणंभूत्वावाचकान्वहून्भजते ११५

एतद्वोऽभिहितं सर्वं निःश्रेयसकरं परं अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिं ११६ ॥

एतद्वइति निःश्रेयसमायुक्तप्रकृष्टधर्मादिकंसर्वंयुष्माकमभिहितंएतदनुतिष्ठन् ब्राह्मणादिःपरमांगतिंस्वर्गापवर्गरूपांप्राप्नोति ११६

एवं स भगवान्देवो लोकानां हितकाम्यया धर्मस्य परमं गुह्यं ममेदं सर्वमुक्तवान् ११७ ॥

एवमितिसभगवानेषसर्वादिमंप्रकाशितनादेवमनुरुक्तप्रकारेणइदंसर्वंधर्मस्यपरमार्थंगुह्यमपिशिष्येभ्योगोपनीयंलोकहितेच्छयाममोक्तवानितिभृगुर्महर्षीनाह ११७ ॥

सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः ११८

एवंप्रपंचंदत्यमवंधोणांहितायकर्मप्रतिआत्मज्ञानेप्रकृष्टमोक्षोपकारकतयापृथक्कृत्याहसर्वमितिसद्भावजातमसदभावएतत्सर्वंब्राह्मणोजानन् ब्रह्मस्वरूपमात्मन्य स्थितत्तदालोकमनन्यतमात्माध्यानप्रकर्षेणसाक्षात्कुर्वीत यस्मात्सर्वमात्मनेत्संपश्यन्रागद्वेषाभावात् अधर्मेमनोनकुरुते ११८ ॥

आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितं आत्मा हि जनयत्येषां कर्मयोगं शरीरिणां ११९ ॥

182

म°
टी° मे°
१२

खं संनिवेशयेत्खेषु चेष्टनःस्पर्शनेऽनिलं पंक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्त्तिषु १२० मनसींदुं दिशः श्रोत्रे क्रांते विष्णुं बले हरं वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिं १२१ इदानीं वक्ष्य... ध्यानविशेषोपयोगितया देहिकाकाशादिषु बाह्याकाशादीनां लय... का... प्रजापति... मानसं इतिमनसि... तिबाह्याकाशादीनामुदराशयवच्छिन्न शारीराकाशेषु लीनमेकत्वेन ध्यायेत् तथा ... देहिकवायौ बाह्यवायुं... ... विष्णुं बले हरं वाग्निंद्रिये अग्निं पायुंद्रिये मित्रमुपस्थेंद्रिये प्रजाप... त्मकतेजो देहिकाग्नौ बाह्याग्निं ... पृथिवीं मनसि चंद्रं श्रोत्रे दिशः ... इह कर्मनियमोऽथच कर्मणां फलप्रतिनियतेन तत्सर्वं परमः तिलीनमेकत्वेन भावयेत् एवमाध्यात्मिकभूतादिषु बाह्यभूतादिकलीनत्वेन भावयित्वा ... प्रपंचमहति १२१॥ ... ध्यानेन तथा चतस्य च ... प्रपासनेनागोलस्ये पतितत्था भयादस्याग्निस्तपति भयात्तपति सूर्यः दिक्ष्वां ...

प्रशासितारं सर्वेषामणीयांसमणोरपि रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् १२२

प्रशासितारमिति प्रशासितारं नियंतारं ब्रह्मादिस्तंबपर्यंतस्य चेतनाचेतनस्य जगतो योगमशारीनां मोक्षादिनियमात् ... दित्यादीनां भ्रमणादिविषयमोऽथच कर्मणां फलं प्रतिनियतमेतत्सर्वं वैप रमात्मायीनं तथाचेतस्य वा ... प्रशासने गार्गीत्याद्युपनिषदः तथा भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति तथा ... अणीयांसं सर्वात्मता तयाश्रुतिः वालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः ... सिद्धः रुक्माभं ... स्वप्नसमधीगम्यं ... उपनिषत्सु ... तद्धीयेति परमेश्वरोपासनादिप्रोक्तस्य ... गृह्यते सूक्ष्मदर्शिभिः एवंविधं परमात्मानमनुचिंतयेत् १२२॥ नोमाद्यन्तं ... मनसात्मप्रसन्नेन गृह्यते सूक्ष्मदर्शिभिः एवंविधं परमात्मानमनुचिंतयेत् १२२॥

एतमेके वदंत्यग्निं मनुमन्ये प्रजापतिं इंद्रमेके परे प्राणमपरे ब्रह्म शाश्वतं १२३ एतमिति एतं च परमात्मानं अश्मित्वेन एके याज्ञिका उ पासते ते मेकमग्निमुपासते ... मनुं ... प्रजापतिरूपतया उपासते ... अपरे ... इंद्ररूपतया उपासते सर्वाणि ह वा इमानि भूतानि प्राणमेवा भिसंविशंति ... सच्चिदानंदरूपं परमात्मानमपाश्रुते मूर्त्तामूर्त्तस्वरूपं च ब्रह्माणि सर्वाण्येवोपासते श्रुतिप्रसिद्धाः भवंति १२३

एष सर्वाणि भूतानि पंचभिर्व्याप्य मूर्त्तिभिः जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् १२४॥ एषइति एष आत्मा सर्वान् प्राणिनः पंचभिः पृथिव्यादिभिर्महाभूतैः शरीरारंभकैः परिगृह्य सर्वं जन्मार्जितपेक्षया उत्पत्तिस्थितिविनाशै रथादिचक्रवत् ... कर्मानुसारेण ... संसारिणः करोति १२४॥

एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना स सर्वसमतामेत्य ब्रह्माभ्येति परं पदं १२५।

इदानीमात्मज्ञानेनोक्तं सर्वधर्मश्रेष्ठतया सर्वं च परमात्मदर्शनमनुष्ठेयत्वेनोपसंहरति एवं यः सर्वभूतेष्विति एवं सर्वभूतेषु व्याप्यात्मानं ... सर्वेषु भूतेषु च व्यवस्थितं आत्मानमात्मना पश्यति ... ब्रह्मसाक्षात्कारात् परं श्रेष्ठपदं ब्रह्म प्राप्नोतिति ... ब्रह्मणि लीयते मुक्तो भवतीत्यर्थः १२५॥

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन्द्विजः भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिं १२६ इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां द्वादशोऽध्यायः १२॥ समाप्तमिदं शुभमस्तु।

इत्येतदिति समाप्त्यर्थ इतिशब्दः एतत्समस्तं शास्त्रं भृगुणा प्रोक्तं मानवं पठन् द्विजातिः पठन् विहितानुष्ठाननिषिद्धवर्जनाचारवान्नित्यं भवति यथापेक्षितां च स्वर्गापवर्गादिरूपां गतिं प्राप्नुयादिति १२६॥ ॥

नानामारवचः प्रपंचन याति येसात्र यीलोकं वस्त्र[illegible]मलवच[illegible]ज्ञो विदग्धाजगेत ग्रंथेस्मिन्परणीयरस्य बहुधाः स्तनैनमेतावता सष्टातानवनतनये
मविलंबकंकृतीयेश्च[illegible]याभिर्निर्भिद्यते कथयन्येषा[illegible]स्मतेरथम[illegible]भिर्यथसहस्रैः ममयातश्चनैः सूक्ता हृति ३ मेयंमया मानवधर्मशास्त्रविषायहेति[illegible]
डुषाहिताय डुषीतज्ञा[illegible]याय भूयात्तेनो जगतामधीशः ३॥ [illegible]द्रनावासीय भट्टदिवात्मजश्री उल्लूकभट्ट विरचितायां मन्वर्थमुक्तावल्यामष्टमो द्वादशो
ध्यायः १२ [illegible]मन्वर्थमुक्तावल्याम् ॥ शुभम् ॥

183 folio.

347-MS.

सं. १९३३ श्रावणशुक्लासप्तम्यां गुरौ ४५।१८ चित्रा ४५।४. सि
०५।४. कर्कार्कगत १४ दिनमान ३०।११. इष्टं १५।४६ तुलो
दये वर्षप्रवेशः २९।७।२८

वर्षल.

वर्षेशादि च.

जन्मल. पति चं

वर्षल. पति शु

मुंथापति मंगल

त्रिराशिपति श्रु

दिनपति चंद्रः

वर्षेशः शुक्रः

दशाचक्रं

रा.	गु	श	बु	के	शु.	सू.	चं	मं
०।१ २४	०।१ १८	०।१ २७	०।१ २१	०।० २२	०।२ ०।०	०।१ १८	०।१ ०।०	०।० २७
१९३३					१९३४			१९३४
०।५ ०।८	०।६ २६	०।८ २३	१० १४	११ ०।४	१ ५	१ २३	२ २३	०।३ १४

कार्त्तिक शुक्ल त्रयोदश्यां
बुधवासरे इष्टं २।।२५।।२
वृश्चिक लग्नोदये वर्ष
प्रवेशे १८।। गता २७